A.C. Joshi Library
P.U. Chandigarh

MSS No. 457 Subject Gita

Name of MSS Bhagwad Geeta Shankar Bhashay

Author

Period Folios 547

Script Devnagiri Source P.P.S. Jaura, Jalandhar

Missing Folios

॥ गी॰ ॥
॥ १ ॥

ॐ श्रीगणेशाय नमः ॥ ॐ नमो गौरीश्वराय ॥ ॐ श्रीउद्धवे नमः ॥ धृतराष्ट्र उवाच ॥
धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः ॥ मामकाः पांडवाश्चैव किमकुर्वत संजय ॥ १ ॥ सं
जय उवाच ॥ दृष्ट्वा तु पांडवानीकं व्यूढं दुर्योधनस्तदा आचार्यमुपसंगम्य राजा व
चनमब्रवीत् ॥ २ ॥ दुर्योधन उवाच ॥ पश्यैतां पांडुपुत्राणामाचार्य महतीं चमूं ॥ व्यू
ढां द्रुपदपुत्रेण तव शिष्येण धीमता ॥ ३ ॥ अत्र शूरा महेष्वासा भीमार्जुनसमा युधि ॥
युयुधानो विराटश्च द्रुपदश्च महारथः ॥ ४ ॥ धृष्टकेतुश्चेकितानः काशिराजश्च वीर्यवा
न् ॥ सौभद्रो द्रौपदेयाश्च सर्व एव महारथाः ॥ पुरुजित्कुंतिभोजश्च शैब्यश्च नरपुंगवः
प ॥ युधामन्युश्च विक्रांत उत्तमौजाश्च वीर्यवान् ॥ अस्माकं तु विशिष्टा ये तान्निबोध द्विजो
त्तम ॥ नायका मम सैन्यस्य संज्ञार्थं तान्ब्रवीमि ते ॥ ७ ॥ भवान्भीष्मश्च कर्णश्च कृपश्च ।
समितिंजयः ॥ अश्वत्थामा विकर्णश्च सौमदत्तिश्च वीर्यवान् ॥ ८ ॥ अन्ये च बहवः शूरा म
दर्थे त्यक्तजीविताः ॥ नानाशस्त्रप्रहरणाः सर्वे युद्धविशारदाः ॥ ९ ॥ अपर्याप्तं तदस्माकं
बलं भीष्माभिरक्षितं ॥ पर्याप्तं त्विदमेतेषां बलं भीमाभिरक्षितं ॥ १० ॥ अयनेषु च सर्वेषु यथा



457

भागमवस्थिताः॥भीष्ममेवाभिरक्षंतुभवंतःसर्वएवहि॥११॥संजय उवाच॥तस्यसंज
नयन्हर्षंकुरुवृद्धःपितामहः॥सिंहनादंविनद्योच्चैःशंखंदध्मौप्रतापवान्॥१२॥ततः
शंखाश्चभेर्यश्चपणवानकगोमुखाः॥सहसैवाभ्यहन्यंतसशब्दस्तुमुलोभवत्॥
१३॥ततःश्वेतैर्हयैर्युक्तेमहतिस्यंदनेस्थितौ॥माधवःपांडवश्चैवदिव्यौशंखौप्रदध्म
तुः॥१४॥पांचजन्यंहृषीकेशोदेवदत्तंधनंजयः॥पौंड्रंदध्मौमहाशंखंभीमकर्मा
वृकोदरः॥१५॥अनंतविजयंराजाकुंतीपुत्रोयुधिष्ठिरः॥नकुलःसहदेवश्चसुघोषम
णिपुष्पकौ॥१६॥काश्यश्चपरमेष्वासःशिखंडीचमहारथः॥धृष्टद्युम्नोविराटश्चसा
त्यकिश्चापराजितः॥१७॥द्रुपदोद्रौपदेयाश्चसर्वशःपृथिवीपते॥सौभद्रश्चमहाबाहुः
शंखान्दध्मुःपृथक्पृथक्॥१८॥सघोषोधार्तराष्ट्राणांहृदयानिव्यदारयत्॥नभश्च
पृथिवींचैवतुमुलोव्यनुनादयन्॥१९॥अथव्यवस्थितान्दृष्ट्वाधार्तराष्ट्रान्कपिध्व
जः॥प्रवृत्तेशस्त्रसंपातेधनुरुद्यम्यपांडवः॥२०॥हृषीकेशंतदावाक्यमिदमाहमही
पते॥सेनयोरुभयोर्मध्येरथंस्थापयमेच्युत॥२१॥यावदेतान्निरीक्षेहंयोद्धुकामानवस्थि

तान् ॥ कैर्मया सह योद्धव्यमस्मिन्रणसमुद्यमे ॥ २२ ॥ योत्स्यमानानवेक्षेहं य एतेत्र समागताः
धार्तराष्ट्रस्य दुर्बुद्धेर्युद्धे प्रियचिकीर्षवः ॥ २३ ॥ संजय उवाच ॥ एवमुक्तो हृषीकेशो गुडाकेशेन भा
रत ॥ सेनयोरुभयोर्मध्ये स्थापयित्वा रथोत्तमं ॥ २४ ॥ भीष्मद्रोणप्रमुखतः सर्वेषां च मही
क्षितां ॥ उवाच पार्थ पश्यैतान्समवेतान्कुरूनिति ॥ २५ ॥ तत्रापश्यत्स्थितान्पार्थः पितॄन
थ पितामहान् ॥ आचार्यान्मातुलान्भ्रातॄन्पुत्रान्पौत्रान्सखींस्तथा ॥ २६ ॥ श्वशुरान्सुहृद
श्चैव सेनयोरुभयोरपि ॥ तान्समीक्ष्य स कौंतेयः सर्वान्बंधूनवस्थितान् ॥ २७ ॥ कृपया प
रयाविष्टो विषीदन्निदमब्रवीत् ॥ अर्जुन उवाच ॥ दृष्ट्वेमं स्वजनं कृष्ण युयुत्सुं समुपस्थि
तं ॥ २८ ॥ सीदंति मम गात्राणि मुखं च परिशुष्यति ॥ वेपथुश्च शरीरे मे रोमहर्षश्च जायते ॥ २९ ॥
गांडीवं स्रंसते हस्तात्त्वक्चैव परिदह्यते ॥ न च शक्नोम्यवस्थातुं भ्रमतीव च मे मनः ॥ ३० ॥ निमि
त्तानि च पश्यामि विपरीतानि केशव ॥ न च श्रेयोनुपश्यामि हत्वा स्वजनमाहवे ॥ ३१ ॥ न कां
क्षे विजयं कृष्ण न च राज्यं सुखानि च ॥ किं नो राज्येन गोविंद किं भोगैर्जीवितेन वा ॥ ३२ ॥ येषाम
र्थे कांक्षितं नो राज्यं भोगाः सुखानि च ॥ त इमेवस्थिता युद्धे प्राणांस्त्यक्त्वा धनानि च ॥ ३३ ॥ आ

4

चार्य्याः पितरः पुत्रास्तथैव च पितामहाः ॥३४॥ मातुलाः श्वसुराः पौत्राः श्यालाः संबंधिनस्तथा

॥ एतान्न हंतुमिच्छामि घ्नतोपि मधुसूदन ॥३५॥ अपि त्रैलोक्यराज्यस्य हेतोः किं नु महीकृ

ते ॥ निहत्य धार्त्तराष्ट्रान्नः का प्रीतिः स्याज्जनार्दन ॥३६॥ पापमेवाश्रयेदस्मान् हत्वैतानाता

तायिनः ॥ तस्मान्नार्हा वयं हंतुं धार्त्तराष्ट्रान्सबांधवान् ॥३७॥ स्वजनं हि कथं हत्वा सुखिनः

स्याम माधव ॥ यद्यप्येते न पश्यंति लोभोपहतचेतसः ॥३८॥ कुलक्षयकृतं दोषं मित्रद्रो

हे च पातकं ॥ कथं न ज्ञेयमस्माभिः पापादस्मान्निवर्तितुं ॥३९॥ कुलक्षयकृतं दोषं प्रपश्यद्भि

र्जनार्दन ॥ कुलक्षये प्रणश्यंति कुलधर्माः सनातनाः ॥४०॥ धर्मे नष्टे कुलं कृत्स्नमधर्मोभि

भवत्युत ॥ अधर्माभिभवात्कृष्ण प्रदुष्यंति कुलस्त्रियः ॥४१॥ स्त्रीषु दुष्टासु वार्ष्णेय जायते व

र्णसंकरः ॥ संकरो नरकायैव कुलघ्नानां कुलस्य च ॥ पतंति पितरो ह्येषां लुप्तपिंडोदकक्रि

याः ॥ दोषैरेतैः कुलघ्नानां वर्णसंकरकारकैः ॥४३॥ उत्साद्यंते जातिधर्माः कुलधर्माश्च शा

श्वताः ॥ उत्सन्नकुलधर्माणां मनुष्याणां जनार्दन ॥४४॥ नरके नियतं वासो भवतीत्यनु

शुश्रुम ॥ अहो बत महत्पापं कर्त्तुं व्यवसिता वयं ॥४५॥ यद्राज्यसुखलोभेन हंतुं स्वजनमु

यतां॥ यदिमामप्रतीकारमशस्त्रंशस्त्रपाणयः॥४५॥ धार्तराष्ट्रारणेहन्युस्तन्मेक्षेमतरंभ
वेत्॥ संजय उवाच॥ एवमुक्त्वार्जुनःसंख्येरथोपस्थउपाविशत्॥ विसृज्यसशरंचापंशो
कसंविग्नमानसः॥४६॥ इतिश्रीभग॰ वद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृ
ष्णार्जुनसंवादेअर्जुनविषादोनामप्रथमोऽध्यायः॥१॥ संजय उवाच॥ तंतथाकृपयावि
ष्टमश्रुपूर्णाकुलेक्षणं॥ विषीदंतमिदंवाक्यमुवाचमधुसूदनः॥१॥ श्रीभग॰ वानुवाच
कुतस्त्वाकश्मलमिदंविषमेसमुपस्थितं॥ अनार्यजुष्टमस्वर्ग्यमकीर्तिकरमर्जु
न॥२॥ क्लैब्यंमास्मगमःपार्थनैतत्त्वय्युपपद्यते॥ क्षुद्रंहृदयदौर्बल्यंत्यक्त्वोत्तिष्ठपरंतप
॥३॥ अर्जुन उवाच॥ कथंभीष्ममहंसंख्येद्रोणंचमधुसूदन॥ इषुभिःप्रतियोत्स्यामिपू
जार्हावरिसूदन॥४॥ गुरूनहत्वाहिमहानुभावान्श्रेयोभोक्तुंभैक्ष्यमपीहलोके॥ ह
त्वार्थकामांस्तुगुरूनिहैवभुंजीयभोगान्रुधिरप्रदिग्धान्॥५॥ नचैतद्विद्मःकतर
न्नोगरीयोयद्वाजयेमयदिवानोजयेयुः॥ यानेवहत्वानजिजीविषामस्तेऽवस्थिताःप्र
मुखेधार्तराष्ट्राः॥६॥ कार्पण्यदोषोपहतस्वभावःपृच्छामित्वांधर्मसंमूढचेताः॥

6 यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे शिष्यस्तेहं शाधि मां त्वां प्रपन्नं ॥७॥ न हि प्रपश्या
मि ममापनुद्याद्यच्छोकमुच्छोषणमिंद्रियाणां ॥ अवाप्य भूमावसपत्नमृद्धं
राज्यं सुराणामपि चाधिपत्यं ॥८॥ संजय उवाच ॥ एवमुक्त्वा हृषीकेशं गुडा
केशः परंतप ॥ न योत्स्य इति गोविंदमुक्त्वा तूष्णीं बभूव ह ॥९॥ तमुवाच हृ
षीकेशः प्रहसन्निव भारत ॥ सेनयोरुभयोर्मध्ये विषीदंतमिदं वचः ॥१०॥

वा१

गी॰भा॰ ॥२॥ ७ ॐ श्री गणेशाय नमः॥ ॐ नमो गौरीश्वराय॥ ॐ श्री गुरवे नमः॥ स भगवान्सृष्ट्वेदं जगत्त
स्य च स्थितिं चिकीर्षुर्म्मरीच्यादीनग्रे सृष्ट्वा प्रजापतीन्॥ प्रवृत्तिलक्षणं धर्म्मं ग्राहयामा
स वेदोक्तं॥ ततोन्यांश्च सनकसनंदनादीनुत्पाद्य निवृत्तिधर्म्मं ज्ञानवैराग्यलक्षणं ग्राहया
मास द्विविधो हि वेदोक्तो धर्म्मः॥ प्रवृत्तिलक्षणो निवृत्तिलक्षणश्च जगतः स्थि

श्री गणेशाय नमः॥ नारायणः परोव्यक्तादंडमव्य
क्तसंभवं॥ अंडस्यांतस्त्विमे लोकाः सप्तद्वीपा च मेदिनी॥१॥

तिकारणं॥ प्राणिनां साक्षादभ्युदयनिःश्रेयसहेतुर्यः स धर्मो ब्राह्मणाद्यैर्वर्णिभिराश्रमिभि
श्चानुष्ठीयमानो दीर्घेण कालेनानुष्ठातॄणां कामोद्भवाद्धीयमानविवेकज्ञानहेतुके
नाधर्म्मेणाभिभूयमाने धर्म्मे विवर्द्धमाने चाधर्मे जगतः स्थितिं परिपालयिषुः स आ ॥१॥
दिकर्ता नारायणाख्यो विष्णुर्भौमस्य ब्रह्मणो ब्राह्मणत्वस्य रक्षणार्थं देवक्यां वसुदे

8

वादंशेनकृष्णःकिलसंबभूव॥ब्राह्मणत्वस्यहिरक्षणेनरक्षितःस्याद्वैदिकोधर्मस्तदधीनत्वा
द्वर्णाश्रमभेदानां॥सचभगवान्॥ज्ञानैश्वर्यशक्तिबलवीर्यतेजोभिःसदासंपन्नस्त्रिगुणा
त्मिकांवैष्णवींस्वांमायांमूलप्रकृतिंवशीकृत्याजोऽव्ययोभूतानामीश्वरोनित्यशुद्धबु
द्धमुक्तस्वभावोऽपिसन्॥स्वमाययादेहवानिवजातइवचलोकानुग्रहंकुर्वन्नलक्ष्यते॥
स्वप्रयोजनाभावेऽपिभूतानुजिघृक्षयावैदिकंधर्मद्वयमर्जुनायशोकमोहमहोदधौनि
मग्नायोपदिदेश॥गुणाधिकैर्हिगृहीतोनुष्ठीयमानश्चधर्मःप्रचयंगमिष्यतीति॥तं
धर्मंभगवतायथोपदिष्टंभगवान्वेदव्यासः॥सर्वज्ञोगीताख्यैःसप्तभिःश्लोकशतैरुपनि
बबंध॥तदिदंगीताशास्त्रंसमस्तवेदार्थसारसंग्रहभूतंदुर्विज्ञेयार्थंतदर्थाविःकरणा
यानेकैर्विवृतपदपदार्थवाक्यार्थन्यायमप्यत्यन्तविरुद्धानेकार्थत्वेनलौकिकैर्गृह्य
माणमुपलभ्याहंविवेकतोर्थनिर्धारणार्थंसंक्षेपतःविवरणंकरिष्यामि॥तस्यास्यगीता
शास्त्रस्यसंक्षेपतःप्रयोजनंपरंनिःश्रेयसंसहेतुकस्यसंसारस्यात्यन्तोपरमलक्षणं॥तच्च
सर्वकर्मसंन्यासपूर्वकादात्मज्ञाननिष्ठारूपाद्धर्माद्भवति॥तथेममेवगीतार्थंधर्ममुद्दि

एवंभगवतैवोक्तं॥ सहिधर्मः सुपर्याप्तोब्रह्मणः पदवेदनइत्यनुगीतासु॥ किंचान्यदपितत्रै
वोक्तंनैवधर्मीनचाधर्मीनचैवहिशुभाशुभी॥ यः स्यादेकासनेलीनस्तूष्णींकिंचिदचिंतय
न्॥ ज्ञानंसंन्यासलक्षणमितिच॥ इहापिचांतेउक्तमर्जुनाय॥ सर्वधर्मान्परित्यज्यमामेकं १५४
शरणंव्रजेति॥ अभ्युदयार्थोपिप्रवृत्तिलक्षणोधर्मोवर्णानाश्रमांश्चोद्दिश्यविहितः॥ सचदेवा
दिस्थानप्राप्तिहेतुरपिसन्नीश्वरार्पणबुद्ध्यानुष्ठीयमानः फलाभिसंधिवर्जितः॥ सत्व
शुद्धयेभवति॥ शुद्धसत्वस्यचज्ञाननिष्ठायोग्यताप्राप्तिद्वारेणज्ञानोत्पत्तिहेतुत्वेनच।
निःश्रेयसहेतुत्वमपिप्रतिपद्यते॥ तथाचेममर्थमभिसंधायवक्ष्यति॥ ब्रह्मण्याधायक
र्माणियतचित्ताः जितेंद्रियाः योगिनः कर्मकुर्वंतिसंगंत्यक्त्वात्मशुद्धयइति॥ इमंद्वि:॥
प्रकारंधर्मंनिःश्रेयसप्रयोजनंपरमार्थतत्वंच॥ वासुदेवाख्यंपरंब्रह्माभिधेयभूतंविशे
षतोऽभिव्यंजयत्॥ विशिष्टप्रयोजनसंबंधाभिधेयवत्॥ गीताशास्त्रं॥ यतस्तदर्थविज्ञाने
समस्तपुरुषार्थसिद्धिरित्यतस्तद्विवरणेयत्नः क्रियते॥ अत्रच॥ दृष्ट्वातुपांडवानीक। २
मित्यारभ्यनयोत्स्यइतिगोविंदमुक्त्वातूष्णींबभूवहेत्येतदंतः प्राणिनांशोकमोहादि।

10

संसारबीजभूतदोषोद्भवकारणप्रदर्शनार्थत्वेन व्याख्येयो ग्रंथः॥ तथाह्यर्जुनेन राज्यगु
रुपुत्रमित्रसुहृत्स्वजनसंबंधिबांधवेषु अहमेषां ममैते इत्येवंभ्रांतिप्रत्ययनिमित्तस्नेह
विछेदादिनिमित्तावात्मनः॥ शोकमोहौ प्रदर्शितौ॥ कथं भीष्ममहं संख्ये इत्यादिना॥ शोक
मोहाभ्यां ह्यभिभूतविवेकविज्ञानः स्वत एव क्षत्रधर्मे युद्धे प्रवृत्तोपि तस्माद्युद्धादुपरराम
परधर्मं च भिक्षाजीवनादिकं कर्तुं प्रववृते॥ तथा च सर्वप्राणिनां शोकमोहादिदोषाविष्टचे
तसां स्वभावत एव स्वधर्मपरित्यागः॥ प्रतिषिद्धसेवा च स्यात्॥ स्वधर्मे प्रवृत्तानामपि तेषां
वाङ्मनःकायादीनां प्रवृत्तिः फलाभिसंधिपूर्विकैव साहंकारा च भवति॥ तत्रैवं सति धर्माध
र्मोपचयादिष्टानिष्टजन्ममरणसुखदुःखादिसंप्राप्तिलक्षणः संसारोऽनुपरतो भवति।
इत्यतः संसारबीजभूतौ शोकमोहौ तयोश्च सर्वकर्मसंन्यासादात्मज्ञानान्नान्यतो निवृत्तिरिति।
तदुपदिदिक्षुः सर्वलोकानुग्रहार्थं अर्जुनं निमित्तीकृत्याह भगवान्॥ वासुदेवोऽशोच्या
नित्यादि॥ अत्र केचिदाहुः॥ सर्वकर्मसंन्यासपूर्वकादात्मज्ञाननिष्ठामात्रादेव केवलात्कै
वल्यं न प्राप्यत एव॥ किं तर्हि अग्निहोत्रादिश्रौतस्मार्तकर्मसहितात्॥ ज्ञानात्॥ कैवल्य

गी॰भा॰
३

प्राप्नोतीति ॥ तस्मात्तु गीताशास्त्रनिश्चितोऽर्थ इति ॥ ज्ञापकं चाह्वरस्यार्थस्य ॥ अथ चेत्त्वमिमं धर्म्यं संग्रामं
न करिष्यसि ॥ ततः स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसि ॥ कर्मण्येवाधिकारस्ते इत्युक्तकर्मैव
तस्मात्त्वमित्यादिहिंसादियुक्तत्वात् ॥ वैदिकं कर्माधर्मायेति शंका न कर्तव्या ॥ कथं तर्हि क।
र्मयुद्धलक्षणं गुरुभ्रातृपुत्रादिहिंसालक्षणमत्यन्तक्रूरमपि स्वधर्म इति कृत्वा नाधर्मा
य ॥ तदकरणे च ततः स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसीति ब्रुवता नारायणेन यावा।
ज्जीवादिश्रुतिचोदितानां स्वकर्मणां पश्वादिहिंसालक्षणानां च कर्मणां प्रागेव नाधर्म।
त्वमिति निश्चितमुक्तं भवतीति तदसत् ॥ ज्ञानकर्मनिष्ठयोर्विभागवचनाद्बुद्धिद्वया।
श्रयोश्च अशोच्यानित्यादिना भगवता यावत् ॥ स्वधर्ममपि चावेक्ष्येत्यन्तेन ग्रंथे
न यत्परमार्थात्मतत्त्वनिरूपणं कृतं तत्सांख्यं ॥ तद्विषया बुद्धिरात्मनो जन्मादिषड्वि।
क्रियाभावादकर्तात्मेति ॥ प्रकरणार्थनिरूपणाद्या जायते बुद्धिः सा येषां ज्ञानिनां उचिता
भवति ते सांख्याः ॥ एतस्या बुद्धेर्जन्मनः प्रागात्मनो देहादिव्यतिरिक्तकर्तृत्वभोक्तृत्वापे। ३
क्षो धर्माधर्मविवेकपूर्वको मोक्षसाधनानुष्ठाननिरूपणलक्षणो योगः ॥ तद्विषया बुद्धि

12

योगेबुद्धिःसायेषांकर्म्मिणामनुचिंताभवतितेयोगिनः॥तथाचभगवताविभक्तेद्वेबु
द्धीनिर्दिष्टेएषातेभिहितासांख्येबुद्धिर्योगेत्विमांशृणुइति॥तयोश्चसांख्यबुद्ध्याश्रयां।
ज्ञानयोगेननिष्ठांविभक्तांवक्ष्यति॥पुरावेदात्मनामयाप्रोक्तेति॥तथाचयोगबुद्ध्या
श्रयांकर्मयोगेननिष्ठांविभक्तांवक्ष्यति॥कर्मयोगेनयोगिनामित्येवंसांख्यबुद्धिंयो
गबुद्धिंचाश्रित्यद्वेनिष्ठेविभक्तेभगवतैवोक्ते॥ज्ञानकर्मणोःकर्तृत्वाकर्तृत्वैकत्वा।
नेकत्वबुद्ध्याश्रययोरेकपुरुषाश्रयत्वासंभवंपश्यता॥यथैतद्विभागवचनंतथैवद
र्शितं॥शातपथीयेब्राह्मणे॥एतमेवप्रव्राजिनोलोकमिच्छंतोब्राह्मणाः॥प्रव्रजंती।
ति॥सर्वकर्मसंन्यासंविधायतच्छेषेण॥किंप्रजयाकरिष्यामोयेषांनोयमात्मायंलो
कइति॥तत्रचप्राक्दारपरिग्रहात्॥पुरुषआत्माप्राकृतोधर्मजिज्ञासोत्तरकालंलो
कत्रयसाधनंपुत्रंद्विःप्रकारंचवित्तंमानुषंदैवंचतत्रमानुषंवित्तंकर्मरूपंपितृ।
लोकप्राप्तिसाधनंविद्याचदैवंवित्तंदेवलोकप्राप्तिसाधनंसोकामयतेत्यविद्याका
मवतएवसर्वाणिकर्माणिस्मार्तानिश्रौतानिदर्शितानितेभ्योव्युत्थायप्रव्रजंतीति

गी·भा·
४
13

मुत्थानमात्मानमेवलोकमिछंतोऽकामस्यविहितं॥तदेतद्धिभागवचनमनुपपन्नंस्या
द्यदिश्रौतकर्मज्ञानयोःसमुच्चयोऽभिप्रेतःस्यात्॥नचार्जुनस्यप्रश्नउपपन्नःज्यायसीचेत्क
र्मणस्तेइत्यादि॥एकपुरुषानुष्ठेयत्वाऽसंभवंबुद्धिकर्मणोर्भगवतापूर्वमनुक्तंकथम
र्जुनोऽश्रुतंबुद्धेश्चकर्मणोज्यायस्त्वंभगवत्यध्यारोपयेत्॥मृषैवज्यायसीचेत्कर्मण
स्तेमताबुद्धिरिति॥किंचयदिबुद्धिकर्मणोःसर्वेषांसमुच्चयउक्तःस्यादर्जुनस्यापि
सउक्तएवेति॥यच्छ्रेयएतयोरेकंतन्मेब्रूहिसुनिश्चितमितिकथमुभयोपदेशेसत्यन्य
तरविषयएवप्रश्नःस्यान्नहिपित्तप्रशमार्थिनावैद्येनमधुरंशीतंचभोक्तव्यमित्युपदि
ति५ ष्टेएतयोरन्यतरत्पित्तप्रशमकारणंब्रूहीतिप्रश्नोभवेदथार्जुनस्यभगवदुक्तार्थाविवे
कानवधारणनिमित्तःप्रश्नःकल्प्येत॥तथापिभगवताप्रश्नानुरूपंप्रतिवचनंदेयम्म
याबुद्धिकर्मणोःसमुच्चयउक्तः॥किमर्थमित्थंत्वंभ्रांतोसीतिनपुनःप्रतिवचनम्।
ननुरूपंपृष्टादन्यदेवद्वेनिष्ठेमयापुराप्रोक्तेइतिवक्तुंयुक्तं॥नापिस्मार्तेनैवकर्म ४
णाबुद्धेःसमुच्चयेऽभिप्रेतेविभागवचनादिसर्वमनुपपन्नं॥किंच॥क्षत्रियस्ययुद्धंस्मा

14

तं स्वधर्म्ममिति जानतस्तत्किं कर्म्मणि घोरे मां नियोजयसीत्युपालंभोनुपपन्नस्तस्माद्गी।
ताशास्त्रे ईषन्मात्रेणापि श्रौतेन स्मार्त्तेन वा कर्म्मणा ज्ञानस्य समुच्चयो न केन चिद्दर्श
यितुं शक्यः॥ यस्य त्वज्ञानाद्रागादिदोषतो वा॥ कर्म्मणि प्रवृत्तस्य यज्ञेन दानेन तपसा वा
विशुद्धसत्वस्य ज्ञानमुत्पन्नं परमार्थतत्वविषयमेकमेवेदं सर्वं ब्रह्माकर्त्तृ चेति तस्य
कर्म्मणि प्रयोजने च निवृत्तेपि लोकसंग्रहार्थं यत्नपूर्वं यथा प्रवृत्तस्तथैव प्रवृत्तस्य यत्प्रवृत्ति
रूपं दृश्यते॥ न तत्कर्म्म येन बुद्धेः॥ समुच्चयः स्यात्॥ यथा भगवतो वासुदेवस्य क्षात्रधर्म
चेष्टितं न ज्ञानेन समुच्चीयते पुरुषार्थसिद्धये॥ तद्वत्फलाभिसंध्यहंकाराभावस्य तुल्य
त्वाद्विदुषः तत्वविन्नाहं करोमीति मन्यते॥ न च फलमभिसंधत्ते॥ यथा च स्वर्गादिका
मार्थिनोग्निहोत्रादिकर्म्मसाधनानुष्ठानायाहिताग्नेः काम्ये एवाग्निहोत्रादौ प्रवृत्तस्य सा
मिकृते विनष्टेपि कामे तदेवाग्निहोत्राद्यनुतिष्ठतोपि न तत्काम्यमग्निहोत्रादि भवति॥ तथा
च दर्शयति॥ भगवान् कुर्वन्नपि न करोति न लिप्यत इति॥ तत्र तत्र दर्शितं॥ यत्तु पूर्वैः पू
र्वतरं कृतं॥ कर्म्मणैव हि संसिद्धिमास्थिता जनकादयः॥ इति तु प्रविभज्य विज्ञेयं॥ तत्क

र्थे॥ यदि तावत्पूर्वे जनकादयस्तत्त्वविदोऽपि प्रवृत्तकर्म्माणः स्युस्ते लोकसंग्रहार्थं गुणा गुणे
ष्ववर्त्तन्त इति ज्ञानेनैव संसिद्धिमास्थिताः कर्मसंन्यासे प्राप्तेऽपि कर्मणा सहैव संसिद्धिमा
स्थिताः न कर्मसंन्यासं कृतवन्त इत्यर्थः॥ अथ न ते तत्त्वविद ईश्वरसमर्पितेन कर्म्मणा सा
15 धनभूतेन संसिद्धिं सत्त्वशुद्धिं ज्ञानोत्पत्तिलक्षणां वा संसिद्धिमास्थिता जनकादय इ
ति व्याख्येयं॥ एतमेवार्थं वक्ष्यति भगवान्॥ सत्त्वशुद्धये कर्म्म कुर्वन्तीति स्वकर्म्मणा त
मभ्यर्च्य सिद्धिं विन्दति मानव इत्युक्त्वा सिद्धिं प्राप्तस्य पुनर्ज्ञाननिष्ठां वक्ष्यति॥ सिद्धिं प्रा
प्तो यथा ब्रह्मेत्यादिना तस्माद्गीतासु केवलादेव तत्त्वज्ञानान्मोक्षप्राप्तिर्न कर्मसमुच्च
यादिति निश्चितोऽर्थः॥ यथा चायमर्थस्तथा प्रकरणशो विभज्य तत्र तत्र दर्शयिष्या
मः॥ तत्रैवं धर्मसंमूढचेतसो मिथ्याज्ञानवतो महति शोकसागरे निमग्नस्यार्जुन
स्यात्मज्ञानादन्यत्रोद्धरणमपश्यन्॥ भगवान्॥ वासुदेवस्ततः॥ कृपयार्जुन
मुद्दिधारयिषुरात्मज्ञानमवतारयन्नाह॥ अशोच्यानित्यादि॥ ॥ ॥ ५

ॐ नमः शिवाय ॐ

16

न शोच्या अशोच्या भीष्मद्रोणादयः ॥ सद्वृत्तत्वात् ॥ परमात्मस्वरूपेण नित्यत्वाच्च
तान् अशोच्यान् अन्वशोचोऽनुशोचितवानसि ॥ ते म्रियंते मन्निमित्तं अहं तैर्विना भूतः किं
करिष्यामि राज्यसुखादिनेति ॥ त्वं प्रज्ञावतां बुद्धिमतां वादांश्च वचनानि च भाषसे
तदेतन्मौढ्यं पांडित्यं च विरुद्धमात्मनि दर्शयस्युन्मत्त इवेत्यभिप्रायः ॥ यस्माद्गता।

अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे ॥ गता
सूनगतासूंश्च नानुशोचंति पंडिताः ॥ ११ ॥

सून् गतप्राणान् ॥ मृतान् ॥ अगतासून् ॥ अगतप्राणान् ॥ जीवतश्च न अनुशोचंति
पंडिताः ॥ आत्मज्ञाः तेहि पंडिताः परमार्थतः ॥ पांडित्यं निर्विद्येति श्रुतेः परमार्थतस्
तु ते नित्यास्तान् ॥ अशोच्यान् ॥ अनुशोचस्यतो मूढो स०२
सीत्येतत् कुतस्ते अशोच्याः यतो नित्याः कथं ॥ ११ ॥

नत्वेवजातुकदाचिदहं [illegible]नासं॥ किंत्वासमेवातीतेषुदेहोत्पत्तिविनाशेषुनित्य
एवाहमासमित्यभिप्रायः॥ तथानत्वंनासीः किंत्वासीरेव तथानेमेजनाधिपाःना
सन्किंत्वासन्नेव॥ तथानभविष्यामः॥ किंतुभविष्यामएवच॥ सर्वेवयमतोस्मादे

नत्वेवाहंजातुनासंनत्वंनेमेजनाधिपाः॥ न
चैवनभविष्यामः सर्वेवयमतःपरं ॥१२॥

हविनाशात्परमुत्तरकालेपित्रिष्वपिकालेषुनित्याआत्मस्वरूपेणेत्यर्थः॥ दे
हभेदानुवृत्त्याबहुवचनंनात्मभेदाभिप्रायेण॥ तत्रकथमिवनित्यआत्मेतिदृ ६
ष्टान्तमाह ॥१२॥ ॥ ॥

द्वितीयावस्थोपजननेनोपजननंआत्मनः किंतर्ह्यविक्रियस्यैव ४×

18 देहिनः देहोस्यास्तीति देही तस्य देहिनो देहवत आत्मन अस्मिन् वर्तमाने देहे यथा येन प्रकारेण ॥ कौमारं कुमारभावो बाल्यावस्था ॥ यौवनं यूनो भावो मध्यमावस्था ॥ जरा वयोहानिः जीर्णावस्थेत्येतास्तिस्रोवस्था अन्योन्यविलक्षणाः तासां प्रथमावस्थानाशेन नाशो द्वितीयतृतीयावस्थाप्राप्तिरात्मनो दृष्टा यथा तथा तद्वदेव देहात ॥ अन्यो देहो देहां

देहिनोस्मिन्यथा देहे कौमारं यौवनं जरा ॥ तथा
देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति ॥१३॥ ॥

तरं तस्य प्राप्तिर्देहान्तरप्राप्तिरविक्रियस्यैवात्मन इत्यर्थः ॥ धीरो धीमांस्तत्रैवं सति न मुह्यति न मोहमापद्यते ॥ यद्यप्यात्मनाशनिमित्तो मोहो न संभवति नित्य आत्मेति जानतः ॥ तथापि शीतोष्णसुखदुःखप्राप्तिनिमित्तो मोहो लौकिको दृश्यते ॥ सुखवियोगनिमित्तो दुःखसंयोगनिमित्तश्च शोक इत्येतदर्जुनस्य वचनमाशंक्याह ॥१३॥

मात्रास्ताभिर्मीयंते शब्दादय इति श्रोत्रादीनींद्रियाणि मात्राणां स्पर्शाः शब्दादिभिः
संयोगास्ते शीतोष्णसुखदुःखदाः ॥ शीतमुष्णं सुखं दुःखं च प्रयच्छंतीति ॥ अथवा स्पृ
श्यंत इति स्पर्शा विषया मात्राश्च स्पर्शाश्च शीतोष्णसुखदुःखदाः ॥ शीतं कदाचित्
सुखं कदाचिद्दुःखं तथोष्णमपि अनियतरूपं सुखदुःखे पुनर्नियतरूपे यतो न व्यभि

मात्रास्पर्शास्तु कौंतेय शीतोष्णसुखदुःखदाः ॥ आ
गमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत ॥१४॥

चरतः ॥ अतस्ताभ्यां पृथक् शीतोष्णयोर्ग्रहणं ॥ यस्मात्ते मात्रास्पर्शादयः ॥ आग
मापायशीलास्तस्मादनित्याः अतस्तान् शीतोष्णादीन् ॥ तितिक्षस्व ॥ प्रसहस्व
तेषु हर्षं विषादं च माकार्षीरित्यर्थः ॥ शीतोष्णादीन् ॥ सह
‸पायिन आगमा ३ नः ॥ एतावता किं स्यादिति ॥१४॥ ॥

खसु।

20 यंपुरुषंसमदुःखंसुसमेदुःखसुखेयस्येति॥तंसमदुःखसुखं॥सुखदुःखप्राप्तौहर्षविषा
दरहितंधीरंधीमंतं॥नव्यथयंतिनचालयंतिनित्यात्मदर्शनादेतेयथोक्ताःशीतादयः

यंहिनव्यथयंत्येतेपुरुषंपुरुषर्षभ ॥सम
दुःखसुखंधीरंसोमृतत्वायकल्पते ॥१५॥

सनित्यात्मस्वरूपदर्शननिष्ठोद्वंद्वसहिष्णुःअमृतत्वायअमृतभावायमोक्षायक
ल्पतेसमर्थोभवति॥इतश्चशोकमोहावकृत्वाशीतोष्णादिसहनंयुक्तंयस्मात्॥१५॥

असतोऽविद्यमानस्यशीतोष्णादेःसकारणस्यनविद्यतेनास्तिभावोभवनंअस्तितानहि।
शीतोष्णादिसकारणंप्रमाणैर्निरूप्यमाणंवस्तुसंभवतिविकारोहिसः।विकारश्चव्यभिचर
तियथाघटादिसंस्थानंचक्षुरादिनिरूप्यमाणं॥मृद्व्यतिरेकेणानुपलब्धेरसत्तथासर्वो
विकारःकारणव्यतिरेकेणानुपलब्धेरसन्॥जन्मप्रध्वंसाभ्यांप्रागूर्ध्वंचानुपलब्धेः।

नासतोविद्यतेभावोनाभावोविद्यतेसतः॥उभयोरपिदृष्टोऽन्तस्त्वनयोस्तत्वदर्शिभिः॥१६॥

कार्यस्यमृदादिकारणस्यचतत्कारणव्यतिरेकेणानुपलब्धेरसत्वंतदसत्वेसर्वाभा
वप्रसंगइतिचेन्न॥सर्वत्रबुद्धिद्वयोपलब्धेःसद्बुद्धिरसद्बुद्धिश्चयत्विषयाबुद्धिर्नव्य।
व्यभिचरतितत्सत्॥यद्विषयाबुद्धिर्व्यभिचरतितदसत्॥इतिसदासद्विभागेबुद्धित
न्त्रेव्यवस्थितेसर्वत्रद्वेबुद्धीसर्वैरुपलभ्येतेसमानाधिकरणेननीलोत्पलवत्॥सन्
घटःसन्पटःसन्हस्तीत्येवंसर्वत्रतयोर्बुद्ध्योर्घटादिबुद्धिविषयोऽसन्व्यभिचारात्। ८
घटादिबुद्धिर्व्यभिचरति तथा च दर्शितं नतु सद्बुद्धिस्तस्मात् १५

त्। न तु सद्बुद्धिविषयोऽव्यभिचारात्। घटे विनष्टे घटबुद्धौ व्यभिचारेऽपि सद्बुद्धेरव्यभि-
22 चरतीति चेन्न। पटादावपि सद्बुद्धिदर्शनात्। विशेषणविषयैव सा बुद्धिरतो न विन-
श्यति। अथ सद्बुद्धिवत् घटबुद्धिरपि घटान्तरे दृश्यत इति चेन्न। पटादावदर्शनात्। स-
द्बुद्धिरपि नष्टे घटे न दृश्यत इति चेन्न। विशेष्याभावात्। सद्बुद्धिर्विशेषणविषया
सती तु। विशेष्याभावे विशेषणानुपपत्तेः किंविषया स्यात्। न तु पुनः सद्बुद्धेर्विषया-
भावादेकाधिकरणत्वं घटादिविशेष्याभावे न तु युक्तमिति चेन्न। सदिदमुदकमि-
ति मरीच्यादावन्यतराभावेऽपि सामानाधिकरण्यस्य दर्शनात्। तस्माद्देहादेर्द्वन्द्वस्य स-
कारणस्यासतो न विद्यते भाव इति। तथा सतश्चात्मनो भावोऽविद्यमानत्वं न वि-
न्य४ द्यते सर्वत्राव्यभिचारादित्यवोचाम। एवमात्मानात्मनोः सदसतोरुभयोरपि दृष्ट उ-
पलब्धो नो निर्णयः। सत्सदेव असदसदेव। अनयोर्यथोक्तयोस्तत्त्वदर्शिभिस्त-
त्त्वेतदिति सर्वनाम। सर्वं च ब्रह्म तत्तस्य नाम तदिति। तद्भावो ब्रह्मणो याथात्म्यं तत्त्वं त-
द्द्रष्टुं शीलं येषां ते तत्त्वदर्शिनस्तैस्तत्त्वदर्शिभिः। त्वमपि तत्त्वदर्शिनां दृष्टिमाश्रित्य

शोकं मोहं च हित्वा शीतोष्णादीनि तितिक्षस्वेत्यभिप्रायः ॥ किं पुनस्तत् यत्सदेव सर्व
दोच्यते ॥ १६ ॥ ॥ अविनाशि न विनष्टुं शीलमस्येति ॥ तुशब्दोऽसतो विशेषणार्थः ॥ त
द्विद्धि जानीहि किं येन सर्वमिदं ततं व्याप्तं ॥ आकाशेनेव घटादयः ॥ विनाशमदर्श
नमभावं ॥ अव्ययस्यास्य ॥ नैतत्सदाख्यं ब्रह्म स्वेन रूपेण व्येति व्यभिचरति निरव

अविनाशि तु तद्विद्धि येन सर्वमिदं ततं ॥ विना
शमव्ययस्यास्य न कश्चित्कर्तुमर्हति ॥ १७ ॥

त२१

यवत्वाद्देहादिवत् ॥ नाप्यात्मीयेन ॥ आत्मीयाभावात् ॥ यथा देवदत्तो धनहान्या व्ये
ति न त्वेवं ब्रह्म ॥ अतो अव्ययस्यास्य ब्रह्मणो विनाशं न कश्चित्कर्तुमर्हति न कश्चि
दात्मानं विनाशयितुं शक्नोति ईश्वरोऽपि ॥ आत्मा हि ब्रह्म स्वात्मनि च क्रियाविरोधा
त् ॥ किं पुनस्तदसत् ॥ यदात्मसत्तां व्यभिचरतीत्युच्यते ॥ १७ ॥ ॥

24

अंतवंतअंतोविनाशोविद्यतेयेषांतेअंतवंतः॥यथामृगतृष्णिकादौसद्बुद्धिरनुवृत्ताप्र
माणनिरूपणांतेविछिद्यतेसतस्यांतस्तथेमेदेहाःस्वप्नमायादिदेहवञ्चांतवंतोनित्य
स्यशरीरिणः॥शरीरवतोविनाशिनो॥अप्रमेयस्यात्मनोऽतवंतइत्युक्ताविवेकभिरि
त्यर्थः॥नित्यस्यानाशिनइतिनपुनरुक्तंनित्यस्यहिद्विविधत्वात्॥लोकेनाशस्यचय

अंतवंतइमेदेहा॥नित्यस्योक्ताःशरीरिणः॥अना
शिनोप्रमेयस्यतस्माद्युध्यस्वभारत ॥१८॥ ॥ ॥

थादेहोभस्मीभूतोदर्शनंगतोनष्टउच्यते॥विद्यमानोप्यन्यथापरिणतोव्याध्या
दियुक्तोजातोनष्टउच्यते॥तत्रानाशिनोनित्यस्येतिद्विविधेनविनाशेनासंबंधोस्ये।
त्यर्थः॥अन्यथापृथिव्यादिवदपिनित्यत्वंस्यादात्मनःतन्माभूदितिनित्यस्याना।
शिनइत्याह॥अप्रमेयस्यनप्रमेयस्यप्रत्यक्षादिप्रमाणैरपरिछेद्यस्येत्यर्थः॥नन्वा

गमेनात्मापरिछिद्यतेप्रत्यक्षादिनाचपूर्वंनआत्मनःस्वतःसिद्धत्वात्॥सिद्धेह्यात्म
निप्रमातरिप्रमित्सोःप्रमाणान्वेषणाभवति॥नहिपूर्वमित्थमहमित्यात्मानमप्र
मायपश्चात्प्रमेयपरिछेदायप्रवर्त्ततेनह्यात्मानामकस्यचिदप्रसिद्धोभवति॥शा
स्त्रंत्वंत्यप्रमाणमतद्धर्माध्यारोपणमात्रनिवर्त्तकत्वेनप्रमाणत्वमात्मनः॥प्रतिप
द्यते॥नत्वज्ञातार्थज्ञापकत्वेनतथाचश्रुतिः॥यत्साक्षादपरोक्षाद्ब्रह्मयआत्मेति॥य
स्मादेवं॥नित्योविक्रियश्चात्मातस्माद्युध्यस्व॥युद्धादुपरमंमाकार्षीरित्यर्थः॥नह्य
त्रयुद्धकर्त्तव्यताविधीयते॥युद्धेप्रवृत्तएवह्यसौशोकमोहप्रतिबद्धस्तूष्णीमास्ते॥अ
तस्तस्यप्रतिबंधापनयनमात्रंभगवताक्रियते॥तस्माद्युध्यस्वेत्यनुवादमात्रंनविधिः
शोकमोहादिसंसारकारणनिवृत्त्यर्थंगीताशास्त्रंनप्रवर्त्तकमित्येतस्यार्थस्यसा।
दिभूतेऋचावानिनाय॥भगवान् यत्त्वमन्यसेयुद्धेभीष्मादयोमयाहन्यंते अह
मेषांहंताइत्येषाबुद्धिर्मृषैवतेकथं ॥१८॥ ॥ ॥

26

यएनंदेहिनंप्रकृतंवेत्तिजानाति॥हंतारंहननक्रियायाःकर्तारमेतं॥यश्चैनंमन्य
तेहतंदेहहननेनेतंहतोहमितिहननक्रियायाःकर्मभूतं॥तावुभौनविजानीतः।
तोनज्ञातवंतोविवेकेनात्मानं॥हंता॥अहंहतोहमिति॥देहहननेप्यात्मानमहं

यएनंवेत्तिहंतारंयश्चैनंमन्यतेहतं॥उभौ॥१०॥
तौनविजानीतोनायंहंतिनहन्यते॥१९॥

प्रत्ययविषयंयौविज्ञानीतःतावात्मनस्तत्स्वरूपानभिज्ञावित्यर्थः॥यस्मान्नाय
मात्माहंतिहननक्रियायाःकर्त्तानभवति॥नहन्यतेनचकर्मभवतीत्यर्थः॥
अविक्रियत्वात्॥कथमविक्रियआत्मेतिद्वितीयोमंत्रः॥१९॥ ॥ ॥ ॥

गी॰भा॰ नजायतेनोत्पद्यतेजनिलक्षणावस्तुविक्रियानात्मनोविद्यतइत्यर्थः॥नम्रियतेवावाश
११ 27 ब्दश्चार्थे॥नम्रियतेचेत्यंत्याविनाशलक्षणाविक्रियाप्रतिषिध्यते॥कदाचिच्छब्दःसर्ववि
क्रियाप्रतिषेधैःसंबध्यतेनकदाचिज्जायतेनकदाचिन्म्रियतइत्येवं॥यस्मादयमात्माभू
त्वाभवनक्रियामनुभूयपश्चादभविता॥अभावंगंतानभूयःपुनःतस्मान्नम्रियते॥यो

नजायतेम्रियतेवाकदाचिन्नायंभूत्वाभवितावानभूयः॥अजो
नित्यःशाश्वतोयंपुराणोनहन्यतेहन्यमानेशरीरे॥२०॥॥

हिभूत्वानभवतिसम्रियतइत्युच्यतेलोके॥वाशब्दान्नशब्दाच्चायमात्माअभूत्वाभवि
तादेहवन्नभूयःपुनःतस्मान्नजायते॥योह्यभूत्वाभवितादेहवन्नभूयःपुनःतस्मान्न
जायते॥योह्यभूत्वाभविता॥सजायतइत्युच्यते॥नैवमात्माअतोनजायते॥यस्मादेवं ११
तस्मादजोयस्मान्नम्रियतेतस्मान्नित्यः॥यद्यप्याद्यंतयोर्विक्रिययोःप्रतिषेधेसर्वविक्रि

याः प्रतिषिद्धा भवंति॥ तथापि मध्यभाविनीनां विक्रियाणां स्वयमेवेहैव तदर्थः प्रतिषेधः
कर्तव्य इत्यः ऽनुक्तानामपि गमनादिसमस्तविक्रियाणां प्रतिषेधो यथा स्यादित्याह॥ शा
श्वत इत्यादि॥ शाश्वत इत्यादि॥ शाश्वत इत्यपक्षयलक्षणा विक्रिया प्रतिषिध्यते॥ शश्व
द्भवः शाश्वतः नापक्षीयते स्वरूपेण निरवयवत्वान्निर्गुणत्वाच्च॥ नापि गुणक्षयेणापक्ष
यः॥ विपरीतवृद्धिलक्षणा विक्रिया प्रतिषिध्यते पुराण इति॥ यो ह्यवयवागमेनोपचीय
ते स वर्द्धते अभिनव इत्युच्यते॥ अयं त्वात्मा निरवयवत्वात्पुरापि नव एवेति पुराणः नव
एव इत्यर्थः॥ तथा न हन्यते नापि विपरिणम्यते हन्यमाने विपरिणम्यमाने शरीरे॥ हंति
रत्र विपरिणामार्थो द्रष्टव्यः॥ अपुनरुक्ततायैवमस्मिन्मंत्रे षड्भावविकारा लौकिकव
स्तुविक्रिया आत्मनि प्रतिषिध्यंते॥ सर्वप्रकारविक्रियारहित आत्मेति वाक्यार्थः॥ नवि
परिणम्यत इत्यर्थः॥ यस्मादेवं तस्मादुभौ तौ न विजानीत इति पूर्वेणास्य संबंधः॥ य
एनं वेत्ति हंतारमित्यः नेन [illegible] हननक्रियायाः कर्ता कर्म च न भवतीति प्रतिज्ञाय

न ज्ञायत इत्यः तेना ऽविक्रियत्वे हे।
तमनक्काणइति ज्ञातार्थस्योपसंहरति॥ ॥

या१

गी॰भा॰
२२ 29

वेदविजानातिअविनाशिनं॥ अंत्यभावविकाररहितं॥ नित्यंविपरिणामरहितंयोवेदेतिसंबंधः एनंपूर्वेणामंत्रेणोक्तलक्षणमजंजन्मरहितं॥ अव्ययमपक्षयरहितं॥ कथंकेनप्रकारेण स विद्वान्पुरुषअधिकृतः हंतिहननक्रियांकरोति॥ कथंवाघातयति॥ हंतारंप्रयोजयति॥ न कथंचितहंति॥ नकथंचित्कंचित्घातयतीतिउभयत्राक्षेपएवार्थः॥ प्रश्नार्थासंभवाद्धेत्व र्थस्यतुल्यत्वाद्धिदुषः॥ सर्वकर्मप्रतिषेधएवप्रकरणार्थोभिप्रेतोभगवतः॥ हंतेस्त्वाक्षेप।

वेदाविनाशिनंनित्यंयएनमजमव्ययं॥ कथंसपुरुषःपार्थकंघातयतिहंतिकं ॥२१॥

उदाहरणार्थत्वेनविदुषःकंचित्कर्मासंभवहेतुविशेषंपश्यन्कर्माण्याक्षिपतिभगवान् कथंसपुरुषइति॥ नन्वक्तमात्मनोविक्रियत्वंकर्मासंभवकारणविशेषः सत्यमुक्तोन। तुसकारणविशेषोअन्यत्वाद्विदुषः॥ अविक्रियादात्मनइतिनह्यविक्रियस्याणुविदि तवतःकर्मनसंभवतीतिचेन्न॥ विदुषआत्मत्वात॥ नहिदेहादिसंघातस्यविद्वत्ता अ

तःपरिशेष्याद् असंहतस्यात्माविद्वानविक्रियइति ॥ तस्यविदुषःकर्मासंभवादाक्षेपोयुक्तः
30 सकथंसपुरुषइति ॥ यथाबुद्ध्याद्याहृतस्यशब्दाद्यर्थस्याविक्रियएवसन् ॥ बुद्धिवृत्त्यविवेक।
ज्ञानेनाविद्ययोपलब्धात्माकल्प्यते ॥ एवमात्मानात्मविवेकज्ञानेनबुद्धिवृत्त्या।
विद्ययासत्यमनृतयैवपरमार्थतोऽविक्रियएवात्माविद्वानुच्यते ॥ विदुषःकर्मासंभव
वचनात् ॥ यानिकर्माणिशास्त्रेविधीयंतेतान्यविदुषोविहितानीतिभगवतोनिश्च
योवगम्यते ॥ ननुविद्याप्यविदुषएवविधीयते ॥ विदितवेद्यस्यापिष्टपेषवत् ॥ विद्यावि
धानानर्थक्यात् ॥ नत्राप्यविदुषःकर्माणिविधीयंतेनविदुषइतिविशेषोनोपपद्यते ॥
नयन्नुष्ठेयस्यभावाभावविशेषोपपत्तेः ॥ अग्निहोत्रादिविध्यर्थज्ञानोत्तरकालमग्निहो
त्रादिकर्मानेकसाधनोपसंहारपूर्वकमनुष्ठेयं ॥ कर्ताहंममकर्तव्यमित्येवंप्रका
रविज्ञानवतोऽविदुषोयथानुष्ठेयंभवति ॥ नतयानजायतइत्यादावात्मस्वरूपवि
ध्यर्थज्ञानोत्तरकालभाविकिंचिदनुष्ठेयंभवति ॥ किंतुनाहंकर्तानभोक्तेत्यादि।

ज्ञानमात्मैकत्वाऽकर्तृत्वज्ञानादन्यन्नोपपद्यत इति॥ एष विशेष उपपद्यत इति॥ यः पुनः
कर्ताहमिति वेत्त्यात्मानं तस्य ममेदं कर्तव्यमित्यवश्यंभाविनी बुद्धिः स्यात्॥ तदपेक्षया।
सोऽधिक्रियत इति तं प्रति कर्माणि॥ स चाविद्वानुभौ तौ न विजानीत इति वचनात्॥ विशेषितस्य
विदुषो मुमुक्षोश्च सर्वकर्मसंन्यास एवाधिकारः॥ अत एव भगवान्नारायणः सांख्यान्वि-
दुषोऽविदुषश्च कर्मिणः॥ प्रविभज्य द्वे निष्ठे ग्राहयति॥ ज्ञानयोगेन सांख्यानां कर्मयोगे-
न योगिनामिति॥ तथा च पुत्रायाह भगवान्व्यासः॥ द्वाविमावथ पंथानाविति॥ तथा च
पुत्रायाह भगवान्व्यासः द्वाविमावथ पंथानावित्यादि तथा क्रियापथश्चैव पुरस्तात्संन्या-
सश्चेत्येतमेव विभागं पुनः पुनर्दर्शयिष्यति भगवान्॥ अतत्त्वविदहंकारविमूढात्मा
कर्ताहमिति मन्यते॥ तत्त्ववित्तु नाहं करोमीति॥ तथा च सर्वकर्माणि मनसा संन्यस्या-
स्त इत्यादि॥ तत्र केचित्पंडितंमन्या वदंति॥ जन्मादिषड्भावविकाररहितोऽविक्रियोऽकर्ता तो२
एकोऽहमात्मेति॥ न कस्यचिज्ज्ञानमुत्पद्यते॥ यस्मिन्सति सर्वकर्मसंन्यास उपदिश्यते

तत्र॥ न जायते इत्यादिशास्त्रोपदेशानर्थक्यात्॥ यथा च शास्त्रोपदेशसामर्थ्याद्धर्माधर्मास्ति
32 त्वविज्ञानं कर्तुश्च देहांतरसंबंधिविज्ञानमुत्पद्यते॥ तथा शास्त्रात्तस्यैवात्मनोऽविक्रियत्वा
कर्तृत्वैकत्वादिविज्ञानं कस्मान्नोत्पद्यत इति प्रष्टव्यास्ते॥ करणागोचरत्वादिति चेन्न॥ म
नसैवानुद्रष्टव्यम् इति श्रुतेः॥ शास्त्राचार्योपदेशशमदमादिसंस्कृतं मनः॥ आत्मदर्शने।
करणं॥ तथा च तदधिगमायानुमाने आगमे च सति ज्ञानं नोत्पद्यत इति साहसमेतत्
ज्ञानं चोत्पद्यमानं तद्विपरीतज्ञानमवश्यं बाधत इत्यभ्युपगन्तव्यं॥ तच्चाज्ञानं दर्शितं॥ हं
ता हतोऽस्मीति उभौ तौ न विजानीत इत्यत्र चात्मनो हननक्रियायाः कर्तृत्वं कर्मत्वं च हे
तुकर्तृत्वं च अज्ञानकृतं दर्शितं॥ तच्च सर्वक्रियास्वपि समानं॥ कर्तृत्वादेरविद्याकृतत्वमवि
क्रियत्वादेवात्मनः विक्रियावान् हि कर्त्ता आत्मनः कर्मभूतमन्यं प्रयोजयति कुर्विति॥ तदे।
तदविशेषेण विदुषः सर्वक्रियासु कर्तृत्वं हेतुकर्तृत्वं च प्रतिषेधति भगवान् कर्माधिका।
राभावप्रदर्शनार्थं वेदाविनाशिनं कथं स पुरुष इत्यादिना॥ क्व पुनर्विदुषोऽधिकार इत्येत
दुक्तं पूर्वमेव ज्ञानयोगेन सांख्यानामिति॥ तथा सर्वकर्मसंन्यासं वक्ष्यति सर्वकर्माणि मनसा

गी·भा· मेत्यादिना॥ननुमनसेतिवचनान्नवाचिकानांकायिनांचसंन्यासइतिचेन्न॥सर्वकर्माणीति
१४ विशेषितत्वात्॥मानसानामेवसर्वकर्मणामितिचेन्न॥मनोव्यापारपूर्वकत्वाद्वाक्काय।
33 व्यापाराणांमनोव्यापाराभावेतदनुपपत्तेः॥शास्त्रीयाणांवाक्कायकर्मणांव्यापाराणांकार
णानिमानसानितानिवर्जयित्वाअन्यानिसर्वकर्माणिमनसासंन्यस्यइतिचेन्न॥नैवकुर्वन्न
कारयन्नितिविशेषणात्सर्वकर्मसंन्यासोयंभगवतोक्तः॥नरिष्यतेनजीवतइतिचेन्न
नवद्वारेपुरेदेहीआस्तइतिविशेषणानुपपत्तेः॥नहिसर्वकर्मसंन्यासेनमृतस्यदे।
हस्यासनंभवति॥अकुर्वतोऽकारयतश्चदेहेसंन्यस्येतिसंबंधोनदेहआस्तइतिचे
न्न॥सर्वत्रात्मनोविक्रियत्वाऽवधारणात्॥आसनक्रियायाश्चाधिकरणापेक्षत्वात्॥
तदनपेक्षत्वाच्च॥संन्यासस्तुसंपूर्वन्यासशब्दस्त्यागार्थः॥ननिक्षेपार्थः।तस्माद्गीता
शास्त्रेआत्मज्ञानवतःसंन्यासएवाधिकारोनकर्मणीति॥तत्रतत्रोपदिष्टादात्मज्ञान
प्रकरणेदर्शयिष्यामः॥प्रकृतंतुवक्ष्यामः॥तत्रतत्रात्म १४
नोऽविनाशित्वंप्रतिज्ञातंतत्॥किमिवेत्युच्यते॥२१॥

वासांसि च वस्त्राणि जीर्णानि दुर्बलतां गतानि। यथा लोके विहाय परित्यज्य नवान्यभिनवा
34 नि गृह्णाति उपादत्ते। नरः पुरुषः अपराणि अन्यानि। तथा तद्वदेव शरीराणि विहाय जीर्णा
न्यन्यानि संयाति संगच्छति नवानि देही। आत्मा पुरुषवदविक्रिय एवेत्यर्थः। कस्मादवि
क्रिय इत्याह। २२। एवं प्रकृतं देहिनं न छिंदंति निरवयवत्वात्। नावयवविभागं कुर्वंति

वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि। तथा शरीराणि विहाय जीर्णान्य
न्यानि संयाति नवानि देही। २२। नैनं छिंदंति शस्त्राणि नैनं दहति पावकः। न चैनं क्लेदय
न्त्यापो न शोषयति मारुतः। २३।

शस्त्राणि अस्यादीनि। तथा नैनं दहति पावकः अग्निरपि
न भस्मीकरोति। तथा नैनमापः क्लेदयन्ति। अपां हि सावयवस्य वस्तुनः आर्द्रीकरणेनाव
यवविश्लेषापादने सामर्थ्यं न तु निरवयवे आत्मनि तन्न संभवति। तथा स्नेहवद्द्रव्यं स्नेहविशो
षणेन वायुर्नाशयति। एवं तमात्मानं न शोषयति मारुतोऽपि। यत एवं तस्मात्। २३। ।।।।।

गी॰भा॰
२५
35

यस्मादन्योन्यनाशहेतूनि भूतानि आत्मानं नाशयितुं नोत्सहंते ॥ तस्मान्नित्यः नित्यत्वात्सर्व
गतः सर्वगतत्वात् स्थाणुः स्थाणुरिव स्थिर इत्येतत् स्थिरत्वादचलः अयमात्मा अतः सनात
नः ॥ चिरंतनः ॥ न कारणात्कुतश्चिन्निष्पन्नः अभिनव इत्यर्थः नैतेषां श्लोकानां पौनरुक्त्यं
चोदनीयं ॥ यत एकेनैव श्लोकेनात्मनो नित्यत्वमविक्रियत्वं चोक्तं न जायते म्रियते वेत्या

अच्छेद्योयमदाह्योयमक्लेद्योशोष्य एव च ॥ नित्यः स
र्वगतः स्थाणुरचलोयं सनातनः ॥२४॥ ॥ ॥

दिना ॥ तत्र यदेवात्मविषयं किंचिदुच्यते ॥ तस्मात् ॥ श्लोकार्थान्नातिरिच्यते ॥ किंचिच्छब्द
तः पुनरुक्तं किंचिदर्थत इति दुर्बोधत्वादात्मवस्तुनः पुनः पुनः प्रसंगमापाद्य शब्दां
तरेण तदेव वस्तु निरूपयति भगवान् ॥ वासुदेवः कथं नु नाम संसारिणां बुद्धिगोचर ५
तामापन्नमव्यक्तं तत्त्वं संसारनिवृत्तये स्यादिति ॥ किंच ॥२४॥ ॥ ॥ ॥

36 अव्यक्तः सर्वकरणाविषयत्वात॥ नव्यज्यतइत्यव्यक्तोयमात्मा अचिंत्योयं॥ यद्धींद्रियगोचरंत
च्चिंताविषयमापद्यते॥ अयंत्वात्मानेंद्रियगोचरः अतएवाचिंत्य॥ अविकार्यः यथाक्षीरंदध्यात
चनादिनाविकुरुते॥ ननथायमात्मानिरवयवत्वाच्चाविक्रियः॥ नहिनिरवयवंकिंचिद्विक्रि।

अव्यक्तोयमचिंत्योयमविकार्योयमुच्यते॥ तस्मा
देवंविदित्वैनंनानुशोचितुमर्हसि ॥२५॥ ॥

यात्मकंदृष्टं॥ अविक्रियत्वादविकार्योयमात्मेत्युच्यते॥ तस्मादेवंयथोक्तप्रकारेणैन
मात्मानंविदित्वात्वंनानुशोचितुमर्हसि॥ हंताहमेषांमयैतेहन्यंतइति॥ आत्मनोऽ
नित्यत्वमभ्युपगम्येदमुच्यते ॥२५॥

अथचेत्त्वमभ्युपगमार्थः॥एनंप्रकृतमात्मानंनित्यजातंलोकप्रसिद्ध्याप्रत्यनेकशरीरोत्पत्तिं
जातोजातइतिमन्यसे॥तथातद्विनाशंप्रतिनित्यंवामन्यसेमृतंमृतोमृतइति॥तथापित्वं
तथाभाविन्यात्मनिमहाबाहोनैवंशोचितुमर्हसि॥जन्मवतोजन्मनाशश्चावश्यंभावि
नाविति॥तथाचसति॥२६॥जातस्यहिलब्धजन्मनःध्रुव॥अव्यभिचारीमृत्युर्मरणं

अथचैनंनित्यजातंनित्यंवामन्यसेमृतं॥तथापित्वंमहाबाहोनैवंशोचितुमर्हसि॥२६॥
जातस्यहिध्रुवोमृत्युर्ध्रुवंजन्ममृतस्यच॥तस्मादपरिहार्येऽर्थेनत्वंशोचितुमर्हसि॥२७

ध्रुवंजन्ममृतस्यचतस्मादपरिहार्योऽयंजन्ममरणलक्षणोऽर्थः॥तस्मिन्जन्ममरणलक्ष
णे॥अपरिहार्येऽर्थे॥नत्वंशोचितुमर्हसि॥कार्यकारणसंघातात्मकान्यपिभूतान्युद्दिश्य २६
शोकोनयुक्तःकर्तुंयतः॥२७॥

38

अव्यक्तादीनिअव्यक्तमदर्शनमनुपलब्धिरादिर्येषांभूतानांपुत्रमित्रादिकार्यकार
णसंघातात्मकानांतान्यव्यक्तादीनिभूतानि॥प्रागुत्पत्तेःउत्पन्नानिचप्राङ्मरणात्
व्यक्तमध्यानि॥अव्यक्तनिधनान्येवपुनरप्यदर्शनंनिधनंमरणंयेषांतान्यव्यक्तनि
धनानिमरणादूर्ध्वमव्यक्ततामेवप्रतिपद्यंतइत्यर्थः॥तथाचोक्तं॥अदर्शनादापति

अव्यक्तादीनिभूतानिव्यक्तमध्यानिभारत॥अ
व्यक्तनिधनान्येवतत्रकापरिदेवना॥२८॥॥

तःपुनश्चादर्शनंगतइति॥तत्रकापरिदेवनाकोविलापः अदृष्टदृष्टनष्टभ्रांति।
भूतेषुभूतेष्वित्यर्थः॥दुर्विज्ञेयःप्रकृतआत्माकिंत्वामेवैकउपालभेसाधारणे।
भ्रांतिनिमित्ते॥कथंदुर्विज्ञेयआत्मेत्याह ॥२८॥ ॥ ॥॥॥ ॥॥

आश्चर्यवदाश्चर्यमद्भुतं ॥ अदृष्टमकस्मादृश्यमानं तेन तुल्यमाश्चर्यवत् ॥ आश्चर्यमिवैनमा
त्मानं पश्यति कश्चित् ॥ आश्चर्यवदेनं वदति तथैव चान्यः ॥ आश्चर्यवच्चैनमन्यः शृणोति
श्रुत्वादृष्ट्वाउक्त्वाप्येनं वेद न चैव कश्चित् ॥ अथवा य आत्मानं पश्यति स आश्चर्यतुल्यः यो
वदति यश्च शृणोति सो ऽनेकसहस्रेषु कश्चिदेव भवति ॥ अतोदुर्बोधआत्मेत्यभिप्रायः ॥ अ

आश्चर्यवत्पश्यति कश्चिदेनमाश्चर्यवद्वदति तथैव चान्यः ॥ आश्चर्यवच्चैनमन्यः शृणो
ति श्रुत्वाप्येनं वेद न चैव कश्चित् ॥ २९ ॥ देही नित्यमवध्योयं देहे सर्वस्य भारत ॥ तस्मात्स
र्वाणि भूतानि न त्वं शोचितुमर्हसि ॥ ३० ॥ ॥

इदानीं प्रकरणार्थ उपसंह्रियते ॥ २९ ॥ सर्व
स्य प्राणिजातस्य देहे वध्यमानेप्ययं देही न वध्यो यस्मात्तस्माद्भीष्मादीनि सर्वाणि भूतानि
उद्दिश्य न त्वं शोचितुमर्हसि ॥ इह परमात्मतत्वापेतायां शोको मोहो वा न संभवतीत्युक्तं
न केवलं परमात्मतत्वापेतायामेव ॥ ३० ॥ ॥ ॥ ॥ १८

40

स्वधर्ममपि स्वोयधर्मः क्षत्रियस्य युद्धं ॥ तमप्यवेक्ष्य त्वं न विकंपितुं न प्रचलितुमर्हसि ॥ स्वाभावि
कात् धर्मात् आत्मस्वाभाव्यादित्यभिप्रायः ॥ न च युद्धं पृथिवीजयद्वारेण धर्मार्थं प्रजारक्षणार्थं चे
ति परं धर्म्यं ॥ तस्माद् धर्म्यात् युद्धात् श्रेयोऽन्यत् क्षत्रियस्य न विद्यते ॥ हि यस्मादतश्च युद्धं कर्तव्य
मित्युच्यते ॥ ३१ ॥ यदृच्छया चाप्रार्थितया उपपन्नमागतं ॥ स्वर्गद्वारमपावृतमुद्घाटितं ॥ येन

स्वधर्ममपि चावेक्ष्य न विकंपितुमर्हसि ॥ धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत् क्षत्रियस्य न विद्यते ॥ ३१ ॥
यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतं ॥ सुखिनः क्षत्रियाः पार्थ लभंते युद्धमीदृशं ॥ ३२ ॥
अथ चेत्त्वमिमं धर्म्यं संग्रामं न करिष्यसि ॥ ततः स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसि ॥ ३३ ॥

ईदृशं युद्धं लभंते क्षत्रियाः हे पार्थ सुखिनस्ते एवं कर्तव्यतां प्राप्तमपि ॥ ३२ ॥ अथ चेत्त्वमि
मं धर्म्यं धर्मादनपेतं संग्रामं युद्धं न करिष्यसि चेत् ततस्तदकरणात् ॥ स्वधर्मं कीर्तिं च महा
देवादिसमागमादिनिमित्तां हित्वा केवलं पापमवाप्स्यसि ॥ न केवलं स्वधर्मकीर्तिः

गी-भा- अकीर्तिं च युद्धे भूतानि कथयिष्यन्ति ते वा ते अव्ययां दीर्घकालं धर्मात्मा शूर इत्येवमादिभिर्गुणैः ॥
१८ 41 संभावितस्य चाकीर्तिर्वैरं मरणादित्यर्थः ॥ किंच ॥३४॥ भयात्कर्णादिभ्यः रणाद्युद्धादुपरतं त्वां नि
वृत्तं मंस्यन्ते चिंतयिष्यन्ति ॥ न कृपयेति त्वां महारथाः दुर्योधनप्रभृतयः ॥ केमन्यत इत्या

अकीर्तिं चापि भूतानि कथयिष्यन्ति तेऽव्ययां ॥ संभावितस्य चाकीर्तिर्मरणादतिरिच्यते ॥३४॥
भयाद्रणादुपरतं मंस्यन्ते त्वां महारथाः ॥ येषां च त्वं बहुमतो भूत्वा यास्यसि लाघवं ॥३५॥

ह ॥ येषां च त्वं दुर्योधनादीनां बहुमतो बहुभिर्गुणैर्युक्त इत्येवं मतः ॥ बहुमतो भूत्वा पु
नर्यास्यसि लाघवं लघुत्वभावं ॥३५॥
किंच ॥ ॐ नमः शिवाय ॐ ॥ ॥३५॥

१८

अवाच्यवादान् ॥ अवक्तव्यान् ॥ वादांश्च बहूननेकप्रकारान् ॥ वदिष्यन्ति तवाहिताः शत्रु
42 वः निन्दयन्तः कुत्सयन्तः तव त्वदीयं सामर्थ्यं ॥ तस्मात् ततो निन्दाप्राप्तेर्दुःखात् दुःखतरं
नु किं ॥ ततः कष्टतरं दुःखं नास्तीत्यर्थः ॥ युद्धे पुनः क्रियमाणे कर्णादिभिः ॥ ३६ ॥ हतः स

अवाच्यवादांश्च बहून् वदिष्यन्ति तवाहिताः ॥ निंदंतस्तव सामर्थ्यं ततो दुःखतरं नु किं ॥ ३६ ॥
हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीं ॥ तस्मादुत्तिष्ठ कौंतेय युद्धाय कृतनिश्चयः
३७ ॥

न् स्वर्गं प्राप्स्यसि कर्णादीन्वा जित्वा महीं भोक्ष्यसे ॥ उभयथापि ते लाभ एवेत्यभिप्रा
यः यत एवं तस्मादुत्तिष्ठ कौंतेय युद्धाय कृतनिश्चयः ॥ जेष्यामि शत्रून् ॥ मरिष्यामि वेति नि
श्चयं कृत्वेत्यर्थः ॥ न च युद्धं स्वधर्म्म इत्येव युध्यमानस्यापदेशमिमं शृणु ॥ ३७ ॥ ॥

भा॰गी॰ सुखदुःखे समे तुल्ये कृत्वा रागद्वेषावकृत्वेत्यर्थः ॥ तथा लाभालाभौ जयाजयौ च समौ कृत्वा ॥ त
२५ 43 तो युद्धाय युज्यस्व घटस्व ॥ नैवं युद्धं कुर्वन्पापमवाप्स्यसि ॥ एष उपदेशः प्रासंगिकः शोकमोहा
पनयाय लौकिको न्यायः स्वधर्ममपि चावेक्ष्येत्याद्यैः श्लोकैः उक्तः न तु तात्पर्येण परमार्थद
र्शनं त्विह प्रकृतं ॥ तच्चोक्तमुपसंहरति ॥ एषा तेऽभिहितेति ॥ शास्त्रविषयविभागप्रदर्श

सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ ॥ त
तो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि ॥ ३८ ॥

नाय ॥ इह हि दर्शिते ॥ शास्त्रविषयविभागे उपरिष्टात् ॥ ज्ञानयोगेन सांख्यानां कर्मयो
गेन योगिनामिति ॥ निष्ठाद्वयविषयं शास्त्रं सुखं प्रवर्त्तिष्यते श्रोतारश्च विषयविभा १५
गेन सुखं ग्रहीष्यंतीत्यभिप्रायेणाह ॥ ३८ ॥ ॥ ॥ ॥ ॥

44 एषा ते तुभ्यमभिहिता उक्ता सांख्ये परमार्थवस्तुविवेकविषये॥ बुद्धिर्ज्ञानं सा तावच्छोकमोहा
दिसंसारहेतुदोषनिवृत्तिकारणं॥ योगे तु तत्प्राप्त्युपाये निःसंगतया द्वंद्वप्रहाणपूर्वकमीश्व
राराधनार्थे कर्मयोगे कर्मानुष्ठाने समाधियोगे च॥ इमामनंतरोच्यमानां बुद्धिं श्रृणु प्ररोच

एषा तेभिहिता सांख्ये बुद्धिर्योगे त्विमां शृणु॥ बुद्ध्या
युक्तो यया पार्थ कर्मबंधं प्रहास्यसि॥३९॥॥॥

नार्थं॥ यया बुद्ध्या योगविषयया युक्तो हे पार्थ कर्मबंधं कर्मैव धर्माधर्माख्यं बंधः
कर्मबंधः॥ तं प्रहास्यसि॥ ईश्वरप्रसादनिमित्तज्ञानप्राप्त्येत्यभिप्रायः॥ किंचान्यत्॥३९॥
ॐ॥ ॐ॥ ॐ ३९

नेहाभिक्रमनाशोस्तिनेहमोक्ष मार्गेयोगे॥ [illegible] अभिक्रमनाशः॥ अभिक्रमण
मभिक्रमः प्रारंभः तस्यनाशोनास्ति॥ यथाकृष्यादेःयोगविषयेप्रारंभस्यनानैकांतिकफ
लत्वमित्यर्थः किंच॥ नापिचिकित्सावत्प्रत्यवायोविद्यतेभवति॥ किंतुस्वल्पमप्यस्य

नेहाभिक्रमनाशोस्तिप्रत्यवायोनविद्यते॥ स्वल्प
मप्यस्यधर्मस्यत्रायतेमहतोभयात्॥ ४०॥॥॥

योगधर्मस्यानुष्ठितंत्रायतेरक्षति॥ महतः संसारभयात्जन्ममरणादिलक्षणात्॥ येयं
सांख्येबुद्धिरुक्तायोगेवक्ष्यमाणा
चसा॥ ४१॥॥ २

व्यवसायात्मिका निश्चयस्वभावा एकैव बुद्धिः इतरविपरीतबुद्धिशाखाभेदस्य बाधिका
46 सम्यक्प्रमाणजनितत्वात् ॥ इह श्रेयोमार्गे हे कुरुनंदन ॥ याः पुनरितरा बुद्धयः यासां शा
खाभेदप्रचारवशादनंतोऽपारोऽनुपरतः संसारः नित्यप्रततो भवति प्रमाणजनितवि
वेकबुद्धिनिमित्तवशाच्चोपरतास्वनंतभेदबुद्धिषु संसारोऽप्युपरमते ॥ ताः बुद्धयो

व्यवसायात्मिका बुद्धिरेकेह कुरुनंदन ॥ बहु
शाखा ह्यनंताश्च बुद्धयोऽव्यवसायिनां ॥ ४१ ॥ ॥

बहुशाखाः बह्व्यः शाखा यासां ता बहुशाखाः बहुभेदा इत्यर्थः ॥ प्रतिशाखाभेदेन ह्य
नंताश्च बुद्धयः ॥ केषामव्यवसायिनां ॥ प्रमाणजनितविवेकबुद्धिरहितानामित्य
र्थः ॥ येषां व्यवसायात्मिका बुद्धिर्नास्तीति ॥ ४१ ॥ ॥

गी·भा· यामिमांवक्ष्यमाणांपुष्पितांपुष्पितइववृक्षःशोभमानांश्रूयमाणरमणीयांवाचंवाक्यल
२१ 47 क्षणांवदंति॥ केअविपश्चितः॥ अल्पमेधसः॥ अविवेकिनइत्यर्थः॥ वेदवादरताः॥ बह्वर्थ

यामिमांपुष्पितांवाचंप्रवदंत्यविपश्चितः॥ वे
दवादरताःपार्थनान्यदस्तीतिवादिनः॥ ४२॥

वादफलसाधनप्रकाशकेषुवेदवाक्येषुरताःपार्थ॥ नान्यत्स्वर्गपश्वादिफलसाधने २१
भ्यःकर्मभ्यःअस्तीत्येवंवादिनोवदनशीलाःतेच ॥४२॥ ॥ ॥ ॥

कामात्मानः कामस्वभावाः ॥ कामपरा इत्यर्थः ॥ स्वर्गपराः स्वर्गः परः पुरुषार्थो येषां ते
स्वर्गपराः स्वर्गप्रधानाः ॥ जन्मकर्मफलप्रदां ॥ कर्मणः फलं जन्मैव कर्मफलं तत्प्रदда
तीति जन्मकर्मफलप्रदां वाचं प्रवदंतीत्यनुषज्यते ॥ क्रियाविशेषबहुलां ॥ क्रियाणां वि
शेषाः क्रियाविशेषाः ॥ ते बहुला यस्यां तां वाचं स्वर्गपशुपुत्राद्यर्थः ॥ ययाबाहुल्येन प्र

कामात्मानः स्वर्गपरा जन्मकर्मफलप्रदां ॥ क्रि
याविशेषबहुलां भोगैश्वर्यगतिं प्रति ॥ ४३ ॥

काश्यते ॥ भोगैश्वर्यगतिं प्रति ॥ भोगश्च ऐश्वर्यं च ते भोगैश्वर्ये तयोर्गतिः प्राप्तिः ॥ भोगै
श्वर्यगतिः ॥ तां प्रति साधनभूता ये क्रियाविशेषाः ॥ तद्बहुलां वाचं प्रवदंतो मूढाः ॥ सं
सारे परिवर्तंत इत्यभिप्रायः ॥ तेषां च ॥ ४३ ॥ ॥ ॥ ॥ ॐ नमः शिवाय ॥

गी॰भा॰ भोगैश्वर्यप्रसक्तानां भोगः कर्तव्यः ऐश्वर्यं चेति भोगैश्वर्ये ॥ तयोरेव प्रणयवतां तदात्मभूतानां
२२ ५१ तया क्रियाविशेषबहुलया वाचा ॥ अपहृतचेतसां ॥ आच्छादितविवेकप्रज्ञानां ॥ व्यवसाया
त्मिकासंशयविपर्ययरहिता बुद्धिः समाधौ न समाधीयते ॥ अस्मिन्पुरुषोपभोगाय सर्वमिति समा

भोगैश्वर्यप्रसक्तानां तयापहृतचेतसां ॥ व्यव
सायात्मिका बुद्धिः समाधौ न विधीयते ॥ ४४ ॥

धिरंतःकरणं बुद्धिः तस्मिन्समाधौ न विधीयते न स्थिरीभवतीत्यर्थः ॥ एवं विवेक २२
बुद्धिरहिताः तेषां कामात्मनां ॥ ४४ ॥
शिवजी

त्रैगुण्यविषयाःत्रैगुण्यंसंसारोविषयःप्रकाशयितव्योयेषांवेदानांतेवेदास्त्रैगुण्यवि
षयाः॥त्वंतुनिस्त्रैगुण्योभवअर्जुननिष्कामोभवेत्यर्थः॥सुखदुःखहेतूसप्रतिपक्षौपदा
र्थौद्वंद्वशब्दवाच्यौ॥ततोनिर्गतोनिर्द्वंद्वोभव॥त्वंनित्यसत्वस्थःसदासत्वगुणाश्रितो
भव॥तथानिर्योगक्षेमः॥अनुपात्तस्योपादनंयोगः॥उपात्तस्यरक्षणंक्षेमःयोगक्षेम

त्रैगुण्यविषयावेदानिस्त्रैगुण्योभवार्जुन॥निर्द्वं
द्वोनित्यसत्वस्थोनिर्योगक्षेमआत्मवान्॥४५॥

प्रधानस्यश्रेयसिप्रवृत्तिर्दुःकरेत्यतोनिर्योगक्षेमोभव॥आत्मवानःअप्रमत्तश्चभव
एषतवोपदेशःस्वधर्ममनुतिष्ठतःसर्वेषुवेदोक्तेषुकर्मसुयान्यनंतानिफलानि
तानिनापेक्षतेनचेत्किमर्थंतानीश्वरायेत्यनुदीयेतइति॥उच्यतेस्याग्रस्लो॥४५॥

यथालोकेकूपतडागाद्यनेकस्मिन्नुदपानेपरिच्छिन्नोदकेयावान्यावत्परिमाणः स्नान
पानादिरर्थः फलंप्रयोजनंनससर्वोऽर्थः सर्वतः संप्लुतोदकेपिसोर्थस्तावानेवसंपद्यते ॥
तत्रान्तर्भवतीत्यर्थः ~~सुखाकर्मफलेतस्मातेस्थानेदातवकर्मफलम्~~ ॥ एवंतावांस्तावत्परिमा
णएवसंपद्यते ॥ सर्वेषुवेदेषु ॥ वेदोक्तेषुकर्मसु ॥ योर्थोयत्कर्मफलं ॥ सोर्थोब्राह्मणस्य
विजानतः संन्यासिनः परमार्थतत्त्वंविजानतोयोर्थोयद्विज्ञानफलं ॥ सर्वतः संप्लु।

यावानर्थउदपानेसर्वतः संप्लुतोदके ॥ तावान्सर्वेषुवेदेषुब्राह्मणस्यविजानतः ॥ ४६ ॥

तोदकस्थानीयंतस्मिंस्तावानेवसंपद्यते ॥ तत्रान्तर्भवतीत्यर्थः ॥ यथाकृतायविजिता।
याधरेयाः संयन्त्येवमेनंसर्वंतदभिसमेतियत्किंचित्प्रजाः साधुकुर्वन्तियस्तद्वेदयत्।
सवेदेतिश्रुतेः ॥ सर्वंकर्माखिलमितिचवक्ष्यति ॥ तस्मात्प्राक्ज्ञाननिष्ठाधिकारप्राप्तेः २३
कर्मण्यधिकृतेनकूपतडागाद्यर्थस्थानीयमपिकर्मकर्तव्यंतवचस्लं ॥ ४६ ॥

कर्मण्येवाधिकारः नज्ञाननिष्ठायां॥तेतव॥तत्रचकर्मकुर्वतोमाफलेष्वधिकारोस्तु
52 कर्मफलतृष्णामाभूत्॥कदाचनकस्यांचिदवस्थायामित्यर्थः॥यदाकर्मफलेतृ
ष्णातेस्यात्तदात्वंकर्मफलप्राप्तेर्हेतुःस्याः एवंकर्मफलेमाहेतुर्भूः यदाहिकर्मफल

कर्मण्येवाधिकारस्तेमाफलेषुकदाचन ॥ मा
कर्मफलहेतुर्भूर्मातेसंगोस्त्वकर्मणि ॥ ४७ ॥

तृष्णाप्रयुक्तःकर्मणिप्रवर्त्तते॥तदाकर्मफलस्यैवजन्मनोहेतुर्भवेत्॥यदिकर्म
फलंनेष्यतेकिंकर्मणादुःखरूपेणेति॥मातेतवसंगोस्त्वकर्मणि॥अकरणेप्रीति
र्माभूत्॥यदिकर्मफलप्रयुक्तेननकर्त्तव्यंकर्मकथंतर्हिकार्यमित्युच्यते॥स्थलं॥४८॥

योगस्थः सन् कर्माणि कुरु ॥ केवलमीश्वरार्थं तत्रापीश्वरो मे तुष्यत्विति संगं त्यक्त्वा धनंज
य ॥ फलतृष्णाशून्येन क्रियमाणे कर्मणि ॥ सत्त्वशुद्धिजा ज्ञानप्राप्तिलक्षणा सिद्धिः ॥

योगस्थः कुरु कर्माणि संगं त्यक्त्वा धनंजय ॥ सि
द्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते ॥४८॥

तद्विपर्ययजासिद्धिस्तयोः ॥ सिद्ध्यसिद्ध्योरपि समस्तुल्यो भूत्वा कर्माणि कुरु ॥ कोसौ
योगो यत्रस्थः कुर्वित्युक्तं ॥ इदमेव तत् ॥ सिद्ध्यसिद्ध्योः समत्वं योग उच्यते ॥४८॥

54

यत्तुनः समत्वबुद्धियुक्तमीश्वराराधनार्थं कर्म तस्मात् कर्मणः ॥ दूरेणातिविप्रकर्षे
ण अवरमधमं निकृष्टं कर्म फलार्थिना क्रियमाणं ॥ बुद्धियोगात्समत्वबुद्धियुक्तात्क
र्मणः ॥ जन्ममरणादिहेतुत्वात् ॥ हे धनंजय ॥ यत एवं योगविषयायां बुद्धौ तत्वविपाक।

दूरेण ह्यवरं कर्म बुद्धियोगाद्धनंजय ॥ बुद्धौ
शरणमन्विच्छ कृपणाः फलहेतवः ॥४९॥

जायां वा सांख्यबुद्धौ शरणमाश्रयमभयप्राप्तिकारणमन्विच्छ प्रार्थयस्व ॥ परमात्म
ज्ञानप्राप्तिकारणीभवेत्यर्थः ॥ अतोवरं कर्म कुर्वाणाः कृपणा दीनाः फलहेतवः ॥ फलतृष्णा
प्रयुक्ताः सन्तः यो वा एतदक्षरं गार्ग्यविदित्वास्माल्लोकात्प्रैति स कृपण इति श्रुतेः ॥४९॥

 समत्वबुद्धियुक्तःसन्स्वधर्ममनुतिष्ठन्यत्फलंप्राप्नोतितच्छृणु॥ बुद्धियुक्तःसमत्वविष
 ययाबुद्ध्यायुक्तोबुद्धियुक्तः॥जहातिपरित्यजति॥इहास्मिन् लोके॥उभेसुकृतदुःकृते।
पुण्यपापेसत्त्वशुद्धिज्ञानप्राप्तिद्वारेण॥यतःतस्मात्॥समत्वबुद्धियोगाययुज्यस्व

बुद्धियुक्तोजहातीहउभेसुकृतदुःकृते॥त
स्माद्योगाययुज्यस्वयोगःकर्मसुकौशलं॥५०॥

टस्वयोगोहिकर्मसुकौशलं॥स्वधर्माख्येषुकर्मसुप्रवर्तमानस्ययासिद्ध्यसिद्ध्योः॥स
मत्वबुद्धिःईश्वरार्पितचेतस्तयातत्कौशलंकुशलभावः॥तद्धिकौशलंयद्बंधस्वभा
वान्यपिकर्माणिसमत्वबुद्ध्यास्वभावान्निवर्तंते॥तस्मात्समत्वबुद्धियुक्तोभवत्यस्मात् ५०

56 कर्मफलं त्यक्त्वेति व्यवहितेन संबंधः ॥ इष्टानिष्टदेहप्राप्तिः कर्मजं फलं कर्मभ्यो जातं ॥ बु
द्धियुक्ताः समत्वबुद्धियुक्ताः संतो हि यस्मात् ॥ फलं त्यक्त्वा परित्यज्य मनीषिणः ज्ञानिनो

कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः ॥ जन्म
बंधविनिर्मुक्ताः पदं गच्छंत्यनामयं ॥ ५१ ॥ ॥ ॥ ॥

भूत्वा जन्मबंधविनिर्मुक्ताः ॥ जन्मैव बंधः जन्मबंधः तेन विनिर्मुक्ताः जीवंत एव जन्
मबंधविनिर्मुक्ताः संतः परमं पदं विष्णोर्मोक्षाख्यं गच्छंति ॥ अनामयं सर्वोपद्रवरहि

अथवाबुद्धियोगाद्धनंजयेत्यारभ्यपरमार्थदर्शनलक्षणोवसर्वतःसंप्लुतोदकस्थानीयाक
र्मयोगजासत्वशुद्धिजनिताबुद्धिर्दर्शिता॥साक्षात्सुकृतदुःकृतप्रहाणादिहेतुत्वश्रव।
णात॥योगानुष्ठानजनितसत्वशुद्धिजाबुद्धिःकदाप्राप्स्यतइत्युच्यते॥यदायस्मिन्का।
लेतेतवमोहकलिलंमोहात्मकंअविवेकरूपंकालुष्यंयेनात्मानात्मविवेकबोधक

यदातेमोहकलिलंबुद्धिर्व्यतितरिष्यति॥तदागं
तासिनिर्वेदंश्रोतव्यस्यश्रुतस्यच ॥५२॥ ॥ ॥

लुषीकृत्यविषयंप्रत्यंतःकरणंप्रवर्त्तते॥तत्तेतवबुद्धिर्व्यतितरिष्यतिव्यतिक्रमिष्यतिशु
द्धिभावमापत्स्यतइत्यर्थः॥तदातस्मिन्कालेगंतासिप्राप्तासिनिर्वेदंवैराग्यंश्रोतव्यस्य
श्रुतस्यचतदाश्रोतव्यंश्रुतंचनिष्फलंप्रतिपत्स्यतइत्यभिप्रायः ॥५२॥ ॥ ॥

मोहकलिलात्ययद्वारेणालब्धात्मविवेकजप्रज्ञः ॥ कदा कर्मयोगजं फलं परमात्मयोगमवाप्स्यसीति तच्छृणु ॥ श्रुतिविप्रतिपन्नाऽनेकसाध्यसाधनसंबंधप्रकाशनश्रुतिभिः श्रवणैर्विप्रतिपन्ना नानाप्रतिपन्ना श्रुतिविप्रतिपन्ना विक्षिप्ता सती ते तव बुद्धिर्यदा यस्मिन् ॥

श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला ॥ समा-
धावचला बुद्धिस्तदा योगमवाप्स्यसि ॥५३॥

काले स्थास्यति स्थिरीभूता भविष्यति ॥ निश्चला विक्षेपचलनवर्जिता सती समाधौ स-
माधीयते चित्तमस्मिन्निति आत्मनीत्येतत् अचला तत्रापि विकल्पवर्जितेत्येतत् ॥ बुद्धि-
रन्तःकरणं तदा तस्मिन् काले योगमवाप्स्यसि ॥ विवेकप्रज्ञां समाधिं प्राप्स्यसि ॥५३॥

प्रश्नवीजमुपालभ्यार्जुनउवाचलब्धसमाधिप्रज्ञस्यलक्षणंवुभुत्सया ॥ स्थितप्रज्ञस्येति स्थि
ताप्रतिष्ठा ॥ अहमस्मिपरंब्रह्मेतिप्रज्ञायस्यसस्थितप्रज्ञः ॥ तस्यकाभाषाभाषणंवचनंकथम
सौपरैर्भाष्यते ॥ समाधिस्थस्यसमाधौस्थितस्यकेशव ॥ स्थितधीःस्थितप्रज्ञस्स्वयंवाकिंप्रभा

अर्जुनउवाच ॥ स्थितप्रज्ञस्यकाभाषासमाधिस्थस्यके
शव ॥ स्थितधीःकिंप्रभाषेतकिमासीतव्रजेतकिं ॥ ५४ ॥

षेत ॥ किमासीतव्रजेतकिं ॥ आसनंव्रजनंवातस्यकथमित्यर्थः ॥ ५४ ॥ ॥ ॥ ॥

ॐनमःशिवायॐ ॥ ॥ ॐनमःशिवाय

॥ ॐ ॥

60
स्थितप्रज्ञस्य लक्षणमनेन श्लोकेन पृच्छ्यते ॥ यो ह्यादित एव संन्यस्य कर्माणि ज्ञाननि
ष्ठायां प्रवृत्तो यश्च कर्मयोगेन तयोः स्थितप्रज्ञस्य प्रजहातीत्यारभ्याध्यायपरिसमाप्तिप
र्यंतं स्थितप्रज्ञस्य लक्षणं साधनं चोपदिश्यते ॥ सर्वत्रैव ह्यध्यात्मशास्त्रे कृतार्थलक्षणा
नि यानि तान्येव साधनान्युपदिश्यंते ॥ यत्नसाध्यत्वात् यानि यत्नसाध्यानि साधनानि ।
लक्षणानि च भवंति तानि ॥ प्रजहाति प्रकर्षेण जहाति परित्यजति ॥ यदा कामानिच्छा
भेदान् हे पार्थ मनोगतान् मनसि प्रविष्टान् ॥ सर्वकामपरित्यागे तुष्टिकारणाभावा

श्रीभगवानुवाच ॥ प्रजहाति यदा कामान्सर्वान्पार्थ मनोगतान् ॥ आत्मन्येवात्म
नातुष्टः स्थितप्रज्ञस्तदोच्यते ॥ ५५ ॥

च्छरीरधारणनिमित्तशेषे च सत्युन्मत्तप्रम
त्तस्येव प्रवृत्तिः प्राप्ता ॥ इत्यत उच्यते ॥ आत्मन्येव प्रत्यगात्मस्वरूप एवात्मना स्वेनैव बा
ह्यार्थलाभनिरपेक्षः तुष्टः परमार्थदर्शनामृतरसलाभेनान्यस्मादलंप्रत्ययवा
न् स्थितप्रज्ञः स्थिता आत्मानात्मविवेकजा प्रतिष्ठिता प्रज्ञा यस्य स स्थितप्रज्ञः विद्वा
न् तदोच्यते ॥ त्यक्तपुत्रवित्तलोकैषणः संन्यासी आत्मारामः आत्मक्रीडः स्थितप्रज्ञ इ त्यर्थः ५५

गी॰भा॰ किंच॥ दुःखेष्वाध्यात्मिकादिषु अनुद्विग्नं नोद्विग्नं न प्रक्षुभितं दुःखप्राप्तौ मनो यस्य सोय
२८ 61 मनुद्विग्नमनाः॥ तथा सुखेषु प्राप्तेषु विगता स्पृहा तृष्णा यस्य॥ नाग्निरिवेंधनाद्याधाने य
सुखान्यनु विवर्द्धते स विगतस्पृहः॥ वीतरागभयक्रोधः रागश्च भयं च क्रोधश्च रागभयक्रो
धाः वीता रागभयक्रोधा यस्मात् स वीतरागभयक्रोधः स्थितधीः स्थितप्रज्ञः मुनिः संन्या

दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः॥ वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते॥५६॥
यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभं॥ नाभिनंदति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता॥५७॥

यः सर्वत्रेति।

सी तदोच्यते॥५६॥ किंच॥ यो मुनिः सर्वत्र देहजीवितादिष्वपि अनभिस्नेहः अभिस्नेहव
र्जितः॥ तत्तत्प्राप्य शुभाशुभं तत्तच्छुभमशुभं वा लब्ध्वा नाभिनंदति॥ शुभं प्राप्य न हृष्यति
अशुभं च प्राप्य न द्वेष्टीत्यर्थः॥ तस्यैवं हर्षविषादवर्जितस्य विवेकप्रज्ञा प्रतिष्ठिता॥ २८
॥५७॥

62

किंच॥यदासंहरतिसम्यगुपसंहरतेच।अयंज्ञाननिष्ठायांप्रवृत्तोयतिः कूर्मोंगानीवयथाकू
र्मोभयात्स्वान्यंगान्युपसंहरतिसर्वतः॥एवंज्ञाननिष्ठः इंद्रियार्थेभ्यः सर्वविषयेभ्यउपसंहरते
तस्यप्रज्ञाप्रतिष्ठितेत्युक्तार्थंवाक्यं॥तत्रविषयाननाहरतस्त्वातुरस्यापिइंद्रियाणिकू
र्मांगानीवसंह्रियंतेनतुरसविषयोरागः सकथंसंह्रियतइत्युच्यते॥यद्यपिविषयोप।
लक्षितानिविषयशब्दवाच्यानिइंद्रियाणि॥अथवाविषयाः अनाह्रियमाणस्यनिराह

यदासंहरतेचायंकूर्मोंगानीवसर्वशः॥ इंद्रियाणींद्रियार्थेभ्यस्तस्यप्रज्ञाप्रतिष्ठिता
५८॥विषयाविनिवर्तंतेनिराहारस्यदेहिनः॥रसवर्जंरसोप्यस्यपरंदृष्ट्वानिवर्तते॥५९॥

रस्यकष्टेतपसिस्थितस्यमूर्खस्यापिविनिवर्तंते॥देहिनोदेहवतः॥रसवर्जंरसोरागः।
विषयेषुयः तंवर्जयित्वा॥रसशब्दोरागेप्रसिद्धः स्वरसेनप्रवृत्तोरसिकोरसज्ञइत्या।
दिदर्शनात्॥सोपिरसोरंजनात्मकः सूक्ष्मः।अस्ययतेः परंपरमात्मतत्त्वंब्रह्मदृष्ट्वाउप
लभ्यअहमेवतदितिवर्तमानस्यनिवर्ततेनिर्बीजंविषयज्ञानंसंपद्यतइत्यर्थः॥ना
सतिसम्यग्दर्शनेरसस्योच्छेदः॥तस्मात्सम्यग्दर्शनात्मिकायाः प्रज्ञायाः स्थैर्यंकर्तव्यमि

॥२८॥

सम्यग्दर्शनलक्षणां प्रज्ञास्थैर्यं चिकीर्षता आदाविंद्रियाणि स्ववशे स्थापयितव्यानि॥ यस्मा
दऽनवस्थापने दोषमाह॥ यततः यत्नं कुर्वतः हि यस्मादपि कौंतेय पुरुषस्य विपश्चितः
मेधाविनोपीति व्यवहितेन संबंधः इंद्रियाणि प्रमाथीनि प्रमथनशीलानि विषयाभिमुखं
हि पुरुषं विक्षोभयंति॥ आकुलीकुर्वंति॥ आकुलीकृत्य च हरंति प्रसभं प्रसह्य॥ प्रकाशमे

यततो ह्यपि कौंतेय पुरुषस्य विपश्चितः॥ इंद्रियाणि प्रमाथीनि हरंति प्रसभं मनः॥६०॥
तानि सर्वाणि संयम्य युक्त आसीत मत्परः॥ वशे हि यस्येंद्रियाणि तस्य प्रज्ञा प्रतिष्ठिता॥६१॥

वपश्यतः विवेकज्ञानयुक्तं मनः यतः तस्मात्॥६०॥ तानि सर्वाणि संयम्य वशीकृत्य युक्तः
समाहितः सन्॥ आसीत मत्परः॥ अहं वासुदेवः सर्वप्रत्यगात्मा परो यस्य स मत्परः ना
स्याहं तस्मादित्यासीतेत्यर्थः॥ एवमासीनस्य यतेर्वशे हि यस्येंद्रियाणि वर्तंते॥ अभ्या
सबलात्तस्य प्रज्ञा प्रतिष्ठिता॥६१॥

64

अथेदानींपराभविष्यतःसर्वानर्थस्यमूलमिदमुच्यते॥ पुरुषस्यध्यायतश्चिंतयतः
विषयान्शब्दादिविषयविशेषानालोचयतःपुंसःसंगआसक्तिःप्रीतिस्तेषुविषये

ध्यायतोविषयान्पुंसः॥संगस्तेषूपजायते॥ संगा
त्संजायतेकामःकामात्क्रोधोभिजायते॥६२॥॥॥

षूपजायतेउत्पद्यते॥ संगात्प्रीतेःसंजायतेसमुत्पद्यतेकामः॥तस्मात्कामात्कुत
श्चित्प्रतिहतात्॥क्रोधोभिजायते ॥६२॥ ॥ ॥ॣ॥ ॥ ॥॥

क्रोधाद्भवति संमोहः ॥ अविवेकः कार्याकार्यविषयः भवतीति संबध्यते ॥ क्रुद्धो हि संमूढः
सन् गुरुमप्याक्रोशति संमोहात्स्मृतिविभ्रमः ॥ शास्त्राचार्योपदेशाहितसंस्कारजनिता
याः स्मृतेः स्याद्विभ्रमः ॥ भ्रंशः स्मृत्युत्पत्तिनिमित्तप्राप्तौ अनुत्पत्तिः ततः स्मृतिभ्रंशाद्बुद्धेर्ना
शः कार्याकार्यविषयविवेकायोग्यता अंतःकरणस्य बुद्धेर्नाश उच्यते ॥ बुद्धिनाशात्प्र

क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः ॥ स्मृ
तिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ॥ ६३ ॥

णश्यति ॥ तावदेव हि पुरुषो यावदंतःकरणं कार्याकार्यविषयविवेकयोग्यं ॥ तदयोग्य
त्वे नष्ट एव पुरुषो भवति ॥ अतः तस्यांतःकरणस्य बुद्धेर्नाशात्प्रणश्यति ॥ पुरुषार्थायो
ग्यो भवतीत्यर्थः सर्वानर्थस्य मूलमुक्तं विषयाभिध्यानं ॥ ६३ ॥

अथेदानीं मोक्षकारणमिदमुच्यते ॥ रागद्वेषवियुक्तैः रागश्च द्वेषश्च रागद्वेषौ तत्पुरःसरा इंद्रिया
66 णां प्रवृत्तिः स्वाभाविकी ॥ तत्र यो मुमुक्षुर्भवति स ताभ्यां वियुक्तैः श्रोत्रादिभिरिंद्रियैर्विषया
न् अवर्जनीयान् चरन् उपलभमानः आत्मवश्यैः आत्मनो वश्यानि वशीकृतानि तैरात्मव
श्यैः विधेयात्मा ॥ इच्छातो विधेय आत्मांतःकरणं यस्य सोयं प्रसादमधिगच्छति ॥ प्रसादः

रागद्वेषवियुक्तैस्तु विषयानिंद्रियैश्चरन् ॥ आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति ॥ ६४ ॥
प्रसादे सर्वदुःखानां हानिरस्योपजायते ॥ प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते ॥ ६५ ॥

प्रसन्नता स्वास्थ्यं ॥ ६४ ॥ प्रसादे सति किं स्यादित्युच्यते ॥ प्रसादे सर्वदुःखानां आध्यात्मिकादी
नां हानिर्विनाशः अस्य यतेः उपजायते ॥ किंच प्रसन्नचेतसः स्वच्छांतःकरणस्य हि यस्मा
दाशु शीघ्रं बुद्धिः पर्यवतिष्ठति ॥ आकाशमिव परि समंताद् ऽवतिष्ठते ॥ आत्मस्वरूपे
णैव निश्चला भवतीत्यर्थः ॥ ६५ ॥ ॥ ॥ ॥ ॥

गी·भा·
३१ 67

एवं प्रसन्नचेतसः ॥ स्थिरबुद्धेः कृतकृत्यता यतः यस्माद्रागद्वेषवियुक्तैरिन्द्रियैः ॥ शास्त्राविरुद्धेः
कृतकृत्यता यतस्तस्माद्रागद्वेषवियुक्तैरिन्द्रियैः शास्त्राविरुद्धेष्ववर्जनीयेषु युक्तः ॥ समाचरे
त् इति वाक्यार्थः ॥ सेयं प्रसन्नता स्तूयते ॥ अयुक्तस्यासमाहितचित्तस्य बुद्धिरात्मस्वरूपवि

नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना ॥ न
चाभावयतः शान्तिरशान्तस्य कुतः सुखं ॥ ६६ ॥

षया नास्ति न विद्यते न भवतीत्यर्थः ॥ नास्ति अयुक्तस्य भावना आत्मज्ञानाभिनिवेशः न
यान चास्य भावयतः ॥ आत्मज्ञानाभिनिवेशमकुर्वतः शान्तिरुपशमो न विद्यते ॥ अशा
न्तस्य कुतः सुखं ॥ इन्द्रियाणां हि विषयसेवातृष्णातो निवृत्तिर्या तत्सुखं ॥ न तत्र विषयतृष्णा

दुःखमेव हि तस्मात्तस्यां सत्यां ॥ सुख
स्य गंधमात्रमपि नोपपद्यत इत्यर्थः ॥ ६६ ॥

68 अयुक्तस्य कस्माद्बुद्धिर्नास्तीत्युच्यते ॥ इंद्रियाणां हि चरतां स्वविषयेषु प्रवर्त्तमानानां यन्मनो
ऽनुविधीयते ॥ अनुवर्त्तते ॥ तदिंद्रियविषयविकल्पनप्रवृत्तं मनोऽस्य यतेः ॥ प्रज्ञामात्मानात्
मविवेकजां हरति नाशयति ॥ वायुरिव नावमंभसि उदके जिगमिषतां मार्गादुद्धृत्य ॥ अ
मार्गे यथा वायुः प्रवर्त्तयति ॥ एवमात्मविषयां प्रज्ञां हृत्वा मनो विषयविषयां करोति ॥ ६७

इंद्रियाणां हि चरतां यन्मनोऽनुविधीयते ॥ तदस्य हरति प्रज्ञां वायुर्नावमिवांभसि ॥ ६७ ॥
तस्माद्यस्य महाबाहो निगृहीतानि सर्वशः ॥ इंद्रियाणींद्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता
॥ ६८ ॥ ॥

यततो ह्यपीति ॥ उपन्यस्तस्यार्थस्यानेकधोपपत्तिमुक्त्वा तं चार्थमुपपर्ययोपसंहरति
तस्मादिति ॥ इंद्रियाणां प्रवृत्तौ दोष उपपादितो यस्मात् ॥ तस्माद्यस्य यतेः हे महाबाहो इं
द्रियाणि सर्वशः सर्वप्रकारैर्मनस्यादिभेदैः निगृहीतानि इंद्रियार्थेभ्यः तस्य प्रज्ञा प्रति
ष्ठिता ॥ ६८ ॥ ॥॥॥ ॥ ॥

गी·भा·
३२ 69

योयंलौकिकोवैदिकश्चव्यवहारःसउत्पन्नविवेकज्ञानस्यस्थितप्रज्ञस्याविद्याकार्यत्वादविद्या
निवृत्तौनिवर्त्तते॥अविद्यायाश्चविद्याविरोधित्वान्निवृत्तिरित्येतमर्थंस्फुटीकुर्वन्नाह॥यानिशा
रात्रिःसर्वपदार्थानामविवेककरीतमःस्वभावत्वात्॥सर्वभूतानांसर्वेषांभूतानांकिंतत्पर
मार्थतत्वंस्थितप्रज्ञस्यविषयःयथानक्तंचराणामहरेवसदन्येषांनिशाभवतितद्वत्नक्तं
चरस्थानीयानामज्ञानांसर्वभूतानांनिशेवनिशापरमार्थतत्वमगोचरत्वादतद्बुद्धीनां।

यानिशासर्वभूतानांतस्यांजागर्त्तिसंयमी॥यस्यांजाग्रतिभूतानिसानिशापश्यतोमुनेः
॥६९॥

मा॥६२

तस्यांपरमार्थतत्वलक्षणायां॥अज्ञाननिद्रायाःप्रबुद्धोजागर्त्तिसंयमी॥संयमवान्॥जि
तेंद्रियोयोगीत्यर्थः॥यस्यांग्राह्यग्राहकभेदलक्षणायांअविद्यानिशायांप्रसुप्तान्येवभूतानि।
जाग्रतीत्युच्यंते॥यस्यांनिशायांप्रसुप्ताइवस्वप्नदृशः॥सानिशाअविद्यारूपत्वात्परमार्थ
तत्वंपश्यतोमुनेः॥अतःकर्माणिविद्यावस्थायामेवचोद्यंते॥नविद्यावस्थायांविद्याव। ३२
स्थायांदित्यसत्यामुदितेसवितरिशार्वरमिवतमःप्रणाशमुपगच्छति॥अविद्या॥प्राग्विद्यो

स्येतेः अविद्याप्रमाणादुद्यानस्थप्रमाणात्क्रियाकारकफलभेदरूपा सती सर्वकर्महेतुत्वं ।
70 प्रतिपद्यते नाप्रमाणादुद्यानस्थप्रमाणायाः कर्महेतुत्वोपपत्तिः यथोक्तम् ॥ उक्तवानेव दृष्टा स्या
वत् ॥ अविद्या किं करिष्यति प्रमाणमस्ते तेन न वेदेन मम चोदितं कर्तव्यं कर्मेति कर्मणि कर्त्ता ।
प्रवर्तते ॥ नाविद्यामात्रमिदं सर्वं निशेवेति ॥ यस्य पुनर्निशेवाविद्यामात्रमिदं सर्वं भेद ।
जातमिति ॥ तस्यात्मज्ञस्य सर्वकर्मसंन्यास एवाधिकारो न प्रवृत्तौ ॥ तथा च तद्दर्शयिष्य
ति ॥ तद्बुद्धयस्तदात्मान इत्यादिना ॥ ज्ञाननिष्ठायामेव तस्याधिकारः ॥ तत्रापि प्रवर्तक
प्रमाणाभावे प्रवृत्त्यनुपपत्तिरिति चेन्न स्वात्मविषयत्वादात्मज्ञानस्य ॥ न ह्यात्मनः स्वात्म
नि प्रवर्तकप्रमाणापेक्षता ॥ आत्मत्वादेव तदन्तत्वाच्च सर्वप्रमाणानां प्रमाणत्वस्य न
ह्यात्मस्वरूपाधिगमे सति पुनः प्रमाणप्रमेयादिव्यवहारः संभवति ॥ प्रमातृत्वं ह्यात्म
नो निवर्तयति अंत्यं प्रमाणं निवर्तयदेव चाप्रमाणीभवति ॥ स्वप्नका
लप्रमाणमिव च प्रतिबोधे ॥ लोके च वस्त्वधिगमे प्रवृत्तिहे
तुत्वादर्शनात्प्रमाणस्य ॥ तस्मान्नात्मविदः कर्मण्यधिकार इति सिद्धं ॥ ६९ ॥

विद्वषस्त्यक्तैषणस्य स्थितप्रज्ञस्य यतेरेव मोक्षप्राप्तिर्न त्वसंन्यासिनः कामकामिन इत्येतमर्थं
 दृष्टान्तेन प्रतिपादयिष्यन्नाह ॥ आपूर्यमाणमद्भिः अचलप्रतिष्ठं ॥ अचलतया प्रतिष्ठा यस्य
तमचलप्रतिष्ठं समुद्रमापः ॥ सर्वतोगताः ॥ प्रविशंति ॥ स्वात्मस्थमविक्रियमेव सन्तं यद्वत्
तद्वत्कामा विषयसंनिधावपि सर्वत इच्छाविशेषा यं समुद्रमिव आपो विकुर्वंतः ॥ प्रविश।

आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रवि
शंति यद्वत् ॥ तद्वत्कामा यं प्रविशंति सर्वे स
शान्तिमाप्नोति न कामकामी ॥ ७० ॥ ॥ ॥

ति सर्वे आत्मन्येव प्रविलीयंते ॥ न स्वात्मवशं कुर्वंति ॥ स शान्तिं मोक्षमाप्नोति ने
तरः कामकामी काम्यन्त इति कामा विषयाः ॥ तान्कामयितुं शीलं यस्य स कामका
मी नैव प्राप्नोतीत्यर्थः ॥ ७० ॥ ॥

यस्मादेवं तस्मात् ॥ विहाय परित्यज्य कामानशेषतः कार्त्स्न्येन ॥ यः संन्यासी विद्वान् ॥ पु
72 मान् चरति पर्यटतीत्यर्थः ॥ जीवनमात्रचेष्टाशेषः ॥ निस्पृहः ॥ शरीरजीवनमात्रेपि नि
र्गता स्पृहा यस्य स निस्पृहः सन् ॥ निर्ममः ॥ शरीरजीवनमात्राक्षिप्तपरिग्रहेपि ममेद

विहाय कामान्यः सर्वान्पुमांश्चरति निस्पृहः ॥ निर्म
मो निरहंकारः स शान्तिमधिगच्छति ॥ ७१ ॥ ॥

मित्यभिनिवेशवर्जितः ॥ निरहंकारः ॥ विद्यावत्त्वादिनिमित्तात्मसंभावनारहित इत्येतत् ॥
स एवंभूतः स्थितप्रज्ञो ब्रह्मवित् ॥ शान्तिं सर्वसंसारदुःखोपशमलक्षणां निर्वाणा
ख्याम् अधिगच्छति प्राप्नोति ॥ ७१ ॥ ॥

गी·टी·
२५ 73

मेषाज्ञाननिष्ठाऽल्पयते॥ एषायथोक्ताब्राह्मीब्रह्मणिभवेयंस्थितिः॥सर्वंकर्मसंन्यस्यब्रह्म
स्वरूपेणावस्थानमित्येतत्॥नैनांस्थितिंप्राप्यलब्ध्वानविमुह्यतिनविमोहंगच्छति
प्राप्नोति॥स्थित्वास्यांस्थितौब्राह्म्यांयथोक्तायामंतकालेप्यंतेवयस्यपिब्रह्मनिर्वाणंब्र।

एषाब्राह्मीस्थितिःपार्थनैनांप्राप्यविमुह्यति॥स्थित्वास्यामंतका
लेपिब्रह्मनिर्वाणमृच्छति॥७२॥ इतिश्रीद्वितीयोध्यायः॥२॥॥

ह्मणानिर्वृतिमोक्षंऋच्छति॥किंवक्तव्यं॥ब्रह्मचर्यादेवसंन्यस्ययावज्जीवंयोब्रह्मण्येवा।
वतिष्ठतेसब्रह्मनिर्वाणमृच्छतीति॥॥॥ इतिश्रीपरमहंसपरिव्राजकाचार्यश्रीशं
करभगवत्कृतौगीताविवरणेद्वितीयोध्यायः॥२॥॥ ॥ ॥॥॥ ॥शिव॥ २५

74 प्राप्तस्य प्रवृत्तिनिवृत्तिविषयस्य ते हेतुद्वयी भगवता निर्दिष्टे सांख्यबुद्धियोगबुद्धिरिति च
तत्र प्रजहाति यदा कामानित्यारभ्याध्यायपरिसमाप्तिपर्यंतं सांख्यबुद्ध्याश्रितानां संन्यासः
कर्तव्य इत्युक्तं तेषां तन्निष्ठतयैव च कृतार्थता उक्ता एषा ब्राह्मी स्थितिः पार्थेति ॥ अर्जुना
य च कर्मण्येवाधिकारस्ते मा ते संगोस्त्वकर्मणीति कर्मैव कर्तव्यमिति योगोक्तवान् ॥ तस्य च
योगबुद्धिमाश्रित्यनंतरमेव श्रेयः प्राप्तिमुक्तवान् ॥ तस्य च योगबुद्धिमाश्रित्यनंतरमप
व श्रेयः प्राप्तिमुक्तवान् तदेतदालक्ष्य पर्याकुलीभूतोऽर्जुन उवाच ॥ कथं भक्ताय श्रेयो
र्थिने यत्साक्षाच्छ्रेयः प्राप्तिसाधनं सांख्यबुद्धिनिष्ठां श्रावयित्वा मां कर्मणि दृष्टादृष्टाने
कानर्थयुक्ते पारंपर्येणाप्यनैकांतिकश्रेयः प्राप्तिफले नियुंज्यादिति युक्तः पर्याकुली
भावोऽर्जुनस्य तदनुरूपश्च प्रश्नो ज्यायसी चेदित्यादि प्रश्ननिराकरणवाक्यं च भगव
तोक्तं यथोक्तविभागविषये शास्त्रे केचित्तु अर्जुनस्य प्रश्नार्थमन्यथा कल्पयित्वा तत्प्र
तिकूलं भगवतः प्रतिवचनं वर्णयंति ॥ यथा चात्मना संबंधग्रंथे गीतार्थो निरूपितः ॥ त

गी॰भा॰ त्यतिकूलं वेदं पुनः प्रश्नप्रतिवचनयोरर्थं निरूपयंति॥ कथं तत्र संबंधग्रंथे तावत्सर्वेषामा
२५ 75 श्रमिणां ज्ञानकर्मणोः समुच्चयो गीताशास्त्रे निश्चितोर्थ इत्युक्तं॥ तत्रापि विशेषितं च॥ यावज्जीवं
श्रुतिचोदितानि कर्माणि परित्यज्य केवलादेव ज्ञानान्मोक्षः प्राप्यत इत्येतदेकांतेनैव प्रति।
षिद्धमिति॥ इह त्वाश्रमविकल्पं दर्शयता यावज्जीवं श्रुतिचोदितानामेव कर्मणां परित्याग ना४
उक्तः तत्कथमीदृशं विरुद्धमर्थमर्जुनाय ब्रूयाद्भगवान्॥ श्रोता वा कथं विरुद्धमर्थमव
धारयेत्॥ तत्रैतत्स्याद्गृहस्थानामेव श्रौतकर्मपरित्यागेन केवलादेव ज्ञानान्मोक्षः प्रति
षिध्यते॥ न त्वाश्रमांतराणामित्येतदपि पूर्वोत्तरविरुद्धमेव॥ कथं सर्वाश्रमिणां ज्ञानक
र्मणोः समुच्चयो गीताशास्त्रे निश्चितोर्थ इति प्रतिज्ञाय इह कथं तद्विरुद्धं केवलादेव ज्ञा।
नान्मोक्षं ब्रूयात्॥ आश्रमांतराणां॥ अथ मतं॥ श्रौतकर्मापेक्षयैतद्वचनं केवलादेव ज्ञाना
त्॥ श्रौतकर्मरहितानां गृहस्थानां मोक्षः प्रतिषिध्यत इति॥ तत्र गृहस्थो विद्यमानमपि स्मार्तं २५
कर्माविद्यमानवदुपेक्ष्य ज्ञानादेव केवलाद्विमुच्यत इति॥ एतदपि विरुद्धं कथं गृहस्थस्य
नां२

वस्मार्त्तकर्मणामसमुच्चिताज्ज्ञानान्मोक्षः प्रतिषिध्यते ॥ नत्वाश्रमान्तराणामिति ॥ कथं वि
76 वेकिभिः शाक्यमवधारयितुमिति ॥ किं च यदि मोक्षसाधनत्वेन स्मार्त्तानि कर्माणि गृहस्थैरे
तैः समुच्चीयन्ते ॥ तथा गृहस्थस्यापीष्यते स्मार्त्तैरेव समुच्चयो न श्रौतैः ॥ अथ श्रौतैः स्मा
र्त्तैश्च गृहस्थस्यैव समुच्चयो मोक्षायेष्यते तस्मात्तु स्मार्त्तकर्ममात्रसमुच्चिताज्ज्ञानान्मोक्ष
इति ॥ तच्चैवं सति गृहस्थस्यायासबाहुल्यं स्मार्त्तश्रौतं च बहुदुःखरूपं कर्म शिरस्यारोपि
तं स्यात् ॥ अथ गृहस्थस्यैवायासबाहुल्यकरणान्मोक्षः स्यात् ॥ नाश्रमान्तराणां ज्ञानादि
नित्यकर्मरहितत्वादिति ॥ तदप्यसत् ॥ सर्वोपनिषत्सु हि तेतिहासपुराणेषु योगशास्त्रे
षु च ॥ ज्ञानाङ्गत्वेन च मुमुक्षोः सर्वकर्मसंन्यासविधानादाश्रमविकल्पसमुच्चयविधा
नाच्च श्रुतिस्मृत्योः सिद्धः ॥ तर्हि सर्वाश्रमाणां ज्ञानकर्मणोः समुच्चयः ॥ न मुमुक्षोः सर्व
कर्मसंन्यासविधानात् ॥ पुत्रायाश्चाभिताचार्यं चरेति ॥ तस्माज्ज्ञानमेषा न परमामतिरिक्ता
माहुः न्यासएवात्यरेचयदिति न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुरिति
ब्रह्मचर्यादेव प्रव्रजेदित्याद्याः श्रुतयः त्यज धर्ममधर्मं च उभे सत्यानृते त्यज ॥ उभे सत्या

असंन्यासिविषयत्वात्प्रत्यवायप्राप्तेः न ह्यग्निकार्याद्यकरणात्संन्यासिनः प्रत्यवायः कल्पयितुं शक्यः यथा ब्रह्मचारिणां

गी·भा· न्तेनत्यक्तायेनत्यजसितत्यज॥ संसारमेवनिःसारंदृष्ट्वासारदिदृक्षया॥ प्रव्रजंत्यकृतोद्वाहाः
२६ 77 परंवैराग्यमाश्रिताः॥ इतिबृहस्पतिः॥ कर्मणाबध्यतेजंतुर्विद्ययाचविमुच्यते॥ तस्मात्
कर्मनकुर्वंतियतयःपारदर्शिनः इतिशुकानुशासनं॥ इहापिच॥ सर्वकर्माणिमन
सासंन्यस्यास्तइत्यादि॥ मोक्षस्यचाकार्यत्वान्मुमुक्षोःकर्मानर्थक्यं॥ नित्यानिप्रत्यवा
यपरिहारार्थानि इतिचेन्न॥ असंन्यासिनामपितावन्नित्यानामकरणादभावादेवभा
वरूपस्यप्रत्यवायस्योत्पत्तिःकल्पयितुंशक्या कथमसतःसज्जायेतइत्यसतःसज्ज
न्मासंभवश्रुतेः॥ यदिचविहिताकरणादसंभाव्यमपिप्रत्यवायंब्रूयाद्वेदस्तदानर्थ
करोवेदोऽप्रमाणमित्युक्तंस्यात्॥ विहितस्यकरणाकरणयोर्दुःखमात्रफलत्वात्तथा
चकारकंशास्त्रंनज्ञापकमित्यनुपपन्नार्थंकल्पितंस्यान्नचैतदिष्टं॥ तस्मात्संन्यासिनां
नकर्माणि॥ अतोज्ञानकर्मणोःसमुच्चयानुपपत्तिः॥ ज्यायसीचेदित्यर्जुनस्यप्रश्नानु
पपत्तेश्च॥ यदिहिभगवताद्वितीयेऽध्यायेज्ञानंचकर्मचसमुच्चित्यत्वयानुष्ठेयमित्यु २६
क्तंस्यात्ततोऽर्जुनस्यप्रश्नोऽनुपपन्नोज्यायसीचेत्कर्मणस्तेमताबुद्धिरित्यर्जुनायचेद्बुद्धि।

78 कर्माणित्वयाऽनुष्ठेयइत्युक्तेयाचकर्मणोज्यायसीबुद्धिःसाप्युक्तैवेति॥तत्किंकर्मणिघोरेमां
नियोजयसीत्युपालंभोनकथंचनोपपद्यते॥नचार्जुनस्यज्यायसीबुद्धिर्नानुष्ठेयेतिभग ३९
वतोक्तंपूर्वमितिकल्पयितुंयुक्तंयेनज्यायसीचेदितिप्रश्नःस्यात्॥यदिपुनरेकस्यपुरु
षस्यज्ञानकर्मणोर्विरोधाद्युगपदनुष्ठानंनसंभवतीतिभिन्नपुरुषानुष्ठेयत्वंभगवता
पूर्वमुक्तंततोयंप्रश्नउपपन्नोज्यायसीचेदित्यादि॥अविवेकतःप्रश्नकल्पनायामपिभि
न्नपुरुषानुष्ठेयत्वेनज्ञानकर्मनिष्ठयोर्भगवतःप्रतिवचनंनोपपद्यतेनचाज्ञाननिमि
त्तंभगवतःप्रतिवचनंकल्प्यमस्माच्चभिन्नपुरुषानुष्ठेयत्वेनज्ञानकर्मनिष्ठयोर्भग
वतःप्रतिवचनदर्शनाज्ज्ञानकर्मणोः[illegible]र्भगवतःप्रतिवचन
नं॥समुच्चयानुपपत्तिःकेवलादेवज्ञानान्मोक्षइत्येषोर्थोनिश्चितोगीतासुसर्वोपनिष
त्सुच॥ज्ञानकर्मणोरेकंवदनिश्चित्येतिचैकविषयैवप्रार्थनानुपपन्नाउभयोःसमुच्चयसं त्रा २
भवे॥कुरुकर्मैवतस्मात्त्वमितिचज्ञाननिष्ठासंभवमर्जुनस्यावधारणेन
दर्शयिष्यति ॥॥ ॥ऽ॥ ॥॥

गी॰ भा॰ ७९ 79

ज्यायसी श्रेयसी चेद्यदि कर्म्मणः सकाशात्ते तव मता अभिप्रेता बुद्धिर्ज्ञानं हे जनार्द्दन ॥ यदि बुद्धिकर्म्मणी समुच्चिते इष्टे तदेकं श्रेयःसाधनमिति ॥ कर्मणो ज्यायसी बुद्धिरिति च कर्म्मणोऽतिरिक्तकरणं बुद्धेरनुपपन्नमर्ज्जुनेन कृतं स्यान्नहि तदेव तस्मात्फलतोऽतिरिक्तं स्यात्तथा कर्म्मणः श्रेयस्करी भगवतोक्ता बुद्धिरश्रेयस्करं च कर्म कुर्विति प्रतिपादयति ॥ त

अर्जुन उवाच ॥ ज्यायसी चेत्कर्म्मणस्ते मता बुद्धिर्जनार्द्दन
तत्किं कर्म्मणि घोरे मां नियोजयसि केशव ॥ १ ॥

त्किं कारणमिति भगवत उपालंभमिव कुर्वन्‌ ॥ तत्किं कस्मात्कर्म्मणि घोरे क्रूरे हिंसालक्षणे मां नियोजयसि केशव इति च यदाह तदपि नोपपद्यते ॥ अथ स्मार्त्तेनैव कर्म्मणा समुच्चयः ॥ सर्वेषां भगवता कृतोऽर्ज्जुनेनावधारितश्चेत्तत्किं कर्म्मणि घोरे मां नियोजयसीत्यादिकमयुक्तं वचनम् ॥ १ ॥ ७९

80

किंच॥ व्यामिश्रेणेव॥ यद्यपि विविक्ताभिधायी भगवान्॥ तथापि मम मंदबुद्धेर्व्यामिश्र
मिव भगवद्वाक्यं प्रतिभाति॥ तेन मम बुद्धिं मोहयसीव॥ मे मम बुद्धेर्व्यामोहापनयनयता
यद्धि प्रवृत्तस्त्वं तु कथं मोहयस्यतो ब्रवीमि बुद्धिं मोहयसीवेति॥ तत्राभिन्नकर्तृक
योर्ज्ञानकर्मणोरेकपुरुषानुष्ठानासंभवं यदि मन्यसे तत्रैवमस्तिनितन्नयोरेकं बुद्धिं

व्यामिश्रेणेव वाक्येन बुद्धिं मोहयसीव मे॥ तदे
कं वद निश्चित्य येन श्रेयोहमाप्नुयां॥ २॥

कर्म वाश्चर्जुनस्येदमेव योरयं बुद्धिप्राज्ञवस्यात्तद्रूपमिति निश्चित्य वद॥ येन ज्ञाने
न कर्मणा वान्यतरेण श्रेयोहमाप्नुयां प्राप्नुयां यद्दि कर्मनिष्ठायां गुणभूतमपि
ज्ञानं भगवतोक्तं स्यात्॥ कथं तयोरेकं वदेत्येकविषयैवार्जुनस्य शुश्रूषा स्यान्न भग
वतोक्तं श्रेयोन्यतरदेव ज्ञानकर्मणोर्वक्ष्यामि॥ नैव द्वयंयेनोभयप्राप्त्यसंभवमात्मनोम

॥ २ ॥

गी·भा· ३८ 81

प्रश्नानुरूपमेवप्रतिवचनं ॥ लोकेस्मिनशास्त्रार्थानुष्ठानाधिकृतानांत्रैवर्णिकानांद्विविधा
द्विप्रकारानिष्ठास्थितिः ॥ अनुष्ठेयतात्पर्यंप्राक्पूर्वंसर्गादौप्रजाःसृष्ट्वातासामभ्युदयनिः
श्रेयसप्राप्तिसाधनंवेदार्थसंप्रदायंआविष्कुर्वताप्रोक्तामयासर्वज्ञेनेश्वरेण ॥ अनघअपाप
कासाद्विविधानिष्ठाइत्याह ॥ तत्रज्ञानयोगेनज्ञानमेवयोगस्तेनज्ञानयोगेनसांख्या

श्रीभगवानुवाच ॥ लोकेस्मिन्द्विविधानि
ष्ठापुराप्रोक्तामयानघ ॥ ज्ञानयोगेनसां
ख्यानांकर्मयोगेनयोगिनां ॥ ३ ॥

नां२

नांआत्मानात्मविषयविवेकज्ञानवतांब्रह्मचर्यादेवाश्रमात्कृतसंन्यासानांवे
दांतविज्ञानसुनिश्चितार्थानांपरमहंसपरिव्राजकानांब्रह्मण्येवावस्थितानांनिष्ठा
प्रोक्ता ॥ कर्मयोगेनकर्मैवयोगःकर्मयोगः तेनकर्मयोगेनयोगिनांकर्मिणांनि

82

ष्टाप्रोक्तेत्यर्थः॥यदिचैकेनपुरुषेणैकस्मैपुरुषार्थायज्ञानंकर्मचसमुच्चित्यानुष्ठे
यंभगवतेष्टमुक्तंवक्ष्यमाणंवागीतासुवेदेषुचोक्तंकथमिहार्जुनायोपसन्नाय
प्रियायविशिष्टभिन्नपुरुषकर्तृकेएवज्ञानकर्मनिष्ठेब्रूयाद्यदिपुनरर्जुनोज्ञानं
कर्मचद्वयंचानुष्ठातास्वयमेवानुष्ठास्यत्यन्येषांतुभिन्नपुरुषानुष्ठेयतांवक्ष्यामीति
मतंभगवतः॥कल्प्यतेतदारागद्वेषवानप्रमाणभूतोभगवान्कल्पितःस्यात्
तच्चायुक्तं॥तस्मान्नसमुच्चयोज्ञानकर्मणोर्यदर्जुनेनोक्तंकर्मणोज्यायस्त्वंबु
द्धेःतच्चस्थितमनिराकरणात्तस्याश्चसंन्यासिभिरेवानुष्ठे
यत्वं॥भिन्नपुरुषानुष्ठेयत्ववचनाद्भग
वतएवानुमतमिति
गम्यते॥२॥
ॐ ॐ

मांचबंधकारणेकर्मण्येवनियोजयसीति॥विषण्णमनसमर्जुनंनकर्मनारंभणीयमित्येवंप्र
त्यवस्थितमालक्ष्याहभगवान्।नकर्मणामनादिति॥अथवाज्ञानकर्मनिष्ठयोःपरस्परविरो
धादेकेनपुरुषेणयुगपदनुष्ठातुमशक्यत्वेसतीतरेतरानपेक्षयोरेवपुरुषार्थहेतुत्वेप्रा
प्तेकर्मनिष्ठायाज्ञाननिष्ठाप्राप्तिहेतुत्वेनपुरुषार्थहेतुत्वंनस्वातंत्र्येण॥ज्ञाननिष्ठातु
कर्मनिष्ठोपायलब्धात्मिकासतीस्वातंत्र्येणपुरुषार्थहेतुरिति॥अन्यानपेक्षेत्येतमर्थं

नकर्मणामनारंभान्नैष्कर्म्यंपुरुषोऽश्नुते॥नच
संन्यसनादेवसिद्धिंसमधिगच्छति॥४॥ ॥

प्रदर्शयिष्यन्नाह॥नकर्मणां॥कर्मणांक्रियमाणानांयज्ञादीनांइहजन्मनिजन्मांतरेवा
अनुष्ठितानांउपात्तदुरितक्षयहेतुत्वेनसत्वशुद्धिकारणानांतत्कारणत्वेनचज्ञानोत्पत्ति
हेतुत्वेनज्ञाननिष्ठाहेतूनां॥ज्ञानमुत्पद्यतेपुंसांक्षयात्पापस्यकर्मणः॥तथाऽऽदर्शतलप्र ३५
ख्येपश्यत्यात्मानमात्मनि॥इत्यादेःस्मरणात्॥अनारंभादननुष्ठानात्॥नैष्कर्म्यंनिः

कर्म्माभावं कर्म्मनिरपेक्षत्वं ज्ञानयोगेन निष्ठां निःक्रियात्मस्वरूपेणैवावस्थानमिति यावत्॥ नाश्नु
तेन प्राप्नोतीत्यर्थः॥ कर्म्मणामनारंभान्नैष्कर्म्यं नाश्नुत इति वचनात्तद्विपर्ययात्तेषामारंभा
न्नैष्कर्म्यमश्नुत इति गम्यते॥ कस्मात्पुनः कारणात्कर्म्मणामनारंभात्नैष्कर्म्यं नाश्नुत इत्यु
च्यते॥ कर्म्मारंभस्य नैष्कर्म्योपायत्वात्॥ न ह्युपायमन्तरेणोपेयप्राप्तिरस्ति॥ कर्म्मयोगोपायत्वं
च नैष्कर्म्यलक्षणस्य ज्ञानयोगस्य श्रुताविह च प्रतिपादनात्॥ श्रुतौ तावत्प्रकृतस्यात्मलोक
स्य वेदनोपायत्वेन॥ तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति॥ यज्ञेन दानेन तपसेत्या
दिना॥ कर्म्मयोगस्य ज्ञानयोगोपायत्वं प्रतिपादितं॥ इहापि संन्यासस्तु महाबाहो दुःखमा
प्तुमयोगतः॥ योगिनः कर्म्म कुर्वन्ति संगं त्यक्त्वात्मशुद्धये इति॥ यज्ञो दानं तपश्चैव पावनानि
मनीषिणामित्यादि प्रतिपादयिष्यति॥ ननु चाभयं सर्व्वभूतेभ्यो दत्त्वा नैष्कर्म्यमाचरेदित्या
दौ कर्त्तव्यकर्म्मसंन्यासादपि नैष्कर्म्यप्राप्तिं दर्शयति लोके च कर्म्मणामनारंभान्नैष्कर्म्यमिति
प्रसिद्धतरं ततश्च नैष्कर्म्यार्थिनः किं कर्म्मारंभेणेति प्राप्तमत आह॥ न च संन्यसनादेवेति
नापि संन्यसनादेव केवलात्कर्म्मत्यागमात्रादेव ज्ञानरहितात्सिद्धिं॥ नैष्कर्म्यलक्षणां

गी·भा· कस्मात्पुनःकारणात्कर्मसंन्यासमात्रादेवकेवलात्सिद्धिंनैष्कर्म्यलक्षणांपुरुषोनाधिगच्छ
३·85 तीतिहेत्वाकांक्षायामाह ॥ नहियस्मात्क्षणमपि ॥ किंचित्कालंजातुकदाचित्कश्चित्तिष्ठति ।
इत्यकर्मकृत्सन् ॥ कस्मात्कार्यतेह्यवशएवकर्म ॥ सर्वः ॥ प्राणीप्रकृतिजैः प्र
कृतितोजातैर्गुणैःसत्वरजस्तमोभिः ॥ अज्ञइतिवाक्यशेषः यतोवक्ष्यति ॥ गुणैर्योनविचा
ल्यतइति ॥ सांख्यानां ॥ पृथक्करणादज्ञानामेवहिकर्मयोगः ॥ नज्ञानिनांज्ञानिनां ।

नहिकश्चित्क्षणमपिजातुतिष्ठत्यकर्मकृत्
कार्यतेह्यवशःकर्मसर्वःप्रकृतिजैर्गुणैः ॥५॥

गुणैरचाल्यमानानां ॥ स्वतश्चलनाभावात्कर्मयोगोनोपपद्यते ॥ तथाचव्याख्या
तं ॥ वेदाविनाशिनमित्यत्र ॥ यस्त्वनात्मज्ञश्चोदितंकर्मनारभतेतदसदेवेति ॥५॥
॥ ॐनमःशिवायॐ ॥ ॥

86

कर्मेंद्रियाणि हस्तादीनि संयम्य संहृत्य य आस्ते तिष्ठति ॥ मनसा इंद्रियार्थान् विषया
न्स्मरन् विमूढात्मा विमूढांतःकरणः मिथ्याचारः मृषाचारः ॥ स उच्यते ॥ ६ ॥ यस्त्व
यं पुनः कर्मण्यधिकृतः अज्ञः बुद्धींद्रियाणि मनसा नियम्य आरभते अर्जुन कर्मेंद्रियै

कर्मेंद्रियाणि संयम्य य आस्ते मनसा स्मरन् ॥ इंद्रियार्थान्विमूढात्मा मिथ्या
चारः स उच्यते ॥ ६ ॥ यस्त्विंद्रियाणि मनसा नियम्यारभतेऽर्जुन ॥ कर्मेंद्रियैः क
र्मयोगमसक्तः स विशिष्यते ॥ ७ ॥ ॥

वाक्पाण्यादिभिः किमारभत इत्या
ह ॥ कर्मयोगं ॥ असक्तः फलाभिसंधिवर्जितः सन् स विशिष्यते इतरस्मात् मि
थ्याचारात् ॥ ७ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

यतएवमतः॥नियतंनित्यंशास्त्रोपदिष्टंयोयस्मिन्कर्मण्यधिकृतःफलायचाश्रुतं॥तन्निय
तंकर्मत्वंकुरुत्वं॥यतःकर्मज्यायःअधिकतरंफलतःहियस्मादकर्मणोऽकरणादनारंभा
त्कथंशरीरयात्राशरीरस्थितिःअपिचतेतवनप्रसिद्ध्येतप्रसिद्धिंनगच्छेत॥अकर्मणःक
र्मणोऽकरणादतोदृष्टःकर्माकर्मणोर्विशेषोलोकेयच्चमन्यसेबंधनार्थत्वात्कर्मन
कर्तव्यमिति॥तदप्यसत्॥ ॥कथं॥यज्ञोवैविष्णुरितिश्रुतेः॥यज्ञईश्वरःतदर्थंयत्क्रि

नियतंकुरुकर्मत्वंकर्मज्यायोह्यकर्मणः॥शरीरयात्रापिचतेनप्रसिद्ध्येदकर्मणः॥८॥
यज्ञार्थात्कर्मणोन्यत्रलोकोयंकर्मबंधनः॥तदर्थंकर्मकौंतेयमुक्तसंगःसमाचर॥९॥

मक्रियते॥नयज्ञार्थंकर्मतस्मात्कर्मणःअन्यत्रान्येनकर्मणालोकोयमधिकृतःकर्मकृ
त्कर्मबंधनःकर्मबंधनंयस्यसोयंकर्मबंधनोलोकः॥नतुयज्ञार्थादतस्तदर्थंयज्ञार्थं
कर्मकौंतेयमुक्तसंगःकर्मफलासंगरहितःसन्समाचरनिर्वर्तय॥इतश्चाधिकृते
नकर्मकर्तव्यं॥९॥ ॥ ॥॥॥

88 सहयज्ञाःयज्ञसहिताःप्रजाःत्रयोवर्णाःताःसृष्ट्वाउत्पाद्यपुरासर्गादौउवाचउक्तवान्
प्रजापतिःप्रजानांस्रष्टाअनेनयज्ञेनप्रसविष्यध्वंप्रसवोवृद्धिस्तांकुरुध्वंए
षयज्ञःवोयुष्माकमस्तुभवतु॥इष्टकामधुक्॥इष्टानभिप्रेतान्कामान्फलवि

सहयज्ञाःप्रजाःसृष्ट्वापुरोवाचप्रजापतिः॥अनेनप्रसविष्यध्वमेषवोऽस्त्विष्टकाम
धुक्॥१०॥देवान्भावयतानेनतेदेवाभावयन्तुवः॥परस्परंभावयन्तःश्रेयःपरमवाप्स्य
थ॥११॥

शेषान्दोग्धीति॥इष्टकामधुक्॥१०॥कथं॥देवानिंद्रादीन्भावयतवर्द्धयत
अनेनयज्ञेनतेदेवाभावयन्तुवोयुष्मान्॥वृष्ट्यादिनाआप्याययंतुपरस्परमन्योन्यं
भावयन्तःश्रेयः॥परमपिज्ञानप्राप्तिक्रमेणावाप्स्यथस्वर्गंवा॥परंश्रेयोवाप्स्यथ॥११॥

किंच॥ इष्टानभिप्रेतान्भोगान्हिवोयुष्मभ्यंदेवादास्यंते॥ वितरिष्यंति॥ स्त्रीपशुपुत्रादीन्
यज्ञभाविताः॥ यज्ञैर्वर्द्धिताः तोषिताः संतइत्यर्थः॥ तैर्दैवैर्दत्तान्भोगान् अप्रदायअद।
त्वायान्नरएवमहत्कृतेत्यर्थः॥ एभ्योदेवेभ्योयोभुंक्तेस्वदेहेंद्रियाण्येवतर्पयतिस्तेनएवतस्क
रएवसः॥ १२॥ देवादिस्वापहारीयेपुनः॥ देवयज्ञादीननिर्वर्त्यतच्छिष्टमशनंअमृताख्य

इष्टान्भोगान्हिवोदेवादास्यंतेयज्ञभाविताः॥ तैर्दत्तानप्रदायैभ्योयोभुंक्तेस्तेनए
वसः॥ १२॥ यज्ञशिष्टाशिनःसंतोमुच्यंतेसर्वकिल्बिषैः॥ भुंजतेतेत्वघंपापायेपचंत्या
त्मकारणात॥ १३॥

अमृतंतुशीलंयेषांतेयज्ञशिष्टाशिनःसंतो॥ मुच्यंते॥ सर्वकिल्बि
षैः सर्वपापैः चुल्ल्यादिपंचसूनाकृतैः प्रमादकृतहिंसाजनितैश्चान्यैः येत्वात्मंभ
रयः येभुंजतेतेत्वघंपापंस्वयमपिपापाःयेपचंति॥ पाकंनिर्वर्त्तयंतिआत्मकारणा ४२
त॥ आत्महेतोः॥ १३॥ ॥

90 इतश्चाधिकृतेनकर्मकर्त्तव्यं॥जगच्चक्रप्रवृत्तिहेतुर्हिकर्मकथमित्युच्यते॥अन्नाद्भुक्ता
त्‌॥लोहितरेतः॥परिणतात्प्रत्यक्षंभवंतिजायंतेभूतानि॥पर्जन्याद्वृष्टेःअन्नस्यसंभवः
अन्नसंभवः॥यज्ञाद्भवतिपर्जन्यः॥अग्नौप्रास्ताहुतिःसम्यगादित्यमुपतिष्ठते॥आदित्या

अन्नाद्भवंतिभूतानिपर्जन्यादन्नसंभवः॥ यज्ञा
द्भवतिपर्जन्योयज्ञःकर्मसमुद्भवः॥१४॥ ॥ ॥

ज्जायतेवृष्टिर्वृष्टेरन्नंततःप्रजाइति॥यज्ञोऽपूर्वंसचकर्मसमुद्भवःऋत्विग्यजमानयो
स्तुव्यापारः॥ कर्मतत्समुद्भवोयस्ययज्ञस्यापूर्वस्यसयज्ञःकर्मसमुद्भवः ॥१४॥॥
शिव॥ ॥राम॥ ॥शिव

गी॰भा॰ तच्च ॥ कर्म ब्रह्मोद्भवं ब्रह्म वेदः स उद्भवः कारणं यस्य तत्कर्म ब्रह्मोद्भवं ॥ विद्धि जानीहि ब्रह्म पु
४३ ९१ नर्वेदाख्यमक्षरसमुद्भवं ॥ अक्षरः परमात्मा समुद्भवः कारणं यस्य तदक्षरसमुद्भवं तत्स
भवो वेद इत्यर्थः ॥ यस्मात्साक्षात्परमात्माख्यादक्षरात्पुरुषनिःश्वासवत्समुद्भवं ब्रह्म

कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवं ॥ तस्मा
त्सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितं ॥१५॥ ॥ ॥

तस्मात्सर्वार्थप्रकाशकत्वात्सर्वगतं सर्वगतमपि सन्नित्यं ॥ यदा यज्ञविधिप्रधानत्वा
त् ॥ यज्ञे प्रतिष्ठितं ॥१५॥ ॥ ॥ ॥ ॥ श्रीशिव
श्रीगौरीश्वरः ॥ ॥ ॥ ॥ ॥ ॥ ॥ ४३

92 एवमीश्वरेणवेदयज्ञपूर्वकंजगच्चक्रं॥प्रवर्तितंनानुवर्तयति॥इहलोकेयःकर्मण्य
धिकृतःसन्॥अघायुः॥अघंपापमायुर्जीवनंयस्यसअघायुः॥पापजीवनइतियावत्
इंद्रियारामः॥इंद्रियैरारामः॥आरमणंक्रीडाविषयेषुयस्यसइंद्रियारामः॥मोघंवृथा
हेपार्थसजीवति॥तस्माद्ज्ञेनाधिकृतेनकर्तव्यमेवकर्मेतिप्रकरणार्थः॥अनात्म
ज्ञाननिष्ठायोग्यताप्राप्तेस्तादर्थ्येनकर्मयोगानुष्ठानमधिकृतेनानात्मज्ञेनकर्त

एवंप्रवर्तितंचक्रंनानुवर्तयतीहयः॥अघायुरिंद्रियारामोमोघंपार्थसजीवति॥१६॥

व्यमेवेत्येतच्चकर्मणामनारंभान्नैःकर्म्यंपुरुषोऽश्नुतइत्यारभ्य॥शरीरयात्रापिचतेन।
प्रसिद्ध्येदकर्मणइत्येवमंतेनप्रतिपाद्य॥यज्ञार्थात्कर्मणोऽन्यत्रेत्यादिनामोघंपार्थस
जीवतीत्येवमंतेनापिग्रंथेनप्रासंगिकमधिकृतस्यानात्मविदःकर्मानुष्ठानेबहु।
कारणमुक्तं॥तदकरणेचदोषसंकीर्तनंकृते ॥१६॥ ॥ ॥ ॥॥॥

गी॰ ९३
एवंस्थिते॥ किमेवं प्रवर्त्तितं चक्रं सर्वेणानुवर्त्तनीयं॥ अहोस्वित्पूर्वोक्तकर्मयोगानुष्ठानोपाय
५५ प्राप्यानात्मवेदाज्ञानयोगेनैव निष्ठामात्मविद्भिः सांख्यैरनुष्ठेयामप्राप्तेनैवेत्येतमर्थम
र्जुनस्य प्रश्नमाशंक्य स्वयमेव शास्त्रार्थस्य विवेकप्रतिपत्त्यर्थं॥ एतं वै तमात्मानं विदित्वा निवृ
त्तमिथ्याज्ञानाः संतो ब्राह्मणा मिथ्याज्ञानवद्भिरवश्यं कर्त्तव्येभ्यः॥ पुत्रैषणादिभ्यो व्युत्थायाथ भि
क्षाचर्यादिकं शरीरस्थितिमात्रप्रयुक्तं चरंति॥ न तेषामात्मज्ञाननिष्ठाव्यतिरेकेणान्यत्का

यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः॥ आत्मन्येव च संतुष्टस्तस्य कार्यं न विद्यते॥ १७॥ स्य

र्यमस्तीत्येतं श्रुत्यर्थं॥ इह गीताशास्त्रेपि प्रतिपिपादयिषितमाविःकुर्वन्नाह भगवान्॥ यस्त
पुनः सांख्य आत्मज्ञाननिष्ठ आत्मरतिः आत्मन्येव रतिर्न विषयेषु रतिर्यस्य स आत्मरतिरेव
स्यात्॥ आत्मतृप्तश्च॥ आत्मनैव तृप्तो नान्नरसादिना॥ स मानवः मनुष्यः संन्यासी आत्मन्येव च
संतुष्टः संतोषो हि बाह्यार्थलाभे सर्वस्य भवति तमनपेक्ष्य॥ आत्मन्येव च संतुष्टः सर्वतो वीततृ ५५
ष्ण इत्येतत्॥ य ईदृश आत्मवित्तस्य कार्यं करणीयं न विद्यते नास्तीत्यर्थः ॥१७॥ ॥

94 किंच॥ नैव तस्यात्मरतेः कृतेन कर्मणार्थः प्रयोजनमस्तीति॥ अस्तु तर्हि॥ अकृतेनाक
रणेन प्रत्यवायाख्योऽनर्थः॥ नाकृतेनेह लोके कश्चन कश्चिदपि प्रत्यवायप्राप्तिरूप आत्म
हानिलक्षणो वास्ति॥ न चास्य सर्वभूतेषु ब्रह्मादिस्थावरान्तेषु भूतेषु कश्चिदर्थव्यपा
श्रयः प्रयोजननिमित्तः क्रियासाध्यो व्यपाश्रयः॥ व्यपाश्रयणं॥ कंचिद्भूतविशेषमा
श्रित्य न साध्यः कश्चिदर्थोऽस्ति येन तदर्था क्रिया स्यात्॥ न त्वमेतस्मिन्सर्वतःसंप्लुतोद

नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन॥ न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः॥१८॥
तस्मादसक्तः सततं कार्यं कर्म समाचर॥ असक्तो ह्याचरन्कर्म परमाप्नोति पूरुषः॥१९॥

कस्थानीये सम्यग्दर्शने प्रवर्तसे॥ यत एवं॥ तस्मादसक्तः संगवर्जितः॥ सततं का
र्यं कर्तव्यं नित्यं कर्म समाचर निर्वर्तय॥ असक्तो हि यस्मात्समाचरन्नीश्वरार्थं कर्म
कुर्वन्परमाप्नोति पूरुषः परं मोक्षमाप्नोति पूरुषः सत्वशुद्धिद्वारेणेत्यर्थः॥१९॥

यस्माच्च॥कर्मणैव हि यस्मात॥पूर्वे क्षत्रिया विद्वांसः संसिद्धिं मोक्षं गंतुमास्थिताः प्रवृत्ता जन
कादयः जनकाश्वपतिप्रभृतयः॥यदि ते प्राप्तसम्यग्दर्शनाः॥ततो लोकसंग्रहार्थं प्रारब्धक
र्मत्वात्कर्मणा सहैवासंन्यस्यैव कर्म संसिद्धिमास्थिता इत्यर्थः॥अथाप्राप्तसम्यग्दर्शना ज
नकादयः तदा कर्मणा सत्वशुद्धिसाधनभूतेन क्रमेण संसिद्धिमास्थिता इत्येवं व्याख्ये

कर्मणैव हि संसिद्धिमास्थिता जनकादयः॥ लोक
संग्रहमेवापि संपश्यन्कर्तुमर्हसि ॥२०॥ ॥

यः॥श्लोकः॥अथ मन्यसे पूर्वैरप्यजानद्भिरेव कर्तव्यं कर्म कृतं॥नावश्यमन्येन स।
म्यग्दर्शनवता कृतार्थेन कर्तव्यमिति॥तथापि प्रारब्धकर्मायत्तस्त्वं लोकसंग्रहमेवा
पि लोकस्योन्मार्गप्रवृत्तिनिवारणं लोकसंग्रहस्तमेवापि प्रयोजनं संपश्यन्कर्तुम ४५
र्हसि ॥२०॥ ॥

96

लोकसंग्रहं कः कर्तुमर्हतीति कथं चेदुच्यते॥ यद्यत्कर्माचरति॥ श्रेष्ठः प्रधानः तत्तदेव क-
र्माचरति॥ इतरो जनः॥ अन्यो लोकस्तदनुगतः॥ किं च स श्रेष्ठो यत्प्रमाणं कुरुते लौकिकं
वैदिकं वा लोकस्तदनुवर्तते॥ तदेव प्रमाणीकरोतीत्यर्थः॥२१॥ यद्यत्र लोकसंग्रहकर्तव्य
तायां विप्रतिपत्तिस्तदा किं मां न पश्यसि॥ न मे ममेदं पार्थ अस्ति कर्तव्यं न त्रिषु लो

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः॥ स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते॥२१॥
न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किंचन॥ नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि॥२२॥

केषु॥ किंचन किंचिदपि॥ कस्मात्॥ अनवाप्तमवाप्तव्यं प्रापणीयं तथापि वर्ते कर्मण्ये
॥ॐ नमः शिवाय ॐ॥ ॥ ॥शिव
वाह ॥२२॥ ॥

गी·भा·
४६ 97

यदिपुनरहंनवर्तेयं॥जातुकदाचित्॥कर्मण्यतन्द्रितोऽनलसःसन्॥ममश्रेष्ठस्यसतःव
र्त्ममार्गमनुवर्तन्ते॥मनुष्याहेपार्थ॥सर्वशः॥सर्वप्रकारैः॥२३॥तथाचकोदोषइत्याह॥उत्सी
देयुर्विनश्येयुःइमेसर्वेलोकाःलोकस्थितिनिमित्तस्यकर्मणोऽभावात्॥नकुर्यांकर्मचेद

यदिह्यहंनवर्तेयंजातुकर्मण्यतन्द्रितः॥ममवर्त्मानुवर्तन्तेमनुष्याःपार्थसर्वशः॥२३॥
उत्सीदेयुरिमेलोकानकुर्यांकर्मचेदहं॥संकरस्यचकर्तास्यामुपहन्यामिमाःप्रजाः॥२४॥

हं॥किंच॥संकरस्यचकर्तास्यांतेनकारणेनोपहन्याइमाःप्रजाःप्रजानामनुग्रहायप्रवृत्तउप
हतिमुपहननंकुर्यामितिममेश्वरस्याननुरूपमापद्येत॥यदिपुनरहमिवत्वंवाकृतार्थ
बुद्धिरात्मविदन्योवातस्याप्यात्मनःकर्तव्याभावेपिपरानुग्रहएवकर्तव्यइति ॥२४॥ ४६

98

सक्ताः कर्मणि॥ अस्य फलं मम भविष्यतीति॥ के अविद्वांसः यथा कर्म कुर्वंति भारत॥ कुर्याद्वि
द्वानात्मवित् तथा असक्तः सन्॥ तद्वत् किमर्थं करोतीति॥ तच्छृणु॥ चिकीर्षुः॥ कर्तुमिच्छुः लोक
संग्रहं॥ एवं लोकसंग्रहं चिकीर्षोर्ममात्मविदः कर्तव्यमस्ति अन्यस्य वा लोकसंग्रहमुक्ता
तस्मात् आत्मविद् इदम् उपदिश्यते॥ २५॥ न बुद्धिभेदं बुद्धेर्भेदः बुद्धिभेदः कर्तव्यं कर्म भोक्तव्यं चास्य

सक्ताः कर्मण्यविद्वांसो यथा कुर्वंति भारत॥ कुर्याद्विद्वांस्तथासक्तश्चिकीर्षुर्लोकसंग्रहं॥ २५॥
नबुद्धिभेदं जनयेदज्ञानां कर्मसंगिनां॥ जोषयेत्सर्वकर्माणि विद्वान्युक्तः समाचरन्॥ २६॥

कर्मणः फलमिति निश्चितरूपा या बुद्धिः भेदः भेदनं चालनं बुद्धिभेदः॥ तं न जनयेत्॥ नो
त्पादयेत्॥ अज्ञानाम् अविवेकिनां कर्मसंगिनां॥ कर्मण्यासक्तिमतां॥ किं तु कुर्यात्॥ जोष
येत् कारयेत् प्रेरयेत् सर्वकर्माणि॥ विद्वान् स्वयं तदेवाविद्वांसां कर्म युक्तोऽभियुक्तः समा
चरन्॥ २६॥ ॥ ॥ ॥ श्रीव

अविद्वान्कथंकर्मसुसज्जतइत्याह॥प्रकृतेः प्रकृतिःप्रधानंसत्वरजस्तमसांगुणानांसाम्याव
स्थातस्याःप्रकृतेर्गुणैर्विकारैःकार्यकारणरूपैःक्रियमाणानिकर्माणिलौकिकानिशा
स्त्रीयाणिचसर्वशःसर्वप्रकारैः॥अहंकारविमूढात्माकार्यकारणसंघातात्मप्रत्ययोहं
कारः॥तेनविविधंनानाविधंमूढ आत्मान्तःकरणंयस्यसोयंकार्यकारणधर्माकार्य

प्रकृतेःक्रियमाणानिगुणैःकर्माणिसर्वशः॥अहंकारविमूढात्माकर्ताहमितिमन्यते
२७॥तत्ववित्तुमहाबाहोगुणकर्मविभागयोः॥गुणागुणेषुवर्त्तन्तइतिमत्वानसज्जते॥२८॥

कारणाभिमानीअविद्ययाकर्मणयात्मनिमन्यमानस्तत्कर्मणामहंकर्त्तेतिमन्यतेयःपु
नर्विद्वान्॥२७॥तत्वविन्महाबाहो।कस्यतत्वविद्॥गुणकर्मविभागयोः॥गुणविभा
गस्यकर्मविभागस्यचतत्वविदित्यर्थः॥गुणाःकरणात्मकाःगुणेषुविषयात्मकेषु
वर्त्तन्तेनात्माइतिमत्वानसज्जतेसक्तिंनकरोति॥येषुनः॥ ॥२८॥ ॥ ॥

100

प्रकृतेर्गुणैः सम्यक्प्रसृताः संमोहिताः संतः सज्जंते गुणकर्मसु ॥ गुणानां कर्मसु ॥ वयं क
र्म कुर्मः फलायेति ॥ तान्कर्मसंगिनः अकृत्स्नविदः ॥ कर्मफलमात्रदर्शिनः ॥ मंदान्मंद
प्रज्ञान् ॥ कृत्स्नविदात्मवित् स्वयं न विचालयेत् ॥ बुद्धिभेदकरणमेव चालनं ॥ तत्र कर्त्तृ
दित्यर्थः ॥ कथं पुनः ॥ कर्मण्यधिकृतेनाज्ञेन मुमुक्षुणा कर्तव्यमित्युच्यते ॥ २९ ॥ मयि दे

प्रकृतेर्गुणसंमूढाः सज्जंते गुणकर्मसु ॥ तानकृत्स्नविदो मंदान्कृत्स्नविन्न विचा
लयेत् ॥ २९ ॥ मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा ॥ निराशीर्निर्ममो भूत्वा युध्य
स्व विगतज्वरः ॥ ३० ॥

वे परमेश्वरे सर्वज्ञे सर्वात्मनि सर्वाणि कर्माणि संन्यस्य निक्षि
प्य ॥ अध्यात्मचेतसा विवेकबुद्ध्या अहं कर्ता ईश्वराय भृत्यवत्करोमीत्यनया बुद्ध्या
किंच निराशीः त्यक्ताशीः निर्ममो निर्गतो ममभावो यस्य स त्वं निर्ममो भूत्वा यु
ध्यस्व विगतज्वरः ॥ विगतसंतापः विगतशोकः सन्नित्यर्थः ॥ ३० ॥ ॥ ॥

गी·भा·
५८
101

यदेतन्मे मतं कर्म कर्तव्यमिति [illegible] प्रमाणमर्थं तथा॥ ये मे इति॥ ये मे म
दीयमिदं मतं नित्यमनुतिष्ठन्ति अनुवर्तंते॥ मानवाः मनुष्याः श्रद्धावंतः श्रद्दधानाः॥
अनसूयंतः॥ असूयां च मयि गुरौ वासुदेवे ऽकुर्वंतः॥ मुच्यंते तेप्येवंभूताः कर्मभिः धर्मा

ये मे मतमिदं नित्यमनुतिष्ठंति मानवाः॥ श्रद्धावंतोनसूयंतो मुच्यंते तेपि कर्मभिः॥३१॥
ये त्वेतदभ्यसूयंतो नानुतिष्ठंति मे मतं॥ सर्वज्ञानविमूढांस्तान्विद्धि नष्टानचेतसः॥३२॥

धर्माधर्माख्यैः॥३१॥ ये त्विति॥ ये तु तद्विपरीताः एतन्मम मतमभ्यसूयंतः निंदंतः नानुति।
ष्ठंति॥ नानुवर्तंते सर्वेषु ज्ञानेषु विविधं मूढाः ते सर्वज्ञानविमूढास्तान्विद्धि जानीहि
नष्टान्नाशं गतान्॥ अचेतसः॥ अविवेकिनः॥३२॥ ॥ ॥

कस्मात्पुनःकारणात्॥त्वदीयंमतंनानुतिष्ठंति॥परधर्ममनुतिष्ठंति॥स्वधर्मंचनानुव
102 र्तंते॥तत्प्रतिकूलाःकथंनबिभ्येतित्वच्छासनातिक्रमदोषात्॥सदृशमिति॥सदृशमनुरू
पंयोग्यंचेष्टते॥कस्याःस्वस्याःस्वकीयायाःप्रकृतेःप्रकृतिर्नामपूर्वकृतधर्माधर्मादिसं

सदृशंचेष्टतेस्वस्याःप्रकृतेर्ज्ञानवानपि॥प्र
कृतिंयांतिभूतानिनिग्रहःकिंकरिष्यति॥३३॥

स्कारोवर्त्तमानजन्मादावभिव्यक्तः॥साप्रकृतिः॥तस्याःसदृशमेवसर्वोजंतुर्ज्ञानवान
पिकिंपुनर्मूर्खःतस्मात्प्रकृतिंयांति॥अनुगच्छंतिभूतानिनिग्रहःकिंकरिष्यति॥म
मवाअन्यस्यवा॥३३॥ ॥ ॥ ॥॥

गी॰भा॰
४९
103

यदि सर्वो ऽत्रिमतानि निग्रहः किं करिष्यति मम वा शास्त्रस्येज्जंतुः आत्मनः प्रकृतिसदृशमेव चे
ष्टते॥ न प्रकृतिशून्यः कश्चिदस्ति ततः पुरुषकारस्य विषयानुपपत्तेः शास्त्रानर्थक्यप्राप्ताविद
मुच्यते॥ इंद्रियस्येति॥ इंद्रियस्येंद्रियस्य सर्वेषामिंद्रियाणामर्थे शब्दादिविषये इष्टे रागः अनिष्टे द्वेषः
इत्येवं प्रतींद्रियार्थं रागद्वेषाववश्यंभाविनौ॥ तत्रायं पुरुषकारस्य शास्त्रार्थस्य च विषय उच्य
ते॥ शास्त्रार्थप्रवृत्तः॥ पूर्वमेव रागद्वेषयोर्न वशमागच्छेत्॥ पुरुषस्य या हि प्रकृतिः सा रागद्वेषपुरः

इंद्रियस्येंद्रियस्यार्थे रागद्वेषौ व्यवस्थितौ॥ तयोर्न वशमागच्छेत्तौ ह्यस्य परिपंथिनौ॥ ३४॥ ॥

सरैव पुरुषं स्वकार्ये प्रवर्तयति॥ तदा स्वधर्मपरित्यागः परधर्मानुष्ठानं च भवति॥ यदा पुनः राग
द्वेषौ तत्प्रतिपक्षेण नियमयति॥ तदा शास्त्रदृष्टिरेव पुरुषो भवति न प्रकृतिवशः॥ तस्मात्तयो
रागद्वेषयोर्वशं न गच्छेत्॥ यतस्तौ ह्यस्य पुरुषस्य परिपंथिनौ श्रेयोमार्गस्य विघ्नकर्तारौ॥ त ४९
स्करा विव पथि॥ ३४॥ ॥ ॥ ॥ ॥ शिव

तत्र रागद्वेषप्रयुक्तो मन्यते ॥ शास्त्रार्थमन्यथा परधर्मोऽपि धर्मत्वादनुष्ठेय इवेति तदसत् ॥ ५२
104 श्रेयानिति श्रेयान् प्रशस्यतरः स्वकीयो धर्मः स्वधर्मो विगुणोऽपि विगतगुणोऽपि ॥ अनुष्ठीयमा
नः परधर्मात्स्वनुष्ठितात् ॥ साद्गुण्येन संपादितादपि ॥ यतः स्वधर्मे स्थितस्य निधनं मरण
मपि श्रेयः ॥ परधर्मस्थस्य जीवितात् ॥ कस्मात्परधर्मो भयावहः ॥ नरकादिलक्षणं भयमा
वहति ॥ यद्वा स्वधर्मात्मा तस्य धर्मस्य ध्यात्मावगतिरूपः ॥ विगुणः सत्वादिप्राकृतगुणाविशु

श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् ॥ स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥ ३५ ॥

क्तः मुक्तिहेतुत्वात् ॥ इंद्रियाणि पराणि तेषां धर्मः ॥ प्राकृतिकः ॥ तस्मात्स्वनुष्ठितादपि स्वध
र्मे निधनं श्रेयः ॥ अपुनर्भवत्वात् परधर्मो भयावहः अविद्यारूपः पुंसः तया संसारपात
हेतुत्वात् ॥ यद्यप्यनर्थमूलं ॥ ध्यायतो विषयान् ॥ रागद्वेषौ ह्यस्य परिपंथिनावित्युक्त
त्तं ॥ विविदिन्नमनवधारितं च ॥ तदुक्तं तत्सादितं तन्निश्चितं चेदमेवेति ज्ञातुमिच्छन्नर्जुन
उवाच ॥ ज्ञानेनेति तस्मिन्नतदुच्छेदाय यत्नं करिष्यामीति ॥ ३५ ॥ ॥ ॥ ॥

गी॰ भा॰
५०
105

अथइति॥ अथकेनहेतुनाप्रयुक्तः सन्राज्ञेवभृत्यः अयंपूरुषः पापंकर्मचरति॥ आचर।
ति॥ पूरुषः पूरुषः स्वयमनिच्छन्नपिहेवार्ष्णेयबलादिवनियोजितः॥ राज्ञेवभृत्यइत्युक्तो।
दृष्टांतः॥ स्वरागतेवैरिणांसर्वानर्थकरंयत्त्वंपृच्छसि॥ ३६॥ ऐश्वर्यइति॥ ऐश्वर्यादिषट्कंयस्मिन्
वासुदेवेनित्यमप्रतिबंधेनसामस्त्येनचवर्तते॥ उत्पत्तिंचविनाशंचभूतानामागतिंगतिं

अथकेनप्रयुक्तोयंपापंचरतिपूरुषः॥ अनिच्छन्नपिवार्ष्णेयबलादिवनियोजितः॥ ३६॥
श्रीभगवानुवाच॥ ऐश्वर्यस्यसमग्रस्यधर्मस्ययशसःश्रियः॥ वैराग्यस्याथमोक्षस्यषण्णांभ
गइतीरणा॥ ३७॥

वेत्तिविद्यामविद्यांचसवाच्योभगवानिति॥ उत्पत्यादिविषयंचवि
ज्ञाने॥ यस्यसवासुदेवोवाच्योभगवानिति॥ ३७॥ ॥ ॥ ५०
॥शिव॥

कामइति॥ काम एष सर्वलोकं वशमकुर्वन् शत्रुः यन्निमित्तानर्थप्राप्तिः प्राणिनां
106 स एष कामः प्रतिहतः केनचित्॥ क्रोधत्वेन परिणमते॥ अतः क्रोधोप्येष रजोगुणसमुद्भ
वः॥ रजश्च तद्गुणाश्च रजोगुणाः समुद्भवो यस्य स कामो रजोगुणसमुद्भवः॥ रजोगुणस्य।
वा समुद्भवः॥ कामो ह्युद्भूतो रजः प्रवर्तयन् पुरुषं प्रवर्तयति॥ तृष्णया ह्यहं कारित इति

श्रीभगवानुवाच॥ काम एष क्रोध एष रजोगुणसमुद्भ
वः॥ महाशनो महापाप्मा विद्ध्येनमिह वैरिणम्॥३७॥

उःखितानां रजःकार्ये सेवादौ प्रवृत्तानां प्रलापः श्रूयते महाशनः महद् अशनमस्येति
महाशनः॥ अत एव महापाप्मा कामेन हि प्रेरितो जन्तुः महत् पापं करोति अतो वि।
द्ध्येनं काममिह संसारे वैरिणं ॥३७॥
॥शिव॥

गी॰भा॰
५९
107

कथंवैरीतिदृष्टांतैःप्रत्याययति॥धूमइति॥धूमेनसहजेनआव्रियतेवह्निःप्रकाशा
त्मकःअप्रकाशात्मकेनयथाआव्रियतेपिधीयते॥यथाआदर्शोमलेन॥यथोल्वेणगा
र्भवेष्टनेनजरायुनाआवृतआच्छादितोगर्भस्तथातेनेदमावृतं॥३८॥किंपुनस्तदिदंशब्द
वाच्यंयत्कामेनावृतमित्युच्यते॥आवृइति॥आवृतमेतेनकामेनज्ञानंज्ञानिनःनित्यवै
रिणा॥ज्ञानीहिजानातीतिअनेनाहमनर्थेप्रयुक्तइति पूर्वमेवातोनित्यमेवदुःखीभवा

धूमेनाव्रियतेवह्निर्यथादर्शोमलेनच॥यथोल्वेणावृतोगर्भस्तथातेनेदमावृतं॥३८॥
आवृतंज्ञानमेतेनज्ञानिनोनित्यवैरिणा॥कामरूपेणकौंतेयदुःपूरेणानलेनच॥३९॥

ति॥तेनासौज्ञानिनोनित्यवैरी॥नतुमूर्खस्यसहिकामंतृष्णाकालेमित्रमिवपश्यन्॥तत्का
र्यंदुःखंप्राप्तोजानाति॥तृष्णयाहंदुःखित्वमापादितइतिनपूर्वमेव॥अतोज्ञानिनएवनि
त्यवैरीकिंरूपेणकामरूपेण॥कामइच्छैवरूपमस्येतिकामरूपः॥तेनदुःपूरेणदुःखेनपू ५९
रणमस्येतिदुःपूरःअतस्तेनानलेननास्यालंपर्याप्तिर्विद्यतइत्यनलस्तेन ॥३९॥ ॥

108

किमधिष्ठानःकामोज्ञानस्यावरणत्वेनवैरीसर्वस्येत्यपेक्षायामाह॥ ज्ञातेहिशत्रोरधि
ष्ठानेसुखेनशत्रुनिवर्हणंकर्तुंशक्यतइति॥ इंद्रिइति॥ इंद्रियाणिमनोबुद्धिरस्यकाम
स्याधिष्ठानमाश्रयउच्यते॥ एतैरिंद्रियादिभिराश्रयैर्विमोहयति॥ विविधंमोहयति॥
एषकामःज्ञानमावृत्यआच्छाद्यदेहिनं यतएवं॥ तस्मादिति॥ तस्मात्त्वमिंद्रियाण्या

इंद्रियाणिमनोबुद्धिरस्याधिष्ठानमुच्यते॥ एतैर्विमोहयत्येषज्ञानमावृत्यदेहिनं॥४०॥
तस्मात्त्वमिंद्रियाण्यादौनियम्यभरतर्षभ॥ पाप्मानंप्रजहिह्येनंज्ञानविज्ञाननाश
नं॥४१॥

दौपूर्वंनियम्यवशीकृत्य॥ हेभरतर्षभ॥ पाप्मानंपापाचारंकामंप्रजहिहि
परित्यजएनंप्रकृतंवैरिणंज्ञानविज्ञाननाशनं॥ ज्ञानंशास्त्रतआचार्यतश्चआत्मादीना
मवबोधः॥ विज्ञानंविशेषतः॥ तदनुभवप्रत्ययः॥ तयोर्ज्ञानविज्ञानयोःश्रेयःप्राप्तिहे
त्वोर्नाशनंनाशकः॥ तन्नाशनमात्मनःपरित्यजेत्यर्थः॥ इंद्रियाण्यादौनियम्यकामंशत्रुं

गी भा
५२
109

तत्रकिमाश्रयःकामंजह्यादित्युच्यते॥इंद्रियेति॥इंद्रियाणिश्रोत्रादीनिपंचदेहंस्थूलंबा
ह्यं॥परिच्छिन्नंचापेक्ष्यसूक्ष्मत्वांतरस्थत्वव्यापित्वाद्यपेक्ष्यपराणिप्रकृष्टान्याहुःपंडि।
ताः॥तथाइंद्रियेभ्यःपरंमनः॥संकल्पविकल्पात्मकंतथामनसोपिपरातुबुद्धिर्नि

इंद्रियाणिपराण्याहुरिंद्रियेभ्यःपरंमनः॥ मन
सस्तुपरातुबुद्धिर्योबुद्धेःपरतस्तुसः ॥४२॥ ॥

श्चयात्मिका॥तथायःसर्वदृश्येभ्योबुद्ध्यंतेभ्यश्चाभ्यंतरोयंदेहिनमिंद्रियादिभिरा
श्रयैर्युक्तः॥कामःज्ञानावरणद्वारेणमोहयती
त्युक्तं॥परतस्तुसचबुद्धेर्द्रष्टापरमात्मा ॥४३॥ ५२

110 ततःकिं॥ एवंइति एवंबुद्धेःपरमात्मानंबुद्ध्वाज्ञात्वासंस्तभ्यसम्यक्स्तंभनंकृत्वाआत्मा
नंस्वेनैवात्मनासम्यक्समाधायेत्यर्थः॥ जहिएवंशत्रुं॥ हेमहाबाहोकामरूपंदुरा

एवंबुद्धेःपरंबुद्ध्वासंस्तभ्यात्मानमात्मना॥ जहिशत्रुंमहाबा
होकामरूपंदुरासदं॥४३॥ इति श्री तृतीयोध्यायः॥ ३॥ ॥

सदं दुःखेनासदआसादनंप्राप्तिर्यस्यतंदुरासदंदुर्विज्ञेयानेकविशेषमिति॥४३॥
इतिश्रीपरमहंसपरिव्राजकाचार्यश्रीशंकरभगवत्कृतौगीताविवरणेतृतीयोध्यायः॥३॥

गी·भा·
५३

योयंयोगोध्यायद्वयेनोक्तोज्ञाननिष्ठालक्षणःससंन्यासःकर्मयोगोपायोयस्मिन्सम्यक्वेदा
र्थःपरिसमाप्तः॥प्रवृत्तिलक्षणोनिवृत्तिलक्षणश्च॥गीतासुचसर्वासुअयमेवयोगोविवक्षि
तोभगवता॥अतःपरिसमाप्तंवेदार्थंमन्वानस्तंवंशकथनेनस्तौतिभगवान्॥इमंइति॥इम
मध्यायद्वयेनोक्तंयोगंविवस्वतेप्रोक्तं॥आदित्यायसर्गादौप्रोक्तवानहंजगत्परिपालयितॄ

श्रीभगवानुवाच॥इमंविवस्वतेयोगंप्रोक्तवानहमव्य
यं॥विवस्वान्मनवेप्राहमनुरिक्ष्वाकवेब्रवीत्॥१॥

णांक्षत्रियाणांबलाधानायतेनयोगबलेनयुक्ताःसमर्थाभवन्तिब्रह्मपरिरक्षितुं॥ब्रह्म
क्षत्रेपरिपालितेजगत्परिपालयितुमलं॥अव्ययमव्ययफलत्वात्नह्यस्यसम्यग्दर्शननि
ष्ठालक्षणस्यमोक्षाख्यंफलंव्येति॥सचविवस्वान्मनवेप्राहमनुरिक्ष्वाकवेस्वपुत्राय

॥२॥ ५३

एवंइति॥एवंक्षत्रियपरंपराप्राप्तमिमंराजर्षयोराजानस्तेचऋषयश्चेतिराजर्षयःविदुरि
मंयोगं॥सयोगःकालेनेहमहतादीर्घेणनष्टः॥विच्छिन्नसंप्रदायःप्रवृत्तः॥हेपरंतपआ
त्मनोविपक्षभूताःवैरिणस्तेनतान॥शौर्यतेजोगभस्तिभिःभानुरिवतापयतीतिपरंतपः

एवंपरंपराप्राप्तमिमंराजर्षयोविदुः॥ सकालेनेहमहतायोगोनष्टःपरंतप ॥२॥
सएवायंमयातेद्ययोगःप्रोक्तःपुरातनः॥भक्तोसिमेसखाचेतिरहस्यंह्येतदुत्तमं॥३॥

शत्रुतापनइत्यर्थः॥२॥दुर्बलानजितेंद्रियानप्राप्यनष्टंयोगमुपलभ्यलोकंचापुरु
षार्थसंबंधिनं॥सएवेति॥सएवायंयोगःप्रोक्तः॥पुरातनःमयातेतुभ्यमद्यइदानीं॥
भक्तोसिमेसखाचासीति॥रहस्यंहियस्मादेतदुत्तमंयोगोज्ञानमित्यर्थः॥३॥ ॥॥

गी·भा· भगवताविप्रतिषिद्धमुक्तमितिमाभूत्कस्यचिद्बुद्धिरितिपरिहारार्थंचोद्यमिवकुर्वन्नर्जुन
५४ उवाच॥अपरमिति॥अपरमर्वाक्वसुदेवगृहेभवतोजन्म॥परंपूर्वंसर्गादौजन्मउत्पत्तिर्वि
113 वस्वतआदित्यस्यतत्कथमेतद्विजानीयामविरुद्धार्थतयायस्त्वमेवादौप्रोक्तवानिमं
योगंसएवत्वमिदानींमह्यंप्रोक्तवानसीति॥४॥यावासुदेवेअनीश्वरासर्वज्ञाशंकामूर्ख।

अपरंभवतोजन्मपरंजन्मविवस्वतः॥कथमेतद्विजानीयांत्वमादौप्रोक्तवानिति॥४॥
बहूनिमेव्यतीतानिजन्मानितवचार्जुन॥तान्यहंवेदसर्वाणिनत्वंवेत्थपरंतप॥५॥

खाणांतांपरिहरन्॥भगवानुवाच॥यदर्थोह्यर्जुनस्यप्रश्नः॥बहूनीति॥बहूनिजन्मानिमेम
मव्यतीतानिअतिक्रान्तानि॥तवचहेअर्जुन॥तान्यहंसर्वाणिजन्मानिवेदजानेनत्वंवे
त्थनजानीषेधर्माधर्मादिप्रतिबद्धज्ञानशक्तित्वात्॥अहंपुनर्नित्यशुद्धबुद्धमुक्तस्व ५५
भावत्वादनावरणज्ञानशक्तिरितिवेदअहंहेपरंतप॥ ॥५॥ ॥ ॥ ॥

114 कथंतर्हि तवनित्येश्वरस्य धर्माधर्माभावे जन्मेत्युच्यते॥ अजो इति॥ अजोपि जन्मरहितो
पि सन्॥ तथाव्ययात्मा॥ अक्षीणज्ञानशक्तिस्वभावः सन्नपि तथा भूतानां ब्रह्मादिस्तं
बपर्यंतानां ईश्वरः ईशनशीलोपि सन्॥ प्रकृतिं ममैव स्वां वैष्णवीं मायां त्रिगुणात्मिकां य
स्या वशे सर्वं जगद्वर्तते यया मोहितं सन्स्वमात्मानं वासुदेवं न जानाति॥ तां प्रकृतिं॥

अजोपि सन्नव्ययात्मा भूतानामीश्वरोपि सन्॥ प्रकृतिं स्वामधिष्ठाय संभवाम्यात्ममा
यया॥ ६॥ यदा यदा हि धर्मस्य ग्लानिर्भवति भारत॥ अभ्युत्थानमधर्मस्य तदात्मानं सृ
जाम्यहं॥ ७॥

स्वात्ममायामधिष्ठाय वशीकृत्य संभवाम्यतः लोकवत्॥ ६॥ तच्च जन्म
कदा किमर्थं चेत्युच्यते॥ यदा इति॥ यदा यदा धर्मस्य ग्लानिर्हानिर्वर्णाश्रमादिलक्ष
णस्य प्राणिनामभ्युदयनिःश्रेयससाधनस्य भवति भारत॥ अभ्युत्थानं समुद्भवः।
अधर्मस्य॥ तदा तदात्मानं सृजाम्यहं मायया॥ ७॥ ॥ ॥ ॥

गी॰भा॰ ५५ 115

किमर्थं॥परित्राणेति॥साधूनांसन्मार्गस्थानांपरित्राणायपरिरक्षणाय॥विनाशायचदुःकृतांपा
पकारिणां॥किंचधर्मसंस्थापनार्थाय॥धर्मस्यचसम्यक्स्थापनंतदर्थंभवामि॥युगेयुगेप्र
तियुगंतत्॥ ८ जन्मइति॥जन्ममायारूपं॥कर्मचसाधुपरित्राणादिमेममदिव्यं॥अप्राकृ

परित्राणायसाधूनांविनाशायचदुःकृतां॥धर्मसंस्थापनार्थायसंभवामियुगेयुगे॥८॥
जन्मकर्मचमेदिव्यमेवंयोवेत्तितत्त्वतः॥त्यक्त्वादेहंपुनर्जन्मनैतिमामेतिसोऽर्जुन॥९॥

तमैश्वरं॥एवंयथोक्तंवेत्तितत्त्वतः तत्त्वेनयथावत्॥त्यक्त्वादेहंइमंपुनर्जन्मपुनरुत्पत्तिं
नैतिनप्राप्नोति॥मामेतिआगच्छतिसमुच्यतेहेअर्जुन॥नैषमोक्षमार्गइदानींप्र ५५
वृत्तः॥९॥॥ ॥ ॥

116

किं तर्हि इदं पूर्वमपि॥ वीत इति॥ वीतरागभयक्रोधाः रागश्च भयं च क्रोधश्च वीता विगता।
रागभयक्रोधा येभ्यस्ते वीतरागभयक्रोधाः॥ मन्मया ब्रह्मविदः ईश्वराभेददर्शिनः॥
मामेव परमेश्वरं उपाश्रिताः॥ केवलज्ञाननिष्ठा इत्यर्थः॥ बहवोऽनेके ज्ञानतपसा।

वीतरागभयक्रोधा मन्मया मामुपाश्रिताः॥ बहवो
ज्ञानतपसा पूता मद्भावमागताः॥ १०॥ ॥

ज्ञानमेव परमात्मविषयं तपः॥ तेन ज्ञानतपसा पूताः परां शुद्धिं गताः सन्तः मद्भा
वं ईश्वरभावं मोक्षमागताः समनुप्राप्ताः इतरतपोनिरपेक्षा ज्ञाननिष्ठा इत्यस्य लिंगं
ज्ञानतपसेति विशेषणं॥ १०॥ ॥ ॥ ॥ ॥

गी॰ भा॰
५२
५९
117

इंततवतर्हिरागद्वेषौस्तःयेनकेभ्यश्चिदेवात्मभावंप्रयच्छतिनसर्वेभ्यइत्युच्यते॥ययइतिये
थायेनप्रकारेणयेनप्रयोजनेनयत्फलार्थितयामांप्रपद्यंतेतान्तथैवतत्फलप्रदानेनभ
जामिअनुगृह्णामिअहंतेषांमोक्षंप्रत्यनर्थित्वात्॥नह्येकस्यमुमुक्षुत्वंफलार्थित्वंचयुग
पत्संभवति॥अतोयेफलार्थिनस्तान्फलप्रदानेनयेयथोक्तकारिणस्त्वफलार्थिनोमु।
मुक्षवश्चतान्ज्ञानप्रदानेनयेज्ञानिनःसंन्यासिनोमुमुक्षवश्चतान्मोक्षदानेन॥तथार्त्ता

येयथामांप्रपद्यंतेतांस्तथैवभजाम्यहं॥ ममवर्त्मानुवर्त्ततेमनुष्याःपार्थसर्वशः॥११॥

नार्त्तिहरणेन॥इत्येवंयथायेनप्रकारेणप्रपद्यंतेतांस्तथैवभजामीत्यर्थः॥नपुना
रागद्वेषनिमित्तंमोहनिमित्तंवाकिंचिद्भजाम्यहं॥सर्वथापिफलार्थित्वेमुमुक्षुत्वेचजे।
स्तानांभगवच्छरणानामावश्यकमित्याह॥सर्वथापिसर्वावस्थस्यममेश्वरस्यवर्त्ममा
र्गमनुवर्त्ततेमनुष्याःयत्फलार्थितयायस्मिन्कर्मण्यधिकृतायेतेमनुष्याअत्रोच्य।
ते॥हेपार्थसर्वशःसर्वप्रकारैः॥११॥॥ ॥ ॥ प९

यदेतवेश्वरस्यरागद्वेषाभावःसर्वप्राणिषुअनुजिघृक्षायांतुल्यायांसर्वफलप्रदानस
118 मर्थेत्वयिसतिवासुदेवः॥सर्वमितिज्ञानेनैवमुमुक्षवःसंतःकस्मात्वामेवसर्वेनप्र
पद्यंतइतिश्रृणुतत्रकारणं॥कांक्षंतइति॥कांक्षंतःअभीप्संतःकर्मणांसिद्धिंफलनिष्प
त्तिंप्रार्थयंतः॥यजंते॥इहास्मिन्लोकेदेवताःइंद्राग्न्याद्याः॥अथयोऽन्यांदेवतामुपास्ते
अन्योऽसावन्योऽहमस्मीतिनसवेदयथापशुरेवंसदेवानामितिश्रुतेः॥तेषांहिभिन्नदेव
तायाजिनांफलाकांक्षिणांहिक्षिप्रंशीघ्रंहियस्मान्मानुषेलोके॥मनुष्यलोकेहिशास्त्राधि।

कांक्षंतःकर्मणांसिद्धिंयजंतइहदेवताः॥ क्षिप्रंहिमानुषेलोकेसिद्धिर्भवतिकर्मजा॥१२॥

कारः क्षिप्रंमानुषेलोकइतिविशेषणादन्येष्वपिकर्मफलसिद्धिंदर्शयतिभगवान्॥मा
नुषेलोकेवर्णाश्रमादिकर्माणीतिविशेषःतेषांवर्णाश्रमाद्यधिकारिणांकर्मणांफल
सिद्धिः॥क्षिप्रंभवतिकर्मजाकर्मणोजातामानुषएवलोकेवर्णाश्रमादिकर्माधिकारोना
न्येषुलोकेष्वितिनियमः॥किंनिमित्तमिति॥अथवावर्णाश्रमादिप्रविभागोपेतामनु
ष्यामममवर्त्मानुवर्त्ततेसर्वशइत्युक्तं ॥१२॥ ॥ ॥ ॥

गी॰भा॰ कस्मात्पुनः कारणान्नियमेन तव वर्त्मानुवर्तन्ते नान्यस्येत्युच्यते॥ चातु इति॥ चत्वार एव वर्णा

प॰ श्चातुर्वर्ण्यं॥ मया ईश्वरेण सृष्टं उत्पादितं॥ ब्राह्मणोऽस्य मुखमासीदित्यादिश्रुतेः गुणकर्म

विभागशः गुणविभागशः॥ कर्मविभागशश्च गुणाः सत्वरजस्तमांसि॥ तत्र सात्विकस्य स

119 त्वप्रधानस्य ब्राह्मणस्य शमो दमस्तप इत्यादीनि कर्माणि सत्वोपसर्जनस्य रजःप्रधान

स्य क्षत्रियस्य शौर्यतेजःप्रभृतीनि कर्माणि॥ तमउपसर्जनस्य रजःप्रधानस्य वैश्यस्य॥

कृष्यादीनि कर्माणि॥ रजउपसर्जनस्य तमःप्रधानस्य शूद्रस्य शुश्रूषैव कर्म॥ इत्येवं गु॰। गुणक

चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः॥ तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययम्॥१३

र्मविभागशश्चातुर्वर्ण्यं मया सृष्टमित्यर्थः॥ तच्चेदं चातुर्वर्ण्यं नान्येषु लोकेषु॥ अतो मा।

नुषे लोक इति विशेषणं॥ हन्त तर्हि चातुर्वर्ण्यस्य सर्गादेः कर्मणः कर्तृत्वात्तत्फले

न युज्यसे अतो न त्वं नित्यमुक्तो नित्येश्वरश्चेत्युच्यते॥ यद्यपि मायासंव्यवहारेण तस्य।

कर्मणः कर्तारमपि सन्तं॥ मां परमार्थतो विद्ध्यकर्तारमत एवाव्ययं॥ असंसारि ५८

णं मां विद्धि ॥१३॥॥

येषान्तु कर्मणां कर्त्तारं मां मन्यसे परमार्थतः तेषामकर्त्तैवाहं यतः ॥ न मां इति ॥ न मां तानि
120 कर्माणि लिंपन्ति देहाद्यारंभकत्वेनाहंकाराभावात् ॥ न च तेषां कर्मणां फलेषु मे मम
स्पृहा तस्मात् ॥ येषान्तु संसारिणामहंकर्त्तेत्यभिमानः ॥ कर्मसु स्पृहा न तत्फलेषु च तान्
कर्माणि लिंपन्तीति युक्तं ॥ तदभावान्न कर्माणि मां लिंपन्तीति ॥ एवं यो ऽन्योपि मामात्म

न मां कर्माणि लिंपन्ति न मे कर्मफले स्पृहा ॥ इति
मां योऽभिजानाति कर्मभिर्न स बध्यते ॥१४॥ ॥

त्वेनाभिजानाति नाहं कर्त्ता न मे कर्मफले स्पृहेति ॥ कर्मभिर्न स बध्यते ॥ तस्याऽपि न
देहारंभकानि कर्माणि भवंतीत्यर्थः ॥ नाहं कर्त्ता न मे कर्मफले स्पृहेति ॥१४॥
राम ॥ ॥शिव॥ ॥राम

गी॰भा॰
५८
121

एवंइति॥ पूर्वैरप्यतिक्रान्तैर्मुमुक्षुभिः एवंज्ञात्वाकृतंकर्मतेनकर्मैवत्वंकुरुनतूष्णीमासीःना
पिसंन्यासः कर्तव्यः तस्मात्त्वंपूर्वैरप्यनुष्ठितत्वात्॥ यद्यनात्मज्ञस्तदात्मशुद्ध्यर्थंतत्वविच्चेल्लोकसंग्र
हार्थं॥ पूर्वैर्जनकादिभिः पूर्वतरंनाधुनातनंकृतंनिर्वर्तितं॥१५॥ तत्रचेत्कर्मकर्तव्यंत्वद्व
चनात्करोम्यहं॥ किंविशेषितेनपूर्वैः पूर्वतरंमितिउच्यते॥ यस्मान्महद्वैषम्यंकर्माक

एवंज्ञात्वाकृतंकर्मपूर्वैरपिमुमुक्षुभिः॥ कुरुकर्मैवतस्मात्त्वंपूर्वैः पूर्वतरंकृतं॥१५॥
किंकर्मकिमकर्मेतिकवयोप्यत्रमोहिताः॥ तत्तेकर्मप्रवक्ष्यामियज्ज्ञात्वामोक्ष्यसेशु
भात्॥१६॥

मणिाकथं॥ किंकर्मइति॥ किंकर्मकिमकर्मेतिकवयः मेधाविनोपि
अत्रास्मिन्कर्मादिविषयेमोहिताः मोहंगताः॥ अतस्तेतुभ्यमहंकर्मअकर्मचप्रव
क्ष्यामियज्ज्ञात्वाविदित्वाकर्मादिकंमोक्ष्यसेऽशुभात्संसारात्॥ नचैवंत्वयामन्तव्यंकर्म ५८
नामदेहादिचेष्टालोकप्रसिद्धंअकर्मतदक्रियातूष्णीमासनं॥ किंतत्रबोद्धव्यमिति॥१६॥

122 कस्मात्॥ कर्म इति॥ कर्मणः शास्त्रविहितस्यापि यस्मादस्ति बोद्धव्यं॥ बोद्धव्यमस्त्येव वि
कर्मणः॥ प्रतिषिद्धस्य कर्मणः तथाऽकर्मणश्च तूष्णीम्भावस्य बोद्धव्यमस्तीति॥

कर्मणो ह्यपि बोद्धव्यं बोद्धव्यं च विकर्मणः॥ अ
कर्मणश्च बोद्धव्यं गहना कर्मणो गतिः॥१७॥

त्रिष्वप्यध्याहारः कर्तव्यः यस्माद्गहना विषमा दुर्ज्ञाना॥ कर्मण इत्युपलक्षणार्थं
कर्मादीनां॥ कर्माकर्मविकर्मणां गतिर्याथात्म्यं तत्त्वमित्यर्थः॥१७॥

किंपुनस्तत्त्वंकर्मादेर्यद्बोद्धव्यंवक्ष्यामीतिप्रतिज्ञातमित्युच्यते॥कर्मणीति॥कर्मणिकर्मक्रियतइ
तिव्यापारमात्रंतस्मिन्कर्मणि॥यःअकर्मकर्माभावंयःपश्येत्॥अकर्मणिचकर्माभावेकर्तृत
न्त्रत्वात्प्रवृत्तिनिवृत्त्योर्वस्त्वप्राप्यैवहिसर्वएवक्रियाकारकादिव्यवहारःअविद्याभूमावेव।
कर्मयःपश्येत्पश्यति॥सबुद्धिमान्मनुष्येषु॥सयुक्तःयोगीचकृत्स्नकर्मकृत्समस्त।

कर्मण्यकर्मयःपश्येदकर्मणिचकर्मयः॥सबु
द्धिमान्मनुष्येषुसयुक्तःकृत्स्नकर्मकृत्॥१८॥

कर्मकृत्समस्तइतिस्तूयते॥कर्मण्यकर्मणोरितरेतरदर्शी॥ननुकिमिदंविरुद्धमुच्यतेकर्म
ण्यकर्मयःपश्येदकर्मणिचकर्मयइतिनहिकर्माकर्मस्यात्॥अकर्मवाकर्मतत्रकथंवि
रुद्धंपश्येत्द्रष्टा॥ननुअकर्मैवपरमार्थतःसत्कर्मवदवभासतेमूढदृष्टेर्लोक ५८
स्य॥तथाकर्मैवाकर्मवत्॥तत्रयथाभूतदर्शनार्थमाहभगवान्॥कर्मण्यकर्मयः

पश्येदिति॥ अतो न विरुद्धं॥ बुद्धिमत्वाद्युपपत्तेश्च बोद्धव्यमिति च यथाभूतमुच्यते॥ न
च विपरीतज्ञानादशुभात्॥ मोक्षणं स्यात्॥ यज्ज्ञात्वा मोक्ष्यसेऽशुभादिति चोक्तं तस्मा
त्कर्माकर्मणी विपर्ययेण गृहीते प्राणिभिस्तद्विपर्ययग्रहणनिवृत्त्यर्थं भगवतो
वचनं कर्मण्यकर्म यः पश्येदित्यादि॥ न चात्र कर्माधिकरणमकर्मास्ति॥ कुंडे बदरा
णीव॥ नाप्यकर्माधिकरणं कर्मास्ति कर्माभावत्वादकर्मणः॥ अतो विपरीते गृही
ते एव कर्माकर्मणी लौकिकैः यथा मृगतृष्णिकायामुदकं शुक्तिकायां वा रजतं॥ ननु
कर्म कर्मैव अकर्म अकर्मैव सर्वेषां न क्वचिद्व्यभिचरति॥ तन्न नौस्थस्य नावि गच्छंत्यां
तटस्थेष्वगतिषु नगेषु प्रतिकूलगतिदर्शनात्॥ दूरेषु चक्षुषासन्निकृष्टेषु गच्छ
त्सु गत्यभावदर्शनादेवमिहाप्यकर्मणि अहं करोमीति कर्मदर्शनं॥ कर्मणि चा
कर्मविपरीतदर्शनं येन तन्निराकरणार्थमुच्यते॥ कर्मण्यकर्म यः पश्येदित्यादि॥ त
देतदुक्तप्रतिवचनमप्यसकृदत्यंतविपरीतदर्शनभावितत्तया मोमुह्यमानो लोकः श्रुत

गी॰भा॰ मण्यसकृत्तत्वंविस्तरत्यमिथ्याग्रहंसंगमवतार्थ्यावतार्थ्यचोदयतीतिपुनःपुनरुत्तरमाहभग।
६ वान्॥दुर्विज्ञेयत्वंचालक्ष्यवस्तुनः॥अव्यक्तोयमचिंत्योयं॥नजायतेम्रियतइत्यादिना॥आत्म
125 निकर्माभावःश्रुतिस्मृतिन्यायसिद्धः॥उक्तोवक्ष्यमाणश्चतस्मिन्नात्मनिकर्माभावेअकर्मणि
चकर्मविपरीतदर्शनमत्यंतनिरूढंयतःकिंकर्मकिमकर्मेतिकवयोप्यत्रमोहिताः॥देहाद्या
श्रयंकर्मआत्मन्यध्यारोप्य॥अहंकर्ताममैतत्कर्ममयास्यकर्मणःफलंभोक्तव्यमितिच
तथाहंतूष्णींभवामियेनाहंनिरायासोऽकर्मासुखीस्यामितिकार्यकारणाश्रयव्यापारोपर।
मंकर्मैवतत्कृतंचसुखित्वमात्मन्यध्यारोप्यनकरोमि॥किंचित्तूष्णींसुखमासइत्यभिमन्य
तेलोकःतत्रेदंलोकस्यविपरीतदर्शनापनयनायाहभगवान्॥कर्मण्यकर्मयइत्यादि
अत्रकर्मकर्मैवसत्कार्यकारणाश्रयंकर्मरहितेऽविक्रियेआत्मनिसर्वैरध्यस्तं॥यतःपंडि
तोप्यहंकरोमीतिमन्यते॥अतआत्मसमवेततयासर्वलोकप्रसिद्धेकर्मणिनदीकूल। ६
स्थेष्विववृक्षेषुगतिःप्रातिलोम्येनतत्राकर्मकर्माभावंयथाभूतंगत्यभावमिववृक्षेषुयः

126

पश्येत॥ अकर्मणि च कार्यकरणव्यापारोपरमे कर्मवदात्मन्यध्यारोपिते तूष्णीमकुर्वन्
सुखमास इत्यहंकाराभिसंधिहेतुत्वात्तस्मिन्नकर्मणि च कर्म यः पश्येत॥ य एवं कर्माक
र्मविभागज्ञः स बुद्धिमान्पंडितः मनुष्येषु स युक्तः योगी कृत्स्नकर्मकृच्च स॥ अशुभान्मो
क्षितः कृतकृत्यो भवतीत्यर्थः॥ अयं श्लोकोऽन्यथा व्याख्यातः कैश्चित॥ कथं नित्यानां किल
कर्मणामीश्वरार्थेऽनुष्ठीयमानानां तत्फलाभावादकर्माणि तान्युच्यंते॥ गौण्या वृत्त्या तेषां
चाकरणमकर्म तच्च प्रत्यवायफलत्वात्कर्मोच्यते गौण्यैव वृत्त्या॥ तत्र नित्ये कर्मण्यकर्म यः
पश्येत्फलाभावात् यथा धेनुरपि गौरगौरुच्यते॥ क्षीराख्यं फलं न प्रयच्छतीति तद्वत॥ तथा नि
त्याकरणे तु कर्मणि च कर्म यः पश्येन्नरकादिप्रत्यवायफलं प्रयच्छतीति॥ नैतद्युक्तं व्याख्या
नमेवं ज्ञानादशुभान्मोक्षानुपपत्तेः यज्ज्ञात्वा मोक्ष्यसेऽशुभादिति भगवतोक्तं वाध्ये
त॥ कथं नित्यानामनुष्ठानादशुभात्स्यान्नाम मोक्षणं न तु तेषां फलाभावज्ञानात् नहि नित्या
नां फलाभावज्ञानमशुभमुक्तिफलत्वेन चोदितं॥ नित्यकर्मज्ञानं वा न च भगवतैवेहोक्तं

गी० भा० ९१

127

एतेनाकर्मणि कर्मदर्शनं प्रत्युक्तं ॥ न ह्यकर्म कर्मेति दर्शनं कर्तव्यतयेह चोद्यते नित्य
स्य तु कर्तव्यतामात्रं ॥ न चाकरणान्नित्यस्य प्रत्यवायो भवतीति विज्ञानात्किंचित्फलं स्यात्
नापि नित्याकरणं ज्ञेयत्वेन चोदितं ॥ नापि कर्माकर्मेति मिथ्यादर्शनादशुभान्मोक्षणं । न
हितमत्तमसो निवर्तकं भवति ॥ ननु कर्मणि यदकर्मदर्शनं ॥ अकर्मणि च कर्मदर्श
नं न मिथ्याज्ञानं ॥ किं तर्हि गौणं × न च बुद्धिमत्त्वयुक्तताकृत्स्नकर्मकृत्त्वादि च फलस्य
श्रूयते तत्स्तुतिर्वा ॥ मिथ्याज्ञानमेव हि साक्षादशुभरूपं कुतोऽन्यस्मादशुभान्मोक्षणं × फ
लभावाभावनिमित्तं ॥ न कर्माकर्मविज्ञानादपि गौणात्फलस्याश्रवणात् अपि श्रुतहान्यश्रु
तकल्पनया कश्चिद्विशेषो लभ्यते ॥ स्वशब्देनापि शक्यं वक्तुं नित्यकर्मणां फलं नास्ति
अकरणात्तेषां नरकपातः स्यादिति ॥ तत्र व्याजेन परव्यामोहरूपेणाकर्मापि कर्मेयः
पश्येदित्यादिना किं तत्रैवं व्याचक्षाणेन भगवतोक्तं ॥ लोकस्य व्यामोहार्थमिति व्यक्तं ९१
प्रकल्पितं स्यात् । न चैतच्छद्मरूपेण वाक्येन रक्षणीयं वस्तु नापि शब्दान्तरेण पुनः पुन

128 रुच्यमानंसत्त्वबोधंस्यादित्येवंवक्तुंयुक्तं॥कर्मण्येवाधिकारस्तइत्यत्रस्फुरन्तरडक्तोर्थान
पुनर्वक्तव्योभवति॥सर्वत्रप्रशास्त्रंबोद्धव्यंकर्तव्यमेवननिःप्रयोजनंबोद्धव्यमित्युच्य
ते॥नचमिथ्याज्ञानंबोद्धव्यंभवति॥तस्मात्तुपस्थापितंचवस्त्वाभासेनापिनित्यानाम
करणादभावात॥प्रत्यवायभावोत्पत्तिर्नासतोविद्यतेभावइतिकथमसतःसज्जाय
तइतिदर्शितंच॥असतःसदुत्पत्तिंब्रुवतामसदेवसद्भवेत॥सच्चासद्भवेदित्युक्तंस्या
त्तच्चाप्ययुक्तंसर्वप्रमाणविरोधात॥नचनिःफलंविदध्यातकर्मशास्त्र॥दुःखरूपत्वा
त॥दुःखस्यचबुद्धिपूर्वकतयाकार्यत्वानुपपत्तेः॥तदकरणेचनरकपाताभ्युपगमेऽ
नर्थायैवोभयथापिकरणेऽकरणेचशास्त्रंनिःफलंप्रकल्पितंस्यात॥स्वाभ्युपगमवि
रोधश्चनित्यंनिःफलंकर्मेत्यभ्युपगममोक्षफलायेत्यत्तिब्रुवन्तः॥तस्माद्यथाश्रु
तएवार्थः॥कर्मण्यपकर्मयइत्यादेस्तथाचव्याख्यातोस्माभिः॥
श्लोकः ॥१९॥ ॥ शिव

गी॰भा॰
६२
129
ना४

तदेतदकर्मण्यकर्मादिदर्शनं स्तूयते ॥ यस्येति यस्य यथोक्तदर्शिनः सर्वे यावंतः स
मारंभाः सर्वाणि कर्माणि समारभ्यंत इति ॥ समारंभाः कामसंकल्पवर्जिताः काम
स्तत्कारणैश्च संकल्पैश्च वर्जिताः ॥ मुधैव चेष्टामात्रा अनुष्ठीयंते प्रवृत्तेन चेल्लोक
संग्रहार्थं निवृत्तेन चेज्जीवनमात्रार्थं तं ज्ञानाग्निदग्धकर्माणं कर्मादावकर्मादिद
र्शनं ज्ञानं तदेवाग्निस्तेन ज्ञानाग्निना दग्धानि शुभाशुभलक्षणानि कर्माणि यस्य त
माहुः परमार्थतः पंडितं बुधाः ब्रह्मविदः यस्त्वकर्मादिदर्शी सो कर्मदर्शनादेव नि

यस्य सर्वे समारंभाः कामसंकल्पवर्जिताः ॥ ज्ञानाग्निदग्धकर्माणं तमाहुः पंडितं बुधाः ॥१९॥



ष्कर्मा संन्यासी जीवनमात्रार्थचेष्टः कर्मणि न प्रवर्तते ॥ यद्यपि प्राग्विवेकतः प्रवृत्तः यस्तु प्रा
रब्धकर्मा सन्नुत्तरकालमुत्पन्नात्मसम्यग्दर्शनः स्यात्स कर्मणि प्रयोजनमपश्यन्
ससाधनं कर्म परित्यजत्येव स कुतश्चिन्निमित्तात्कर्मपरित्यागासंभवे सति कर्मणि त ६२
त्फले च संगरहिततया स्वप्रयोजनाभावाल्लोकसंग्रहार्थं पूर्ववत् ॥ कर्मणि प्रवृत्तोपि नै
व किंचित्करोमीति ॥१८॥

130

ज्ञानाग्निदग्धकर्मत्वात्तदीयंकर्माकर्मैवेत्संप्रपंचयन्नित्येवमर्थंदर्शयन्नाह ॥ त्यक्त्वेति
त्यक्त्वाकर्मस्वभिमानंफलासंगंचययोक्तेनज्ञानेननित्यतृप्तःनिराकांक्षःविषयेष्वि
त्यर्थः ॥ निराश्रयः आश्रयविहीनः ॥ आश्रयोनामयदाश्रित्यपुरुषार्थंसिसाधयिषति

त्यक्त्वाकर्मफलासंगंनित्यतृप्तोनिराश्रयः ॥ कर्म
ण्यभिप्रवृत्तोपिनैवकिंचित्करोतिसः ॥२०॥ ॥

दृष्टादृष्टफलसाधनाश्रयरहितइत्यर्थः ॥ तेनैवंभूतेनप्रयोजनाभावात्साधनं
कर्मत्यक्तव्यमेवेतिप्राप्तेततोनिर्गमासंभवाल्लोकसंग्रहचिकीर्षयाशिष्टविगर्हणाप
रिजिहीर्षयावापूर्ववत्कर्मण्यभिप्रवृत्तोपिनिःक्रियात्मदर्शनसंपन्नत्वान्नैवकिंचित्

कर्मणि ॥२॥

श्लो॰ ४
131

यः पुनः पूर्वोक्तविपरीतः प्रागेव कर्मारंभाद्ब्रह्मणि सर्वांतरे प्रत्यगात्मनि निःक्रिये संजाता-
त्मदर्शनः दृष्टादृष्टेष्टविषयाशीर्विवर्जिततया दृष्टादृष्टार्थे कर्मणि प्रयोजनमपश्य-
न्ससाधनं कर्म संन्यस्य शरीरयात्रामात्रचेष्टो यतिर्ज्ञाननिष्ठो मुच्यत इत्येतमर्थं दर्शयितु-
माह ॥ निराशीरिति ॥ निराशीर्निर्गता आशिषो यस्मात्स निराशीः यतचित्तात्मा चित्तमंतःकर-
णमात्मा बाह्यः कार्यकरणसंघातः ॥ तावुभावपि यतौ येन ॥ स यतचित्तात्मा त्यक्तसर्व
संयतौ ।

निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः ॥ शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषं ॥२१॥

परिग्रहः त्यक्तः सर्वपरिग्रहो येन स त्यक्तसर्वपरिग्रहः ॥ शारीरं शरीरस्थितिमात्रप्रयोज-
नं केवलं तत्राप्यभिमानवर्जितं कुर्वन्नाप्नोति न प्राप्नोति किल्बिषं ॥ अनिष्टरूपं पापं ॥ ध-
र्मं च मुमुक्षोरनिष्टरूपत्वाद्धर्मोऽपि किल्बिषमेव किं च ॥ शारीरं केवलं कर्मेत्यत्र किं शरी-
रनिर्वर्त्यं शारीरं कर्माभिप्रेतमुताहोस्विच्छरीरस्थितिमात्रप्रयोजनं शारीरं
कर्मेति ॥ किं चातो यदि शरीरनिर्वर्त्यं शारीरं कर्म यदि वा शरीरस्थितिमात्रप्रयोजनं शा-

132

रीरमित्युच्यते॥ यदा शरीरनिर्वर्त्यं कर्म शारीरमभिप्रेतं स्यात्तदा दृष्टादृष्टप्रयोजनं कर्म प्र
तिषिद्धं शरीरेण कुर्वन्नाप्नोति॥ किल्बिषमिति ब्रुवतो विरुद्धाभिधानं प्रसज्येत॥ शास्त्रीयं
च कर्म दृष्टादृष्टप्रयोजनं शरीरेण कुर्वन्नाप्नोति किल्बिषमिति ब्रुवतोऽप्राप्तप्रतिषेधप्र
संगः। शारीरं कर्म कुर्वन्निति विशेषणात्केवलशब्दप्रयोगाच्च॥ वाङ्मनसनिर्वर्त्यं कर्म
विधिप्रतिषेधविषयं धर्माधर्मशब्दवाच्यं कुर्वन्प्राप्नोति किल्बिषमित्युक्तं स्यात्तत्रापि
वाङ्मनसाभ्यां विहितानुष्ठानपक्षे किल्बिषप्राप्तिवचनं विरुद्धमापद्येत॥ प्रतिषि
द्धसेवापक्षेऽपि भूतार्थानुवादमात्रमनर्थकं स्यात्॥ यदा शरीरस्थितिमात्रप्रयोजनं।
शारीरं कर्माभिप्रेतं भवेत्तदा दृष्टादृष्टप्रयोजनं कर्मविधिप्रतिषेधशास्त्रगम्यं शरीर
वाङ्मनसनिर्वर्त्यमन्यदकुर्वन्॥ तैरेव शरीरादिभिः शरीरस्थितिमात्रप्रयोजनं केव
लशब्दप्रयोगादहं करोमीत्यभिमानवर्जितः॥ शरीरादिचेष्टामात्रं लोकदृष्ट्या कुर्व
न्नाप्नोति किल्बिषमेवंभूतस्य पापशब्दवाच्यकिल्बिषप्राप्त्यसंभवात्॥ किल्बिषं संसारं
नाप्नोति ज्ञानाग्निदग्धसर्वकर्मत्वादप्रतिबन्धेन मुच्यत एवेति पूर्वोक्तसम्यग्दर्शनफ

त्यक्तसर्वपरिग्रहस्य यतेरन्नादेः शरीरस्थितिहेतोः परिग्रहस्याभावाद्याचनादिना ॥ शरीरस्थि
तौ कर्तव्यतायां प्राप्तायामयाचितमसंक्लृप्तमुपपन्नं यदृच्छया इत्यादिवचनेनानुज्ञातं य
तेः शरीरस्थितिहेतोरन्नादिप्राप्तिद्वारमाविष्कुर्वन्नाह ॥ यदृच्छेति ॥ यदृच्छालाभसंतुष्टः अ
प्रार्थितोपगतो लाभो यदृच्छालाभः ॥ तेन संतुष्टः संजातालंप्रत्ययः ॥ द्वंद्वातीतः द्वंद्वैः

यदृच्छालाभसंतुष्टो द्वंद्वातीतो विमत्सरः ॥ समः
सिद्धावसिद्धौ च कृत्वापि न निबध्यते ॥ २२ ॥

शीतोष्णादिभिरभिहन्यमानोप्यविषण्णचित्तः द्वंद्वातीत उच्यते ॥ विमत्सरः ॥ विगतम
त्सरः ॥ निर्वैरबुद्धिः समस्तुल्यः ॥ यदृच्छालाभस्य सिद्धावसिद्धौ च ॥ य एवंभूतो यतिरन्ना
देः शरीरस्थितिहेतोर्लाभालाभयोः समो हर्षविषादवर्जितः ॥ कर्मादावकर्मा
दिदर्शी यथाभूतात्मदर्शननिष्ठः शरीरस्थितिमात्रप्रयोजने भिक्षाटनादौ कर्मणि

134 शरीरादिनिर्वर्त्यपि नैव किंचित्करोम्यहं ॥ गुणा गुणेषु वर्तन्त इत्येवं संपरिचक्षाणस्यात्मनः
कर्तृत्वाभावं पश्यन ॥ नैव किंचिद्भिक्षाटनादिकं कर्म करोति लोकव्यवहारसामान्यद
र्शनेन तु लौकिकैरारोपितकर्तृत्वे भिक्षाटनादौ कर्मणि कर्ता भवति ॥ स्वानुभवेन तु शा
स्त्रप्रमाणाज्जनितेनाकर्तैव सः एवं पराध्यारोपितकर्तृत्वे ॥ शरीरस्थितिमात्रप्रयोजने
भिक्षाटनादिकं कर्म कृत्वापि न निबध्यते बंधहेतोः कर्मणः सहेतुकस्य ज्ञानाग्निद
ग्धत्वादित्युक्तानुवाद एवैषः ॥ त्यक्त्वा कर्मफलासंगमित्यनेन श्लोकेन यः प्रारब्धक
र्मा सन ॥ यदा निःक्रियब्रह्मात्मदर्शनसंपन्नः स्यात्तदा तस्यात्मनः कर्तृकर्मप्रयोजना।
भावदर्शिनः कर्मपरित्यागे प्राप्ते कुतश्चिन्निमित्तात्तदसंभवे सति एवं वर्त्तास्मिन्कर्म
ण्यभिप्रवृत्तस्यापि नैव किंचित्करोति स इति कर्माभावः ॥ प्रदर्शितः ॥ यस्यैवंक।
र्माभावादर्शितत्तस्यैव ॥२२॥
॥ शिव ॥ शिव ॥
॥ राम ॥

गतइति॥ गतसंगस्य सर्वतो निवृत्तासक्तेर्मुक्तस्य निवृत्तधर्माधर्मादिबंधनस्य ज्ञानावस्थित।
चेतसः॥ ज्ञानएवावस्थितं चेतो यस्य सोयं ज्ञानावस्थितचेतास्तस्य यज्ञाय यज्ञनिर्वृत्यर्थं

गतसंगस्य मुक्तस्य ज्ञाना।
वस्थितचेतसः॥ यज्ञा।
याचरतः कर्म समग्रं।
प्रविलीयते॥२३॥॥॥

माचरतः निर्वर्त्तयतः॥ कर्म समग्रं सहाग्रेण फलेन वर्त्तत इति॥ समग्रं कर्म यत्
तत्समग्रं प्रविलीयते उन्मुच्यते ॥२३॥

कस्मात्पुनः कारणात् ॥ क्रियमाणं कर्म स्वकार्यारंभं बंधनमकुर्वत् समग्रं प्रलीयत इ-
त्युच्यते यतः ॥ ब्रह्मार्पणमिति ॥ ब्रह्मार्पणम् [illegible] येन करणेन ब्रह्मवित् हविरग्नावर्पयति तद-
र्पणं ब्रह्मैवेति पश्यति ॥ तस्यात्मव्यतिरेकेणाभावं पश्यति ॥ यथा शुक्तिकायां रजताभा-
वं तद्वदुच्यते ॥ ब्रह्मैवार्पणमिति ॥ यथा यद्रजतं तच्छुक्तिकैवेति ॥ ब्रह्मार्पणमित्यसमस्ते

ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतं ॥ ब्रह्मै-
व तेन गंतव्यं ब्रह्मकर्मसमाधिना ॥२४॥ ॥

पदे यदर्पणबुद्ध्या गृह्यते तल्लोके ब्रह्मैवास्य तथा यद्धविः तथा यद्धविर्बुद्ध्या गृह्यते तद्ब्रह्मै-
वास्य ॥ तथा ब्रह्माग्नाविति समस्तं पदं ॥ अग्निरपि ब्रह्मैव यत्र हूयते ॥ ब्रह्मणा कर्त्रा ब्रह्मैव
कर्तेत्यर्थः ॥ यत्तेन हुतं हवनक्रियापि ब्रह्मैव ॥ यत्तेन गंतव्यं फलं तदपि ब्रह्मैव ॥ ब्रह्मकर्म
समाधिना ब्रह्मैव कर्म ब्रह्मकर्म तस्मिन् ब्रह्मकर्मणि समाधिर्यस्य स ब्रह्मकर्मसमाधिस्ते

गी॰ भा॰
९९
137

नब्रह्मकर्मसमाधिना॥ब्रह्मैवगंतव्यं॥एवंलोकसंग्रहंचिकीर्षुणाऽपिक्रियमाणंकर्म।
परमार्थतः।अकर्मब्रह्मबुद्ध्योपमृदितत्वात्॥निवृत्तकर्मणोऽपिसर्वकर्मसंन्यासिनः
सम्यग्दर्शनस्तुत्यर्थंब्रह्मयज्ञत्वसंपादनंज्ञानस्यसुतरामुपपद्यतेयदर्पणाद्यधियज्ञेप्र
वर्तितंतदस्याध्यात्मंब्रह्मैवपरमार्थदर्शिनइति॥अन्यथासर्वस्यब्रह्मत्वेऽर्पणादीनामेव
विशेषतोब्रह्मत्वाभिधानमनर्थकंस्यात्॥यथात्विमिदंसर्वमसत्त्ववदृशः तस्माद्ब्रह्मैवेदंसर्व
मितिजानतः सर्वकर्माभावः कारकबुद्ध्यभावाच्च॥नहिकारकबुद्धिरहितंयज्ञाख्यंकर्मदृष्टं
सर्वमेवाग्निहोत्रादिकंकर्मशब्दसमर्पितदेवताविशेषसंप्रदानादिकारकबुद्धिमत्कर्तृ।
त्वाभिमानफलाभिसंधिमच्चदृष्टं॥नोपमृदितक्रियाकारकफलभेदबुद्धिमत्॥कर्तृत्वाभि
मानफलाभिसंधिरहितंवा॥इदंतुब्रह्मबुद्ध्युपमृदितार्पणादिकारकक्रियाफलभेदबुद्धि
कर्मअतोऽकर्मैव॥तथाचदर्शितं॥कर्मण्यकर्मयःपश्येदिति॥कर्मण्यभिप्रवृत्तोऽपिनैवकिं
चित्करोतिसः॥गुणागुणेषुवर्तंते॥नैवकिंचित्करोमीतियुक्तोमन्येततत्त्ववित्इत्यादि ९९
भिः॥तथाचदर्शयन्॥तत्रतत्रचक्रियाकारकभेदबुद्ध्युपमर्दंनकरोति॥दृष्टाचकाम्या

ग्निहोत्रादौ कामोपमर्दे काम्याग्निहोत्रादिहानिः तथा मतिपूर्वकत्वादिना कर्मणां का।
138 र्यविशेषस्यारंभकत्वं दृष्टं ॥ तथेहापि ब्रह्मबुद्ध्युपमर्दितं कारककियाफलभेदबोध्यं।
चेष्टामात्रेणाकर्मापि विदुषोऽकर्म संपद्यते ॥ उक्तं च समग्रं प्रविलीयत इति ॥ अत्र केचिदा
हुः ॥ यद्ब्रह्म तदर्पणादि ब्रह्मैव किलार्पणादिना पंचविधेन कारकात्मना वस्थितं सत्तदे
व कर्म करोति न तत्र नार्पणादिबुद्धिर्निवर्त्यते किंत्वर्पणादिषु ब्रह्मबुद्धिराधीयते ॥ य
था प्रतिमादौ विष्ण्वादिबुद्धिर्यथा वा नामादौ ब्रह्मबुद्धिः ॥ सत्यमेवमपि स्यात् ॥ यदि ज्ञान
यज्ञस्तुत्यर्थं प्रकरणं न स्यात् ॥ अत्र तु सम्यग्दर्शनं ज्ञानयज्ञशब्दाभिहितं ॥ अनेकान्यज्ञश।
ब्दितान् क्रियाविशेषानुपन्यस्य ॥ श्रेयान् द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः परंतप इति ॥ ज्ञा
नयज्ञं स्तौति ॥ अत्र च समर्थमिदं वचनं ब्रह्मार्पणमित्यादि ज्ञानस्य यज्ञत्वसंपादने
अन्यथा सर्वस्य ब्रह्मत्वेऽर्पणादीनामेव विशेषतो ब्रह्मत्वाभिधानमनर्थकं स्यात् ॥
ये त्वर्पणादिषु प्रतिमायां विष्णुदृष्टिवद्ब्रह्मदृष्टिः क्षिप्यते नामादिष्विव चेति ब्रुव
ते न तेषां ब्रह्मविद्योक्ता इह विवक्षिता स्यात् अर्पणादिविषयत्वाज्ज्ञानस्य ॥ न च दृष्टिसंपा

दनत्तानेनेनमोक्षफलंप्राप्यते॥ब्रह्मैवतेनगंतव्यमितिवोच्यते॥विरुद्धंसम्यग्दर्शनमंतरे
णमोक्ष।फलंप्राप्यतइति॥प्रकृतविरोधश्चसम्यग्दर्शनंचप्रकृतं॥कर्मण्यकर्मयःप।
श्येदित्यत्रांतेच॥सम्यग्दर्शनस्यैवोपसंहरणात्॥श्रेयान्द्रव्य
मयाद्यज्ञाज्ज्ञानयज्ञः॥ज्ञानंलब्ध्वापरांशांतिमि
त्यादिनासम्यग्दर्शनस्तुतिमेवकुर्वन्नुप
क्षीणोध्यायः॥तत्रयस्मादर्पणादौब्र
ह्मदृष्टिप्रकरणेप्रतिमायामिव
विष्णुदृष्टिरित्यनुपपन्नं॥त
स्माद्यथाव्याख्यातार्थ
एवायंश्लोकः
॥२४॥
॥

६०

अत्राधुनासम्यग्दर्शनस्ययज्ञत्वंसंपाद्यतत्स्तुत्यर्थमन्येपियज्ञाउपक्षिप्यन्ते॥ दैवमिति॥ दैवमे
140 वदेवाइज्यतेयेनयज्ञेनअसौदेवोयज्ञः॥ तमेवापरेयज्ञंयोगिनःकर्मिणःपर्युपासतेकु
र्वन्तीत्यर्थः॥ ब्रह्माग्नौसत्यंज्ञानमनंतंब्रह्म॥ विज्ञानमानंदंब्रह्म॥ यत्साक्षादपरोक्षाद्ब्रह्म
यआत्मासर्वांतरइत्यादिवचनेनोक्तमशनायादिसर्वसंसारधर्मविवर्जितंनेतिनेती
तिनिरस्ताशेषविशेषंब्रह्मशब्देनउच्यते॥ ब्रह्मचतदग्निश्च॥ होमाधिकरणत्वविवक्षया।

दैवमेवापरेयज्ञंयोगिनःपर्युपासते॥ ब्रह्माग्नावपरेयज्ञंयज्ञेनैवोपजुह्वति ॥२५॥

ब्रह्माग्नि॥ तस्मिन्ब्रह्माग्नावपरेअन्येब्रह्मविदःयज्ञंयज्ञशब्दवाच्यआत्मायात्मनामसुयज्ञ
शब्दस्यपाठात्॥ तमात्मानंयज्ञंपरमार्थतःपरमेवब्रह्मसंतंबुद्ध्याद्युपाधिसंयुक्तंअध्यस्त
सर्वोपाधिधर्मकमाहुतिरूपंयज्ञेनैवात्मनैवोपलक्षणेनजुह्वतिप्रक्षिपंति॥ सोपाधि
कस्यात्मननिरुपाधिकेनपरब्रह्मस्वरूपेणैवयद्दर्शनंसःतस्मिन्होमःतंकुर्वंति॥ ब्रह्मात्मै
कत्वदर्शननिष्ठाःसंन्यासिनइत्यर्थः॥ सोयंसम्यग्दर्शनलक्षणोयज्ञः॥ दैवयज्ञादिषुयज्ञे

उपक्षिप्यन्ते॥ श्रेयान्द्रव्यमयाद्यज्ञा
ज्ञानयज्ञइत्यादिनास्तुत्यर्थं॥२५॥

श्रोत्रादीति॥ श्रोत्रादीनींद्रियाण्यन्ये अन्ये योगिनः संयमाग्निषु॥ प्रतींद्रियं संयमो भिद्यते।
इति बहुवचनं संयमा एवाग्नयः संयमाग्नयः तेषु जुह्वति इंद्रियसंयममेव कुर्वंतीत्य
र्थः॥ शब्दादीन्विषयानन्य इंद्रियाग्निषु॥ इंद्रियाण्येवाग्नयस्तेषु इंद्रियाग्निषु जुह्वति श्रो
त्रादिभिरविरुद्धविषयग्रहणं होमं मन्यन्ते॥२६॥ किंच॥ सर्वाणीति॥ सर्वाणींद्रियकर्मा
णि इंद्रियाणां कर्माणि इंद्रियकर्माणि॥ तथा प्राणकर्माणि प्राणो वायुराध्यात्मिकस्त

श्रोत्रादीनींद्रियाण्यन्ये संयमाग्निषु जुह्वति॥ शब्दादीन्विषयानन्य इंद्रियाग्निषु जुह्वति॥२६
सर्वाणींद्रियकर्माणि प्राणकर्माणि चापरे॥ आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपि
ते॥२७॥

कर्माणि आकुंचनप्रसारणादीनि तानि चापरे आत्मसंयमयोगाग्नौ आत्मनि
संयमः आत्मसंयमः॥ स एव योगाग्निः तस्मिन्नात्मसंयमयोगाग्नौ जुह्वति प्रक्षिपंति
ज्ञानदीपिते॥ स्नेहेनेव दीपे विवेकविज्ञानेनोज्ज्वलभावमापादिते॥ प्रविलापयंतीत्य र्थः॥२७॥

[illegible] ॥ तीर्थेषु द्रव्यविनियोगं यज्ञबुद्ध्या कुर्वन्ति ये ते द्रव्ययज्ञाः येतपस्विनस्ते तपोयज्ञाः
142 योगयज्ञाः प्राणायामप्रत्याहारादिलक्षणो योगो यज्ञो येषां ते योगयज्ञाः ॥ तथा अपरे स्वाध्या
यज्ञास्तु स्वाध्यायो यथाविधि ऋगाद्यभ्यासो येषां ते स्वाध्याययज्ञाः ज्ञानं शास्त्रार्थपरिज्ञानं
यज्ञो येषां ते ज्ञानयज्ञाः यतयो यतनशीलाः संशितव्रताः सम्यक् शितानि तीक्ष्णीकृता।
किंच। निव्रतानि येषां ते संशितव्रताः ॥ २८ ॥ अपाने इति ॥ अपानेऽपानवृत्तौ जुह्वति ॥ द्विपति प्राणं प्रा

द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे ॥ स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः ॥ २८ ॥
अपाने जुह्वति प्राणं प्राणेऽपानं तथापरे ॥ प्राणापानगती रुद्ध्वा प्राणायामपरायणाः ॥ २९ ॥

णवृत्तिं पूरकाख्यं प्राणायामं कुर्वन्तीत्यर्थः ॥ प्राणेऽपानं तथापरे जुह्वति रेचकाख्यं प्राणा
यामं कुर्वन्तीत्येतत् ॥ प्राणापानगती रुद्ध्वा मुखनासिकाभ्यां वायोर्निर्गमनं प्राणस्य ग
तिस्तद्विपर्ययेणाधोगमनमपानस्य ते प्राणापानगती ते रुद्ध्वा निरुध्य ॥ प्राणाया
मपरायणाः ॥ प्राणायामतत्पराः कुंभकाख्यं प्राणायामं कुर्वन्तीत्यर्थः ॥ २९ ॥ ॥ ॥

गी·भा·
९५
143

किंच ॥ अपर इति ॥ अपरे नियताहाराः ॥ नियतः परिमितः आहारो येषां ते नियताहाराः सन्तः प्राणान्वायुभेदान् तस्मिन् जुह्वति ॥ यस्य यस्य वायोर्जयः क्रियते ॥ इतरान्वायुभेदान् तस्मिन् जुह्वति ॥ तेन ते प्रविष्टा इव भवन्ति ॥ सर्वेप्येते यज्ञविदः यज्ञक्षपितकल्मषाः ॥ यज्ञैर्यथोक्तैः क्षपितो नाशितः कल्मषो येषां ते यज्ञक्षपितकल्मषाः ॥ ३० ॥ एवं यथोक्तान् यज्ञान्नि

अपरे नियताहाराः प्राणान्प्राणेषु जुह्वति ॥ सर्वेप्येते यज्ञविदो यज्ञक्षपितकल्मषाः ॥ ३० ॥
यज्ञशिष्टामृतभुजो यान्ति ब्रह्म सनातनं ॥ नायं लोकोस्त्ययज्ञस्य कुतोन्यः कुरुसत्तम ॥ ३१ ॥

र्वर्त्य ॥ यज्ञ इति ॥ यज्ञशिष्टामृतभुजो ॥ यज्ञानां शिष्टं यज्ञशिष्टं ॥ यज्ञशिष्टं च तदमृतं च यज्ञशिष्टामृतं तद्भुंजत इति ॥ यज्ञशिष्टामृतभुजः यथोक्तान्यज्ञान् कृत्वा तच्छिष्टेन कालेन यथाविधिचोदितमन्नममृतनाम्ना भुंजत इति ॥ यज्ञशिष्टामृतभुजः यान्ति गच्छन्ति ब्रह्म सनातनं ॥ चिरंतनं मुमुक्षवश्चेत् कालादिक्रमापेक्षयेति सामर्थ्याद्गम्यते ॥ नायं लोकः सर्वप्राणिसाधारणोप्यस्ति यथोक्तानां यज्ञानामेकोपि यज्ञो यस्य नास्ति सोयज्ञः तस्य कु

एवंइति ॥ एवंयथोक्ताबहुविधाबहुप्रकारायज्ञावितताविस्तीर्णाब्रह्मणोवेदस्यमुखेद्वा
144 रे ॥ वेदद्वारेणावगम्यमानाब्रह्मणोमुखेविवितताउच्यंते ॥ तद्यथावाचिहि प्राणंजुहुमइ
त्यादयः कर्मजान्कायिकवाचिकमानसिककर्मोद्भवान्विद्धितान्सर्वानंतात्मजान्

एवंवहुविधायज्ञावितताब्रह्मणोमुखे ॥ कर्म
जान्विद्धितान्सर्वानेवंज्ञात्वाविमोक्ष्यसे ॥३२॥

निर्व्यापारोह्यात्मा ॥ अतएवंज्ञात्वाविमोक्ष्यसेशुभाशुभमव्यापारायतेनिर्व्यापारोह
मुदासीन ॥ इत्येवंज्ञात्वातस्मात्सम्यग्दर्शनान्मोक्ष्यसेसंसारबंधनादित्यर्थः ॥३२॥
शिव ॥ ॥।॥ ॥ शिव

ब्रह्मार्पणमित्यादिश्लोकेन सम्यग्दर्शनस्य यज्ञत्वं संपादितं॥ यज्ञाश्चानेके विधा उपदिष्टाः इ-
दानीं तैः सिद्धपुरुषार्थप्रयोजनैर्ज्ञानं स्तूयते कथं॥ श्रेयानिति॥ श्रेयान् द्रव्यमयाद्यज्ञात्
द्रव्यसाधनसाध्याद्यज्ञात्॥ ज्ञानयज्ञः परंतप॥ द्रव्यमयो हि यज्ञः फलस्यारंभको ज्ञानय-

श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः परंतप॥ सर्वं
कर्माखिलं पार्थ ज्ञाने परिसमाप्यते ॥ ३३ ॥ ॥

ज्ञो न फलारंभकोऽतः श्रेयान् प्रशस्यतरः कथं यतः सर्वं कर्म समस्तमखिलं पार्थ ज्ञाने
मोक्षसाधने परिसमाप्यते॥ अंतर्भवतीत्यर्थः॥ यथा कृताय विजितायाधरेयाः संयंति
एवमेनं सर्वं तदभिसमेति यत्किंच प्रजाः साधु कुर्वंति यस्तद्वेद यत्स वेदेति श्रुतेः॥ ३३॥

146

तदेतद्विशिष्टज्ञानं तर्हि केन प्राप्यत इत्युच्यते ॥ तद्विद्धीति ॥ तद्विद्धि प्रणिपातेन परिप्रश्नेन
सेवया ॥ तद्विद्धि विजानीहि येन विधिना प्राप्यत इति ॥ आचार्यानभिगम्य प्रणिपातेन प्र
कर्षेण नीचैः पतनं प्रणिपातः ॥ दीर्घनमस्कारः तेन कथं बंधः कथं मोक्षः का विद्या
अविद्येति परिप्रश्नेन सेवया ॥ गुरुशुश्रूषया ऽन्येवमादिप्रश्रयेणावर्जिता आचार्या

तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया ॥ उप
देक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्वदर्शिनः ॥ ३४ ॥

उपदेक्ष्यन्ति ॥ कथयिष्यन्ति ते ज्ञानं यथोक्तविशेषणं ज्ञानिनो ज्ञानवन्तः ॥ अपि केचिद्य
थावत्तत्वदर्शनशीलाः अपरे नातो विशिनष्टि तत्वदर्शिन इति ये सम्यग्दर्शिनः ॥ तैरु
पदिष्टं ज्ञानं कार्यक्षमं भवति नेतरदिति भगवतो मतं ॥ तथा च सतीदमपि समर्थं व
चनं ॥ ३४ ॥ ॥ ॥ ॥ शिव

गी॰भा॰ ७१ यज्ज्ञात्वेति॥ यज्ज्ञात्वा यज्ज्ञानं तैरुपदिष्टं प्राप्य पुनः भूयः मोहमेवं यथेदानीं मोहं गतो
सि पुनरेवं न यास्यसि॥ हे पांडव किंच॥ येन ज्ञानेन भूतान्यशेषेण ब्रह्मादिस्तंबपर्यंतानि
द्रक्ष्यसि॥ साक्षादात्मनि प्रत्यगात्मनि मत्स्थानीमानीति॥ अथोपि मयि वासुदेवे परमे
श्वरे चेमानीति॥ ते च त्वे श्वरैकत्वं सर्वोपनिषत्प्रसिद्धं द्रक्ष्यसीत्यर्थः किंच तस्य ज्ञानस्य

147

यज्ज्ञात्वा न पुनर्मोहमेवं यास्यसि पांडव॥ येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि
३५॥ अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः॥ सर्वं ज्ञानप्लवेनैव वृजिनं संतरिष्यसि
॥३६॥

माहात्म्यम्॥ अपीति॥ अपि चेदसि पापेभ्यः पापकृद्भ्यः पापकृत्तमः सर्वेभ्योऽति
प्रायेण पापकृत् पापकृत्तमः यद्यसि भवसि सर्वं ज्ञानप्लवेनैव ज्ञानमेव प्लवं कृत्वा वृ
जिनाणां पापसमुद्रं संतरिष्यसि॥ धर्मोपीह मुमुक्षोः पापमुच्यते॥ ज्ञानेन कथं ना ७१
शयति पापमित्यत्र दृष्टांत उच्यते ॥३६॥ ॥ ॥

148

यथैध इति॥ यथा एधांसि काष्ठानि समिद्धः सम्यगिद्धः दीप्तः॥ अग्निर्भस्मसात् भस्मीभावं कुरुते अर्जुन॥ ज्ञानमेवाग्निर्ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते॥ तथा निर्बीजीकरोतीत्यर्थः॥ नहि साक्षादेव ज्ञानाग्निः सर्वकर्माणि इन्धनवद्भस्मीकर्तुं शक्नोतीति॥ तस्मात्सम्यग्दर्शनं सर्वकर्मणां भस्मसात्कारणं निर्बीजत्वकारणमित्यर्थः॥ सामर्थ्याद्येन।

यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन॥ ज्ञाना
ग्निः सर्वकर्माणि भस्मसात्कुरुते तथा ॥३७॥ ॥

श्व२

कर्मणा शरीरमारब्धं तत्प्रवृत्तफलत्वादुपभोगेनैव क्षीयते॥ अतो यान्यप्रवृत्तफलानि ज्ञानोत्पत्तेः प्राक्कृतानि ज्ञानसहभावीनि चातीतानेकजन्मकृतानि तान्येव सर्वाणि भस्मसात्कुरुते ॥३७॥ ॥ ॥ ॥शिव

यतएवमतः ॥ नहीति ॥ नहिज्ञानेनसदृशंतुल्यंपवित्रंपावनंशुद्धिकरमिहवि
द्यते ॥ हियस्मात्तज्ज्ञानंस्वयमेवयोगसंसिद्धः योगेनकर्मयोगेनसमाधियोगेनच

नहिज्ञानेनसदृशंपवि
त्रमिहविद्यते ॥ तत्स्व
यंयोगसंसिद्धःकालेना
त्मनिविंदति ॥३८॥ ॥

संसिद्धः ॥ संस्कृतःयोग्यतामापन्नःसन्कालेनमहतात्मन्यात्मनिविंदतिलभत।
इत्यर्थः ॥३८॥ ॥ ॥ ॥

150

येनैकांतेन ज्ञानप्राप्तिर्भवति स उपाय उपदिश्यते ॥ श्रद्धा इति ॥ श्रद्धावान् श्रद्धालुः ।
लभते ज्ञानं ॥ श्रद्धालुत्वेपि भवति कश्चिन्मंदप्रस्थानः ॥ अत आह तत्परः गुरूपासना ।
दावभियुक्तः ज्ञानलब्ध्युपाये श्रद्धावान् तत्परः ॥ अजितेंद्रियः स्यादित्यत आह ॥ संय
तेंद्रियः ॥ संयतानि विषयेभ्यो निवर्तितानि इंद्रियाणि यस्य स संयतेंद्रियः ॥ य एवंभूतः
श्रद्धावान् तत्परः संयतेंद्रियः सोवश्यं ज्ञानं लभते ॥ प्रणिपातादिस्तु बाह्योनैकांति ।

श्रद्धावान् लभते ज्ञानं तत्परः संयतेंद्रियः ॥ ज्ञा
नं लब्ध्वा परां शांतिमचिरेणाधिगच्छति ॥ ३९ ॥

कोपि भवति मायावित्वादिसंभवात् ॥ न तु तच्छ्रद्धावत्वादावित्येकांततो ज्ञानलब्ध्यु ।
पायः ॥ किं पुनर्ज्ञानलाभात्स्यादित्युच्यते ॥ ज्ञानं लब्ध्वा परां शांतिं मोक्षाख्यामु
परतिं ॥ अचिरेण क्षिप्रमेवाधिगच्छति ॥ सम्यग्दर्शनात् क्षिप्रं मोक्षो भवतीति
सर्वशास्त्रन्यायप्रसिद्धः सुनिश्चितोर्थः ॥ अत्र संशयो न कर्तव्यः पापिष्ठो हि संशयः ॥ ३९ ॥

कथमित्युच्यते॥अज्ञश्चेति॥अज्ञः अश्रद्दधानः संशयात्मा च विनश्यति॥अज्ञोऽश्रद्दधानो यद्य
पि विनश्यतः न तथापि न यथा संशयात्मा संशयात्मा तु पापिष्ठः सर्वेषां कथं नायं साधारणो

अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति॥नायं
लोकोऽस्ति न परो न सुखं संशयात्मनः॥४०॥

पि लोकोऽस्ति॥न परलोकः न सुखं तत्रापि संशयोपपत्तेः॥संशयात्मनः संशयचित्त
स्य॥तस्मात्संशयो न कर्तव्यः॥४०॥
॥शिव॥

कस्मात् ॥ योग इति ॥ परमार्थदर्शनलक्षणेन योगेन संन्यस्तानि कर्माणि येन परमा
152 र्थदर्शिना ॥ धर्माधर्माख्यानि तं योगसंन्यस्तकर्माणं ॥ कथं योगसंन्यस्तकर्मेत्याह
ज्ञानसंछिन्नसंशयं ज्ञानेनात्मेश्वरैकत्वदर्शनेन संछिन्नः संशयो यस्य स ज्ञानसंछि
न्नसंशयः ॥ एवं योगसंन्यस्तकर्माणमात्मवंतमप्रमत्तं ॥ गुणचेष्टारूपेण दृष्टानि क

योगसंन्यस्तकर्माणं ज्ञानसंछिन्नसंशयं ॥ आत्म
वंतं न कर्माणि निबध्नंति धनंजय ॥४१॥ ॥ ॥॥

र्माणि न निबध्नंति ॥ अनिष्टादिरूपं फलं नारभंते हे धनंजय ॥ यस्मात्कर्मयोगानुष्ठाना।
नादशुद्धिक्षयहेतुकज्ञानसंछिन्नसंशयो न निबध्यते ॥ कर्मभिः ज्ञानाग्निदग्धकर्म
त्वादेव ॥ यस्माच्च ज्ञानकर्मानुष्ठानविषये संशयवान्
विनश्यति ॥४२॥ ॥

तस्मात्पापिष्ठमज्ञानसंभूतं॥ अज्ञानादविवेकाज्जातं हृत्स्थं हृदि बुद्धौ स्थितं॥ ज्ञानासिना शो
कमोहादिदोषहरं सम्यग्दर्शनं ज्ञानं तदेवासिः खड्गस्तेन ज्ञानासिना॥ आत्मनः स्वस्यात्म
विषयत्वात्संशयस्य॥ न हि परस्य संशयः परेणच्छेत्तव्यतां प्राप्तः येन स्वस्येति विशेष्येत॥ अतस्त्वा

तस्मादज्ञानसंभूतं हृत्स्थं ज्ञानासिनात्मनः॥ छित्त्वैनं संशयं
योगमातिष्ठोत्तिष्ठ भारत ॥ ४२ ॥ इति श्रीचतुर्थोऽध्यायः ॥ ४ ॥

त्मविषयं संशयं छित्त्वा॥ एनं संशयं स्वविनाशहेतुभूतं॥ योगं सम्यग्दर्शनोपायभूतं कर्मानु
ष्ठानं आतिष्ठ कुर्वित्यर्थः॥ उत्तिष्ठ युद्धाय इदानीं हे भारत ॥ ४२ ॥ इति श्रीपरमहंस ७४
परिव्राजकाचार्यश्रीशंकरभगवत्कृतौ गीताविवरणे चतुर्थोऽध्यायः ॥ ४ ॥॥ शिव

कर्मण्यकर्म यः पश्येदित्यारभ्य स युक्तः ॥ कृत्स्नकर्मकृत ॥ ज्ञानाग्निदग्धकर्माणं शरी
154 रं केवलं कर्म कुर्वन्यदृच्छालाभसंतुष्टः ब्रह्मार्पणं ब्रह्म हविः कर्मजान्विद्धि तान्स
र्वान् ॥ सर्वं कर्माखिलं पार्थ ॥ ज्ञानाग्निः सर्वकर्माणि योगसंन्यस्तकर्माणमित्येतैर्वच
नैः सर्वकर्मणां संन्यासमवोचद्भगवान् ॥ छित्त्वैनं संशयं योगमातिष्ठोत्तिष्ठ

संन्यासं कर्मणां कृष्ण पुनर्योगं च शंससि ॥ यच्छ्रे
य एतयोरेकं तन्मे ब्रूहि सुनिश्चितं ॥ १ ॥ ॥ ॥

भारतेत्यनेन योगं च कर्मानुष्ठानलक्षणमनुतिष्ठेत्युक्तवान् ॥ उभयोश्च कर्मा
नुष्ठानकर्मसंन्यासयोः स्थितिगतिवत्परस्परविरोधादेकेन सह कर्तुमशक्यत्वात्का
लभेदेनानुष्ठानविधानाभावादर्थादेतयोरन्यतरकर्तव्यतायां प्राप्तायां यत्प्रश
स्यतरमेतयोः ॥ कर्मानुष्ठानकर्मसंन्यासयोस्तत्कर्तव्यं नेतरदिति ॥ एवं मन्यमानः

गी॰भा
७५ 155

प्रशस्यतरबुभुत्सया॥संन्यासंइति॥ननुचात्मविदोज्ञानयोगेननिष्ठांप्रतिपादयिष्यन्
पूर्वोदाहृतैर्वचनैर्भगवान्कर्मसंन्यासमवोचत्॥नत्वनात्मज्ञस्यअतःकर्मानुष्ठा
नकर्मसंन्यासयोर्भिन्नपुरुषविषयत्वादन्यतरस्यप्रशस्यतरबुभुत्सयाप्रश्नोनुपपन्नः
सत्यमेवत्वदभिप्रायेणप्रश्नोनोपपद्यते॥प्रष्टुःस्वाभिप्रायेणपुनःप्रश्नोयुज्यतएवे
तिवदामः॥कथंपूर्वोदाहृतैर्वचनैर्भगवतासर्वकर्मसंन्यासस्यकर्तव्यतयावि
वक्षितत्वात्प्राधान्यमंतरेणचकर्त्तारंतस्यकर्त्तव्यत्वासंभवादनात्मविदपिकर्तृत्वप
क्षेप्राप्तोऽनूद्यतएवनपुनरात्मवित्कर्तृकत्वमेवसंन्यासस्यविवक्षितमित्येवंमत्वातस्या
ज्ञेनस्यकर्मानुष्ठानसंन्यासयोरविरुद्धत्वरूपकर्तृकत्वमप्यस्तीति॥पूर्वोक्तेनप्रका
रेणतयोःपरस्परविरोधादन्यतरस्यकर्तव्यत्वेप्राप्तेप्रशस्यतरंचकर्तव्यं॥नेतरदि
तिप्रशस्यतरविविदिषयाप्रश्नोनानुपपन्नः॥प्रतिवचनवाक्यार्थनिरूपणेनापिप्रष्टु ॰७५
रभिप्रायएवमेवेतिगम्यते॥कथंसंन्यासकर्मयोगौनिःश्रेयसकरौतयोस्तुकर्मसंन्या

साक्कर्मयोगो विशिष्यत इति प्रतिवचनमेतन्निर्णयं॥ किमनेनात्मविकर्तृकयोः संन्या-
सकर्मयोगयोर्निःश्रेयसकरत्वप्रयोजनमुक्तं तयोरेव कुतश्चिद्विशेषात्कर्मयोगस्य
विशिष्टत्वमुच्यते॥ आहोस्विदनात्मविकर्तृकयोः संन्यासकर्मयोगयोस्तदुभयमु-
च्यत इति॥ किं चातः॥ यद्यात्मवित्कर्तृकयोः कर्मसंन्यासकर्मयोगयोर्निःश्रेयस-
करत्वं॥ तयोस्तु कर्मसंन्यासात्कर्मयोगस्य विशिष्टत्वमुच्यते॥ यदि वा॥ अनात्मवित्क-
र्तृकयोः संन्यासकर्मयोगयोस्तदुभयमुच्यत इति॥ अत्रोच्यते॥ आत्मवित्कर्तृकयोः।
संन्यासकर्मयोगयोरसंभवात्तयोर्निःश्रेयसकरत्ववचनं तदीयाच्च कर्मसंन्यासात्क-
र्मयोगस्य विशिष्टत्वाभिधानमित्येतदुभयमनुपपन्नं॥ यद्यात्मविदः कर्मसंन्यासः
तत्प्रतिकूलश्च कर्मानुष्ठानलक्षणः कर्मयोगः संभवेतां तदा तयोर्निःश्रेयसकरत्वो-
क्तेः कर्मयोगस्य च कर्मसंन्यासाद्विशिष्टत्वाभिधानमित्येतदुभयमुपपद्यते॥ आत्म-
विदस्तु संन्यासकर्मयोगयोरसंभवात्तयोर्निःश्रेयसकरत्वाभिधानं कर्मसंन्यासात्क-

गी-भा
७६
157

र्मयोगो वा विधीयत इति चानुपपन्नं ॥ तत्राह किमात्मविदः कर्मयोगसंन्यासयोर्द्वयोरप्य
संभवः ॥ बाढोसिदन्यतरस्य ॥ यदा चान्यतरस्यासंभवस्तदापि किं कर्मसंन्यासस्यैव न
कर्मयोगस्येति ॥ असंभवकारणं च वक्तव्यमिति ॥ अत्रोच्यते ॥ आत्मविदो निवृत्तमिथ्याज्ञान
त्वाद्विपर्ययः । यज्ञानमूलस्य कर्मयोगस्यासंभवः स्यात् ॥ जन्मादिसर्वविक्रियारहितत्वेन
निःक्रियमात्मानमात्मत्वेन यो वेत्ति तस्यात्मविदः सम्यग्दर्शनापास्तमिथ्याज्ञानस्य
निःक्रियात्मस्वरूपावस्थानलक्षणं सर्वकर्मसंन्यासमुक्त्वा तद्विपरीतस्य मिथ्याज्ञा
नमूलकर्तृत्वाभिमानपुरःसरस्य सक्रियात्मस्वरूपावस्थानरूपस्य कर्मयोगस्ये
ह ग्रन्थेषु तत्र तत्रात्मस्वरूपनिरूपणप्रदेशेषु सम्यग्ज्ञानमिथ्याज्ञानतत्कार्यविरोधा
द्भावः प्रतिपाद्यते ॥ यस्मात्तस्मादात्मविदो निवृत्तमिथ्याज्ञानस्य विपर्ययज्ञान।
मूलः कर्मयोगो न संभवतीति युक्तमुक्तं स्यात् ॥ केषु ॥ केषु पुनरात्मस्वरूपनिरूप ७६
णप्रदेशेषु आत्मविदः कर्माभावः प्रतिपाद्यते ॥ इत्युच्यते ॥ अविनाशि तु तद्विद्धीति

प्रकृत्ययमर्थं नैव तन्निहंतारं ॥ वेदाविनाशिनं नित्यमित्यादौ न च तत्रात्मविदः कर्माभाव उ
च्यते ॥ न न्न कर्मयोगोप्यात्मस्वरूपनिरूपणाग्रदेशेषु ॥ तत्र तत्र प्रतिपाद्यत एव ॥ न ह्यया
तस्मायुध्यस्व भारत स्वधर्ममपि चावेक्ष्य कर्मण्येवाधिकारस्त इत्यादौ स्मृत स्वकर्म यमा
त्मविदः कर्मयोगस्यासंभवः स्यादिति ॥ अत्रोच्यते ॥ समस्तज्ञानमिथ्याज्ञानतत्कार्यवि
रोधात् ॥ ज्ञानयोगेन सांख्यानामित्यनेन सांख्यानामात्मतत्त्वविदां ॥ अनात्मवित्कर्तृ
कर्मयोगनिष्ठातो निःक्रियात्मस्वरूपावस्थानलक्षणाया ज्ञानयोगनिष्ठायाः पृथक् ॥
करणमुक्तं नकृत्स्नत्वेनात्मविदः प्रयोजनान्तराभावात्तस्य कार्यं न विद्यत इति कर्तव्यान्तरा
भाववचनाच्च ॥ न कर्मणामनारंभान्नैःकर्म्यं संन्यासस्तु महाबाहो दुःखमाप्तुमयोग
त इत्यादिना चात्मज्ञानांगत्वेन कर्मयोगस्य विधानात् ॥ योगारूढस्य तस्यैव शमः क
रणमुच्यत इत्यादिना चोपपन्नज्ञानस्य सम्यग्दर्शनस्य कर्मयोगाभाववचनात् ॥ शा
रीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषमिति शरीरस्थितिकारणातिरिक्तस्य कर्मणो

वारणात् ॥ नैवकिंचित्करोमीतियुक्तोमन्येततत्वविदित्यनेनशरीरस्थितिमात्रप्रयुक्तेष्व
पिदर्शनश्रवणादिकर्मस्वात्मयाथात्म्यविदःकरोमीतिप्रत्ययस्यसमाहितचेतस्तया।
सदाःकर्तव्यत्वोपदेशादात्मतत्वविदःसम्यग्दर्शनविरुद्धोमिथ्याज्ञानहेतुकःकर्मयो
गःस्वप्नेपिनाशंकितुंशक्यतेयस्मात्तस्मादनात्मवित्कर्तृकयोरेवसंन्यासकर्मयोगयो
निःश्रेयसकरत्ववचनं ॥ तदीयाच्चकर्मसंन्यासात्पूर्वोक्तात्मवित्कर्तृकसर्वकर्मसंन्या
सविलक्षणात्सत्येवकर्तृत्वविज्ञानेकर्मैकदेशविषयाद्यमनियमादिसहितत्वे
नदुरनुष्ठेयात्सुकरत्वेनचकर्मयोगस्यविशिष्टत्वाभिधानमित्येवंप्रतिवचनवाक्या
र्थनिरूपणेनापिपूर्वोक्तःप्रश्नाभिप्रायोनिश्चीयतइतिस्थितंज्यायसीचेत्कर्मणस्तेम
तज्ज्ञानकर्मणोःसहासंभवेयच्छ्रेयएतयोस्तन्मेब्रूहीत्येवंपृष्टोर्जुनेनभगवानज्ञान
योगेनसांख्यानांनिष्ठाकर्मयोगेनयोगिनांनिष्ठाप्रोक्तेतिनिर्णयंचकार ॥ नचसंन्यास ७७
नादेवसिद्धिंसमधिगच्छतीतिवचनाज्ज्ञानसहितस्यैवसिद्धिसाधनत्वमिष्टं ॥ कर्मयोग

स्यच विधानात॥ तत्तर्हि तस्य संन्यासः श्रेयान् किंवा कर्मयोगः श्रेयानित्येतयोर्विशेष
बुभुत्सया॥ संन्यासंइति॥ संन्यासं परित्यागं कर्मणां शास्त्रोपदिष्टानामनुष्ठानविशेषा
णां शंससि प्रशंससीत्येतत॥ पुनर्योगं च॥ तेषामेवानुष्ठानमवश्यकर्तव्यं शंससि॥ अतो

अर्जुन उवाच॥ संन्यासं कर्मणां कृष्ण पुनर्योगं च शंससि॥ य
च्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितं ॥१॥ ॥ ॥॥

मेक तयोः श्रेय इति संशयः॥ किं कर्मानुष्ठानं श्रेयः किंवा तत्त्यागमिति॥ प्रशस्यतरं वानु
ष्ठेयमतस्तच्छ्रेयः प्रशस्यतर॥ मेतयोः कर्मसंन्यासकर्मानुष्ठानयोर्यदनुष्ठानाच्छ्रेयो
वाप्तिर्मम स्यादिति मन्यसे तदेकमन्यतरत् सहैकपुरुषानुष्ठेयत्वासंभवात्तन्मे सुनि

161

त्वाभिप्रायमाचक्षाणो निर्णयाय॥ संन्यास इति॥ संन्यासः कर्मणां परित्यागः कर्मयोगश्च
कर्मणामनुष्ठानं तावुभावपि निःश्रेयसकरौ मोक्षं कुर्वाते॥ ज्ञानोत्पत्तिहेतुत्वेन उभौ
यद्यपि निःश्रेयसकरौ तथापि॥ तयोस्तु निःश्रेयसहेतोः कर्मसंन्यासात्केवलात्कर्मयो
गो विशिष्यत इति कर्मयोगं स्तौति कस्मादित्याह॥ ज्ञेयः ज्ञातव्यः स कर्मयोगी नित्यसं

श्रीभगवानुवाच॥ संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ॥ तयोस्तु कर्मसंन्यासात्
कर्मयोगो विशिष्यते॥२॥ ज्ञेयः स नित्यसंन्यासी यो न द्वेष्टि न कांक्षति॥ निर्द्वंद्वो हि म
हाबाहो सुखं बंधात्प्रमुच्यते॥३॥

न्यासी यो न द्वेष्टि न किंचित्कांक्षति॥ दुःखसु
खेतत्साधने च॥ एवंविधो यः कर्मणि वर्तमानोऽपि स नित्यसंन्यासीति ज्ञातव्य इत्य
र्थः॥ निर्द्वंद्वः द्वंद्ववर्जितः हि यस्मात् महाबाहो सुखं बंधादनायासेन प्रमुच्यते
३॥॥ ॥३॥ ॥ ॥ ॥॥

संन्यासकर्मयोगयोर्भिन्नपुरुषानुष्ठेययोर्विरुद्धयोः फलेपि विरोधो युक्तः न तूभयोर्निः
162 श्रेयसकरत्वमेवेति प्राप्ते इदमुच्यते॥ सांख्यइति॥ सांख्ययोगौ पृथक् विरुद्धभिन्नफ
लौ बालाः प्रवदंति न तु पंडिताः॥ ज्ञानिनस्त्वेकं फलमविरुद्धं इच्छंति॥ कथमेकमपि॥
सांख्ययोगयोः सम्यगास्थितः सम्यगनुष्ठितवान् इत्यर्थः॥ उभयोर्विंदते फलं॥ उभयो
स्तदेव हि निःश्रेयसं फलं॥ अतः फले विरोधो नास्ति॥ ननु संन्यासकर्मयोगशब्देन प्र
सांख्ययोगौ पृथग्बालाः प्रवदंति न पंडिताः॥ एकमप्यास्थितः सम्यगुभयोर्विंदते फलं
स्तुत्य सांख्ययोगयोः फलैकत्वं कथमिहाप्रकृतं ब्रवीति॥ नैष दोषः॥ ५॥ ४॥ ॥
यद्यप्यर्जुनेन संन्यासं कर्मयोगं च केवलमभिप्रेत्य प्रश्नः कृतो भगवांस्तु तदपरित्यागे
नैव स्वाभिप्रेतं च विशेषं संयोज्य शब्दांतरवाच्यतया प्रतिवचनं ददौ सांख्ययोगाविति
तावेव संन्यासकर्मयोगौ ज्ञानतदुपायसमबुद्धित्वादिसंयुक्तौ सांख्ययोगवाच्याविति भ
गवतो मतं अतो नाप्रकृतप्रक्रियेति ॥५॥ ॥ ॥ ॥

गी॰ भा॰ एकस्यापि सम्यगनुष्ठानात्कथमुभयोः फलं विंदत इत्युच्यते ॥ यत्सांख्ये इति ॥ यत्सांख्यैर्ज्ञाननि
७९ ष्ठैः संन्यासिभिः प्राप्यते स्थानं मोक्षाख्यं ॥ तद्योगैरपि ज्ञानप्राप्त्युपायत्वेनेश्वरे समर्प्य कर्माणि
163 आत्मनः फलमनभिसंधायानुतिष्ठंति ते ये योगिनः तैरपि परमात्मज्ञानसंन्यास
प्राप्तिद्वारेण गम्यत इत्यभिप्रायः ॥ अत एकं सांख्यं च योगं च यः पश्यति स पश्यति ॥ फलैक
त्वात्सम्यक्पश्यतीत्यर्थः ॥ एवं तर्हि योगात्संन्यास एव विशिष्यते ॥ कथं तर्हीदमुक्तं त

यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते ॥ एकं सांख्यं च योगं च यः पश्यति स पश्यति ॥५॥

योस्तु कर्मसंन्यासात्कर्मयोगो विशिष्यत इति ॥ शृणु तत्र कारणं ॥ त्वया पृष्टं केवलं कर्म
संन्यासं कर्मयोगं चाभिप्रेत्य तयोरन्यतरः कः श्रेयानिति तदनुरूपं प्रतिवचनं मयोक्तं क
र्मसंन्यासात्कर्मयोगो विशिष्यत इति न ज्ञानमपेक्ष्य ज्ञानसव्यपेक्षस्तु संन्यासः सां
ख्यमिति मयाभिप्रेतं परमार्थयोगश्च स एव ॥ यस्तु कर्मयोगो वैदिकः स तादर्थ्याद्यो ७९
गः संन्यास इति चोपचर्यते ॥५॥ ॥

164

कथंनादर्थमित्युच्यते॥संन्यासइति॥संन्यासस्तुपारमार्थिकदुःखमाप्तुमयोगतः
योगेनविनायुक्तोवैदिकेनकर्मयोगेनईश्वरसमर्पितरूपेणाफलनिरपेक्षेणायु
क्तः मननादीश्वरस्वरूपस्यमुनिः॥ब्रह्मपरमार्थज्ञाननलक्षणत्वात्प्रकृतःसंन्यासोब्र

संन्यासस्तुमहाबाहोदुःखमाप्तुमयोगतः॥यो
गयुक्तोमुनिर्ब्रह्मनचिरेणाधिगच्छति॥६॥

ह्मोच्यतेन्यासइतिब्रह्म॥ब्रह्माहिपरइतिश्रुतेब्रह्मपरमात्मसंन्यासंपरमात्मज्ञा
ननिष्ठालक्षणंनचिरेणाक्षिप्रमेवअधिगच्छतिप्राप्नोतिअतोमयोक्तंकर्मयो।
गोविशिष्यतइति॥६॥ ॥ ॥ ॥

यदा पुनरयं सम्यग्दर्शनप्राप्त्युपायेन ॥ योगे इति ॥ योगेन युक्तो योगयुक्तः विशुद्धात्मा विशुद्ध
सत्वः ॥ विजितात्मा विजितदेहः ॥ जितेन्द्रियश्च ॥ सर्वभूतात्मभूतात्मा ॥ सर्वेषां ब्रह्मादिस्तंबप
र्यंतानां भूतानां आत्मभूतः आत्मा प्रत्यक्चेतनो यस्य स सर्वभूतात्मभूतात्मा सम्यग्द

योगयुक्तो विशुद्धात्मा विजितात्मा जितेंद्रियः ॥ सर्वभूतात्मभूतात्मा
कुर्वन्नपि न लिप्यते ॥ ७ ॥ नैव किंचित्करोमीति युक्तो मन्येत तत्त्ववित् ॥

र्शीत्यर्थः ॥ स तत्रैवं वर्तमानो लोकसंग्रहाय कर्म कुर्वन्नपि न लिप्यते कर्मभिर्न स बध्य
त इत्यर्थः ॥ न चासौ परमार्थतः करोतीत्यर्थः ॥ ७ ॥ नैव इति ॥ युक्तः समाहितमतिः सन्
नैव किंचित्करोमीति मन्येत चिंतयेत् तत्त्ववित् ॥ आत्मनो याथात्म्यं तत्त्वं वेत्तीति तत्त्ववित् पर

कदाकथंवाततत्वमवधारयन्मन्येतइत्युच्यते॥पश्यन्इति॥मन्येतइतिपूर्वेणसंबंधःयस्यै
166 वंतत्वविदःसर्वकार्यकरणचेष्टासुकर्मस्वकर्मैवपश्यतःसम्यग्दर्शिनःतस्यसर्वक
र्मसंन्यासएवाधिकारः॥कर्मणोऽभावदर्शनात्॥नहिमृगतृष्णिकायामुदकंतृष्णाप
नायप्रवृत्तउदकाभावज्ञानेपितत्रैवपानप्रयोजनायप्रवर्त्तते॥८॥यस्तुपुनरतत्वविन्

पश्यन्शृण्वन्स्पृशन्जिघ्रन्नश्नन्गच्छन्स्वपन्श्वसन्॥८॥प्रलपन्विसृजन्गृह्
णन्नुन्मिषन्निमिषन्नपि॥इंद्रियाणींद्रियार्थेषुवर्त्ततइतिधारयन्॥९॥ब्रह्मण्याधाय
कर्माणिसंगंत्यक्त्वाकरोतियः॥लिप्यतेनसपापेनपद्मपत्रमिवांभसा॥१०॥ ॥

वृत्तस्तुकर्मयोगे॥ब्रह्मइति॥ब्रह्मणिईश्वरेआधायतदर्थंकरोमीतिभृत्यइवस्वाम्यर्थं
मोक्षेपिफलेसंगंत्यक्त्वाकरोतियः॥सर्वकर्माणिलिप्यतेनसपापेनसंबध्यते॥पद्म
पत्रमिवांभसाउदकेन॥१०॥ ॥ ॥ ॥

गी०भा० केवलं सत्वशुद्धिमात्रफलमेव स्यात् यस्मात् ॥ कायेइति ॥ कायेन देहेन मनसा बुद्ध्या च ॥ के
८१ वलैर्ममत्ववर्जितैः ईश्वरायैव करोमि ॥ न मम फलायेति ममत्वबुद्धिशून्यैः इंद्रियैरपि
167 केवलशब्दः कायादिभिरपि प्रत्येकं संबध्यते ॥ सर्वव्यापारेषु ममता वर्जिताः योगिनः

कायेन मनसा बुद्ध्या केवलैरिंद्रियैरपि ॥ यो
गिनः कर्म कुर्वंति संगं त्यक्त्वात्मशुद्धये ॥ ११ ॥

कर्मिणः कर्म कुर्वंति ॥ संगं त्यक्त्वा फलविषयं आत्मशुद्धये सत्वशुद्धये इत्यर्थः त
स्मात्त्वमेव तवाधिकार इति कुरु कर्मैव ॥ ११ ॥ ॥ ॥ ॥ शिव ८१
राम ॥ ॥ ॥ राम

168

यस्मात् ॥ युक्तः इति ॥ युक्तः ईश्वरः यत्कर्माणि करोमि न मम फलाय इत्येवं समाहितः सन् कर्म
फलं त्यक्त्वा परित्यज्य शांतिं मोक्षाख्यामाप्नोति नैष्ठिकीं निष्ठायां भवां सत्वशुद्धिज्ञानप्रा
प्तिसर्वकर्मसंन्यासज्ञाननिष्ठाक्रमेणेति वाक्यशेषः ॥ यस्तु पुनरयुक्तः असमाहितः काम

युक्तः कर्मफलं त्यक्त्वा शांतिमाप्नोति नैष्ठिकीं ॥ अयु
क्तः कामकारेण फले सक्तो निबध्यते ॥ १२ ॥ ॥

कारेण ॥ करणं कारः कामस्य कारः कामकारः तेन कामकारेण कामप्रेरिततयेत्य
र्थः ॥ मम फलायेदं करोमि कर्मेत्येवं फले सक्तो निबध्यते ॥ अतस्त्वं युक्तो भवेत्य
र्थः ॥ १२ ॥ ॥ ॥ ॥ ॥ श्रीव ।

गी॰भा॰ यस्तु परमार्थदर्शी सः॥ सर्वेति॥ सर्वाणि कर्माणि सर्वकर्माणि संन्यस्य परित्यज्य नित्यं
८२ नैमित्तिकं काम्यं प्रतिषिद्धं च तानि॥ सर्वाणि कर्माणि मनसा विवेकबुद्ध्या कर्मादाव
169 कर्मसंदर्शनेन संत्यज्येत्यर्थः॥ आस्ते तिष्ठति॥ सुखं त्यक्तवाङ्मनःकायचेष्टः निरायाः
सः प्रसन्नचित्तः॥ आत्मनोन्यत्र निवृत्तसर्वबाह्यसर्वप्रयोजन इति सुखमास्ते इत्युच्यते

सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी॥ नव
द्वारे पुरे देही नैव कुर्वन्न कारयन्॥१३॥

वशी जितेंद्रिय इत्यर्थः॥ क्वास्त इत्याह॥ नवद्वारे सप्त शीर्षण्यान्यात्मन उपलब्धिद्वारा
णि अर्वाक्॥ द्वे मूत्रपुरीषविसर्गार्थे द्वे॥ एतैर्नवद्वारैर्नवद्वारं पुरमुच्यते॥ शरीरं पुरमि
व पुरं॥ आत्मैकस्वामिकं तदर्थप्रयोजनैश्चेंद्रियमनोबुद्धिविषयैरनेकफलविज्ञानस्योत्पाद
कैः पौरैरिवाधिष्ठितं॥ तस्मिन्नवद्वारे पुरे देही सर्वकर्माणि संन्यस्यास्ते॥ किं विशेषणेन स ८२

मन्यतेनाहिदेहमात्रात्मदर्शिनःगेहइवदेहआसइति ×१

वाँहिदेहीसंन्यासीचेद्देहएवास्तितत्रानर्थकंविशेषणमितिउच्यते॥यस्त्वज्ञोदेहीदेहें
170 द्रियसंघातमात्रात्मदर्शिनःसत्सर्वोगेहस्थमावासनेवासइतिप्रत्ययःसंभवति॥देहा ६३
दिसंघातव्यतिरिक्तात्मदर्शिनस्तुदेहस्थास्तइतिप्रत्ययउपपद्यते॥परकर्मणांचपर
स्मिन्नात्मन्यविद्ययाध्यारोपितानांविद्ययाविवेकज्ञानेनमनसासंन्यासउपपद्यते
उत्पन्नविवेकज्ञानस्यसर्वकर्मसंन्यासिनोपिदेहएवनवद्वारेपुरेआसनंप्रवृत्तफल
कर्मसं[illegible]स्कारविशेषानुवृत्त्यादेहएववि[illegible]
शेषविज्ञानोत्पत्तेर्देहएवास्तइत्यस्त्येवविशेषणफलंविद्वदविद्वत्प्रत्ययभेदापेक्षत्वा
त्॥यद्यपिकार्यकरणकर्माणि॥अविद्ययात्मन्यध्यारोपितानिसंन्यस्तानितथाप्यात्मसं
मवायितुकर्तृत्वकारयितृत्वंचस्यादित्याशंक्याह॥नैवकुर्वन्नस्वयंनकारयन्कार्यक ७८
रणानिक्रियासुवर्तयन्॥किंचनकर्तृत्वकारयितृत्वेदेहिनःस्वात्मसमवायिसं
न्यासान्नभवतियथागच्छतोगतिःगमनव्यापारपरित्यागेनस्यात्तद्वत्॥किंवास्वतएवा
त्मनोनास्तीतिस्वतोच्यते॥नास्त्यात्मनिस्वतःकर्तृत्वंकारयितृत्वंवाऽस्याविकार्योय

171

मुच्यते॥ शरीरस्थोऽपि कौंतेय न करोति न लिप्यते इति॥ आयतीव लेलायतीव चेति।
वश्रुतेः॥१३॥ न कर्तृत्वमिति॥ न कर्तृत्वं स्वतः कुर्विति॥ नापि कर्माणि रथघटप्रासादादी।
नि ईप्सिततमानि लोकस्य सृजति उत्पादयति॥ प्रभुः आत्मा नापि रथादिकृतवत

न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः॥ न क
र्मफलसंयोगं स्वभावस्तु प्रवर्तते ॥१४॥ ॥

न तत्फलेन संयोगं॥ यदि किंचिदपि स्वतो न करोति न कारयति च देही कथं
हि कुर्वन् कारयंश्च प्रवर्तते इत्युच्यते॥ स्वभावस्तु प्रवर्तते इति॥ स्वो भावः स्व
भावः॥ अविद्यालक्षणा प्रकृतिर्माया प्रवर्तते ॥१४॥ ॥ ॥ ८२

परमार्थतत्त्वं ॥ नादत्त इति ॥ नादत्ते न गृह्णाति भक्तस्यापि कस्यचित्पापं नैवादत्ते सुकृतं
172 भक्तैः प्रयुक्तं प्रभुः ॥ किमर्थं तर्हि भक्तैः पूजादिलक्षणं यागदानहोमादिकं च सुकृतं
प्रयुज्यत इत्याह ॥ अज्ञानेनावृतं विवेकज्ञानं तेन मुह्यन्ति करोमि कारयामि भोक्ष्ये भोज
यामीत्येवं मोहं गच्छन्त्यविवेकिनः संसारिणो जन्तवः ॥ १५ ॥ ज्ञानेन तु येनाज्ञानेनावृता।

नादत्ते कस्यचित्पापं न चैव सुकृतं विभुः ॥ अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः ॥ १५ ॥
ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः ॥ तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परं ॥ १६ ॥

मुह्यन्ति जन्तवः तदज्ञानं येषां जन्तूनां विवेकज्ञानेनात्मविषयेण नाशितमात्मनो।
भवति ॥ तेषामादित्यवज्ज्ञानं यथादित्यः समस्तं रूपजातमवभासयति ॥ तद्वज्ज्ञा।
नं ज्ञेयं वस्तु सर्वं प्रकाशयति ॥ तत्परं परमार्थतत्त्वं ॥ यत्परं ज्ञानेन प्रकाशितं ॥ १६ ॥
शिव राम ॥ शिव

गी॰भा॰ तस्मिन्निति॥ तस्मिन्गताबुद्धिर्येषांतेतद्बुद्धयः॥ तदात्मानस्तदेवपरंब्रह्मआत्मायेषांतेत
८८ दात्मानः॥ तन्निष्ठाः॥ निष्ठाअभिनिवेशः तात्पर्यंसर्वाणिकर्माणिसंन्यस्यब्रह्मण्येवावस्था
173 नंयेषांतेतन्निष्ठाः॥ तत्परायणाश्च॥ तदेवपरमयनंपरागतिर्येषांभवतितेतत्परायणाः॥

तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः॥ गच्छं
त्यपुनरावृत्तिंज्ञाननिर्धूतकल्मषाः॥१७॥

केवलात्मरतयइत्यर्थः॥ येषांज्ञानेननाशितंआत्मनोऽज्ञानंतेगच्छंत्येवं॥ विधाःअपु
नरावृत्तिंअपुनर्देहसंबंधं॥ ज्ञाननिर्धूतकल्मषाः॥ यथोक्तेनज्ञानेननिर्धूतोनिर्धूतो ८८
नाशितःकल्मषःपापादिसंसारकारणदोषोयेषांतेज्ञाननिर्धूतकल्मषायतयइ त्यर्थः॥१७॥

174

येषां ज्ञानेन नाशितमात्मनो ज्ञानं ते पंडिताः कथं तत्त्वं पश्यंतीत्युच्यते ॥ विद्येति
विद्याविनयसंपन्ने ॥ विद्या च विनयश्च विद्या ॥ विनयौ विद्यात्मावबोधः विनय उपशमः
ताभ्यां विद्याविनयाभ्यां संपन्नो विद्वान्विनीतश्च यो ब्राह्मणस्तस्मिन्ब्राह्मणे गवि ह
स्तिनि शुनि चैव श्वपाके च पंडिताः समदर्शिनः ॥ विद्याविनयसंपन्ने उत्तमसंस्का

विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि ॥ शुनि
चैव श्वपाके च पंडिताः समदर्शिनः ॥१८॥ ॥

रवति ब्राह्मणे सात्त्विके ॥ मध्यमायां च राजस्यां गवि संस्कारहीनायां अत्यंतमेव के
वलतामसे हस्त्यादौ च सात्त्विकादिगुणैस्तज्जैश्च संस्कारैस्तथा राजसैस्तथा तामसैः
श्च संस्कारैरत्यंतमेवास्पृष्टं सममेकमविक्रियं ब्रह्म द्रष्टुं शीलं येषां ते पंडिताः समद र्शिनः ॥१

नन्वभोज्यान्नास्ते दोषवंतः॥ समासमाभ्यां विषमसमे पूजात इति स्मृतेर्न ते दोषवंतः॥ कथं॥ इहैवेति॥ इहैव जीवद्भिरेव तैः समदर्शिभिः पंडितैर्जितः वशीकृतः सर्गो जन्म येषां साम्ये सर्वभूतेषु ब्रह्मणि समभावे स्थितं निश्चलीभूतं मनोंतःकरणं निर्दोषं॥ यद्यपि दोषवत्सु श्वपाकादिषु मूढैस्तद्दोषैर्दोषवदिव विभाव्यते॥ तथापि तद्दोषैरस्पृ-

इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः॥ निर्दोषं हि समं ब्रह्म तस्माद्ब्रह्मणि ते स्थिताः॥१९॥

ष्टमिति निर्दोषं दोषवर्जितं॥ हि यस्मान्नापि स्वगुणभेदभिन्नं निर्गुणत्वाच्चैतन्यस्य। वक्ष्यति च भगवानिच्छादीनां क्षेत्रधर्मत्वमनादित्वान्निर्गुणत्वादिति च॥ नाप्यंत्या विशेषा आत्मनो भेदकाः संति॥ प्रतिशरीरं तेषां सत्त्वे प्रमाणाभावादतः समं ब्रह्मैकं च तस्माद्ब्रह्मण्येव ते स्थिताः॥ तस्मान्न दोषगंधमात्रमपि तान् स्पृशति देहादिसंघा। ८५

नात्मदर्शनाभावात्तेषां देहादिसंघातात्मदर्शनाभिमानवद्विषयं तु तत्त्वं समास
176 माभ्यां विषमसमे पूजात इति पूजाविषयत्वेन विशेषणान्तरं दर्शयति दि॥ ब्रह्मवित्त्वंच
विद्वत्त्वं वेदविदिति पूजादानादौ गुणविशेषसंबंधः कारणं ब्रह्म तु सर्वगुणदोष।
वर्जितमित्यतो ब्रह्मणि स्थिता इत्युक्तं॥ कर्मिविषयं च समासमाभ्यामित्या
दि॥ इदं तु सर्वकर्मसंन्यासिविषयं प्रस्तुतं सर्वकर्मणाम
न संन्यासव्याख्यायपरिसमाप्तेः॥ यस्मान्निर्दोषं सम
मं ब्रह्म आत्मा तस्मात् ॥१५॥
ॐ श्रीमत्परमशि
वाभ्यां नमो
॥नमः॥॥
॥ॐ॥
॥

गी॰भा॰ न प्रहृष्येदिति न प्रहृष्येन्न प्रहर्षं कुर्यात् ॥ प्रियमिष्टं प्राप्य ॥ नोद्विजेत्प्राप्य चाप्रियं अनिष्टं लब्ध्वा देहमात्रात्मदर्शिनो हि प्रियाप्रियप्राप्ती हर्षविषादस्थाने ने केवलात्मदर्शिनः

८६ तस्य प्रियाप्रियप्राप्त्यसंभवात् ॥ किं च सर्वभूतेष्वेकः समो निर्दोष आत्मेति स्थिरा निर्वि।

177

न प्रहृष्येत्प्रियं प्राप्य नोद्विजेत्प्राप्य चाप्रियं ॥ स्थि
रबुद्धिरसंमूढो ब्रह्मविद्ब्रह्मणि स्थितः ॥ २० ॥

चिकित्सा बुद्धिर्यस्य स स्थिरबुद्धिः ॥ असंमूढः संमोहवर्जितः स्याद्यथोक्तब्रह्मवित्
ब्रह्मणि स्थितः ॥ अकर्मकृत्सर्वकर्मसंन्यासीत्यर्थः ॥ किं च ब्रह्मणि स्थितः ॥ २० ॥ ८६
शिव ॥ राम ॥ शिव

वाह्यस्पर्शेषुवाह्याश्चतेस्पर्शाश्चवाह्यस्पर्शाःस्पृश्यंतइतिस्पर्शाःशब्दादयोविषयाःते
178 षुवाह्यस्पर्शेषुअसक्तआत्माअंतःकरणंयस्यसोयमसक्तात्माविषयेष्वप्रीतिव
जितःसन्विंदतिलभते॥आत्मनियत्सुखंवतर्हिदनीत्येनतत्सब्रह्मयोगयुक्तात्माव्रह्म

वाह्यस्पर्शेष्वसक्तात्माविंदत्यात्मनियत्सुखं॥स
ब्रह्मयोगयुक्तात्मासुखमक्षयमश्नुते॥२१॥ ॥

णियोगःसमाधिर्ब्रह्मयोगः॥तेनब्रह्मयोगेनयुक्तःसमाहितःतस्मिन्आत्मातस्या
त्माअंतःकरणंयस्यसब्रह्मयोगयुक्तात्मासुखमक्षयमश्नुतेआप्नोति॥तस्माद्वा
ह्यविषयप्रीतेःक्षणिकायाइंद्रियाणिनिवर्तयेत्॥आत्मन्यक्षयसुखार्थीत्यर्थः॥२१॥

गी·भा·
इतस्तु निवर्तयेत ॥ ये हि इति ॥ ये हि यस्मात्संस्पर्शजा विषयेंद्रियसंस्पर्शेभ्यो जाता भोगा भुक्तयः
९० दुःखयोनय एव ते ॥ अविद्याकृतत्वात् ॥ दृश्यते ह्यविद्याकृतान्याध्यात्मिकादीनि दुःखानि
179 निमित्तान्येव यथेह लोके तथा परलोकेपीति गम्यत इति ॥ एवं शास्त्रान्न संसारे सुखस्य गंधमा
त्रमप्यस्तीति बुद्ध्वा विषयमृगतृष्णिकाया इंद्रियाणि निवर्तयेत् ॥ न केवलं दुःखयोनय ॥

ये हि संस्पर्शजा भोगा दुःखयोनय एव ते ॥ आद्यंत
वंतः कौंतेय न तेषु रमते बुधः ॥२२॥ ॥ ॥

आद्यंतवंतस्त्वादिर्विषयेंद्रियसंयोगः ॥ भोगानामंतश्च तद्वियोग एव ॥ अतः आद्यंतवंतः
अनित्याः मध्यक्षणभावित्वादित्यर्थः ॥ कौंतेय न तेषु भोगेषु ॥ बुधो रमते ॥ विवेकावग
तपरमार्थतत्त्वो बुध इति ॥ अत्यंतमूढानामेव हि विषयेषु रतिर्दृश्यते ॥ यथा पशुप्र ९०
भृतीनां ॥२२॥ ॥ ॥ ॥ ॥ ॥

श्रेयं चक्षे योमार्गं प्रति पतीकष्टतमो दोषः सर्वानर्थप्राप्तिहेतुर्दुर्निवार्यश्च तन्निवृत्तये विद्वा
180 त्रियत्नाधिक्यं कर्तव्यमित्याह भगवान् ॥ शक्नोतीति ॥ शक्नोतीहस्त्येते ॥ इहैव जीवन्नेव
यः सोढुं प्रसहितुं प्राक् पूर्वं शरीरविमोक्षणात् मरणात् ॥ मरणसीमाकरणं जीवतोव
श्यंभावी हि कामक्रोधोद्भवो वेगः अनेन निमित्तवान् हि स इति यावन्मरणं तावन्न विश्व
सणीय इत्यर्थः ॥ कामः इंद्रियगोचरप्राप्त इष्टविषये श्रूयमाणे स्मर्यमाणे वानुभूते वा

शक्नोतीहैव यः सोढुं प्राक् शरीरविमोक्षणात् ॥ कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः ॥२३॥

हेतौ योगर्द्धिः तृष्णः स कामः क्रोधश्चात्मनः प्रतिकूलेषु दुःखहेतुषु दृश्यमाणे
षु श्रूयमाणेषु स्मर्यमाणेषु वा यो द्वेषः स क्रोधः तौ कामक्रोधावुद्भवो यस्य स कामक्रो
धोद्भवो वेगः कारणप्रलोभरूपः कामोद्भवो वेगो ॥ गात्रकं
पोद्भवो ॥ रोमांचहृष्टनेत्रवदनलिंगतः क्रोधोद्भवो वेगः ॥ तं कामक्रोधोद्भवं वेगं यः प्रस
प्रस्वेदसंदष्टोष्ठपुरःरक्तनेत्रादिलिंगः ॥ ॥२३॥ ॥ ॥ ॥
हते सोढुं स युक्तः योगी स सुखी चेह लोके नरः

181

कथंभूतश्च ब्रह्मणि स्थितो ब्रह्म प्राप्नोतीत्याह भगवान्॥ योंतः इति॥ योंतःसुखः अंतरात्मनि सु
खं यस्य सोंतःसुखः॥ तथांतरेवात्मन्यारामः क्रीडा यस्य सोंतरारामः॥ तथांतरात्मैव ज्योतिः
प्रकाशो यस्य सोंतर्ज्योतिरेव॥ यद्वै दृशः॥ स योगी ब्रह्मनिर्वाणं ब्रह्मणि निर्वृतिमिह जीवन्नेव
ब्रह्मभूतः सन्नधिगच्छति प्राप्नोति॥२४॥ किंच॥ लभंत इति॥ लभंते ब्रह्मनिर्वाणं मोक्षमृषयः

योंतःसुखोंतरारामस्तथांतर्ज्योतिरेव यः॥ स योगी ब्रह्मनिर्वाणं ब्रह्मभूतोधिगच्छति
॥२४॥ लभंते ब्रह्मनिर्वाणमृषयः क्षीणकल्मषाः॥ छिन्नद्वैधा यतात्मानः सर्वभूत।
हिते रताः॥२५॥

सम्यग्दर्शिनः॥ संन्यासिनः॥ क्षीणकल्मषाः॥ क्षीणपापादि
दोषाः॥ छिन्नद्वैधाश्छिन्नसंशयाः॥ यतात्मानः॥ संयतेंद्रियाः॥ सर्वभूतहिते रताः॥ सर्वे। ८८
षां भूतानां हिते आनुकूल्ये रताः॥ अहिंसका इत्यर्थः॥२५॥ ॥ ॥ ॥

किंच॥कामइति॥कामक्रोधवियुक्तानां॥कामश्चक्रोधश्चकामक्रोधौ॥ताभ्यांवियुक्तानां॥य
तीनांसंन्यासिनांयतचेतसांसंयतान्तःकरणानामभितउभयतोजीवतांमृतानांच॥ब्रह्म
निर्वाणंमोक्षोवर्त्ततेविदितात्मनांविदितोज्ञातआत्मायेषांतेविदितात्मानःतेषांसम्यग्द

कामक्रोधवियुक्तानांयतीनांयतचेतसां॥अभि
तोब्रह्मनिर्वाणंवर्त्ततेविदितात्मनां॥२६॥

र्शिनामित्यर्थः॥सम्यग्दर्शननिष्ठानांसंन्यासिनांसद्योमुक्तिरुक्ता॥कर्मयोगस्येश्वरार्पित
सर्वभावेनेश्वरेब्रह्मण्याधायक्रियमाणःसत्वशुद्धिज्ञानप्राप्तिसर्वकर्मसंन्यासक्रमेण
मोक्षायेतिभगवानुपदेक्ष्यन्नब्रवीद्ध्यपतिच॥२६॥

अथेदानीं ध्यानयोगं सम्यग्दर्शनस्यांतरंगं विस्तरेण वक्ष्यामीति तस्य सूत्रस्थानीयान् श्लोकानुपदि
शति स्म ॥ स्पर्शान् इति ॥ स्पर्शान् शब्दादीन् बहिर्बाह्यान् कृत्वा श्रोत्रादिद्वारेणांतर्बुद्धौ प्रवेशिताः

स्पर्शान्कृत्वा बहिर्बाह्यांश्चक्षुश्चैवांतरे भ्रुवोः ॥ प्रा
णापानौ समौ कृत्वा नासाभ्यंतरचारिणौ ॥ २७ ॥

शब्दादयो विषयाः तान् अचिंतयतः बाह्या बहिरेव कृता भवंति ॥ तान् एवं बहिः कृत्वा चक्षुश्चै
वांतरे भ्रुवोः कृत्वेत्यनुषज्यते ॥ तथा प्राणापानौ ॥ नासाभ्यंतरचारिणौ समौ कृत्वा ॥ २७ ॥

यतेंद्रति॥ यतेंद्रियमनोबुद्धिः संयतानींद्रियाणिमनोबुद्धिश्चयस्य॥ सयतेंद्रियमनोबु
द्धिर्मननान्मुनिः संन्यासी॥ मोक्षपरायणः॥ एवंदेहसंस्थानोमोक्षपरायणो॥ मोक्ष
एवपरमयनंपरागतिर्यस्यसमोक्षपरायणः मुनिर्भवेत्॥ विगतेच्छाभयक्रोधः॥ इ

यतेंद्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः॥ विग
तेच्छाभयक्रोधोयःसदामुक्तएवसः॥२८॥

च्छाचभयंचक्रोधश्चइच्छाभयक्रोधाः तेविगताइच्छाभयक्रोधायस्मात्सविगतेच्छा
भयक्रोधः॥ यएवंवर्त्ततेसदासंन्यासीमुक्तएवसः॥ नतस्यमोक्षादन्यत्कर्त्तव्यम
स्ति॥२८॥ ॥ ॥ ॥श्रीव

गी·भा·
५.
185

एवं समाहितचित्तेन किं विज्ञेयमित्युच्यते ॥ भोक्तारं इति ॥ भोक्तारं यज्ञानां तपसां च भोक्ता
रं कर्तृस्वरूपेण देवतास्वरूपेण च ॥ सर्वलोकमहेश्वरं सर्वेषां लोकानां महान्तमीश्व
रं सर्वलोकमहेश्वरं ॥ सुहृदं सर्वभूतानां ॥ सर्वेषां भूतानां प्रत्युपकारनिरपेक्षतयो

भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरं ॥ सुहृदं सर्वभूता
नां ज्ञात्वा मां शान्तिमृच्छति ॥ २९ ॥ इति श्री पंचमोध्यायः ॥ ५ ॥

पकारिणं ॥ सर्वभूतानां हृदयेशयं सर्वकर्मफलाध्यक्षं सर्वप्रत्ययसाक्षिणं नारा
यणं ॥ मां ज्ञात्वा शान्तिं सर्वसंसारोपरतिमृच्छति प्राप्नोति ॥ २९ ॥ इति श्री परमहंस
परिव्राजकाचार्यश्रीशंकरभगवत्कृतौ गीताविवरणे पंचमोध्यायः ॥ ५ ॥ ॥ ॥ ॥ ॥ ॥ ५.

श्रीभगवानुवाच ॥ अतीतानंतराध्यायांते ध्यानयोगस्य सम्यग्दर्शनं प्रत्यंतरंगस्य सूत्रभू-
186 ताः श्लोकाः स्पर्शान्कृत्वा बहिरित्यादय उपदिष्टाः तेषां वृत्तिस्थानीयोयं षष्ठोध्याय आ-
रभ्यते ॥ तत्र ध्यानयोगस्य बहिरंगं कर्मेति यावद्ध्यानयोगारोहणसमर्थस्तावद्गृह-
स्थेनाधिकृतेन कर्तव्यं कर्मेति अतस्तत्स्तौति ॥ अनाश्रितः कर्मफलमित्यादिना ॥ ननु कि-
मर्थं ध्यानयोगारोहणसीमाकरणं यावतानुष्ठेयमेव विहितं कर्म यावज्जीवं ॥ न आरु-
रुक्षोर्मुनेर्योगं कर्म कारणमुच्यत इति ॥ विशेषणादारूढस्य च शमेनैव संबंधकरणा-
दारुरुक्षोरारूढस्य च शमः कर्म चोभयं कर्तव्यत्वेनाभिप्रेतं चेत्स्यात्तदारुरुक्षोरारूढस्य च
कर्म च शमः विषयभेदेन विशेषणं विभागकरणं चानर्थकं स्यात् ॥ तत्राश्रमिणां कश्चिद्यो-
गमारुरुक्षुर्भवति आरूढश्च कश्चिदन्ये नारुरुक्षवो न चारूढास्तानपेक्ष्यारुरुक्षोरारूढस्य
चेति विशेषणं विभागकरणं चोपपद्यत एवेति चेन्न तस्यैवेति वचनात्पुनर्योगग्रहणाच्च
योगारूढस्येति य आसीत्पूर्वं योगमारुरुक्षुस्तस्यैवारूढस्य शम एवेति कर्तव्यं कारणं यो।
गफलं प्रत्युच्यत इत्यतो न यावज्जीवं कर्तव्यत्वप्राप्तिः कस्यचिदपि कर्मणः योगविभ्रष्टव।

गी॰भा॰
५८
187

चनाच्चगृहस्थस्यचेत्कर्मिणोयोगोविहितः॥षष्ठाध्यायेसयोगविभ्रष्टोपिकर्मगतिंकर्मफलं
प्राप्नोतीतितस्यनाशप्राशंकानुपपन्नास्यादेवशंक्यंहिकृतंकर्मकाम्यंनित्यंवामोक्षस्यनित्या
त्वादनारभ्यत्वेपिस्वफलमारभतएवनित्यस्यचकर्मणोवेदप्रमाणावबुद्धत्वात्फलेनभ
वितव्यमित्यवोचाम॥अन्यथावेदस्यानर्थक्यप्रसंगादिति॥नचकर्मणिसत्युभयविभ्र
ष्टवचनमर्थवत्॥कर्मणोविभ्रंशकारणानुपपत्तेः॥कर्मकृतमीश्वरेसंन्यस्यत्यतःक
र्तरिकर्मफलंनारभतइतिचेन्नेश्वरेसंन्यासस्याधिकतरफलहेतुत्वोपपत्तेर्मोक्षा
येवेतिचेत्॥स्वकर्मणांकृतानामीश्वरेन्यासोमोक्षायैवनफलान्तरायययोगसहितोयो
गाच्चविभ्रष्टइत्यतस्तत्प्रतिनाशाशंकायुक्तैवेतिचेन्न॥एकाकीयतचित्तात्मानिराशीर
परिग्रहः॥ब्रह्मचारिव्रतेस्थितइतिकर्मसंन्यासविधानाच्चध्यानकालेस्त्रीसहा
यत्वाशंकायेनैकाकित्वंविधीयतेनचगृहस्थस्यनिराशीरपरिग्रहइत्यादिवचनं।
मनुकूलं॥उभयविभ्रष्टप्रश्नानुपपत्तेः॥अनाश्रितइत्यनेनकर्मिणएवसंन्यासित्वंयो ५८
गित्वंचोक्तंप्रतिषिद्धंचनिरग्नेरक्रियस्यसंन्यासित्वंयोगित्वंचेतिचेन्नध्यानयोगप्रतिब।

188

वहिरंगस्य सतः कर्मणः फलाकांक्षासंन्यासस्तुतिपरत्वात् ॥ न केवलं निरग्निरक्रिय एव सं
न्यासी योगी च ॥ किं तर्हि कर्म्यपि कर्मफलासंगं संन्यस्य कर्मयोगमनुतिष्ठन् सत्वशुद्ध्यर्थं
स संन्यासी च योगी च भवतीति स्तूयते ॥ न चैकेन वाक्येन कर्मफलासंगसंन्यासी च योगी
च भवतीति स्तूयते ॥ न चैकेन वाक्येन कर्मफलासंगसंन्यासस्तुतिश्चतुर्थाश्रमप्रति
षेधश्चोपपद्यते ॥ न च प्रसिद्धं निरग्नेरक्रियस्य परमार्थसंन्यासिनः ॥ श्रुतिस्मृतिपुराणे
तिहासयोगशास्त्रेषु विहितं संन्यासित्वं योगित्वं च प्रतिषेधति भगवान् स्ववचनविरोधा
च्च सर्वकर्माणि मनसा संन्यस्यास्ते नैव कुर्वन्न कारयन्नास्ते ॥ मौनी संतुष्टो येन केनचित् ॥
अनिकेतः स्थिरमतिः विहायकामान् विहाय कामान्यः सर्वान्पुमांश्चरति निःस्पृहः
सर्वारंभपरित्यागीति च ॥ तत्र तत्र भगवता स्ववचनानि प्रदर्शितानि तैर्विरुध्येत च
तुर्थाश्रमप्रतिषेधस्तस्मान्मुनेर्योगमारुरुक्षोः प्रतिपन्नगार्हस्थ्यस्याग्निहोत्रादिक
र्मफलनिरपेक्षमनुष्ठीयमानं ध्यानयोगारोहणसाधनत्वं सत्वशुद्धिद्वारेण प्रतिपद्य

65

गी·भा·
९२
189

तइति संन्यासी च योगी चेति मन्यते॥ अना इति॥ न आश्रितोऽनाश्रितः किं कर्मफलं कर्मणः
फलं कर्मफलं यत्तदनाश्रितः तृष्णारहित इत्यर्थः॥ यो हि कर्मफले तृष्णावान् स कर्मफ
लमाश्रितो भवति॥ अयं तु तद्विपरीतोऽनाश्रितः कर्मफलमेवंभूतः सन्कार्यं कर्तव्यं नि
त्यकाम्यविपरीतं॥ अग्निहोत्रादिकं करोति निर्वर्तयति॥ यः कश्चिदीदृशः कर्मी कर्म्य
न्तरेभ्यः स विशिष्यत इत्येवमर्थमाह स संन्यासी च योगी चेति॥ संन्यासः परित्यागः

अनाश्रितः कर्मफलं कार्यं कर्म करोति यः॥ स संन्यासी च योगी च न निरग्निर्न चाक्रियः
॥१॥

स यस्यास्ति स संन्यासी च योगी च योगश्चित्तसमाधानं स यस्यास्ति स योगी चे
त्येवंगुणसंपन्नोऽयं मन्तव्यः न केवलं निरग्निरक्रिय एव संन्यासी योगी चेति मन्तव्यः
निर्गता अग्नयः कर्मांगभूता यस्मात्स निरग्निः॥ अक्रियश्च अनग्निसाधना अप्यविद्य ९२
माना क्रियाः तपोदानादिका यस्यासावक्रियः ननु निरग्नेरक्रियस्यैव श्रुतिस्मृतियोग

प्राप्तेषु संन्यासित्वं योगित्वं च प्रसिद्धं कथमिदमसामग्र्ये स्तक्रियस्य संन्यासित्वं योगित्वं चाप्र
190 सिद्धमुच्यत इति ॥ नैष दोषः कयाचिद्गुणवृत्त्या उभयस्यापि संपिपादयिषितत्वात् ॥ १ ॥ तत्र क
र्मफलसंकल्पसंन्यासात्संन्यासित्वं योगांगत्वेन च कर्मानुष्ठानात्कर्मफलसंक
ल्पस्य वा चित्तविक्षेपहेतोः परित्यागाद्योगित्वं चेति गौणमुभयं न पुनर्मुख्यं संन्यासि
त्वं योगित्वं वाभिप्रेतमित्येतमर्थं दर्शयितुमाह ॥ यं संन्यासमिति ॥ यं सर्वकर्मतत्फलपरि

यं संन्यासमिति प्राहुर्योगं तं विद्धि पांडव ॥ न ह्यसंन्यस्तसंकल्पो योगी भवति कश्चन ॥ २ ॥

त्यागलक्षणं परमार्थसंन्यासं संन्यासमिति प्राहुः ॥ श्रुतिस्मृतिविदः ॥ योगं क
र्मानुष्ठानलक्षणं तं परमार्थसंन्यासं विद्धि विजानीहि हे पांडव ॥ कर्मयोगस्य प्रवृत्ति
लक्षणस्य तद्विपरीतेन निवृत्तिलक्षणेन परमार्थसंन्यासेन कीदृशं सामान्यमंगीकृ
त्य तद्भाव उच्यते इत्यपेक्षायामिदमुच्यते ॥ अस्ति परमार्थसंन्यासेन सादृश्यं कर्तृद्वार
कं कर्मयोगस्य ॥ यो हि परमार्थसंन्यासी स त्यक्तसर्वकर्मसाधनतया सर्वकर्मतत्फल

विषयं संकल्पप्रवृत्तिहेतुकामकारणं संन्यस्यति॥ अयमपि च कर्मयोगी कर्म कुर्वाण एव
फलविषयकं संकल्पं संन्यस्तोऽपरित्यक्तः संकल्पः फलविषयाभिसंधिर्येन सोऽसं।
न्यस्तसंकल्पः कश्चन कश्चिदपि कर्मी योगी समाधानवान् भवति न संभवतीत्यर्थः। फ।
लसंकल्पस्य चित्तविक्षेपहेतुत्वात्तस्माद्यः कश्चन योगी कर्मी संन्यस्तसंकल्पो भवेत्स।
योगी समाधानवानविक्षिप्तचित्तो भवेत्॥ चित्तविक्षेपहेतोः फलसंकल्पस्य संन्यस्त
त्वादित्यभिप्रायः। योगांगत्वेन कर्मानुष्ठानात्फलसंकल्पस्य वा चित्तविक्षेपहेतोः प
रित्यागाद्योगित्वं चेति संन्यासित्वं चेत्यभिप्रेतमुच्यते॥ एवं परमार्थसंन्यासकर्मयोग।
योः कर्तृद्वारकं संन्याससाम्यमपेक्ष्यायं संन्यासमिति प्राहुर्योगं तं वि
द्धि पाण्डव इति॥ कर्मयोगस्तुत्यर्थं संन्यासित्वमुक्तं॥ ध्या
नयोगस्य फलनिरपेक्षः कर्मयोगो ब
हिरंगसाधनमि
ति॥ २॥

192

तं संन्यासत्वेन स्तुत्वाऽधुना ध्यानयोगसाधनत्वं दर्शयति॥ आरुरुक्षोरिति॥ आरुरुक्षोरारोढुमि-
च्छोरनारूढस्य ध्याने योगेऽवस्थातुमसमर्थस्येत्यर्थः॥ कस्मादारुरुक्षोर्मुनेः कर्मफलसं-
न्यासिन इत्यर्थः॥ कमारुरुक्षोर्योगं कर्म कारणं साधनमुच्यते॥ योगारूढस्य पुनस्तस्यैव
कर्म्मिणः पूर्वं शम उपशमः सर्वकर्मभ्यो निवृत्तिः कारणं योगारूढस्य साधनमुच्यत इ-

आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते ॥ योगा-
रूढस्य तस्यैव शमः कारणमुच्यते ॥३॥ ॥

त्यर्थः॥ यावद्यावत्कर्मभ्य उपरमते तावन्निरायासस्य विजितेंद्रियस्य चित्तं समाधीय-
ते॥ तथा सति स योगारूढो भवति॥ तथा चोक्तं व्यासेन॥ नैतादृशं ब्राह्मणस्यास्ति वि-
त्तं यथैकता समता सत्यता च शीलं स्थितिर्दंडनिधानमार्जवं ततस्ततश्चोपरमः ॥
क्रियाभ्य इति ॥३॥ ॥

अथेदानीं कदा योगारूढो भवतीत्युच्यते॥ यदा हीति॥ यदा समाधीयमानचित्तो योगी इन्द्रिया
र्थेषु इन्द्रियाणामर्थाः शब्दादयः॥ तेष्विन्द्रियार्थेषु कर्मसु च नित्यनैमित्तिककाम्यप्रति
षिद्धेषु प्रयोजनाभावबुद्ध्या नानुषज्जते॥ अनुषंगं कर्तव्यताबुद्धिं न करोतीत्यर्थः॥
सर्वसंकल्पसंन्यासी सर्वान्संकल्पान्॥ इहामुत्रकामहेतून्संन्यसितुं शीलमस्येति
स सर्वसंकल्पसंन्यासी॥ योगारूढः प्राप्तयोग इत्येतत्तदा तस्मिन्काले उच्यते॥ सर्वसंक

यदा हि नेन्द्रियार्थेषु न कर्मस्वनुषज्जते॥ सर्वसंकल्पसंन्यासी योगारूढस्तदोच्यते॥४॥

ल्पसंन्यासीति वचनात्सर्वांश्च कामान्सर्वाणि च कर्माणि संन्यस्येदित्यर्थः॥ संकल्पमू
ला हि सर्वे कामाः संकल्पमूलः कामो वै यज्ञाः संकल्पसंभवाः काम जानामि ते मूलं सं
कल्पात्किल जायसे॥ न त्वां संकल्पयिष्यामि समूलो न भविष्यसि॥ इत्यादिस्मृतेः सर्वका
मपरित्यागे च सर्वकर्मसंन्यासः सिद्धो भवति॥ स यथाकामो भवति तत्क्रतुर्भवति यत्क्रतुर्भ

५४
वति॥

194 तेन कर्मजन्हते इत्यादिश्रुतिभ्यो यं यं हि कुरुते कर्म तत्तत्कामस्य चेष्टितमित्यादिस्मृति
भ्यश्च॥न्यायाच्च॥न हि सर्वसंकल्पसंन्यासे कश्चित्स्पंदितुमपि शक्तः॥तस्मात्सर्वसंक
ल्पसंन्यासीति वचनात्॥सर्वान्कामान्सर्वाणि च कर्माणि त्याजयति भगवान्॥यदैव
योगारूढस्तदात्मा उद्धृतो भवति संसारादनर्थजातात॥अ उद्धरेत् संसारसागरे निम
ग्नमात्मानं॥स्वात्मना उद्धरेत्॥तत ऊर्ध्वं हरेत् योगारूढतामापादयेत्॥इत्यर्थः॥नात्मान

उद्धरेदात्मनात्मानं नात्मानमवसादयेत्॥आत्मैव ह्यात्मनो बंधुरात्मैव रिपुरात्मनः॥५॥

मवसादयेत्॥नाधो नयेत्॥आत्मैव हि यस्मादात्मनो बंधुः न ह्यन्यः कश्चिद्बंधुर्यः संसारमुक्त
ये भवति॥बंधुरपि तावन्मोक्षं प्रति प्रतिकूल एव स्नेहादिबंधनायतनत्वात्॥तस्माद्युक्तम
वधारणमात्मैव ह्यात्मनो बंधुरिति॥आत्मैव रिपुः शत्रुर्योन्योऽपकारी बाह्यः शत्रुः सोप्या
त्मप्रयुक्त एवेति॥युक्तमेवावधारणमात्मैव रिपुरात्मन इति ॥५॥ ॥ ॥ ॥

गी॰ भा॰ स्यात्मैव बंधुरात्मैव रिपुरात्मन इत्युक्तं तत्र किंलक्षण आत्मा आत्मनो बंधुः किंलक्षणो वा आत्मा आत्मनो।
९५ रिपुरित्युच्यते॥ बंधुरिति॥ तस्यात्मनः स्व आत्मा बंधुर्येनात्मैवात्मना जितः॥ आत्मा कार्यका
195 रणसंघातो येन वशीकृतः जितेंद्रिय इत्यर्थः॥ अनात्मनो जितात्मनस्तु शत्रुत्वे शत्रुभाव
वर्तेत आत्मैव शत्रुवत॥ यथा ऽनात्मा शत्रुरात्मनो ऽपकारी तथात्मनो ऽपकारे वर्तेत इ

बंधुरात्मात्मनस्तस्य येनात्मैवात्मना जितः॥ अनात्मनस्तु शत्रुत्वे वर्तेतात्मैव शत्रुव
त्॥६॥ जितात्मनः प्रशांतस्य परमात्मा समाहितः॥ शीतोष्णसुखदुःखेषु तथा मानाप
मानयोः॥७॥

त्यर्थः॥६॥ जिता इति॥ जितात्मनः कार्यकारणसंघात आत्मा जितो
येन॥ स जितात्मा तस्य जितात्मनः॥ प्रशांतस्य उपशांतस्य॥ परमात्मा समाहितः साक्षा
दात्मभावेन वर्तत इत्यर्थः॥ किंच शीतोष्णसुखदुःखेषु॥ तथा मानापमानयोः पू। ९५
जापरिभवयोः समः स्यात ॥७॥ ॥

ज्ञानेइति॥ ज्ञानं शास्त्रोक्तपदपदार्थानां परिज्ञानं विज्ञानं तु शास्त्रतो ज्ञातानां तथैव स्वा
196 नुभवकरणं ताभ्यां ज्ञानविज्ञानाभ्यां तृप्तः॥ संजातालंप्रत्ययः आत्मा मनो यस्य स ज्ञान
विज्ञानतृप्तात्मा॥ कूटस्थः अप्रकंप्यो भवतीत्यर्थः॥ विजितेंद्रियश्च॥ य ईदृशो युक्तः स
समाहित इति उच्यते कथ्यते॥ स योगी समलोष्टाश्मकांचनः लोष्टाश्मकांचनानि
किंच समानि यस्य सः॥ सुहृदिति प्रत्युपकारमनपेक्ष्योपकर्ता मित्रं स्नेहवान्॥ अरिः शत्रुः

ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेंद्रियः॥ युक्त इत्युच्यते योगी समलोष्टाश्मकां
चनः॥७॥ सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबंधुषु॥ साधुष्वपि च पापेषु समबुद्धिर्वि
शिष्यते॥८॥

उदासीनो न कस्यचित्पक्षं भजते॥ मध्यस्थः योः विरुद्ध विरुद्धयोरुभ
योर्हितैषी॥ द्वेष्य आत्मनोऽप्रियः॥ बंधुः संबंधीति॥ एतेषु साधुषु धर्मात्मस्वपि
पापेषु प्रतिषिद्धकारिषु सर्वेष्वेतेषु समबुद्धिः कः किंकर्मेत्यव्यापृतबुद्धिरित्यर्थः
विशिष्यते विमुच्यत इति पाठांतरे॥ योगारूढानां सर्वेषामयमुत्तम इत्यर्थः॥८॥

सततं वा तन्मयफलशांतये ॥ योगीइति ॥ योगी ध्यायी युंजीत समादध्यात ॥ सततं सर्व
दा आत्मानं अंतःकरणं रहसि एकांते गिरिगुहादौ स्थितः सन् ॥ एकाकी असहा
यः रहसि स्थितः ॥ एकाकी चेति विशेषणात् संन्यासं कृत्वेत्यर्थः ॥ यतचित्तात्मा चि

योगी युंजीत सततमात्मानं
रहसि स्थितः ॥ एकाकी यतचि
त्तात्मा निराशीरपरिग्रहः ॥१०॥

त्तमंतःकरणं आत्मा देहश्च संयतौ यस्य स यतचित्तात्मा निराशी वीततृष्णः अपरिग्र
हश्च परिग्रहरहित इत्यर्थः ॥ संन्यासित्वेपि त्यक्तपरिग्रहः सन् युंजीतेत्यर्थः ॥१०॥

अथेदानीं योगं युंजतस्तस्यासनाहारविहारादीनां योगसाधनत्वेन नियमो वक्तव्यः प्राप्तयो
198 गलक्षणात्तत्फलादि चेत्यतआरभ्यते॥ तत्रासनमेव तावत्प्रथममुच्यते॥ शुचाविति॥
शुचौ विविक्ते स्वभावतः संस्कारतो वा देशे स्थाने प्रतिष्ठाप्य स्थिरमचलमात्मन आस
नं॥ नात्युच्छ्रितं नात्युच्चं नातिनीचं च॥ तच्च चैलाजिनकुशोत्तरं विपरीतोऽ
त्क्रमः चैलस्याजिनं कुशाश्चोत्तरे यस्मिंस्तदासनं तदासनं चैलाजिनकुशोत्तरं विपरीतोः

शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः॥ नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरं
११॥ तत्रैकाग्रं मनः कृत्वा यतचित्तेंद्रियक्रियः॥ उपविश्यासने युंज्याद्योगमात्मविशु
द्धये॥१२॥

त्क्रमः चैलादीनां प्रतिष्ठाप्य॥११॥ किंच॥ तत्रैवेति॥ तत्र तस्मिन्नासने उपविश्य
योगं युंज्यात्॥ कथं सर्वविषयेभ्यः उपसंहृत्य एकाग्रं मनः कृत्वा॥ यतचित्तेंद्रियक्रियः
चित्तं च इंद्रियाणि च चित्तेंद्रियाणि तेषां क्रियाः संयता यस्य स यतचित्तेंद्रियक्रियः॥
किमर्थं योगं युंज्यादित्यत आह॥ आत्मविशुद्धये अंतःकरणस्य शुद्धये॥ अंतःकरणस्यस्व

अधुनाशरीरधारणंकथमितिउच्यते॥समंइति॥कायश्चशिरश्चग्रीवाचकायशिरोग्रीवं
तत्समंधारयन्॥अचलंचसमंधारयतश्चलनंचसंभवत्यतोविशिनष्टिअचलमिति
स्थिरःस्थिरोभूत्वेत्यर्थः स्वंनासिकाग्रंसंप्रेक्ष्यसम्यक्प्रेक्षणंदर्शनंकृत्वेवेतीवशब्दो
लुप्तोद्रष्टव्यः नहिस्वनासिकाग्रसंप्रेक्षणं इहविवक्षितं किंतर्हिचक्षुषोदृष्टिसं।

समंकायशिरोग्रीवंधारयन्नचलंस्थिरः॥सं
प्रेक्ष्यनासिकाग्रंस्वंदिशश्चानवलोकयन्॥१३॥

निपातोंतःकरणसमाधानापेक्षोविवक्षितः॥नासिकाग्रसंप्रेक्षणमेवचेद्विवक्षि
तंमनस्तत्रैवसमाधीयेत नात्मनि॥आत्मनिहिमनःसमाधानंवक्ष्यति॥आत्मसंस्थं
मनःकृत्वेति॥तस्मादिवशब्दलोपेनाक्ष्णोर्दृष्टिसंनिपातएवसंप्रेक्ष्येत्युच्यते॥दिशः।
श्चानवलोकयन् दिशांचावलोकनमन्तरायंकुर्वन्नित्येतत् ॥१३॥ ॥ ॥

किंच॥प्रशांतात्मेति॥प्रकर्षेण शांत आत्मा अंतःकरणं यस्य स प्रशांतात्मा विगतभीर्वि
गतभयः ब्रह्मचारिव्रते स्थितः ब्रह्मचारिणो व्रतं ब्रह्मचर्यं गुरुशुश्रूषाभिक्षाभोजनादि तस्मि
न्स्थितः तदनुष्ठाता भवेदित्यर्थः॥ किंच॥ मनः संयम्य मनसो वृत्तीरुपशमनं कृत्वेत्यर्थः॥
मच्चित्तः मयि परमेश्वरे चित्तं यस्य सोयं मच्चित्तः युक्तः समाहितः सन्नासीत उपविशे
त॥ मत्परः अहं परो यस्य सोयं मत्परो भवति॥ कश्चिद्रागी स्त्रीचित्तो न तु स्त्रियमेव परत्वे

प्रशांतात्मा विगतभीर्ब्रह्मचारिव्रते स्थितः॥ मनः संयम्य मच्चित्तो युक्त आसीत मत्परः॥१४
युंजन्नेवं सदात्मानं योगी नियतमानसः॥ शांतिं निर्वाणपरमां मत्संस्थामधिगच्छति॥१५

न गृह्णाति किं तर्हि राजानं महादेवं वा॥ अयं तु मच्चित्तः मत्परश्च॥१४॥ अथेदानीं योगफलमु
च्यते॥ युंजन्निति युंजन्समाधानं कुर्वन्॥ एवं यथोक्तेन विधानेन योगी नियतमानसः॥
नियतं संयतं मानसं मनो यस्य सोयं नियतमानसः॥ शांतिमुपरतिं निर्वा
णपरमां निर्वाणं मोक्षः तत्परमा निष्ठा यस्याः शांतेः तां निर्वाणपरमां मत्संस्थाम ...

योगिनं युक्ताहारादिर्नियम उच्यते॥ नात्यश्नतस्त्विति॥ न अत्यश्नतः आत्मसंमितमन्नपरिमाणमती
त्याश्नतोऽत्यश्नतः न योगोऽस्ति। न च एकान्तमनश्नतो योगोऽस्ति॥ यदु ह वा आत्मसंमितमन्नं
तदवति तन्न हिनस्ति यद्भूयो हिनस्ति यत्कनीयो न तदवतीति श्रुतेः॥ तस्माद्योगी नात्म
संमितादन्नादधिकं न्यूनं वाऽश्नीयात्। अथवा योगिनो योगशास्त्रे परिपठितादन्नप

नात्यश्नतस्तु योगोऽस्ति न चैकान्तमनश्नतः॥ न
चातिस्वप्नशीलस्य जाग्रतो नैव चार्जुन॥१६॥

रिमाणादतिमात्रमश्नतो योगो नास्तीत्युक्तं॥ अर्धमन्नस्य सव्यंजनस्य तृतीयमुदक
स्य च वायोः संचरणार्थं तु चतुर्थमवशेषयेदित्यादिपरिमाणं॥ तथा न चातिस्वप्नशी
लस्य नैव चातिमात्रं जाग्रतः॥ योगो भव
ति चार्जुन॥१६॥

202 कथं पुनर्योगो भवतीत्युच्यते ॥ युक्ताहारेति ॥ आह्रियत इत्याहारोऽन्नं विहरणं विहारः पाद
क्रमः तौ युक्तौ नियतपरिमाणौ यस्य ॥ तथान्यासु च युक्ता नियता चेष्टा यस्य कर्मसु तथा यु
क्तौ स्वप्नावबोधौ यस्य युक्तौ स्वप्नश्चावबोधश्च तौ नियतकालौ यस्य तस्य युक्ताहारविहार
स्य युक्तचेष्टस्य कर्मसु युक्तस्वप्नावबोधस्य योगिनः ॥ योगो भवति दुःखहा दुःखानि स
र्वाणि हन्तीति दुःखहा ॥ सर्वसंसारदुःखक्षयकृत् ॥ योगो भवतीत्यर्थः ॥ १७ ॥ अधुना क

युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु ॥ युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ॥ १७
यदा विनियतं चित्तमात्मन्येवावतिष्ठते ॥ निःस्पृहः सर्वकामेभ्यो युक्त इत्युच्यते त।

दा युक्तो भवतीत्युच्यते ॥ यदेति ॥ यदा विनियतं चित्तं विशेषेण नियतं सं दा ॥ १८ ॥
यतं एकाग्रतामापन्नं चित्तं ॥ हित्वा बाह्यचिन्तामात्मन्येव केवलेऽवतिष्ठते ॥ आत्म।
निस्थितिं लभत इत्यर्थः ॥ निःस्पृहः सर्वकामेभ्यो निर्गता दृष्टादृष्टविषयेभ्यः स्पृहा
तृष्णा यस्य योगिनः स युक्तः समाहितचित्त इत्युच्यते ॥ १८ ॥ ॥ ॥

गी॰भा॰
९९
203

तदा समाहितं तयस्य चित्तं तस्योपमोच्यते ॥ यथाइति ॥ यथा दीपः प्रदीपः निवातस्थः वात
वर्जितदेशेस्थितः नेंगते न चलति सोपमाउपमीयते ॥ स्वनयेत्युपमा योगज्ञैश्चित्तप्रचा
रदर्शिभिः स्मृता चिंतिता ॥ योगिनो यतचित्तस्य संयतांतःकरणस्य ॥ युंजतो योगमनु
ष्ठितआत्मनः समाधिं ध्यानमनुतिष्ठतः इत्यर्थः ॥ १९ ॥ एवं योगाभ्यासबलादेकाग्री

यथा दीपो निवातस्थो नेंगते सोपमा स्मृता ॥ योगिनो यतचित्तस्य युंजतो योगमा
त्मनः ॥ १९ ॥ यत्रोपरमते चित्तं निरुद्धं योगसेवया ॥ यत्र चैवात्मनात्मानं पश्य
न्नात्मनि तुष्यति ॥ २० ॥

भूतं निवातदीपकल्पमत ॥ यत्रेति ॥ यत्र यस्मिन् काले
उपरमते चित्तं उपरतिं गच्छति ॥ निरुद्धं सर्वतो निवारितप्रचारं ॥ योगसेवया योगानु
ष्ठानेन ॥ यत्र च यस्मिंश्च काले आत्मना समाधिपरिशुद्धेनांतःकरणेनात्मानं
परं चैतन्यं ज्योतिःस्वरूपं पश्यन् ॥ उपलभमानः ॥ स्व एवात्मनि तुष्यति तोषं भजते ॥ २० ॥ ९९

204 किंच॥सुखमिति॥सुखमात्यंतिकं॥अत्यंतमेव भवतीत्यात्यंतिकं॥अनंतमित्यर्थः॥यत्त
द्बुद्धिग्राह्यं बुद्ध्यैव इंद्रियनिरपेक्षया गृह्यत इति बुद्धिग्राह्यं॥अतींद्रियमिंद्रियगोचराती
तीनमविषयजनितमित्यर्थः॥वेत्ति तदीदृशं सुखमनुभवति॥यत्र यस्मिन्काले यं
विद्वानात्मस्वरूपे स्थितः॥तस्मान्नैव चलति॥तत्त्वतः तत्स्वरूपान्न प्रच्यवत इत्यर्थः

सुखमात्यंतिकं यत्तद्बुद्धिग्राह्यमतींद्रियं॥वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वतः
॥२१॥यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः॥यस्मिन्स्थितो न दुःखेन गुरुणापि
विचाल्यते॥२२॥

॥२२॥किंच॥यं लब्ध्वा इति॥यमात्मलाभं लब्ध्वा प्राप्य चापरं लाभांतरं
ततोधिकमस्तीति न मन्यते न चिंतयति॥किंच यस्मिन्नात्मतत्त्वे स्थितः दुःखेन श
स्त्रनिपातादिलक्षणेन गुरुणा महतापि न विचाल्यते॥यत्रोपरमते चित्तमित्यार
भ्य यावद्भिर्विशेषणैर्विशिष्टस्यात्मनो वस्थाविशेषो योगः उक्तः॥२२॥ ॥ ॥

गी॰भा॰ १००
205

तं विद्यादिति॥ तं विद्याद्विजानीयात् दुःखसंयोगवियोगं दुःखैः संयोगो दुःखसंयोगः तेन वियोगो दुःखसंयोगवियोगः तं योगं इत्येवं संज्ञितं॥ विपरीतलक्षणेन विद्याद्विजानीयादित्यर्थः॥ योगफलमुपसंहृत्य पुनरन्वारंभेण योगस्य कर्तव्यतेच्यते॥ निश्चयानिर्वेदयोः साधनत्वविधानार्थं॥ सयथोक्तफलयोगो निश्चयेनाध्यवसायेन योक्तव्यः॥ अनिर्विं

तं विद्याद् दुःखसंयोगवियोगं योगसंज्ञितं॥ स निश्चयेन योक्तव्यो योगोऽनिर्विण्णचेतसः॥२३॥ संकल्पप्रभवान्कामांस्त्यक्त्वा सर्वानशेषतः॥ मनसैवेंद्रियग्रामं विनियम्य समंततः॥२४॥

ण्णचेतसानिर्विण्णमनिर्विण्णं किं तत् चेतः तेन निर्वेदरहितेन चेतसा चित्तेनेत्यर्थः॥२३॥ किंच॥ संकल्पेति॥ संकल्पः प्रभवो येषां कामानां ते संकल्पप्रभवाः कामाः तांस्त्यक्त्वा परित्यज्य सर्वानशेषतः निःशेषतः किंच मनसैव विवेकयुक्तेन॥ इंद्रियग्राममिंद्रियसमुदायं विनियम्य विनियमनं कृत्वा समंततः

सं॰ टी॰ ९८

शनैः इति ॥ शनैः शनैर्नै सहसा ॥ उपरमेत उपरतिं कुर्यात ॥ केन बुद्ध्या किंविशिष्टया धृतिगृ
206 हीतया ॥ धैर्ययुक्तयेत्यर्थः आत्मसंस्थं आत्मनि संस्थितं ॥ आत्मैव सर्वं न ततोन्यत्किंचिद 5.6
स्तीत्येवं आत्मसंस्थं मनः कृत्वा न किंचिदपि चिंतयेत ॥ एष योगस्य परमो विधिः ॥ तत्रैव
मात्मसंस्थं मनः कर्त्तुं प्रवृत्तो योगी ॥ २५ ॥ यतो इति ॥ यतो यतो यस्माद्यस्मान्निमित्ताच्छब्दादेर्नि

शनैः शनैरुपरमेद्बुद्ध्या धृतिगृहीतया ॥ आत्मसंस्थं मनः कृत्वा न किंचिदपि चिंत
येत ॥ २५ ॥ यतो यतो निश्चरति मनश्चंचलमस्थिरं ॥ ततस्ततो नियम्यैतदात्मन्येव व
शं नयेत ॥ २६ ॥ ॥

श्चरति निर्गच्छति स्वभावदोषान्मनश्चंचलं स्मृत्यर्थं चलं ॥ अतएवा
स्थिरं ॥ ततस्ततस्तस्मात्तस्माच्छब्दादेर्निमित्तान्नियम्य तत्तन्निमित्तया याथात्म्यनिरूपणेना
6.6 भासीकृत्य वैराग्यभावनया चैतन्मन आत्मन्येव वशं नयेत ॥ आत्मवश्यतामापाद
येत ॥ एवं योगाभ्यासबलाद्योगिन आत्मन्येव प्रशाम्यति मनः ॥ २६ ॥ ॥ ॥

गी॰ भा॰ ९१ प्रयोऽस्ति ॥ प्रशांतंमनोयस्यसप्रशांतमनाः ॥ तंप्रशांतमनसंह्येनंयोगिनंसुखमुत्तमंनिरति
शयमुपैत्युपगच्छति ॥ शांतरजसंप्रक्षीणमोहादिक्लेशरूपरजसमित्यर्थः ॥ ब्रह्मभूतंजीवन्मु
207 क्तंब्रह्मैवसर्वंतदित्येवंनिश्चयवंतंब्रह्मभूतमकल्मषं ॥ अधर्मादिवर्जितं ॥ २६ ॥ युंजन्निति ॥ य

प्रशांतमनसंह्येनंयोगिनंसुखमुत्तमं ॥ उपैतिशांतरजसंब्रह्मभूतमकल्मषं ॥ २७ ॥
युंजन्नेवंसदात्मानंयोगीविगतकल्मषः ॥ सुखेनब्रह्मसंस्पर्शमत्यंतंसुखमश्नुते ॥ २८ ॥

एवंयथोक्तक्रमेणयोगीसदासर्वदाआत्मानंयुंजन्विगतकल्मषः ॥ विगतपापःसुखेना
नायासेन ॥ ब्रह्मसंस्पर्शंब्रह्मणापरेणसंस्पर्शोयस्यतद्ब्रह्मसंस्पर्शंसुखमत्यंतंनिरतिश ९८
यं ॥ अश्नुतेव्याप्नोति ॥ २८ ॥ ॥

इदानीं योगस्य यत्फलं ब्रह्मैकदर्शनं सर्वसंसारविच्छेदकारणं तत्प्रदर्श्यते ॥ सर्वइति
208 सर्वेषु भूतेषु स्थितं स्वमात्मानं ॥ सर्वभूतानि चात्मनि ॥ ब्रह्मादीनि सर्वभूतानि ॥ स्वा
त्मन्येकतां गतानि ॥ ईक्षते पश्यति ॥ योगयुक्तात्मा ॥ समाहितांतःकरणः ॥ सर्वत्र सम

सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि ॥ ईक्ष
ते योगयुक्तात्मा सर्वत्र समदर्शनः ॥२९॥ ॥

दर्शनः सर्वेषु ब्रह्मादिस्थावरांतेषु विषमेषु सर्वभूतेषु समं निर्विशेषं ब्रह्मात्मै
कत्वेन दर्शनं ज्ञानं यस्य स सर्वत्र सम
दर्शनः ॥२९॥ ॥

गी·भा·
१२
209

तस्यात्मैकत्वदर्शनस्यफलमुच्यते॥योमांइति॥योमांपश्यतिसर्वत्रसर्वंचमयिपश्यति
योमांवासुदेवंसर्वस्यात्मानंसर्वेषुभूतेषुसर्वत्रपश्यतिवीतते॥सर्वंचब्रह्मादिस्त
जातंमयिसर्वात्मनिपश्यति॥तस्यैवात्मैकत्वदर्शिनः॥अहमीश्वरोनप्रणश्यामि॥न
परोक्षभावंगमिष्यामि॥सचमेनप्रणश्यतिसचविद्वान्ममवासुदेवस्यनप्रणश्यति।

योमांपश्यतिसर्वत्रसर्वंचमयिपश्यति॥तस्याहंनप्रणश्यामिसचमेनप्रणश्य
ति॥३०॥सर्वभूतस्थितंयोमांभजत्येकत्वमास्थितः॥सर्वथावर्त्तमानोपिसयो
गीमयिवर्त्तते॥३१॥

नपरोक्षीभवति॥यस्माच्चाहमेवसर्वात्मैकत्वदर्शी॥३०॥
सर्वइति॥इत्येतत्पूर्वश्लोकार्थंसम्यग्दर्शनमनूद्यतत्फलंमोक्षोभिधीयते॥सर्व
थासर्वप्रकारैर्वर्त्तमानोपिसम्यग्दर्शीयोगीमयिवैष्णवेपरमेपदेवर्त्ततेनित्यमुक्त १२
एवसः॥नमोक्षंप्रतिकेनचित्प्रतिबध्यतइति॥३१॥ ॥ ॥ ॥

किंचान्यत॥ आत्मौ इति॥ आत्मा स्वयमेव उपमीयतेऽनेनेति ज्ञानवौपम्यं तेनात्मौपम्ये
210 न सर्वत्र सर्वभूतेषु समं तुल्यं पश्यति॥ योऽर्जुन सर्वं किं समं पश्यतीत्युच्यते॥ यथा म
म सुखमिष्टं तथा सर्वप्राणिनां सुखमनुकूलं वा प्रपूर्वार्थं यदि वा यच्च दुःखं मम
प्रतिकूलमनिष्टं यथा तथा सर्वप्राणिनां दुःखमनिष्टं प्रतिकूलमित्येवमात्मौपम्ये

आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन॥ सु
खं वा यदि वा दुःखं स योगी परमो मतः॥ ३२॥

न सुखं दुःखं वा अनुकूलं प्रतिकूले [illegible] तुल्यं तथा स
र्वभूतेषु समं पश्यति॥ न कस्यचित्प्रतिकूलमाचरति॥ अहिंसक इत्यर्थः॥ य एवम
हिंसकः सम्यग्दर्शननिष्ठः स योगी परम उत्कृष्टो मतः॥ अभिमतः सर्वयोगिनां॥ ३२॥

गी॰भा॰
९३
211

एतस्य यथोक्तस्य सम्यग्दर्शनलक्षणस्य योगस्य दुःसंपाद्यतामालक्ष्य शुश्रूषुर्ध्रु
वमुपायमर्जुन उवाच॥ योऽयमिति॥ योऽयं योगस्त्वया साम्येन समत्वेन प्रोक्तः हे मधुसूदन
एतस्य योगस्याहं न पश्यामि नोपलभे चंचलत्वात्॥ कस्य मनसः किं स्थिरां अचलां
स्थितिं प्रसिद्धमेतत्॥ चंह॥ चंचलं इति॥ कृष्णेति कृषतेर्विलेखनार्थस्य रूपं भक्तजना

योऽयं योगस्त्वया प्रोक्तः साम्येन मधुसूदन॥ एतस्याहं न पश्यामि चंचलत्वात्स्थितिं
स्थिरां॥ ३३॥ चंचलं हि मनः कृष्ण प्रमाथि बलवद्दृढं॥ तस्याहं निग्रहं मन्ये वायोरि
वसुदुःकरं॥ ३४॥

नां पापादिदोषापकर्षणात्कृष्णः॥ हि यस्मान्मनः चंचलं न केवल
मत्यर्थं चंचलं प्रमाथि प्रमथनशीलं प्रमथ्नाति शरीरमिन्द्रियाणि च विक्षिपति परवशी
करोति॥ किंच बलवत्॥ न केनचिन्नियंतुं शक्यते॥ किंच दृढं तंतुनागवत्॥ तस्यैवं
भूतस्य मनसो निग्रहं निरोधं दुःकरं मन्ये वायोरिव॥ यथा वायोर्निग्रहो दुःकरः ता।

तोऽपि मनसो निग्रहं दुःकरं मन्यत इत्य
भिप्रायः॥ ३४॥

212

एवमेवयथाब्रवीषि॥असंशयं इति॥नास्तिसंशयोयन्मनोदुर्निग्रहंचलमित्यत्र॥महाबाहो॥किंतु
अभ्यासेनअभ्यासोनामचित्तस्यैकस्मिंश्चित्तमानप्रत्ययावृत्तिश्चित्तस्य॥वैराग्यंदृष्टा
दृष्टेष्टभोगेषुदोषदर्शनाभ्यासाद्वैतृष्ण्यंतेनचवैराग्येणगृह्यतेविक्षेपरूपप्रचारःचि
त्तस्यएवंतन्मनोनिरुध्यतइत्यर्थः॥३५॥यःपुनः॥असंयतेति॥असंयतात्मना॥अभ्या ना०४
सवैराग्याभ्यां॥असंयतःआत्माअन्तःकरणंयस्यसोयमसंयतात्मा॥तेनासंयतात्मना

श्रीभगवानुवाच॥असंशयंमहाबाहोमनोदुर्निग्रहंचलं॥अभ्यासेनतुकौंतेयवैरा
ग्येणचगृह्यते॥३५॥असंयतात्मनायोगोदुःप्राप इतिमेमतिः॥वश्यात्मनातुयततानाश
क्योवाप्तुमुपायतः॥३६॥

योगोदुःप्रापःदुःखेनप्राप्यतइतिमेमतिः॥यस्तुपुनर्वश्यात्मा
अभ्यासवैराग्याभ्यांवश्यत्वमापादितःआत्मामनोयस्यसोयंवश्यात्मातेनवश्यात्मना
तुयततानाभूयोपिप्रयत्नंकुर्वताशक्योवाप्तुंयोगउपायतः॥यथोक्तादुपायाद्यत्रयोगा
भ्यासंगीकरणेनपरलोकइहलोकप्राप्तिनिमित्तानिकर्माणिसंन्यस्तानियोगसि
द्धिफलंचमोक्षसाधनंसम्यग्दर्शनंनप्राप्तमिति ॥३६॥ ॥ ॥

योगी योगमार्गान्मरणकाले चलितचित्तस्तस्य नाशमाशंक्यार्जुन उवाच ॥ अयतिरिति ॥ अ-
यतिः अप्रयत्नः योगमार्गे श्रद्धयास्तिक्यबुद्ध्या चोपेतो योगादन्तकाले चलितं मानसं
मनो यस्य स चलितमानसः ॥ भ्रष्टस्मृतिः सन् अप्राप्य योगसंसिद्धिं योगफलं सम्यग्दर्शनं
कां गतिं हे कृष्ण गच्छति ॥ ३७ ॥ कच्चिन्नोभयविभ्रष्टः कर्ममार्गाद्योगमार्गाच्च ॥ विभ्रष्टः स

अयतिः श्रद्धयोपेतो योगाच्चलितमानसः ॥ अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण गच्छ-
ति ॥ ३७ ॥ कच्चिन्नोभयविभ्रष्टश्छिन्नाभ्रमिव नश्यति ॥ अप्रतिष्ठो महाबाहो विमूढो
ब्रह्मणः पथि ॥ ३८ ॥ एतन्मे संशयं कृष्ण छेत्तुमर्हस्यशेषतः ॥ त्वदन्यः संशयस्यास्य
छेत्ता न ह्युपपद्यते ॥ ३९ ॥

न् ॥ उभयविभ्रष्टः छिन्नाभ्रमिव न नश्यति ॥ न नश्यति किं
अप्रतिष्ठो निराश्रयो हे महाबाहो विमूढः सन् ब्रह्मणः पथि ब्रह्मप्राप्तिमार्गे ॥ ३८ ॥ एतदि-
ति ॥ एतन्मम संशयं कृष्ण छेत्तुमपनेतुमर्हसि ॥ अशेषतः ॥ कार्त्स्न्येन त्वदन्यः ॥ त्वत्तो ॥
अन्य ऋषिर्देवो वा छेत्ता नाशयिता ॥ संशयस्यास्य न हि यस्मादुपपद्यते न संभवति अतस्त्व

214

पार्थ इति ॥ हे पार्थ नैवेह लोके ॥ नामुत्र परस्मिन्वा लोके ॥ तस्य विनाशो विद्यते नास्ति वि
नाशो नाम पूर्वस्माद्धीनजन्मप्राप्तिः स योगभ्रष्टस्य नास्ति नहि यस्मात्कल्याणकृत्
शुभकृत् कश्चिद्दुर्गतिं कुत्सितां गतिं हे तात तनोत्यात्मानं पुत्ररूपेणेति पिता तातः उ
च्यते ॥ पितैव पुत्र इति पुत्रोपि तात उच्यते ॥ शिष्योपि पुत्र उच्यते ॥ गच्छति किं तस्य भ

श्रीभगवानुवाच ॥ पार्थ नैवेह नामुत्र विनाशस्तस्य विद्यते ॥ नहि कल्याणकृत्कश्चि
द्दुर्गतिं तात गच्छति ॥ ४० ॥ प्राप्य पुण्यकृतां लोकानुषित्वा शाश्वतीः समाः ॥ शुची
नां श्रीमतां गेहे योगभ्रष्टोभिजायते ॥ ४१ ॥

वतीति ॥ ४० ॥ प्राप्येति ॥ योगमार्गे
प्रवृत्तः संन्यासी सामर्थ्यात्प्राप्य गत्वा पुण्यकृतां ॥ अश्वमेधयाजिनां लोकान्
तत्र चोषित्वा वासमनुभूय ॥ शाश्वतीर्नित्याः समाः संवत्सरान् तदा गते शुची
नां यथोक्तकारिणां श्रीमतां विभूतिमतां गेहे गृहे योगभ्रष्टोभिजायते ॥ ४१ ॥

गी॰ भा॰ अथइति॥अथश्रीमतांकुलादन्यस्मिन्योगिनामेवदरिद्राणांकुलेभवति॥जायतेधीमतां
९५ बुद्धिमतां॥एतद्धिजन्मयद्दरिद्राणांयोगिनांकुलेतद्दुर्लभतरंदुःखेनलभ्यतरं॥एवंमपे
215 त्वलोकेजन्मयदीदृशंयथोक्तविशेषणेकुलेयस्मात्॥४२॥तत्रइति॥तत्रयोगिनांकुले
तंबुद्धिसंयोगंबुद्ध्यासंयोगंबुद्धिसंयोगंलभतेपौर्वदेहिकं॥पूर्वस्मिन्देहेभवंपौर्वदै

अथवायोगिनामेवकुलेभवतिधीमतां॥एतद्धिदुर्लभतरंलोकेजन्मयदीदृशं॥४२॥
तत्रतंबुद्धिसंयोगंलभतेपौर्वदेहिकं॥यततेचततोभूयःसंसिद्धौकुरुनन्दन॥४३॥

हिकं॥यततेचप्रयत्नंकरोति॥ततस्तस्मात्पूर्वकृतसंस्काराद्भूयोबहुतरंसंसि
द्धौसंसिद्धिनिमित्तं॥हेकुरुनन्दन॥४३॥
शिव॥शंभ
॥रुद्र॥ ९५

216

कथंपुनःयोर्विदोऽधिकंबुद्धिसंयोगमितिचोच्यते॥पूर्वाइति॥यःपूर्वजन्मनिकृतोऽभ्यासः
सपूर्वाभ्यासस्तेनैवबलवताह्रियतेहियस्मादवशोऽपिसन्योगभ्रष्टः।नकृतंचेद्योगा।
भ्यासजनितसंस्काराद्बलवत्तरमधर्मादिलक्षणंकर्मतदायोगाभ्यासजनितेनसं।
स्कारेणह्रियते॥अधर्मश्चेद्बलवत्तरःकृतस्तेनयोगजोपिसंस्कारोभिभूयतएव
तत्क्षयेतुयोगजःसंस्कारःस्वयमेवकार्यमारभते॥नदीर्घकालावस्थस्यापिवि

पूर्वाभ्यासेनतेनैवह्रियतेह्यवशोऽपिसः॥जिज्ञासुरपियोगस्यशब्दब्रह्मातिवर्त
ते॥४४॥

नाशस्तस्यास्तीति॥अतोजिज्ञासुरपियोगस्यस्वरूपंज्ञातुमिच्छुर्योगमार्गेप्र
वृत्तःसंन्यासीयोगभ्रष्टःसामर्थ्यात्सोपिशब्दब्रह्मवेदोक्तकर्मानुष्ठानफलम
तिवर्तते॥कर्मानुष्ठानलक्षणमतिक्रामतीति॥किमुतबुद्ध्वायोयंतन्निष्ठोभ्यासं
कुर्यादितश्चयोगित्वंश्रेयइति॥४४॥ ॥ ॥ ॥शिव

त्रा

गी·भा·

१·६

217

प्रयत्नादिति॥ प्रयत्नात्प्रयतमानात्॥ अधिकं तं यतमान इत्यर्थः॥ तत्र तु योगी विद्वान् संशु
द्धकिल्बिषः संशुद्धपापः अनेकेषु जन्मसु किंचित्किंचित्संस्कारजातमुपचित्य तेनो
पचितेनानेकजन्मकृतेन संसिद्धोऽनेकजन्मसंसिद्धः॥ ततो लब्धसम्यग्दर्शनः स
न्॥ परां प्रकृष्टां गतिं याति॥ ४५॥ यस्मादेवं तस्मात्॥ तपस्वीति॥ तपस्विभ्योऽधिको योगी

प्रयत्नाद्यतमानस्तु योगी संशुद्धकिल्बिषः॥ अनेकजन्मसंसिद्धस्ततो याति परां ग
तिं॥ ४५॥ तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः॥ कर्मिभ्यश्चाधिको योगी त
स्माद्योगी भवार्जुन॥ ४६॥

अतोपवासादिना शरीरसंशोषकारिणः तपस्विनः॥ ते
भ्योऽपि ज्ञानिनः ज्ञानमत्र शास्त्रपाण्डित्यं॥ तद्वद्भ्योऽपि योगी अधिक इति श्रेष्ठो मतो ज्ञा
नः॥ कर्मिभ्यश्चेति॥ अग्निहोत्रादिकर्मवद्भ्योऽपि योगी अधिको विशिष्टो यस्मात्तस्मा
त् योगी भव अर्जुन ॥ ४६ ॥ ॥ ॥ १·६

218

योगिइति ॥ योगिनां सर्वेषामपि रुद्रादित्यादिध्यानेकपराणां मद्गतेन मयि वासुदेवे स
माहितेनांतरात्मना अंतःकरणेन ॥ श्रद्धावान् श्रद्दधानः सन् भजते सेवते यो मां स मे ।

रा १

योगिनामपि सर्वेषां मद्गतेनांतरात्मना ॥ श्रद्धावान् भजते
यो मां स मे युक्ततमो मतः ॥ ४७ ॥ इति श्री षष्ठोऽध्यायः ॥ ६ ॥

मम युक्ततमः ॥ अतिशयेन युक्तः मतोऽभिप्रेत इति ॥ ४७ ॥ इति श्री परमहंसपरिव्रा
जकाचार्य श्री शंकर भगवत्कृतौ भगवद्गीताविवरणे षष्ठोऽध्यायः ॥ ६ ॥ ॥

गी·भा·
९·७
219

योगिनामपि सर्वेषां मद्गतेनांतरात्मना ॥ श्रद्धावान् भजते यो मां स मे युक्ततमो मतः ॥ इति
प्रश्नबीजमुत्पन्नस्य स्वयमेवेदृशं मदीयं तत्त्वं ॥ एवं मद्गतेनांतरात्मा स्यादित्येतद्धि वक्तव्यः ॥
मय इति ॥ मयि वक्ष्यमाणविशेषणे परमेश्वरे आसक्तं मनो यस्य स मय्यासक्तमनाः ॥
पार्थ योगं युंजन् मनःसमाधानं कुर्वन् ॥ मदाश्रयः ॥ अहमेव परमेश्वरः ॥ आश्रयो यस्य
स मदाश्रयः ॥ यो हि कश्चित्पुरुषार्थेन केनचिदर्थी भवति स तत्साधनं कर्माग्निहोत्रादि तपो

श्रीभगवानुवाच ॥ मय्यासक्तमनाः पार्थ योगं युंजन्म
दाश्रयः ॥ असंशयं समग्रं मां यथा ज्ञास्यसि तच्छृणु ॥ १ ॥

दानं वा यत्किंचिदाश्रयं प्रतिपद्यते ॥ अयं तु योगी मामेवाश्रयं प्रतिपद्यते ॥ हित्वान्य
त्साधनांतरं मय्येवासक्तमना भवति स त्वमेवंभूतः ॥ असंशयं समग्रं समस्तविभूति
बलशक्त्यैश्वर्यादिगुणसंपन्नं मां यथा येन प्रकारेण ज्ञास्यसि ॥ असंशयं ॥ संशयमंत १०
रेणैवमेव भगवानिति तच्छृणु ॥ उच्यमानं मया तत्त्वं मद्विषयं ॥ १ ॥ ॥ ॥

220 ज्ञानंइति॥ज्ञानंतेतुभ्यमहंसविज्ञानंविज्ञानसहितंस्वानुभवयुक्तं॥इदंवक्ष्यामिक
थयिष्यामि॥अशेषतःकार्त्स्न्येनतज्ज्ञानंविवक्षितंस्तौति॥श्रोतुरभिमुखीकरणाय
यज्ज्ञात्वायज्ज्ञानंज्ञात्वानेहभूयः॥पुनर्ज्ञातव्यंपुरुषार्थसाधनंअवशिष्यतेनावशे
षोभवति॥मत्तत्त्वज्ञोयःसर्वज्ञोभवतीत्यर्थः॥अतोविशिष्टफलत्वाडुर्लभंतज्ज्ञा

ज्ञानंतेहंसविज्ञानमिदंवक्ष्याम्यशेषतः॥यज्ज्ञात्वानेहभूयोन्यज्ज्ञातव्यमवशि
ष्यते॥२॥मनुष्याणांसहस्रेषुकश्चिद्यततिसिद्धये॥यततामपिसिद्धानांकश्चि
न्मांवेत्तितत्त्वतः॥३॥

णां

नं॥२॥कथमित्युच्यते॥मनुष्याइति॥मनुष्याणांमध्येसह
स्रेष्वनेकेषुकश्चिद्यतति॥यत्नंकरोतिसिद्धयेसिद्ध्यर्थं॥तेषांयततामपिसिद्धा
नांसिद्धाएवहितेयेमोक्षाययतंतेतेषांकश्चिदेवमांवेत्ति॥तत्त्वतोयथावत्
३॥ ॥ ॥ ॥शिव

रि१

श्रोतारं प्ररोचनेनाभिमुखीकृत्याह ॥ भूमिरिति ॥ भूमिरिति पृथिवीतन्मात्रमुच्यते न स्थूला
भिन्ना प्रकृतिरष्टधेति वचनात्तथाप्यबादयोऽपि तन्मात्राण्येव ॥ आपोऽनलो वायुः खं मनः म
न इति मनसः कारणमहंकारो गृह्यते ॥ बुद्धिरित्यहंकारकारणं महत्तत्वं ॥ अहंकार इत्य
विद्यासंयुक्तमव्यक्तं ॥ यथा विषसंयुक्तमन्नं विषमुच्यते एवमहंकारवासनावदव्यक्तं

तु२

भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ॥ अ
हंकार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥४॥ ॥

मूलकारणमहंकार इत्युच्यते प्रवर्त्तकत्वादहंकारस्य ॥ अहंकार एव हि सर्वस्य प्रवृ
त्तिबीजं लोके इतीयं यथोक्ता प्रकृतिः ॥ मे मम ऐश्वरी मायाशक्तिरष्टधा भिन्ना भेद
मागता ॥४॥ ॥ ॥ ॥

९१

222 अपरेति ॥ अपरा न परा निकृष्टा अशुद्धा अनर्थकारी ॥ बंधनात्मिकेयं इतस्त्वस्या यथो
क्तायास्त्व अन्यां विशुद्धां प्रकृतिं आत्मभूतां विद्धि ॥ मे परां प्रकृष्टां जीवभूतां चेतनस्वरू
पां प्राणधारणादिनिमित्तभूतां महाबाहो यया प्रकृत्या इदं धार्यते जगत् ॥ अंतःप्रवि
ष्टया ॥५॥ एतद्योनीनि ॥ एतद्योनीनि परापरे देवे क्षेत्रक्षेत्रज्ञलक्षणे प्रकृती योनिर्येषां भूतानां

अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे परां ॥ जीवभूतां महाबाहो ययेदं धार्यते जगत् ॥५॥
एतद्योनीनि भूतानि सर्वाणीत्युपधारय ॥ अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा
॥६॥

तान्येतद्योनीनि भूतानि सर्वाणि एवमुपधारय जानीहि ॥ यस्मान्मम प्रकृती
योनिः कारणं सर्वभूतानां ॥ अतोहं कृत्स्नस्य समस्तस्य जगतः प्रभव उत्पत्तिः प्रलयो वि
नाशः ॥ तया प्रकृतिद्वयद्वारेणाहं सर्वज्ञ ईश्वरो जगतः कारणमित्यर्थः ॥६॥
शिव ॥ शिव

यतस्तस्मात॥ मत्तः इति॥ मत्तः परमेश्वरात्परतरं॥ अन्यत्कारणांतरं किंचिन्नास्ति न विद्यते
अतोऽहमेव जगतः कारणमित्यर्थः॥ हे धनंजय यस्मादेवं तस्मान्मयि सर्वाणि भूता।
नि सर्वमिदं जगत्प्रोतमनुस्यूतं अनुगतं ग्रथितमित्यर्थः॥ दीर्घतंतुषु पटवत॥ सूत्रे च म।
णिगणा इव केन केन धर्मेण विशिष्टे त्वयि सर्वं प्रोतमित्युच्यते॥ रसो इति॥ अहमप्सु रसः

मत्तः परतरं नान्यत्किंचिदस्ति धनंजय॥ मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव॥७॥
रसोऽहमप्सु कौंतेय प्रभास्मि शशिसूर्ययोः॥ प्रणवः सर्ववेदेषु शब्दः खे पौरुषं नृषु॥८॥

यः सारः स रसस्तस्मिन्रसभूते मयि आपः प्रोता इत्यर्थः॥ एवं सर्वत्र यथाहमप्सु रसः
एवं प्रभास्मि शशिसूर्ययोः प्रणव ओंकारः सर्ववेदेषु तस्मिन्प्रणवभूते मयि सर्वे वे
दाः प्रोताः॥ तथा खे आकाशे शब्दः सारभूतः तस्मिन्मयि खं प्रोतं॥ तथा पौरुषं नृषु पुरुषेषु। ९५
स्वभावः यतः पुंबुद्धिर्नृषु॥ तस्मिन्मयि पुरुषाः प्रोताः ॥८॥ ॥ ॥॥॥

224

पुण्य इति॥ पुण्यः सुरभिर्गंधः पृथिव्यां चाहं॥ तस्मिन्मयि गंधभूते पृथिवी प्रोता॥ पुण्यत्वं
गंधस्य स्वभावत एव पृथिव्यां दर्शितं॥ अबादिषु रसादेः पुण्यत्वोपलक्षणार्थं॥ अपुण्यत्वं तु
गंधादीनां॥ अविद्याधर्माद्यपेक्षं संसारिणां भूतविशेषसंसर्गनिमित्तं भवति॥ तेजो दी
प्तिश्चास्मि विभावसौ वह्नौ॥ तथा जीवनं सर्वभूतेषु॥ येन जीवंति सर्वाणि भूतानि तज्जी

पुण्यो गंधः पृथिव्यां च तेजश्चास्मि विभावसौ॥ जीवनं सर्वभूतेषु तपश्चास्मि तपस्विषु॥९॥
बीजं मां सर्वभूतानां विद्धि पार्थ सनातनं॥ बुद्धिर्बुद्धिमतामस्मि तेजस्तेजस्विनामहं॥१०॥

वनं॥ तपश्चास्मि तपस्विषु॥ तस्मिंस्तपसि मयि तपस्विनः प्रोताः॥९॥ बीजं प्ररोहका
रणं मां विद्धि सर्वभूतानां हे पार्थ सनातनं चिरंतनं॥ किंच बुद्धिर्विवेकशक्तिरंतःकर
णस्य बुद्धिमतां विवेकशक्तिमतां॥ अस्मि॥ तेजः प्रागल्भ्यं तद्वतां तेजस्विनां अहं॥
१०॥ ॥ ॥ ॥ ॥श्रीव

गी॰ भा॰ ११०

225

बलं इति ॥ बलं सामर्थ्यं बलवतामहं न च बलं कामरागविवर्जितं ॥ कामश्च रागश्च कामरागौ ।
कामः तृष्णा असन्निकृष्टेषु विषयेषु रागो रंजना प्राप्तेषु विषयेषु ताभ्यां कामरागाभ्यां ।
विवर्जितं ॥ देहादिधारणमात्रार्थं ॥ बलमहमस्मि ॥ न तु यत्संसारिणां तृष्णारागकारणं किंच
धर्माविरुद्धः धर्मेण शास्त्रार्थेनाविरुद्धो भूतेषु प्राणिषु कामोऽहं ॥ यथा देहधारणमात्राद्य ।
र्थोऽशनपानादिविषयः कामोऽस्मि भरतर्षभ ॥११॥ किंच ॥ ये ॥ इति ॥ ये सात्विकाः सत्वेन नि

बलं बलवतां चाहं कामरागविवर्जितं ॥ धर्माविरुद्धो भूतेषु कामोऽस्मि भरतर्षभ ॥११॥
ये चैव सात्विका भावा राजसास्तामसाश्च ये ॥ मत्त एवेति तान्विद्धि न त्वहं तेषु ते मयि ॥१२॥

र्वृत्ता ॥ भावाः पदार्थाः राजसा रजोनिर्वृत्ताः ॥ तामसाः ॥ तमोनिर्वृत्ताश्च ये केचित्प्राणिनां स्व
कर्मवशाज्जायन्ते भावाः तान्मत्त एवेति जायमानानित्येवं विद्धि सर्वान् ॥ समस्तानेव ११०
यद्यपि ते मत्तो जायन्ते तथापि न त्वहं तेषु तदधीनः ॥ तद्वशो यथा संसारिणः ते पुनर्मयि ॥
मद्वशा मदधीनाः ॥१२॥ ॥

एवंभूतमपिपरमेश्वरंनित्यशुद्धबुद्धमुक्तस्वभावं॥सर्वभूतात्मानंनिर्गुणंसंसारदोष
226 वीजप्रदाहायमानोनाभिजानातिजगदित्यनुक्रोशंदर्शयतिभगवान्॥तच्चकिंनिमित्तं
जगतोज्ञाननिमित्तमुच्यते॥त्रिभिरिति॥गुणमयैर्गुणविकारैःत्रिभीरागद्वेषमोहादिप्रकारैः

त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदंजगत्॥ मोहि
तंनाभिजानातिमामेभ्यः परमव्ययं॥१३॥ ॥

भावैः पदार्थैरेभिर्यथोक्तैः सर्वमिदंप्राणिजातंजगन्मोहितं॥अविवेकतामापादि
तंसन्नाभिजानातिमामेभ्यः परमव्ययं॥यथोक्तेभ्योगुणेभ्यः परंव्यतिरिक्तंविल
क्षणंचास्त्ययंव्ययरहितंजन्मादिषड्भावविकाररहितमित्यर्थः॥१३॥॥॥

कथं पुनर्दैवीमेतां त्रिगुणात्मिकां वैष्णवीं मायामतिक्रामंतीत्युच्यते॥ दैवीइति॥ दैवी देव
स्य ममेश्वरस्य विष्णोः स्वभूता हि यस्मादेषा यथोक्ता गुणमयी मम माया दुरत्यया॥ दुः
खेनात्ययोतिक्रमणं यस्याः सा दुरत्यया॥ अतः सर्वान्धर्मान्परित्यज्य मामेव माया
विनं स्वात्मभूतं सर्वात्मना ये प्रपद्यंते ते मायामेतां सर्वभूतमोहिनीं तरंति अतिक्रा।

दैवी ह्येषा गुणमयी मम माया दुरत्यया॥ मामेव ये प्रपद्यंते मायामेतां तरंति ते॥१४॥
न मां दुःकृतिनो मूढाः प्रपद्यंते नराधमाः॥ माययापहृतज्ञाना आसुरं भावमाश्रि
ताः॥१५॥

मंति संसारबंधनान्मुच्यंत इत्यर्थः॥१४॥ यदि त्वां प्रपन्ना मायामेतां तरंति॥ क
स्मात्त्वामेव सर्वे न प्रपद्यंत इत्युच्यते॥ न मां इति॥ मां परमेश्वरं दुःकृतिनः पापकारि
णो मूढा न प्रपद्यंते॥ नराधमाः नराणामधमाः निकृष्टा ये च माययापहृतज्ञानाः १११
संमुषितज्ञाना आसुरं भावं हिंसानृतादिलक्षणमाश्रिताः॥१५॥ ॥ ॥ ॥ ॥

228

येपुनर्नरोत्तमाःपुण्यकर्माणः॥चतुरिति॥चतुर्विधाःचतुःप्रकारामांभजंतेसेवंतेजनाः
सुकृतिनःपुण्यकर्माणः॥अर्जुनआर्तआर्तिपरिगृहीतःतस्करव्याघ्ररोगादिनाभि
भूतआपन्नः॥जिज्ञासुर्भगवत्तत्वंज्ञातुमिच्छुः॥अर्थार्थीधनकामः॥ज्ञानीविष्णोःतत्व
विच्चभरतर्षभ॥१६॥तेषामिति॥तेषांचतुर्णांमध्येज्ञानीतत्ववित्॥तत्ववित्वान्नित्य

चतुर्विधाभजंतेमांजनाःसुकृतिनोर्जुन॥आर्तोजिज्ञासुरर्थार्थीज्ञानीचभरतर्षभ
१६॥तेषांज्ञानीनित्ययुक्तएकभक्तिर्विशिष्यते॥प्रियोहिज्ञानिनोत्यर्थमहंसचमम
प्रियः॥१७॥

युक्तोभवत्येकभक्तिश्चान्यस्यभजनीयस्याभावात्॥सएकभक्तिर्विशिष्य
तेविशेषमाधिक्यमापद्यते॥अतिरिच्यतइत्यर्थः॥प्रियोहियस्मादहमात्माज्ञानिनः
अतस्तस्याहमत्यर्थंप्रियः॥प्रसिद्धंहिलोकेआत्माप्रियोभवतीति॥तस्माज्ज्ञानिनआ
त्मत्वाद्वासुदेवःप्रियोभवतीत्यर्थः॥सचज्ञानीममआत्मैवेत्यतोऽत्यर्थंप्रियःनत।

 नकिंतर्हि॥उदाराइति॥उदाराउत्कृष्टाः सर्वएवैतेत्रयोपिममप्रियाइत्यर्थः नहिकश्चि
 न्मद्भक्तः ममाप्रियोभवतिज्ञानीत्वत्यर्थं॥प्रियोभवतीतिविशेषः तत्कस्मादित्यतआह
 ज्ञानीत्वात्मैवनान्योमत्तइतिमेममममतंनिश्चयः॥आस्थितआरोढुंप्रवृत्तः॥सज्ञानी

उदाराः सर्वएवैतेज्ञानीत्वात्मैवमेमतं॥आस्थि
तः सहियुक्तात्मामामेवानुत्तमांगतिं॥१८॥॥

हियस्मादहमेवभगवान्वासुदेवोनान्योस्मीत्येवंयुक्तात्मासमाहितचित्तः स
न्मामेवपरंब्रह्मगंतव्यमनुत्तमांगतिंगंतुंप्रवृत्तइत्यर्थः ॥१८॥ ॥ ॥
शिव॥ ॥ ॥शिव

नो१

230 तानीपुनरपिस्तूयते॥ बहूनामिति॥ बहूनांजन्मनांज्ञानार्थसंस्कारार्जनाश्रयाणामंतेस
माप्तौ॥ ज्ञानवान्प्राप्तपरिपाकज्ञानः॥ मांवासुदेवंप्रत्यगात्मानंप्रतिपद्यते॥ कथंवा
सुदेवःसर्वमितिएवंसर्वात्मानंप्रतिपद्यते॥ समहात्मानतत्समोन्योऽस्तिअधि।
कोवाअतःसुदुर्लभःमनुष्याणांसहस्रेष्वितिह्युक्तं॥१९॥ आत्मैवसर्वोवासुदेवइत्येव

बहूनांजन्मनामंतेज्ञानवान्मांप्रपद्यते॥ वासुदेवःसर्वमितिसमहात्मासुदुर्लभः
॥१९॥ कामैस्तैस्तैर्हृतज्ञानाःप्रपद्यंतेन्यदेवताः॥ तंतंनियममास्थायप्रकृत्यानिय॥
ताःस्वया॥२०॥

मप्रतिपत्तौकारणमुच्यते॥ कामैरिति॥ तैस्तैःकामैःपुत्रपशुस्वर्गादि
विषयैर्हृतज्ञाना॥ अपहृतज्ञानाःप्रपद्यंतेन्यदेवताःवासुदेवात्मनोन्यादेवताः
तंतंनियममास्थायदेवताराधनेप्रसिद्धोयोयोनियमः॥ तंतमास्थायाश्रित्यप्रकृत्या
स्वभावेनजन्मांतरार्जितसंस्कारविशेषेणनियतानियमिताः॥ स्वयाआत्मीययाते

योयइति॥योयःकामीयांयांदेवतातनुंश्रद्धयासंयुक्तःभक्तःसन्॥अर्चयितुंपूजयितुमि
च्छति॥तस्यतस्यकामिनःअचलांस्थिरांश्रद्धांतामेवविदधामि॥स्थिरीकरोमि॥ययापूर्वं
प्रवृत्तःस्वभावतःयोयांदेवतातनुंश्रद्धयार्चितुमिच्छति॥२१॥सतयेति॥सतयामद्विहि मा
तयाश्रद्धयायुक्तःसन्॥तस्यादेवतातन्वाआराधनमीहतेचेष्टते॥लभतेचततःस्वा।

योयोयांयांतनुंभक्तःश्रद्धयार्चितुमिच्छति॥तस्यतस्याचलांश्रद्धांतामेवविदधाम्य
हं॥२१॥सतयाश्रद्धयायुक्तस्तस्याराधनमीहते॥लभतेचततःकामान्मयैवविहि
तान्हितान्॥२२॥

राधितायादेवतातन्वाःकामानीप्सितान्मयैवपरमेश्वरेणसर्व
ज्ञेनकर्मफलविभागज्ञतयाविहितान्निर्मितान्॥तान्हियस्मात्तेभगवताविहि
ताःकामास्तस्मात्तानवश्यंलभतइत्यर्थः॥हितानिति पदच्छेदे हितत्वंकामानाम
पचरितंकल्प्यं॥नहिकामाहिताःकस्यचित् ॥२२॥ ॥ ॥ ॥

232

यस्मादंतवत्साधनव्यापारस्त्वाविवेकिनस्तेनेत्यंतः॥ अंतवदिति॥ अंतवद्विनाशित्वफलं तेषां तद्भवति॥ अल्पमेधसां अल्पप्रज्ञानां देवान्॥ देवयजः देवान् यजंतीति देवयजः ते देवान् यांति॥ मद्भक्ता यांति मामपि॥ २३॥ एवं समानेप्यायासे मामेव न प्रपद्यंते॥ अनंतफलाय॥ अहो खलु कष्टं वर्त्तत इत्यनुकोशं दर्शयति॥ भगवान्॥ किं निमित्तं त्वा

अंतवत्तु फलं तेषां तद्भवत्यल्पमेधसां॥ देवान्देवयजो यांति मद्भक्ता यांति मामपि॥ २३॥ अव्यक्तं व्यक्तिमापन्नं मन्यंते मामबुद्धयः॥ परं भावमजानंतो ममाव्ययमनुत्तमं॥ २४॥

भं।

मेव न प्रपद्यंते इत्युच्यते॥ अव्यक्तेति॥ अव्यक्तमप्रकाशं व्यक्तिमापन्नं प्रकाशं गतमिदानीं मन्यंते॥ मां नित्यप्रसिद्धमीश्वरमपि संतमबुद्धयो ऽविवेकिनः परं भावं परमात्मस्वरूपं अजानंतो ऽविवेकतः मामव्ययं व्ययरहितं अनुत्तमं निरतिशयं॥ मदीयं भावमजानंतो मन्यंत इत्यर्थः॥ २४॥ ॥ ॥ ॥शिव

तदज्ञाने किं निमित्तमित्युच्यते॥ नाहमिति॥ सर्वस्य लोकस्य नाहं प्रकाशः केषांचिदे
वमहं भक्तानां प्रकाशोहमित्यभिप्रायः॥ योगमायासमावृतः॥ योगो गुणानां युक्तिः
घटनं सैव माया योगमाया तया योगमायया चित्तसमाधिर्वा योगो भगवतस्तत्कृ
ता माया योगमाया तया समावृतः संछन्न इत्यर्थः॥ अत एव मूढोऽयं लोको नाभि

नाहं प्रकाशः सर्वस्य योगमायासमावृतः॥ मू
ढोऽयं नाभिजानाति लोको मामजमव्ययं॥२५॥

जानाति मामजमव्ययं॥ यया योगमायया समावृतं मां लोको नाभिजानाति।
नाऽसौ योगमाया मदीया सती मम मैवेश्वरस्य मायाविनो ज्ञानं प्रतिबध्नाति॥ यथा
न्यस्यापि मायाविनो माया ज्ञानं तद्वत्॥ यत एवमतः॥२५॥ ॥ ॥ ११४
॥॥॥॥ ॥
राम

234

वेदाहमिति॥ अहं तु समतीतानि समतिक्रान्तानि भूतानि तथा वर्त्तमानानि चार्जुन भविष्या
णि च भूतानि वेद जाने॥ मां तु न कश्चिद्वेद मद्भक्तं मच्छरणमेकं मुक्त्वा॥ मत्तत्ववेदनाभावा
देव मां न भजते॥२६॥ केन पुनस्तत्त्ववेदनप्रतिबंधेन प्रतिबद्धानि संति॥ जायमानानि
सर्वभूतानि त्वां न विदंतीत्यपेक्षायामिदमाह॥ इच्छेति॥ इच्छा च द्वेषश्च इच्छाद्वेषौ

वेदाहं समतीतानि वर्त्तमानानि चार्जुन॥ भविष्याणि च भूतानि मां तु वेद न कश्चन
॥२६॥ इच्छाद्वेषसमुत्थेन द्वंद्वमोहेन भारत॥ सर्वभूतानि संमोहं सर्गे यांति परंतप॥
॥२७॥

ताभ्यां समुत्तिष्ठतीति इच्छाद्वेषसमुत्थेन केनेति विशेषणापेक्षायामिदमाह
द्वंद्वमोहेनेति॥ द्वंद्वनिमित्तो मोहो द्वंद्वमोहस्तेन तावेवेच्छाद्वेषौ शीतोष्णवत्परस्प
रविरुद्धौ सुखदुःखतद्धेतुभूतौ सविषयौ यथाकालं सर्वभूतैः संबध्यमानौ द्वं
द्वशब्देनाभिधीयेते॥ तत्र यदा इच्छाद्वेषौ सुखदुःखतद्धेतुसंप्राप्त्या लब्धात्मकौ भवतः

तदात्मेसर्वभूतानांप्रज्ञायाः स्ववशापादनद्वारेणापरमार्थात्मविषयज्ञानोत्पत्तिप्र
तिबंधकारणंमोहंजनयतः नहीच्छाद्वेषदोषवशीकृतचित्तस्ययथाभूतार्थविषा
यंज्ञानमुत्पद्यतेबहिरपि॥ किंवक्तव्यंताभ्यामाविष्टबुद्धेः संमूढस्यप्रत्यगात्मनिब
हुप्रतिबंधेज्ञानंनोत्पद्यतेइति॥ अतस्तेनइच्छाद्वेषसमुत्थेनद्वंद्वमोहेनभारत॥
भरतान्वयजसर्वभूतानिसंमोहितानिसंति॥ संमोहं संमूढतां सर्गेजन्मनिउत्प
त्तिकालइत्येतत्॥ यांतिगच्छंतिहेपरंतप॥ मोहवशान्येवसर्वभूतानिजायमा
नानिजायंतइत्यभिप्रायः॥ यतएवमतस्तेनद्वंद्वमोहेन
प्रतिबद्धज्ञानानिसर्वभूतानिसंमोहितानि॥ मा
मात्मभूतेनजानंति॥ अतएवात्मभावेन
मांनभजंति॥२७॥ ११५
॥शिव॥

236 केपुनरनेनद्वंद्वमोहेननिर्मुक्ताःसंतःत्वांविदित्वायथाशास्त्रमात्मभावेनभजंतइ।
त्यपेक्षितमर्थंदर्शयितुमाह॥येषांइति॥येषांपुनरंतगतंपापंसमाप्तप्रायंजनानांपु
ण्यकर्मणांपुण्यकर्मयेषांसत्वशुद्धिकारणंविद्यतेतेपुण्यकर्माणः॥तेषांक्षीयमा
णानांतेद्वंद्वमोहनिर्मुक्तायथोक्तेनद्वंद्वेनमोहेननिर्मुक्ताभजंतेमांपरमात्मानं

येषांत्वंतगतंपापंजनानांपुण्यकर्मणां॥तेद्वंद्वमोहनिर्मुक्ताभजंतेमांदृढव्रताः
॥२८॥जरामरणमोक्षायमामाश्रित्ययतंतिये॥तेब्रह्मतद्विदुःकृत्स्नमध्यात्मंकर्म।
चाखिलं॥२९॥

दृढव्रताएवमेवपरमार्थतत्वंनान्यथेत्येवंनिश्चितविज्ञानाःदृढ
व्रताउच्यते॥२८॥तेकिमर्थंभजंतइत्युच्यते॥जराइति॥जरामरणयोर्मोक्षार्थंमांपर
मेश्वरमाश्रित्यमत्समाहितचित्ताःसंतोयतंतेप्रयतंतेयेतेतद्ब्रह्मपरंतद्विदुःकृत्स्नं
समस्तमध्यात्मंप्रत्यगात्मविषयंवस्तुतद्विदुःकर्मचाखिलंसमस्तंविदुः॥२९॥

666

गी॰भा॰ साधिदैवमिति॥ अधिभूतं चाधिदैवं च अधिभूताधिदैवं॥ सहाधिभूताधिदैवेन॥ सा
११६ धिभूताधिदैवं च मां ये विदुः साधियज्ञं च मां ये विदुः सहाधियज्ञेन साधियज्ञं।
237 ये विदुः॥ प्रयाणकालेपि च मरणकालेपि च मां ते विदुर्युक्तचेतसः॥ समाहि

साधिभूताधिदैवं मां साधियज्ञं च ये विदुः॥ प्रयाणका
लेपि च मां ते विदुर्युक्तचेतसः॥ ३०॥ इति श्री सप्तमोध्यायः॥ ७॥

न चिन्ता इति॥ ३०॥ इति श्री परमहंसपरिव्राजकाचार्य श्रीशंकरभगवत्कृतौ
भगवद्गीताभाष्ये विवरणे सप्तमोध्यायः॥ ७॥ ११६
ॐ नमः शिवाय॥

238

तेब्रह्मतद्विदुःकृत्स्नमध्यात्मंकर्मचाखिलमित्यादिभगवतास्वर्जुनस्यप्रश्नबीजान्युपदिष्टानि
अतस्तत्प्रश्नार्थमर्जुनउवाच॥ एषांप्रश्नानांयथाक्रमंनिर्णयायश्रीभगवानुवाच॥ नक्षर।
तीत्यक्षरंपरमात्मा॥ एतस्यवाक्षरस्यप्रशासनेगार्गीतिश्रुतेः॥ ॐकारस्यचओमित्येकाक्ष
रंब्रह्मेतिपरेणविशेषणादग्रहणंपरममितिचनिरतिशयेऽक्षरेउपपद्यतेतरांविशेषणं

अर्जुनउवाच॥ किंतद्ब्रह्मकिमध्यात्मंकिंकर्मपुरुषोत्तम॥ अधिभूतंचकिंप्रोक्तमधिदै
वंकिमुच्यते॥१॥ अधियज्ञःकथंकोत्रदेहेस्मिन्मधुसूदन॥ प्रयाणकालेचकथंज्ञेयो
सिनियतात्मभिः॥२॥ श्रीभगवानुवाच॥ अक्षरंपरमंब्रह्मस्वभावोध्यात्ममुच्यते॥ भूत
भावोद्भवकरोविसर्गःकर्मसंज्ञितः॥३॥

ग्रन्थ १

तस्यैवपरमस्यब्रह्मणःप्रतिदेहंप्रत्यगा
त्मभावःस्वोभावःस्वभावःअध्यात्ममुच्यतेआत्मानंदेहमधिकृत्यप्रत्यगात्मतयाप्र।
वृत्तंपरमात्मब्रह्मावसानंवस्तुस्वभावअध्यात्ममुच्यते॥ अध्यात्मशब्देनाभिधीय

ते॥ भूतानां भावः भूतभावः तस्योद्भवः भूतभावोद्भवः तं करोतीति भूतभावोद्भवकरः भू
तवस्तूत्पत्तिकर इत्यर्थः॥ विसर्गो विसर्जनं देवतोद्देशेन चरुपुरोडाशादेर्द्रव्यस्य स्वत्व
परित्यागः स एव विसर्गलक्षणो यज्ञः कर्मसंज्ञितः कर्मशब्दितः इत्येतस्माद्धि बीजभूताद्वृष्ट्या
दिक्रमेण स्थावरजंगमानि भूतानि उद्भवंति॥३॥ अधिभूतमिति अधिभूतं प्राणिजातमधिकृ
त्य भवतीति अधिभूतं कः क्षरः क्षरतीति क्षरः विनाशी भावः यत्किंचिज्जनिमद्वस्त्वित्यर्थः॥

अधिभूतं क्षरो भावः पुरुषश्चाधिदैवतं॥ अधियज्ञोऽहमेवात्र देहे देहभृतां वर॥४॥

पुरुषः पूर्णमनेनेति पुरुषः पुरि पुरिशयनाद्वा पुरुषः॥ आदित्यान्तर्गतो हिरण्यगर्भः स
र्वप्राणिकरणानामनुग्राहकः सोऽधिदैवतं॥ अधियज्ञः सर्वयज्ञाभिमानिनी देवता॥
विष्ण्वाख्या यज्ञो वै विष्णुरिति श्रुतेः॥ स हि विष्णुरहमेव॥ अत्रास्मिन्॥ देहे यो यज्ञः तस्या
हमधियज्ञः यज्ञो हि देहेन निर्वर्त्यते तेन देहसमवायीति
देहाधिकरणो भवति हे देहभृतां वर॥४॥

अंतइति ॥ अंतकालेमरणकाले ॥ मामेवपरमेश्वरंविष्णुंस्मरन्मुक्त्वापरित्यज्यकलेवरंशरी
240 रंयःप्रयातिसमद्भावं ॥ वैष्णवंतत्त्वंयातिनास्तिनविद्यतेअत्रास्मिन्विषयेयातिनैवेतिसं
शयः ॥ नमहिक्षयएवायंनियमः ॥ ५ ॥ किंतर्हि ॥ यंयंइति ॥ यंयंवापियंयंभावंदेवतावि
शेषंस्मरन् ॥ चिंतयन् ॥ त्यजतिपरित्यजति ॥ अंतेअंतकालेप्राणवियोगकालेकले

अंतकालेचमामेवस्मरन्मुक्त्वाकलेवरं ॥ यःप्रयातिसमद्भावंयातिनास्त्यत्रसंशयः ॥ ५ ॥
यंयंवापिस्मरन्भावंत्यजत्यंतेकलेवरं ॥ तंतमेवैतिकौंतेयसदातद्भावभावितः ॥ ६ ॥

वरंतंतमेवस्मृतंभावं ॥ एतिनान्यं ॥ हेकौंतेयसदासर्वदातद्भावभावितःतस्मिन्भाव।
स्तद्भावःसभावितःयेनसतद्भावभावितःसन् ॥ यस्मादेवमंत्याभावनादेहांतरप्रा।
प्तौकारणं ॥ ६ ॥ ॥ ॥ शिव ॥ ॥ शिव
शिव ॥ ॥ ॥ राम ॥ ॥ राम

सर्वेइति ॥ सर्वेषुकालेषुतस्मान्मामनुस्मर ॥ तथाशास्त्रंयुध्यचयुद्धंचस्वधर्मंकुरु मयिदेवे
ऽर्पितेमनोबुद्धीयस्यतवसत्वंमय्यर्पितमनोबुद्धिःसन्मामेवयथास्मृतमेष्यसिआग।
मिष्यसि ॥ असंशयःनसंशयोत्रविद्यते ॥७॥ किंच ॥ अभ्यासेति ॥ मयिचित्तसमर्पणविष
यभूतेएकस्मिन्तुल्यप्रत्ययावृत्तिलक्षणःविलक्षणप्रत्ययानंतरितअभ्यासः ॥ स।
चाभ्यासयोगःतेनयुक्तंतत्रैवव्यापृतंयोगिनश्चेतस्तेनचेतसानान्यगामिना अन्यत्रवि

तस्मात्सर्वेषुकालेषुमामनुस्मरयुध्यच ॥ मय्यर्पितमनोबुद्धिर्मामेवैष्यस्यसंशयः
॥७॥ अभ्यासयोगयुक्तेनचेतसानान्यगामिना ॥ परमंपुरुषंदिव्यंयातिपार्थानुचि
न्तयन् ॥८॥

षयांतरेनगंतुंशीलमस्येतिनान्यगामितेननान्यगामिनापरमंनि
रतिशयंपुरुषंदिव्यंदिविसूर्यमंडलेभवंयातिगच्छति ॥८॥ ११८
॥शिव॥

242 हेयार्थाननुचिंतयन् शास्त्राचार्योपदेशमनुध्यायन्नित्येतत् ॥ किंविशिष्टं पुरुषं यातीत्यु।
च्यते ॥ कविमिति ॥ कविं क्रांतदर्शिनं सर्वज्ञं पुराणं चिरंतनं ॥ अनुशासितारं सर्वस्य जग
तः प्रशासितारं ॥ अणोः सूक्ष्मादप्यणीयांसं सूक्ष्मतमं ॥ अनुस्मरेदनुचिंतयेत् यः क
श्चित्सर्वस्य कर्मफलजातस्य धातारं विधातारं विचित्रतया प्राणिभ्यो विभक्तारं ॥ अ

कविं पुराणमनुशासितारमणोरणीयांसमनुस्मरेद्यः ॥ सर्व
स्य धातारमचिंत्यरूपमादित्यवर्णं तमसः परस्तात् ॥ ९ ॥ ॥

चिंत्यरूपं नास्य रूपं विद्यमानमपि केनचिच्चिंतयितुं शक्यत इति अचिंत्यरूपः तमादित्यस्ये
वनित्यचैतन्यप्रकाशो वर्णो यस्य ॥ तमादित्यवर्णं ॥ तमसः परस्तादज्ञानलक्षणान्मोहां
धकारात्परं तमनुचिंतयन् ॥ यातीति पूर्वेण संबंधः ॥ ९ ॥
॥ शिव ॥

किंच ॥ प्रयाण इति ॥ प्रयाणकाले मरणकाले मनसाचलेन चलनवर्जितेन ॥ भक्त्यायुक्तः
भजनं भक्तिः तया युक्तो योगबलेन चैव योगस्य बलं योगबलं समाधिजन्यसंस्कारजनि
तं चित्तस्थैर्यलक्षणं योगबलं तेन च युक्त इत्यर्थः ॥ एवं हृदयपुंडरीके वशीकृत्य चि।

प्रयाणकाले मनसाचलेन भक्त्यायुक्तो योगबलेन चैव ॥ भ्रुवो।
र्मध्ये प्राणमावेश्य सम्यक् स तं परं पुरुषमुपैति दिव्यम् ॥१०॥

त्तं तत ऊर्ध्वगामिन्या नाड्या भूमिजयक्रमेण भ्रुवोर्मध्ये प्राणमावेश्य स्थापयित्वा सम्य
ग्प्रमत्तः सन् ॥ स एवं विद्वान्योगी कविं पुराणमित्यादिलक्षणं तं परं पुरुषमुपैति प्र
तिपद्यते ॥ दिव्यं द्योतनात्मकं ॥१०॥ ॥ ११८

पुनरपिवक्ष्यमाणेनोपायेनप्रतिपित्सितस्यब्रह्मणोवेदविद्वचनादिविशेषणेनविशे
244 षस्याभिधानंकरोतिभगवान्॥यदक्षरमिति॥यदक्षरंनक्षरतीतिअविनाशिवेदविदःवेदा
र्थज्ञाःवदंति॥तद्वाएतदक्षरंगार्गिब्राह्मणाअभिवदंतीतिश्रुतेः॥सर्वविशेषनिर्वर्तक
त्वेनाभिवदंतिअस्थूलमनणित्यादिकिंचविशंति॥प्रविशंतिसम्यग्दर्शनप्राप्तौ॥यत

यदक्षरंवेदविदोवदंतिविशंतियद्यतयोवीतरागाः॥ यदिच्छं
तोब्रह्मचर्यंचरंतितत्तेपदंसंग्रहेणप्रवक्ष्ये ॥११॥ ॥ ॥

तयःयत्नशीलाःसंन्यासिनःवीतरागाः॥विगतोरागोयेभ्यस्तेवीतरागाःयच्चा।
क्षरमिच्छंतोज्ञातुमितिवाक्यशेषःब्रह्मचर्यंगुरौचरंतितत्पदंतदक्षराख्यंपदंनी
यंसंग्रहणंसंग्रहःसंक्षेपःतेनसंग्रहेणप्रवक्ष्येकथयिष्यामि ॥११॥ ॥ ॥

इन्यत्राधर्मा ४

गी·भा· स यो ह वै तद्भगवान्मनुष्येषु प्रयाणांतमोंकारमभिध्यायीत कतमं वाव स तेन लोकं जयतीति
१२० तस्मै स होवाच ॥ एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोंकारः इत्युपक्रम्य यः पुनरेतं त्रिमा
245 त्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत ॥ प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्य
मुच्यते ॥ अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेत् ॥ इत्यादिवचनेनान्यत्र धर्मादिति चो
पक्रम्य सर्वे वेदा यत्पदमामनंति तपांसि सर्वाणि च यद्वदंति ॥ यदिच्छंतो ब्रह्मचर्यं चरं

सर्वद्वाराणि संयम्य मनो हृदि निरुध्य च ॥ मूर्ध्न्याधायात्मनः प्राणमास्थितो योगधारणां ॥१२॥

ति तत्ते पदं संग्रहेण ब्रवीम्योमित्येतत् ॥ इत्यादिभिश्च वचनैः परस्य ब्रह्मणः वाच
करूपेण प्रतिमावत् ॥ प्रतीकरूपेण च परस्य ब्रह्मणः प्रतिपत्तिसाधनत्वेन मंदमध्यमबुद्धीनां
विवक्षितस्योंकारस्योपासनं कालांतरमुक्तिफलमुक्तं यत्तदेवेहापि कविं पुराणमनुशा
सितारं यदक्षरं वेदविदो वदंतीति चोपन्यस्तस्य परस्य ब्रह्मणः पूर्वोक्तरूपेण प्रतिपत्त्यु ॥१२०॥
पायभूतस्योंकारस्य कालांतरमुक्तिफलमुपासनं योगधारणासहितं वक्तव्यं प्रस

कालप्रसक्तंयत्किंचिदित्येवमर्थमनंतरोग्रंथआरभ्यते॥सर्वाणिचतानिद्वाराणिचेति
246 सर्वद्वाराणि॥उपलब्धौतानिसर्वाणिसंयम्यसंयमनंकृत्वामनोहृत्पुंडरीके॥निरु
ध्यनिरोधंकृत्वानिःप्रचारमापाद्यतत्रवशीकृतेनमनसाहृदयान्मूर्द्धिंगामिन्याना
ड्याऊर्द्धमारुह्यमूर्द्धिंआधायात्मनःप्राणमास्थितःप्रवृत्तःयोगधारणांधारयन्नंते

ॐमित्येकाक्षरंब्रह्मव्याहरन्मामनुस्मरन्॥यःप्रया
तित्यजन्देहंसयातिपरमांगतिं ॥१३॥ ॥

धारयन्॥१२॥ॐमिति॥ब्रह्मणोभिधानंतंॐकारंव्याहरन्नुच्चारयन्तदर्थभूतं
मामीश्वरंअनुस्मरन्अनुचिंतयन्॥यःप्रयातिम्रियतेसत्यजन्परित्यजन्देहंश
रीरंत्यजन्॥देहमितिप्रयाणविशेषणंदेहत्यागेनप्रमाणमात्मनःनस्वरूपना
शेनेत्यर्थः॥सएवंत्यजन्प्रयातिगच्छति॥परमांप्रकृष्टांगतिं ॥१३॥ ॥ ॥

किंच ॥ अनन्येति ॥ नान्यविषये चेतो यस्य सोऽनन्यचेताः योगी सततं सर्वदा यो मां परमेश्वरं स्मरति
नित्यशः सततमिति नैरंतर्यमुच्यते ॥ नित्यश इति दीर्घकालत्वमुच्यते ॥ न षण्मासं संवत्स
रं वा किं तर्हि यावज्जीवं नैरंतर्येण यो मां स्मरतीत्यर्थः ॥ तस्य योगिनोऽहं सुलभः हे पार्थ ॥ नि
त्ययुक्तस्य सदा समाहितस्य योगिनः यत एवमनोऽनन्यचेताः सन् मयि सदा समाहितो भ
वेदिति ॥ १४ ॥ तवैवं सौलभ्येन किं स्यादित्युच्यते ॥ शृणु तत्मम सौलभ्येन यद्भवति ॥ मां ॥ इति

अनन्यचेताः सततं यो मां स्मरति नित्यशः ॥ तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः ॥ १४ ॥
मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतं ॥ नाप्नुवंति महात्मानः संसिद्धिं परमां गताः ॥ १५ ॥

मामीश्वरमुपेत्य मद्भावमापद्य पुनर्जन्म पुनरुत्पत्तिं न प्राप्नुवंति ॥ किंविशिष्टं पुनर्जन्म ना
प्नुवंतीत्याह ॥ दुःखालयं दुःखानामाध्यात्मिकादीनामालयमाश्रयः आलीयंते ॥ यस्मिन् दुः
खान्याध्यात्मिकादीनि दुःखालयं जन्म ॥ न केवलं दुःखालयमशाश्वतं ॥ अनवस्थितस्वरूपं
च नाप्नुवंतीदृशं पुनर्जन्म महात्मानो यतयः संसिद्धिं मोक्षाख्यां परमां प्रकृष्टां गताः ये पुनर्मां

248

किंपुनस्त्वत्तोन्यत्वाज्ञाः पुनरावर्तंतइत्युच्यते। आब्रह्मइति। आब्रह्मभुवनात्। भवंत्यस्मि
न्। भूतानीतिभुवनंब्रह्मणोभुवनंब्रह्मभवनंब्रह्मलोकइत्यर्थः॥ आब्रह्मभुवनात्स
हब्रह्मभुवनेनलोकाः सर्वेपुनरावर्त्तनस्वभावाः॥ हेअर्जुन॥ मामेकमुपेत्यहेकौंत
यपुनर्जन्मपुनरुत्पत्तिर्नविद्यते॥ ॥ब्रह्मलोकसहिताल्लोकाः कस्मात्पुनरावर्त्तिनः॥
कालपरिच्छिन्नत्वात्॥ कथं॥ सहस्रइति॥ सहस्राणियुगानिपर्यंतः पर्यवसानंयस्याह्नः

आब्रह्मभुवनाल्लोकाः पुनरावर्त्तिनोर्जुन॥ मामुपेत्यतुकौंतेयपुनर्जन्मनविद्यते॥१६
सहस्रयुगपर्यंतमहर्यद्ब्रह्मणोविदुः॥ रात्रिंयुगसहस्रांतांतेहोरात्रविदोजनाः॥१७

तदह्नः सहस्रयुगपर्यंतंब्रह्मणः प्रजापतेर्विराजः विदुः रात्रिमपियुगसहस्रांतां
अह्नः परिमाणमेवकेविदुरित्याह॥ तेहोरात्रविदोजनाः येकालसंख्याविदोजनाइ
त्यर्थः॥ यतएवंकालपरिच्छिन्नास्ततः पुनराव
र्त्तिनोलोकाः॥ १७॥

प्रजापतेरहनि यद्भवति रात्रौ च तदुच्यते ॥ अव्यक्तादव्यक्तं प्रजापतेः स्वापावस्था तस्मादव्य-
क्ताद्व्यक्तयः ॥ व्यज्यंत इति व्यक्तयः स्थावरजंगमलक्षणाः प्रजाः सर्वाः प्रभवंत्यभिव्यज्यंते
अह्नः आगमः अहरागमः तस्मिन्नहरागमे काले ब्रह्मणः प्रबोधकाले ॥ तथा रात्र्यागमे
काले ब्रह्मणः स्वापकाले प्रलीयंते सर्वा व्यक्तयः तत्रैव पूर्वोक्ते अव्यक्तसंज्ञके ॥१८॥ अकृ-
ताभ्यागमकृतविप्रणाशदोषपरिहारार्थं बंधमोक्षशास्त्रप्रवृत्तिसाफल्यप्रदर्शनार्थं

अव्यक्ताद्व्यक्तयः सर्वाः प्रभवंत्यहरागमे ॥ रात्र्यागमे प्रलीयंते तत्रैवाव्यक्तसंज्ञके ॥१८॥
भूतग्रामः स एवायं भूत्वा भूत्वा प्रलीयते ॥ रात्र्यागमेऽवशः पार्थ प्रभवत्यहरागमे ॥१९॥

अविद्यादिक्लेशमूलकर्माशयवशाच्चावशो भूतग्रामः भूत्वा प्रलीयते इत्यतः संसारे
वैराग्यप्रदर्शनार्थं चेदमाह ॥ भूतग्राम इति ॥ भूतग्रामः भूतसमुदायः स्थावरजंगमलक्षणः यः
पूर्वस्मिन् कल्पे आसीत् स एवायं नान्यः ॥ भूत्वा भूत्वाहरागमे प्रलीयते पुनः पुनः रात्र्यागमे
अह्नः क्षये अवशः अस्वतंत्र एव पार्थ प्रभवति जायते स एवाहरागमे ॥१९॥ ॥ ॥

यदुपन्यस्तमक्षरं तस्य प्राप्त्युपायो निर्दिष्टः॥ ओमित्येकाक्षरं ब्रह्मेत्यादिना॥ इदानीमक्षरस्यैव स्व
250 रूपनिर्देशायेदमुच्यते॥ तदनेन योगमार्गेण गंतव्यमिति॥ परस्तस्मात्तु॥ परो व्यतिरिक्तो भि 155
न्नः कुतः तस्मात्पूर्वोक्तात् तु शब्दः अक्षरस्य विवक्षितस्याव्यक्ताद्वैलक्षण्यप्रदर्शनार्थः भा
वः अक्षराख्यं परं ब्रह्म अव्यतिरिक्तं त्वसत्स्वपि सालक्षण्यप्रयोगोस्तीति॥ नहि नित्यत्वमाह अ
व्यक्त इति अन्यो विलक्षणः सचाव्यक्तः नेंद्रियगोचरः परः तस्मादित्युक्तः॥ कस्मात्तुनः परः

परस्तस्मात्तु भावोन्योऽव्यक्तोऽव्यक्तात्सनातनः॥ यः स सर्वेषु भूतेषु नश्यत्सु न विनश्यति॥२०॥
अव्यक्तोक्षर इत्युक्तस्तमाहुः परमां गतिं॥ यं प्राप्य न निवर्तंते तद्धाम परमं मम॥२१॥॥

पूर्वोक्तभूतग्रामबीजभूतादविद्यालक्षणादव्यक्तात्सनातनः चिरंतनः यः स भावः स
र्वेषु ब्रह्मादिषु नश्यत्सु न विनश्यति॥२०॥ योसावव्यक्तः अक्षर इत्युक्तः तमेव चाक्षरसं
ज्ञकं अव्यक्तं भावमाहुः परमां प्रकृष्टां गतिं॥ यं भावं प्राप्य गत्वा न निवर्तंते संसाराय तद्धा
म स्थानं परमं प्रकृष्टं मम विष्णोः परमं पदमित्यर्थः॥२१॥॥ ॥ ॥

तल्लभ्येरुपायउच्यते ॥ पुरुषः इति ॥ पुरिशयनात्पूर्णत्वाद्वापुरुषः सपरः पार्थ ॥ यतोनिर।
तिशयोयस्मात्पुरुषान्नपरंकिंचित्सभक्त्यालभ्यस्तत्त्वानलक्षणयास्त्वनन्ययाऽऽत्म।
विषयया ॥ यस्यपुरुषस्यांतः स्थानिमध्यस्थानिकार्यभूतानिकार्यंहिकारणस्था।

पुरुषः सपरः पार्थभक्त्यालभ्यस्त्वनन्यया ॥ यस्यां
तः स्थानिभूतानियेनसर्वमिदंततं ॥ २२ ॥ ॥

नंवर्त्तिभवतियेनपुरुषेणसर्वमिदंजगत् ॥ ततंव्याप्तं ॥ आकाशेनेवघटादितत्त्वं।
ह्यांतरस्यविवदितस्यात्यन्ताह्दे लक्षणपविशेषणार्थः ॥२२॥ ॥ ॥ ॥
॥ शिव ॥

प्रकृतानांयोगिनांप्रणवावेशितब्रह्मबुद्धीनांकालांतरमुक्तिभाजांब्रह्मप्रतिपत्तयेउ।
252 त्तरोमार्गोवक्तव्यइति॥यत्रकालइत्यादिविवक्षितार्थसमर्पणार्थमुच्यते॥आवृत्तिमार्गो
पन्यासउत्तरमार्गस्तुत्यर्थः॥यत्रइति॥यत्रकालेप्रयाताइतिव्यवहितेनसंबंधः॥यत्रयस्मि
न्कालेत्वनावृत्तिमपुनर्जन्म॥आवृत्तिंतद्विपरीतांचएवयोगिनइतियोगिनःकर्मिणः

यत्रकालेत्वनावृत्तिमावृत्तिंचैवयोगिनः॥प्रया
तायांतितंकालंवक्ष्यामिभरतर्षभ॥२३॥॥

श्चोच्यंतेकर्मिणस्तुगुणतःकर्मयोगेनयोगिनामितिविशेषणात्॥योगिनःयत्रकाले
प्रयातामृतायोगिनोऽनावृत्तिंयांति॥यत्रकालेप्रयाताआवृत्तिंतंकालंवक्ष्यामिभ
रतर्षभ॥२३॥॥

गी॰भा॰ अग्निरिति॥अग्निःकालाभिमानिनीदेवतातथाज्योतिर्देवतैवकालाभिमानिनी॥अथवा
२४ अग्निज्योतिषीयथाश्रुतेएवदेवते॥भूयसातुनिर्देशोयत्रकालेतंकालमितिचाम्रवन
253 वत्॥तथाहर्देवताऽहः शुक्लः शुक्लपक्षदेवताषण्मासाउत्तरायणंतत्रापिदेवतैव
मार्गभूतेतिस्थितोऽन्यत्रायंन्यायः॥तत्रतस्मिन्मार्गेप्रयातामृतागच्छंति॥ब्रह्मब्रह्मवि

अग्निर्ज्योतिरहः शुक्लः षण्मासाउत्तरायणं॥ तत्र
प्रयातागच्छंतिब्रह्मब्रह्मविदोजनाः ॥२४॥ ॥

दः॥ब्रह्मोपासनपराजनाःक्रमेणेतिवाक्यशेषः॥नहिसद्योमुक्तिभाजांसम्यग्दर्श
ननिष्ठानांगतिरागतिर्वाक्वचिदस्तिनतस्यप्राणाउत्क्रामंतीतिश्रुतेः॥ब्रह्मसंलीन
प्राणाएवतेब्रह्ममयाब्रह्मभूताएवेति २४
॥२४॥॥

धूमोइति॥धूमाभिमानिनीरात्र्यभिमानिनीचदेवता॥तथाकृष्णःकृष्णपक्षदेवताष
254 ण्मासादक्षिणायनमितिपूर्ववद्देवतैव॥तत्रचंद्रमसिभवंचांद्रमसंज्योतिश्चफलं
इष्टपूर्त्तादिकारीयोकर्मीप्राप्यभुक्त्वाततस्तत्क्षयान्निवर्त्तते॥२५॥शुक्लेति॥शुक्लाच
कृष्णाचशुक्लकृष्णेज्ञानप्रकाशकत्वाच्छुक्लातदभावात्कृष्णाएतेशुक्लकृष्णेगती

धूमोरात्रिस्तथाकृष्णःषण्मासादक्षिणायनं॥तत्रचांद्रमसंज्योतिर्योगीप्राप्यनिव
र्तते २५ शुक्लकृष्णेगतीह्येतेजगतःशाश्वतेमते॥एकयायात्यनावृत्तिमन्ययावर्ततेपु
नः॥२६॥

जगतइत्यधिकृतानांज्ञानकर्मणोर्नजगतःसर्वस्यैवएतेगतीसंभवतःशा
श्वतेनित्ये॥संसारस्यनित्यत्वात्मतेअभिप्रेते॥तत्रैकयाशुक्लयायात्यनावृत्तिम
न्ययाइतरयाआवर्ततेपुनर्भूयः॥२६॥ ॥ ॥ ॥ ॥शिव
शिव॥

गी·भा·
१२५
255

नैतेइति॥ यथोक्तेयथोक्तेसृतीमार्गौपार्थजानन्संसारायैकान्यामोक्षायचेतियोगीनमुह्यतिक
श्चनकश्चिदपि॥ तस्मात्सर्वेषुकालेषुयोगयुक्तःसमाहितोभव॥ अर्जुनशृणुयोगस्यमा
हात्म्यं॥२७॥ वेदेइति॥ वेदेषुसम्यगधीतेषुयज्ञेषुसाद्गुण्यानुष्ठितेषुतपःसुचसुतप्तेषु।
दानेषुसम्यग्दत्तेषु॥ यदेतेषुपुण्यफलंप्रदिष्टंशास्त्रेण॥ अत्येतिअतीत्यगच्छतितत्सर्वं

नैतेसृतीपार्थजानन्योगीमुह्यतिकश्चन॥ तस्मात्सर्वेषुकालेषुयोगयुक्तोभवार्जु
न॥२७॥ वेदेषुयज्ञेषुतपःसुचैवदानेषुयत्पुण्यफलंप्रदिष्टं॥ अत्येतितत्सर्वमिदंविदि
त्वायोगीपरंस्थानमुपैतिचाद्यं॥२८॥ इति श्रीअष्टमोध्यायः॥८॥॥

फलजातमिदंवि
दित्वासप्तप्रश्ननिर्णयद्वारेणोक्तंसम्यगवधार्यानुष्ठायइदंयोगीपरंप्रकृष्टमैश्वरं
स्थानमुपैतिप्रतिपद्यते॥ आद्यमादौभवंकारणंब्रह्मेत्यर्थः॥२८॥ इतिश्रीपरमहं
सपरिव्राजकाचार्यश्रीशंकरभगवत्कृतौगीताविवरणेअष्टमोध्यायः॥८॥ ॥ १२५

256

ज्ञान ७

ॐ अष्टमे नाडीद्वारेण धारणायोगः सगुण उक्तः तस्य च फलमग्न्यर्चिरादिक्रमेण काला
न्तरे ब्रह्मप्राप्तिलक्षणमेवानावृत्तिरूपं निर्दिष्टं ॥ तत्रानेनैव प्रकारेण मोक्षप्राप्तिफलम
धिगम्यते नान्यथेति तदाशंकाव्यावृत्त्यर्थं ॥ इदं ब्रह्मज्ञानेनैव समाणाउक्तं च पूर्वं षष्ठाध्या
येषु ॥ तद्धि ह्येषां संनिधीकृत्य इदमाह ॥ तत्र ज्ञेयविशेषणार्थः ॥ इदमेव तत्सम्यग्ज्ञानं सा
क्षान्मोक्षप्राप्तिसाधनं वासुदेवः सर्वमिति ॥ आत्मैवेदं सर्वं एकमेवाद्वितीयमित्यादि

श्रीभगवानुवाच ॥ इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे ॥ ज्ञानं विज्ञानसहितं यज्ज्ञात्वा
मोक्ष्यसेऽशुभात् ॥१॥

स्मृतिश्रुतिभ्यः नान्यत् ॥ अथ येऽन्यथातो विदुरन्यराजान
स्ते क्षय्यलोका भवन्तीत्यादि ॥ श्रुतिभ्यश्च ते तुभ्यं गुह्यतमं प्रवक्ष्यामि कथयिष्यामि
अनसूयवे । असूयारहिताय किं तज्ज्ञानं किंविशिष्टं ॥ विज्ञानसहितं ॥ अनुभवयुक्तं य
ज्ज्ञानं ज्ञात्वा प्राप्य मोक्ष्यसे अशुभात् संसारबंधनात् तथ ॥१॥ ॥ ॥ ॥

राजइति॥ विद्यानां राजा राजविद्या दीप्त्यतिशयवत्वात् दीप्यते हीयमतिशयेन ब्रह्मविद्यास
र्वविद्यानां राजा॥ तथा राजगुह्यं गुह्यानां राजा पवित्रं पावनमिदं॥ उत्तमं सर्वेषां पावना
नांशुद्धिकराणामिदं ब्रह्मविज्ञानं उत्कृष्टतमं॥ अनेकजन्मसहस्रसंचितमपि धर्मा
धर्मादि समूलं कर्म क्षणमात्रादेव भस्मीकरोति॥ अतः किं तस्याः पावनत्वं वक्तव्यं॥ किंच॥
प्रत्यक्षावगमं प्रत्यक्षेण सुखादेरिवावगमो यस्य तत्प्रत्यक्षावगमं॥ अनेकगुणवतोपि ध

राजविद्या राजगुह्यं पवित्रमिदमुत्तमं॥ प्रत्यक्षावगमं धर्म्यं सुसुखं कर्तुमव्ययं ॥२॥

र्मविरुद्धत्वं दृष्टं॥ न तथात्मज्ञानं धर्मविरोधि किंतु धर्म्यं धर्मादनपेतं॥ एवमपि स्याद्दुः
संपाद्यमित्यत आह॥ सुसुखं कर्तुं यथा रत्नविवेकविज्ञानं॥ तत्रान्येषां कर्मणां सुख
संपाद्यानामल्पफलत्वं॥ दुष्कराणां च महत्फलत्वं दृष्टमिति॥ इदं तु सुखसंपाद्यत्वा १२९
त्फलक्षयाद्व्येतीति प्राप्ते आह अव्ययं॥ नास्य फलतः कर्म
वद्व्ययोस्तीति अव्ययं ॥२॥ ॥

अतः श्रद्धेयमात्मज्ञानं ॥ ये तु नः ॥ अश्रद्दिति ॥ अश्रद्दधानाः श्रद्धाविहीनाः आत्मज्ञानस्य
258 धर्मस्यास्य स्वरूपे तत्फले च नास्तिकाः पापकारिणः असुराणामुपनिषदं तदेहमा
वात्मदर्शनमेव प्रतिपन्नाः अतत्पराः पुरुषाः परंतप ॥ अप्राप्य मां परमेश्वरं मत्प्राप्तौ ने

अश्रद्दधानाः पुरुषा धर्मस्यास्य परंतप ॥ अप्राप्य मां
निवर्तन्ते मृत्युसंसारवर्त्मनि ॥३॥ ॥ ॥॥॥

वाशंकेति मत्प्राप्तिमार्गसाधनभेदभक्तिमार्गमप्यप्राप्येत्यर्थः ॥ निवर्तन्ते निश्चयेना
नुवर्तन्ते ॥ क्व मृत्युसंसारवर्त्मनि ॥ मृत्युयुक्तः संसारो मृत्युसंसारः तस्य वर्त्म नरक
तिर्यगादिप्राप्तिमार्गस्तस्मिन्नेवावर्तन्त इत्यर्थः ॥३॥ ॥ ॥ ॥

तानन्तत्वाश्रन्नेनमभिमुखीकृत्याह ॥ मयाऽइति ॥ मया मम यः परो भावः तेन ततं व्याप्तं
सर्वमिदं जगत् ॥ अव्यक्तमूर्तिनान व्यक्ता मूर्तिः स्वरूपं यस्य मम सो ऽहमव्यक्तमूर्तिना
न व्यक्ता मूर्तिः स्वरूपं यस्य मम सो ऽहमव्यक्तमूर्तिः तेन मया ऽव्यक्तमूर्तिना करणागो
चरस्वरूपेणेत्यर्थः ॥ तस्मिन्मय्यव्यक्तमूर्तौ स्थितानि मत्स्थानि सर्वभूतानि ब्रह्मादि
स्थावरान्तानि ॥ न हि निरात्मकं किंचिद्भूतं व्यवहारायकल्पते ॥ अतो मत्स्थानि मयात्म

मया ततमिदं सर्वं जगदव्यक्तमूर्तिना ॥ मत्स्थानि
सर्वभूतानि न चाहं तेष्ववस्थितः ॥ ४ ॥ ॥

नात्मवत्वेन स्थितानि अतो मत्स्थानीत्युच्यते ॥ तेषां भूतानामहमात्मेत्यतः तेषु स्थि
त इति मूढबुद्धीनामेवावभासते ॥ अतो ब्रवीमि न चाहं तेषु भूतेष्ववस्थितो मूर्तव
त् ॥ संश्लेषाभावेनाकाशस्याप्यन्तरतमो ह्यहं न ह्यसंसर्गि वस्तु क्वचिदाधेयभावेना १२७
वस्थितं भवति ॥ अत एवासंसर्गित्वान्मम ॥ ४ ॥ ॥ ॥

नचइति॥पश्यमेयोगमैश्वरंयोगंयुक्तिंघटनंमेममऐश्वरंईश्वरस्येदंयोगमात्मनो।
260 याथात्म्यमित्यर्थः॥तथाचश्रुतिः असंसर्गित्वादसंसर्गितांदर्शयति॥असंगोनहिस
ज्जतेइति॥इदंचैवाश्चर्यमन्यत्पश्य॥भूतभृदसंगोपिसन्भूतानिबिभर्तिनचभूत
स्थोयथोक्तेनन्यायेनदर्शितत्वात्॥भूतस्थत्वानुपपत्ते॥कथंपुनरुच्यते॥असौममा

नचमत्स्थानिभूतानिपश्यमेयोगमैश्वरं॥भूतभृ
न्नचभूतस्थोममात्माभूतभावनः॥५॥ ॥ ॥

त्मेतिविभज्यदेहादिसंघातंतस्मिन्नहंकारमध्यारोप्यलोकबुद्धिमनुसरन्व्य
पदिशतिममात्मेति॥नपुनरात्मनआत्माअन्यइतिलोकवदविजानन्॥तथा
भूतभावनोभूतानिभावयत्युत्पादयतीतिभूतभावनः॥५॥ ॥ ॥

यथोक्तेन श्लोकद्वयेनोक्तमर्थं दृष्टान्तेनोपपादयन्नाह ॥ यथा लोके आकाशे स्थितो नित्यं
सदा वायुः सर्वत्र गच्छतीति सर्वत्रगो महान् परिमाणतः ॥ तथा आकाशवत्सर्वगते मय्य
संश्लेषेणैव स्थितानीत्येवमुपधारय जानीहि ॥ एवं वायुराकाश इव मयि स्थितानि भूतानि
स्थितिकाले तानि ॥ ६ ॥ सर्वेति ॥ सर्वभूतानि प्रकृतिं ॥ त्रिगुणात्मिकामपरां कौंतेय मामि।

यथाकाशस्थितो नित्यं वायुः सर्वत्रगो महान् ॥ तथा सर्वाणि भूतानि मत्स्थानीत्युपधा
रय ॥ ६ ॥ सर्वभूतानि कौंतेय प्रकृतिं यांति मामिकां ॥ कल्पक्षये पुनस्तानि कल्पादौ वि
सृजाम्यहं ॥ ७ ॥ प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः ॥ भूतग्राममिमं कृत्स्नम
वशं प्रकृतेर्वशात् ॥ ८ ॥

कां मदीयां यांति कल्पक्षये प्रलयकाले पुनर्भूयः तानि भू
तान्युत्पत्तिकाले कल्पादौ सर्गादौ विसृजाम्युत्पादयामि अहं पूर्ववत् ॥ एवमविद्याल
क्षणां ॥ ७ ॥ प्रकृतिमिति ॥ प्रकृतिं स्वां स्वीयां अवष्टभ्य वशीकृत्य प्रकृतितो जातं भूतग्रामं भूतस
मुदायमिमं वर्त्तमानं कृत्स्नं समस्तमवशमस्वतंत्रमविद्यादिदोषैः परवशीकृतं प्रकृतेर्वशा

ननुतस्यतेपरमेश्वरस्यभूतग्राममिमंविषमंविदधतस्तन्निमित्ताभ्यांधर्माधर्माभ्यांसंबंधः
262 स्यादित्यतइदमाहभगवान्॥ नचेति॥ नचमामीश्वरंतानिभूतग्रामस्यविषमविसर्ग
निमित्तानिकर्माणिनिबध्नंतिधनंजय॥ तत्रकर्मणामसंबंधकारणमाह॥ उदासीनव

नचमांतानिकर्माणिनिबध्नंतिधनंजय॥ उदासी
नवदासीनमसक्तंतेषुकर्मसु ॥९॥ ॥ ॥॥

दासीनेयथाउदासीनउपेक्षकःकश्चित्तद्वदासीनमात्मनोऽविक्रियमसक्तमभि
मानवर्जितमहंकरोमीतितत्फलासंगरहितंतेषुकर्मसुअतोन्यस्यापिकर्तृत्वा
भिमानाभावःफलासंगाभावश्चाबंधकारणंअन्यथाकर्मभिर्बध्यतेमूढःकोश।

कारवदित्यभिप्रायः

गी
१२८
263

तदध्यक्षतयाममिमंविसृजाम्युदासीनवदासीनइतिचविरुद्धमव्यक्तइतितत्परिहारार्थमा
ह॥मयाध्यक्षेति॥मयासर्वतोदृशिमात्रस्वरूपेणाविक्रियात्मनाध्यक्षेणममामायात्रिगुणा
त्मिकाअविद्यालक्षणाप्रकृतिःसूयतेउत्पादयतिसचराचरंजगत्तथाचमंत्रव
र्णः॥एकोदेवःसर्वभूतेषुगूढःसर्वव्यापीसर्वभूतांतरात्मा॥कर्माध्यक्षःसर्वभूता
धिवासःसाक्षीचेताःकेवलोनिर्गुणश्चेति॥हेतुनानिमित्तेनानेनाध्यक्षत्वेनकौंतेयज

मयाध्यक्षेणप्रकृतिःसूयतेसचराचरं॥हेतुनानेनकौंतेयजगद्धिपरिवर्तते॥१०॥

गत्सचराचरं॥१०॥व्यक्ताव्यक्तात्मकंविपरिवर्तते॥सर्वावस्थासुदृशिकर्मत्वाप
त्तिनिमित्ताहिजगतः॥सर्वाप्रवृत्तिरहमिदंभोक्ष्येपश्यामीदंशृणोमिइदंसुखमे
नुभवामिदुःखमनुभवामितदर्थमिदंकरिष्येएतदर्थमिदंकरिष्ये॥इदंज्ञास्या
मीत्याद्यःवगतिनिष्ठावगत्यवसानैव॥१०॥ योस्याध्यक्षःपरमेव्योमन्नि १२८

स्पादयञ्च मंत्रापतनमर्थं दर्शयति ॥ ततश्चैकस्य देवस्य सर्वाध्यक्षभूतचैतन्यमात्रस्य प
रमार्थतः ॥ सर्वभोगानभिसंबंधिनोऽन्यस्य चेतनांतरस्याभावे भोक्त्रंतरस्याभावात् कि
264 न्निमित्तेयं सृष्टिरित्यत्र प्रश्नप्रतिवचने चानुपपन्ने ॥ को अद्धा वेद क इह प्रवोचत् ॥ कुत
आयाता कुत इयं विसृष्टिरित्यादिमंत्रवर्णेभ्यः दर्शितं च ॥ भगवताध्यक्षत्वेनाहं तस्या
नैतेन मह्यमिति जनतवइतियवमानित्यशुद्धबुद्धमुक्तस्वभावं सर्वज्ञं सर्वजंतूनामात्मा

अवजानंति मां मूढा मानुषीं तनुमाश्रितं ॥ परं भावमजानंतो मम भूतमहेश्व
॥ रं ॥ ११ ॥

नमपि सन्तं ॥ मूढा इति ॥ अवजानंत्यवज्ञां परिभवं कुर्वंति मां मूढा ॥ अविवे
किनो मानुषीं मनुष्यसंबंधिनीं तनुं देहमाश्रितं मनुष्यदेहेन व्यवहरंतमित्येत
त् ॥ परं प्रकृष्टं भावं परमात्मतत्त्वमाकाशकल्पमाकाशादप्यंतरतमं ममाजानंतो ।
मम भूतमहेश्वरं सर्वभूतानां महांतमीश्वरं स्वमात्मानं ततश्चास्य ममावज्ञानाहतो
वराकास्ते ॥ ११ ॥ ॥ ॥ ॥

गी॰ भा॰ कथं॥मोघाइति॥मोघाशावृथाआशाआशिषोयेषांतेमोघाशाः॥तथामोघकर्माणो।
१३० यानिचाग्निहोत्रादीनितैरनुष्ठीयमानानितेषांभगवत्परिभवात्॥स्वात्मभूतस्या
265 वज्ञानान्मोघान्येवनिःफलानिकर्माणिभवंतीतिमोघकर्माणः॥तथामोघज्ञानानिः
फलज्ञानाःज्ञानमपितेषांनिःफलमेवस्यात्॥विचेतसोविगतविवेकाश्चतेभवंति

मोघाशामोघकर्माणोमोघज्ञानाविचेतसः॥राक्ष
सीमासुरींचैवप्रकृतिंमोहिनींश्रिताः॥१२॥ ॥

त्यभिप्रायः॥किंचतेभवंतिराक्षसींरक्षसांप्रकृतिंस्वभावं॥आसुरीमसुराणांचप्रकृतिंस्वभा
वंमोहिनींमोहकारिणींश्रिताआश्रिताः॥छिंधिभिंधिपिबखादपरस्वमपहरेत्येवंवदन १३
शीलाःक्रूरकर्माणोभवंतीत्यर्थः॥असुर्यानामतेलोकाइतिश्रुतेः॥१२॥ ॥ ॥

ये पुनः श्रद्दधाना भगवद्भक्तिलक्षणे मोक्षमार्गे प्रवृत्ताः ॥ महात्मेति ॥ महात्मानस्तु अक्षुद्र
266 द्रचित्ता मामीश्वरं पार्थ दैवीं देवानां प्रकृतिं शमदमश्रद्धादिलक्षणामाश्रिताः सन्तो भजन्
ति सेवन्ते ॥ अनन्यमनसोऽनन्यचित्ताः ज्ञात्वा मां भूतानामादिं कारणमव्ययं ॥ १३ ॥ कथं

महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः ॥ भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययं
॥१३॥ सततं कीर्तयन्तो मां यतन्तश्च दृढव्रताः ॥ नमस्यन्तश्च मां भक्त्या नित्ययुक्ता उपासते
॥१४॥

सततं सर्वकालं भगवन्तं ब्रह्मस्वरूपं मां कीर्तयन्तो यतन्तश्च इन्द्रियोपसंहारशम
दमदयाहिंसादिधर्मैः प्रयतन्तश्च दृढं स्थिरमचाल्यं व्रतं येषां ते दृढव्रताः ॥ नमस्यन्तो मां
हृदयेशयमात्मानं ॥ भक्त्या नित्ययुक्ताः सन्त उपासते सेवन्ते ॥१४॥ ॥ ॥ ॥

गी·भा· केनकेनप्रकारेणोपासत इत्युच्यते॥ ज्ञानइति॥ ज्ञानमेवभगवद्विषयंयज्ञस्तेनज्ञान
१३१ यज्ञेनयजंतःपूजयंतोमामीश्वरंचाप्यन्येऽप्यन्योपासनापरित्यज्योपासते॥ तच्चज्ञा
नमेकत्वेनएकमेवपरंब्रह्मेतिपरमात्मदर्शनेनयजंतउपासते॥ केचिच्चपृथक्त्वे
267 नादित्यचंद्रादिभेदेन॥ सएवभगवान्॥ विष्णुरादित्यादिरूपेणावस्थितइत्युपासते

ज्ञानयज्ञेनचाप्यन्येयजंतोमामुपासते॥ एक
त्वेनपृथक्त्वेनवहुधाविश्वतोमुखं ॥१५॥ ॥

केचिद्बहुधावस्थितःसएवभगवान्सर्वतोमुखोविश्वतोमुखोविश्वरूपइति॥ तं
विश्वरूपंसर्वतोमुखंवहुधावहुप्रकारेणोपासते॥ यदिवहुभिःप्रकारैरुपासते
कथंतामेवोपासतइत्यतआह ॥[illegible]॥ ॥॥ १३१

अहंइति॥ अहंक्रतुःश्रौतकर्मभेदोहमेव॥ अहंयज्ञःस्मार्तः॥ स्वधान्नमहंयत्पितृभ्योदी
268 यते अहमौषधंसर्वप्राणिभिर्यदद्यतेतदौषधप्राहूवाच्य॥ अथवास्वधेतिसर्वप्राणि
साधारणमन्नमौषधमितिव्याध्युपशमार्थंभेषजं॥ मंत्रोहंयेनपितृभ्योदेवताभ्य।
श्चहविर्दीयते॥ अहमेवाज्यंहविस्साहं॥ अग्निर्यस्मिन्हूयतेसोग्निरहं॥ अहंहुतंहव

अहंक्रतुरहंयज्ञःस्वधाहमहमौषधं॥ मंत्रोहमहमेवाज्यमहमग्निरहंहुतं
१६॥ पिताहमस्यजगतोमाताधातापितामहः॥ वेद्यंपवित्रमोंकारऋक्साम
यजुरेवच॥१७॥

नकर्मच॥१६॥ किंच॥ पिताजनयिताअहमस्यजगतोमाता
जनयित्रीधाताकर्मफलस्यप्राणिभ्योविधातापितामहःपितुःपिता॥ वेद्यंवेदयि
तव्यंपवित्रंपावनं॥ ॐकारश्चऋक्सामयजुरेवच॥१७॥
शिव॥ शंकर॥ शिव

269

किंच॥गतिरिति॥गतिःकर्मफलं॥भर्तापोष्टा॥प्रभुःस्वामी॥साक्षीप्राणिनांकृताकृतस्य
निवासःयस्मिन्प्राणिनोनिवसन्ति॥शरणमार्तानामत्प्रपन्नानामार्तिहरः॥सुहृत्प्र
त्युपकारानपेक्षःसन्नुपकारी॥प्रभवउत्पत्तिर्जगतःप्रलयःप्रलीयतेयस्मिन्निति॥

गतिर्भर्ताप्रभुःसाक्षीनिवासःशरणंसुहृत्॥
प्रभवःप्रलयःस्थानंनिधानंबीजमव्ययं॥१८॥

तथास्थानंतिष्ठत्यस्मिन्निति॥निधानंनिक्षेपःकालांतरोपभोग्यंप्राणिनां॥बीजं
प्ररोहकारणंप्ररोहधर्मिणां॥अव्ययंयावत्संसारभावित्वादव्ययंनह्यबीजं
किंचित्प्ररोहति॥नित्यंचप्ररोहदर्शनात्॥बीजसंततिर्नव्येतीतिगम्यते॥१८

किंच ॥ तपाइति ॥ आदित्यो भूत्वा तपामि ॥ अहं वर्षमहं केश्चिद्रश्मिभिर्वर्षमहमुत्सृजा
270 मि ॥ उत्सृज्य पुनर्निगृह्णामि केश्चिद्रश्मिभिरष्टभिर्मासैः पुनरुत्सृजामि प्रावृषि ॥ अ
मृतं चैव देवानां ॥ मृत्युश्च मर्त्यानां सद्यस्यं संबंधितया विद्यमानं तद्विपरीतमसच्चैवा

तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च ॥ अ
मृतं चैव मृत्युश्च सदसच्चाहमर्जुन ॥१९॥

हमर्जुन ॥ न पुनरत्यंतमेवासत ॥ भगवान् स्वयं कार्यकारणे वा सदसती ये एवं वोक्तै
निवृत्तिप्रकारैरेकत्वपृथक्त्वादिविज्ञानैर्यज्ञैर्मां यजंत उपासते ते ज्ञानविदस्तय। ॥ ॥
थाविज्ञानं मामेव प्राप्नुवंति ॥१९॥ ॥

गी·भा·

१३३

271

ये पुनरन्याः कामकामाः ॥ त्रैविद्या इति ॥ त्रैविद्या ऋग्यजुःसामविदः वस्वादिदेवरूपिणं सो
मं पाः सोमं पिबंतीति सोमपाः ॥ तेनैव सोमपानेन पूतपापाः शुद्धकिल्बिषाः ॥ यज्ञै
रग्निष्टोमादिभिरिष्ट्वा पूजयित्वा ॥ स्वर्गतिं प्रार्थयंते स्वर्गगमनं याचंते ॥ ते च पुण्यं पुण्य
फलमासाद्य संप्राप्य सुरेंद्रलोकं शतक्रतोः स्थानमश्नंति भुंजते दिव्यान् दिवि भवा

त्रैविद्या मां सोमपाः पूतपापा यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयंते ॥ ते पुण्यमासाद्य सुरेंद्रलो
कमश्नंति दिव्यान् दिवि देवभोगान् ॥ २० ॥ ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पु
ण्ये मर्त्यलोकं विशंति ॥ एवं त्रयीधर्ममनुप्रपन्ना गतागतं कामकामा लभंते ॥ २१ ॥

[illegible]प्राकृतान् ॥ देवभोगान् देवानां भोगास्तान् ॥ २० ॥ ते [illegible] इति ॥ ते तं भुक्त्वा स्वर्गलो
कं विशालं विस्तीर्णं क्षीणे पुण्ये मर्त्यलोकमिमं विशंत्याविशंति ॥ एवं यथोक्तेन
प्रकारेण त्रयीधर्मं केवलं वैदिकं कर्मानुप्रपन्नाः ॥ गतागतं गतं चागतं च गमनाग

१३३

येपुनर्निःकामाःसम्यग्दर्शिनः॥अनन्यइति॥अनन्याअपृथग्भूताःपरंदेवंनारायणं॥आ
त्मत्वेनगताःसंतः॥चिंतयंतोमांयेजनाःसंन्यासिनःपर्युपासतेतेषांपरमार्थदर्शिनां
नित्याभियुक्तानांसतताभियुक्तानांयोगक्षेमंयोगोऽप्राप्तस्यप्रापणंक्षेमस्तद्रक्षणं
तदुभयंवहामिप्रापयाम्यहं॥ज्ञानीत्वात्मैवमेमतं॥सचममप्रियोयस्मात्तस्मात्तेम

अनन्याश्चिंतयंतोमांयेजनाःपर्युपासते॥तेषां
नित्याभियुक्तानांयोगक्षेमंवहाम्यहं॥२२॥ ॥

मात्मभूताःप्रियाश्चेति॥नन्वन्येषामपिभक्तानांयोगक्षेमंवहत्येव॥सत्यमेवंव
हत्येवभगवान्॥किंत्वयंविशेषोयेन्येभक्ताआत्मार्थंस्वयमपियोगक्षेममीहंते।
अनन्यदर्शिनस्तुनात्मार्थंयोगक्षेममीहंतेनहितेजीवितेमरणेचात्मनोगृद्धिं
कुर्वंति॥केवलमेवभगवच्छरणास्ते॥अतोभगवानेवतेषांयोगक्षेमंवहतीति॥२२॥

गी॰भा॰ ननन्यास्त्वपिदेवतास्त्वमेवततश्चत्वामेवयजंतेसत्यमेव ॥ ये इति ॥ येप्यन्यदेवता
१३४ भक्तेति ॥ अन्यासुदेवतासुभक्ताअन्यदेवताभक्ताः तेतोयजंतेपूजयंतिश्रद्धयाआ
273 स्तिक्यबुद्ध्यान्विताः अनुगताः तेपिमामेवकौंतेययजंत्यविधिपूर्वकमविधिर
हितंतत्पूर्वकंयजंतइत्यर्थः ॥ २३ ॥ कस्मात्तेऽविवेकपूर्वकंयजंतइत्युच्यतेयस्मात्

येप्यन्यदेवताभक्तायजंतेश्रद्धयान्विताः ॥ तेपिमामेवकौंतेययजंत्यविधिपूर्वकं ॥ २३ ॥
अहंहिसर्वयज्ञानांभोक्ताचप्रभुरेवच ॥ नतुमामभिजानंतितत्वेनातश्च्यवंतिते ॥ २४ ॥

अहमिति ॥ अहंहिसर्वयज्ञानांश्रौतानांस्मार्तानांचसर्वेषांयज्ञानांदेवतात्वेनभोक्ता
चप्रभुरेवचमत्स्वामिकोयज्ञः अधियज्ञोहमेवात्रेत्युक्तं ॥ तथानतुमामभिजानंतित
त्वेनयथावत् ॥ अतश्चाविधिपूर्वकमिष्ट्वायागफलाच्च्यवंतिप्रच्यवंते ॥ येप्यन्यदेवताभ १३४
क्तत्वेनाविधिपूर्वकंयजंतेतेषामपियागफलमेवावश्यंभविष्यति ॥ २४ ॥ ॥ ॥

देवेषु व्रतं नियमो भक्तिश्च येषां ते देवव्रताः १

274

कथं ॥ यांतीत्यत इति ॥ यांति गच्छंति देवव्रताः देवान्यांति ॥ पितॄन अग्निष्वात्तादीन पितृव्रताः ॥
श्राद्धादिक्रियापराः पितृव्रताः भूतानि विनायकमातृगणचतुर्भगिन्यादीनि यांति
भूतेज्या भूतानां पूजका यांति ॥ मद्याजिनोपि मद्यजनशीला अपि वैष्णवा मामेव स
मानेप्यायासे मामेव न भजंति ॥ अज्ञानात्ते नाल्पफलभाजो भवंतीत्यर्थः ॥२५॥ न

यांति देवव्रता देवान् पितॄन् यांति पितृव्रताः ॥ भूतानि यांति भूतेज्या यांति मद्या
जिनोपि मां ॥२५॥ पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ॥ तदहं भक्त्युपहृत
मश्नामि प्रयतात्मनः ॥२६॥

केवलं मद्भक्तानां अनावृत्तिलक्षणमनंतफलम्
किंच सुखाराधनश्चाहं ॥ कथं ॥ पत्रमिति ॥ पत्रं पुष्पं फलं तोयमुदकं यो मे मह्यं भक्त्या
प्रयच्छति तदहं भक्त्युपहृतं पत्रादि भक्तिपूर्वकं प्रापितं भक्त्याउपहृतमश्नामि
गृह्णामि प्रयतात्मनः ॥ शुद्धबुद्धेः ॥२६॥ ॥ ॥ ॥

यतएवमतः॥ यत्करोषीति॥ यत्करोषि यदाचरसि शास्त्रीयं कर्म स्वतः प्राप्तं यदश्नासि
त्वाददासि यज्जुहोषि हवनं निर्वर्तयसि श्रौतं स्मार्तं वा॥ यद्ददासि प्रयच्छसि ब्राह्मणादि
भ्यो हिरण्यान्नाज्यादीनि॥ यत्तपस्यसि तपश्चरसि॥ कौन्तेय तत्कुरुष्व मदर्पणम्॥२७॥ एवं कुर्व
तस्तव यद्भवति तच्छृणु॥ शुभाशुभेति॥ शुभाशुभे इष्टानिष्टफले येषां तानि शुभाशुभ

यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्॥ यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम्
२७॥ शुभाशुभफलैरेवं मोक्ष्यसे कर्मबन्धनैः॥ संन्यासयोगयुक्तात्मा विमुक्तो मामु
पैष्यसि॥२८॥

फलानि कर्माणि तैः शुभाशुभफलैः कर्मबन्धनैः कर्माण्येव बन्धना
नि तैः कर्मबन्धनैः॥ एवं मत्समर्पणं कुर्वन्॥ मोक्ष्यसे सोऽयं संन्यासयोगो नाम संन्यास।
श्चासौ मत्समर्पणतया कर्मत्वाद्योगश्चासाविति तेन संन्यासयोगेन युक्त आत्मा अन्तः
करणं यस्य तस्य त्वं संन्यासयोगयुक्तात्मा सन् विमुक्तो बन्धनैर्जीवन्नेवापतितेच

रागद्वेषवांस्तर्हि भगवानप्यतो भक्तानेवानुगृह्णाति नेतरानिति तत्र ॥ समोऽहमिति ॥ स
मस्तुल्योऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः ॥ अग्निवद्दूरस्थानां यथाग्निः शीतं
नापनयति समीपमुपसर्पतां शीतमपनयति ॥ तथाहं भक्ताननुगृह्णामि नेतरा
न् ॥ ये भजन्ति तु मामीश्वरं भक्त्या मयि ते स्वभावत एव न मम रागनिमित्तं मयि वर्त्त

समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः ॥ ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्य
हं ॥ २९ ॥ अपि चेत्सुदुराचारो भजते मामनन्यभाक् ॥ साधुरेव स मन्तव्यः सम्यग्व्यवसि
तो हि सः ॥ ३० ॥

न्ते ॥ तेषु चाप्यहं स्वभावत एव वर्ते ॥ नेतरेषु नैतावता तेषु द्वेषो मम
२९ ॥ शृणु मद्भक्तेर्माहात्म्यं ॥ अपि चेदिति ॥ अपि चेद्यद्यपि सुदुराचारः अतीव कुत्सि
ताचारोऽपि मामभिभजते अनन्यभाक् अनन्यभक्तिः सन् साधुरेव सम्यक्प्रवृत्त ए
व स मन्तव्यो ज्ञातव्यः सम्यक् यथावद्व्यवसितः हि यस्मात्साधुनिश्चयः स उत्तरज्य ।

अतः सम्यग्व्यवसायसामर्थ्यात् ॥ क्षिप्रं इति ॥ क्षिप्रं शीघ्रं भवति धर्मात्मा धर्मचित्त एव भवति ॥ शश्व
न्नित्यं शान्तिं चोपशमं निगच्छति प्राप्नोति ॥ शृणु परमार्थं कौन्तेय प्रतिजानीहि निश्चितां
प्रतिज्ञां कुरु न मे मम भक्तो मत्समर्पितान्तरात्मा मद्भक्तो न प्रणश्यतीति ॥ ३१ ॥ किंच ॥ मां
हीति ॥ मां हि यस्मात् पार्थ व्यपाश्रित्य मामाश्रयत्वेन गृहीत्वा येपि स्युर्भवेयुः पाप

क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं निगच्छति ॥ कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति
३१ ॥ मां हि पार्थ व्यपाश्रित्य येपि स्युः पापयोनयः ॥ स्त्रियो वैश्यास्तथा शूद्रास्तेपि यान्ति
परां गतिं ॥ ३२ ॥ किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा ॥ अनित्यमसुखं लोकमि
मं प्राप्य भजस्व मां ॥ ३३ ॥

योनिर्येषां ते पापयोनयः पापजन्मानः के ते इत्याह ॥ स्त्रियो
वैश्यास्तथा शूद्रास्तेपि यान्ति गच्छन्ति ॥ परां प्रकृष्टां गतिं ॥ ३२ ॥ किं पुनर्ब्राह्मणाः पुण्याः
पुण्ययोनयः भक्ता राजर्षयस्तथा ॥ राजानश्च ते ऋषयश्चेति राजर्षयः ॥ अत एवा
नित्यं क्षणभंगुरं असुखं च सुखवर्जितं लोकमिमं मनुष्यलोकं प्राप्य पुरुषार्थसाधनं देह

278

कथं ॥ मन्मना इति ॥ मयि मनो यस्य स त्वं मन्मना भव ॥ तथा मद्भक्तो भव मद्याजी मम यज
नशीलो भव मामेव च नमस्कुरु ॥ मामीश्वरमेष्यस्यागमिष्यसि युक्त्वा समाधाय चित्तं
एवमात्मानं मां त्वं हि सर्वेषां भूतानामात्मा परा गतिः परमयनं मामेवंभूतमेष्यसी

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ॥ मामेवैष्यसि युक्त्वैव
मात्मानं मत्परायणः ॥ ३४ ॥ इति श्री नवमोध्यायः ॥ ९ ॥ ॥

त्यतीतेन पदेन संबंधः मत्परायणः सन्नित्यर्थः ॥ ३४ ॥ इति श्री परमहंस परिव्रा
जकाचार्य श्री शंकर भगवत्कृतौ गीता भाष्य विवरणे नवमोध्यायः ॥ ९ ॥ शिव
भे ॥ हृद्र ॥
शिव ॥

गी·भा· सप्तमेऽष्टमेऽध्यायेभगवतस्तत्त्वंविभूतयश्चप्रकाशितानवमेचाध्यायेदानींयेषुभावेषुचिंत्यो
१३० भगवांस्तांस्तान्भावान्वक्तव्यास्तत्त्वंचभगवतोवक्तव्यमुक्तमपिदुर्विज्ञेयत्वादिति॥अतो॥आह
279 यइति॥भूयएवभूयःपुनःमहाबाहोशृणुमे॥मदीयंपरमंप्रकृष्टंनिरतिशयवस्तुनः
प्रकाशकंवचोवाक्यंयत्परमंतेतुभ्यंप्रीयमाणायमद्वचनात्प्रीयसेत्वममृतमिव

श्रीभगवानुवाच॥भूयएवमहाबाहोशृणुमेपरमंवचः॥यत्तेहंप्रीयमाणायवक्ष्यामि
हितकाम्यया॥१॥नमेविदुःसुरगणाःप्रभवंनमहर्षयः॥अहमादिर्हिभूतानांमह
र्षीणांचसर्वशः॥२॥

पिवन्॥ततोवक्ष्यामिहितकाम्ययाहितेच्छया॥ ॥किमर्थमहं
वक्ष्यामीत्यतआह॥नमेइति॥नमेविदुर्नजानंतिसुरगणाः॥किंतेनविदुःममप्रभवंप्र
भावंप्रभुशक्त्यतिशयं॥अथवा॥प्रभवनमुत्पत्तिंवानापिमहर्षयोभृग्वादयोविदुःक
स्मात्तेनविदुरित्युच्यते॥अहमादिःकारणंहियस्माद्देवानांमहर्षीणांचसर्वशःसर्वप्र १३८

किंच॥ य[illegible]इति॥ योमामजमनादिंच॥ यस्मादहमादिः देवानांमहर्षीणांच तस्मामान्यस्य॥

280 दिर्विद्यते॥ अतोहमजो ऽनादिश्च॥ अनादित्वमजत्वेहेतुः॥ तमामजमनादिंच योवेत्तिवि

जानातिलोकमहेश्वरंलोकानांमहान्तमीश्वरं॥ असंमूढः संमोहवर्जितः समर्त्येषु

योमामजमनादिंचवेत्तिलोकमहेश्वरं॥ असं
मूढः समर्त्येषु सर्वपापैः प्रमुच्यते॥ ३॥ ॥ ॥

मनुष्येषु सर्वपापैः सर्वैःपापैर्मतिपूर्वामतिपूर्वकृतैः प्रमुच्यतेप्रमोक्ष्यते॥ इतश्चा
हमहेश्वरोलोकानां॥ [illegible]॥ ॥

॥शिव॥

बुद्धिरिति ॥ बुद्धिरंतःकरणस्य सूक्ष्माद्यर्थावबोधनसामर्थ्यं तद्वंतं बुद्धिमानिति हि वदंति ।
ज्ञानमात्मादिपदार्थानामवबोधः ॥ असंमोहः प्रत्युत्पन्नेषु बोद्धव्येषु विवेकपूर्विका प्र
वृत्तिः क्षमाक्रुष्टस्य ॥ ताडितस्य वा अविकृतचित्तता ॥ सत्यं यथादृष्टस्य यथाश्रुतस्य चा
त्मानुभवस्य परबुद्धिसंक्रांतये तथैवोच्चार्यमाणा वाक् सत्यमुच्यते दमो बाह्येंद्रियोप
शमः शमोंतःकरणस्योपशमः सुखमाह्लादः दुःखं संतापः भवउद्भवः अभावस्तद्विपर्ययः भयं

बुद्धिर्ज्ञानमसंमोहः क्षमा सत्यं दमः शमः ॥ सुखं दुःखं भवोभावो भयं चाभयमेव च ॥४॥
अहिंसा समता तुष्टिस्तपो दानं यशोयशः ॥ भवंति भावा भूतानां मत्त एव पृथग्विधाः ॥५॥

सा१
च त्रासः ॥ अभयमेव च तद्विपरीतं ॥ ध ॥ अहिंसेति ॥ अहिंसा प्राणिनामपीडा ॥ समता समचि
त्तता ॥ तुष्टिः संतोषः पर्याप्तबुद्धिर्लाभेषु तप इंद्रियसंयमपूर्वकं शरीरपीडनं ॥ दानं य
थाशक्ति संविभागः यशो धर्मनिमित्ता कीर्त्तिः अयशो धर्मनिमित्ता कीर्त्तिः ॥ भवंति भा १३८
वा यथोक्ता बुद्ध्यादयो भूतानां प्राणिनां मत्त एवेश्वरात् ॥ पृथग्विधा नानाविधाः स्वकर्मानु

महर्षयइति॥महर्षयःसप्तभृग्वादयःपूर्वेअतीतकालसंबंधिनः॥चत्वारोमनवस्तथा।
सावर्णाइतिप्रसिद्धाः॥तेचमद्भावाःमद्गतभावनाःवैष्णवेनसामर्थ्येनोपेताः॥मान।
282 सामनसैवोत्पादिताःमयाजाताउत्पादिताः॥येषांमनूनांमहर्षीणांचसृष्टालोक।
इमाःस्थावरजंगमाःप्रजाः॥६॥एतामिति॥एतांयथोक्तांविभूतिंविस्तारंयोगंचयुक्तिं

महर्षयःसप्तपूर्वेचत्वारोमनवस्तथा॥मद्भावामानसाजातायेषांलोकइमाःप्र
जाः॥६॥एतांविभूतिंयोगंचममयोवेत्तितत्वतः॥सोविकंपेनयोगेनयुज्यतेनात्रसं
शयः॥७॥

सामर्थ्यंसर्वज्ञत्वंयोगजंयोगउच्यते
चात्मनोघटनं॥अथवायोगैश्वर्यसामर्थ्यंसर्वज्ञत्वं॥सोविकंपेनाऽप्रचलितेनयो
ममममदीयंयोवेत्ति॥तत्वतस्तत्वेनयथावदित्येतत्॥नात्रसंशयःनास्मिन्संशयः॥७॥
गेनसम्यग्दर्शनस्थैर्यलक्षणेनयुज्यतेसंबध्यते॥ ॥राम
शिव ॥॥॥

कीदृशेनाविकंपेन योगेन युज्यत इत्युच्यते ॥ अहं इति ॥ अहं परं ब्रह्म वासुदेवाख्यं सर्वस्य
जगतः प्रभवः उत्पत्तिः मत्त एव स्थितिः नाशक्रियाफलोपभोगलक्षणां विक्रियारू
पं सर्वं जगत्प्रवर्तते ॥ इत्येवं मत्वा भजंते मां बुधा अवगततत्त्वार्थाः ॥ भावसम
न्विताः भावो भावना परमार्थतत्त्वाभिनिवेशः ॥ तेन समन्विताः संयुक्ता इत्यर्थः ॥८॥
किंच ॥ मच्चित्ता इति ॥ मच्चित्ता मयि परमेश्वरे चित्तं येषां ते मच्चित्ताः मद्गतप्राणाः मां गताः

अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते ॥ इति मत्वा भजंते मां बुधा भावसमन्विताः ॥८॥
मच्चित्ता मद्गतप्राणा बोधयंतः परस्परं ॥ कथयंतश्च मां नित्यं तुष्यंति च रमंति च ॥५॥

प्राणाः चक्षुरादयः प्राणा येषां ते मद्गतप्राणाः मय्युपसंहृतकरणा इत्यर्थः ॥ अथवा
मद्गतप्राणा मद्गतजीवना इत्येतत् ॥ कथयंतो ॥ बोधयंतः परस्परमन्योन्यं कथयंतो ज्ञा
नबलवीर्यादिधर्मैर्विशिष्टं मां ॥ तुष्यंति परितोषं उपयांति ॥ रमंति च रतिं प्राप्नुवंति प्रिय
संगत्येव ॥ ये यथोक्तप्रकारैर्भजंते मां भक्ताः संतः प्रीतिपूर्वकं ॥५॥ ॥ ॥॥

तेषां इति ॥ तेषां सततयुक्तानां नित्याभियुक्तानां भजतां सेवमानानां ॥ किमर्थित्वादिका रणेनेत्याह ॥ प्रीतिपूर्वकं प्रीतिः स्नेहः तत्पूर्वकं मां भजतामित्यर्थः ददामि प्रयच्छामि बु

284

तेषां सततयुक्तानां भजतां प्रीतिपूर्वकं ॥ ददा
मि बुद्धियोगं तं येन मामुपयांति ते ॥ १० ॥ ॥

द्धियोगं बुद्धिः सम्यग्दर्शनं मत्तत्वविषयं तेन योगो बुद्धियोगस्तं बुद्धियोगं येन बुद्धियोगेन स
म्यग्दर्शनलक्षणेन मां परमेश्वरं आत्मभूतं ते ॥ आत्मत्वेनोपयांति प्रतिपद्यंते ॥ १० ॥ ॥

केनेयमच्छिनत्वादिप्रकारैर्मां भजंते॥ किमर्थं कस्य वा त्वत्प्राप्तिप्रतिबंधहेतोर्नाशकं बुद्धि।
योगं तेषां त्वद्भक्तानां ददामीत्याकांक्षायामाह॥ तेषामिति॥ तेषामेव कथं नाम श्रेयः स्यादि
त्यनुकंपार्थं दयाहेतोरहमज्ञानजमविवेकितो जातं मिथ्याप्रत्ययलक्षणं मोहांधका
रं तमो नाशयामि॥ आत्मभावस्थः॥ आत्मनो भावोंतःकरणमाशयस्तस्मिन्नेवस्थितः

तेषामेवानुकंपार्थमहमज्ञानजं तमः॥ ना
शयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता॥ ॥११॥

सन्॥ ज्ञानदीपेन विवेकप्रत्ययरूपेण भक्तिप्रसादस्नेहाभि[षि]युक्तेन मद्भावनाभिनिवे
शवातेरितेन॥ ब्रह्मचर्यादिसाधनसंस्कारवत्प्रज्ञाप्रवर्तिना विरक्तांतःकरणाधारेण
विषयव्यावृत्तचित्तरागद्वेषाकलुषितनिवातापवरकस्थेन नित्यप्रवृत्तैकाग्र्यध्यान
जनितसम्यग्दर्शनभास्वता ज्ञानदीपेनेत्यर्थः ॥११॥ ॥ ॥ ॥ ॥ १४·

286

यथोक्तां भगवतो विभूतिं योगं च श्रुत्वा ॥ परंइति ॥ परं ब्रह्म स्वतत्त्वं निरंजनमिति परं धामप्र
कृतेजः ॥ पवित्रं पावनं परमं प्रकृष्टं भवान् पुरुषं शाश्वतं नित्यं दिव्यं दिविभवं आदिदेवं
सर्वदेवानामाद्यो भवं देवं अजं विभुं विभवनशीलं इदृशं ॥ १२ ॥ आहुरिति ॥ आहुः कथयं
ति त्वां ऋषयो वसिष्ठादयः सर्वे ॥ देवर्षिर्नारदस्तथा ॥ असितो देवलो व्यासमाह ॥ व्यास

अर्जुन उवाच ॥ परं ब्रह्म परं धाम पवित्रं परमं भवान् ॥ पुरुषं शाश्वतं दिव्यमादिदेवमजं
विभुं ॥ १२ ॥ आहुस्त्वामृषयः सर्वे देवर्षिर्नारदस्तथा ॥ असितो देवलो व्यासः स्वयं चैव
ब्रवीषि मे ॥ १३ ॥ सर्वमेतदृतं मन्ये यन्मां वदसि केशव ॥ न हि ते भगवन्व्यक्तिं विदु
र्देवा न दानवाः ॥ १४ ॥

स्स्वयं चैव ब्रवीषि मे ॥ १३ ॥ सर्वंइति ॥ सर्वमेतद्यथोक्तं मद्विषि
भिस्त्वया चतदृतं सत्यमेवमन्ये यन्मां प्रति वदसि भाषसे ॥ केशव ॥ न हि ते भगवन्
व्यक्तिं प्रभवं विदुर्देवा न दानवाः ॥ यतस्त्वं देवानामादिरतः ॥ १४ ॥ ॥ ॥ ॥

स्वयमिति ॥ स्वयमेवात्मनात्मानं वेत्थ त्वं निरतिशयज्ञानैश्वर्यबलादिशक्तिमंतमीश्वरं पु
रुषोत्तम ॥ भूतानि भावयतीति भूतभावनः ॥ हे भूतभावन ॥ भूतेश हे भूतानामीशितः ॥
हे देवदेव जगत्पते ॥ १५ ॥ वक्तुमिति ॥ वक्तुं कथयितुमर्हसि अशेषेण दिव्या ह्यात्मविभूतयः

स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तम ॥ भूतभावन भूतेश देवदेव जगत्पते ॥ १५ ॥ वक्तु
मर्हस्यशेषेण दिव्या ह्यात्मविभूतयः ॥ याभिर्विभूतिभिर्लोकानिमांस्त्वं व्याप्य तिष्ठसि
१६ ॥ कथं विद्यामहं योगिंस्त्वां सदा परिचिंतयन् ॥ केषु केषु च भावेषु चिंत्योसि भगवन्मया
॥ १७ ॥

आत्मनो विभूतयः आत्मविभूतयो यास्ता वक्तुमर्हसि ॥ याभिर्विभूतिभिरात्मनो
माहात्म्यविस्तरैः इमान् लोकांस्त्वं व्याप्य तिष्ठसि ॥ १६ ॥ कथमिति ॥ कथं विद्यां [illegible] जा
नीयामहं योगिन् त्वां सदा परिचिंतयन् ॥ केषु केषु भावेषु वस्तुषु ॥ चिंत्योसि ध्येयोसि
भगवन्मया ॥ १७ ॥

288

विस्तरेणात्मनो योगं योगैश्वर्यशक्तिविशेषं । विभूतिं च विस्तरं ध्येयपदा
र्थानां । हे जनार्दन । अर्दतेर्गतिकर्मणो रूपम् असुराणां देवप्रतिपक्षजनानां नरकादि
गमयितृत्वाज्जनार्दनः अभ्युदयनिःश्रेयसपुरुषार्थप्रयोजनं सर्वैर्जनैर्याच्यत इति
वा जनार्दनः । भूयः पूर्वमुक्तमपि कथय । तृप्तिर्हि परितोषो यस्मान्नास्ति मे मम । शृ

विस्तरेणात्मनो योगं विभूतिं च जनार्दन । भूयः कथय तृप्तिर्हि शृण्वतो नास्ति मेऽमृतं
१८ । श्रीभगवानुवाच । हन्त ते कथयिष्यामि दिव्या ह्यात्मविभूतयः । प्राधान्यतः कुरु
श्रेष्ठ नास्त्यन्तो विस्तरस्य मे ॥ १९ ॥

ण्वतस्त्वन्मुखनिःसृतं वाक्यामृतं ॥ १८ ॥ हन्तेति
हन्त इदानीं ते तव दिव्या दिविभवा । आत्मविभूतयः आत्मनो मम विभूतयो यास्ताः
कथयिष्यामीत्येतत् । प्राधान्यतः यत्र यत्र प्रधाना या या विभूतिस्तां तां प्रधानां प्राधा
न्यतः कथयिष्यामि अहं हे कुरुश्रेष्ठ । अशेषतस्तु वर्षशतेनापि न शक्या वक्तुं । य

तत्प्रथममेव तावच्छृणु ॥ अहमिति ॥ अहमात्मा प्रत्यगात्मा गुडाकेश गुडाका निद्रा त
स्या ईशो गुडाकेशः ॥ जितनिद्र इत्यर्थः ॥ घनकेश इति वा ॥ सर्वभूताशये स्थितः ॥
सर्वेषां भूतानामाशये हृदि स्थितः नित्यं ध्येयः तदशक्तेन तेषु भावेषु चिंत्योऽहं
यस्मादहमादिर्भूतानां कारणं ॥ तथा मध्यं च स्थितिः अंतः प्रलयः ॥२०॥ पंचदश ध्येयाः ।

अहमात्मा गुडाकेश सर्वभूताशयस्थितः ॥ अहमादिश्च मध्यं च भूतानामंत एव
च ॥२०॥ आदित्यानामहं विष्णुर्ज्योतिषां रविरंशुमान ॥ मरीचिर्मरुतामस्मि नक्षत्रा
णामहं शशी ॥२१॥ वेदानां सामवेदोऽस्मि देवानामस्मि वासवः ॥ इंद्रियाणां मनश्चास्मि
भूतानामस्मि चेतना ॥२२॥

हं ॥ आदित्य इति ॥ आदित्यानां द्वादशानां विष्णुर्नामादित्योऽहं
ज्योतिषां रविः प्रकाशयितॄणामंशुमान् रश्मिमान ॥ मरीचिर्नाम मरुतां मरुद्देवता
भेदानामस्मि ॥ नक्षत्राणामहं शशी चंद्रः ॥२१॥ वेदा इति ॥ वेदानां मध्ये सामवेदोऽस्मि
देवानां रुद्रादित्यानां वासवः इंद्रोऽस्मि ॥ इंद्रियाणामेकादशानां मनश्चास्मि ॥ भूतानाम

रुद्राणामिति॥ रुद्राणामेकादशानां शंकरश्चास्मि॥ वित्तेशः॥ कुबेरो यक्षाणां रक्षसां च
290 वसूनामष्टानां पावकोऽग्निरस्मि॥ मेरुः शिखरिणां शिखरवतामहं॥२३॥ पुरोधसामिति॥ पुरोधसां
च राजपुरोहितानां मुख्यं प्रधानं मां विद्धि जानीहि पार्थ बृहस्पतिं॥ महीन्द्रस्याभिमुख्यः
स्यात्पुरोधा॥ सेनानीनां सेनापतीनामहं स्कंदो देवसेनापतिः॥ सरसां यानि देवखाता

रुद्राणां शंकरश्चास्मि वित्तेशो यक्षरक्षसां॥ वसूनां पावकश्चास्मि मेरुः शिखरिणामहं
वि२ ॥२३॥ पुरोधसां च मुख्यं मां विद्धि पार्थ बृहस्पतिं॥ सेनानीनामहं स्कंदः सरसामस्मि साग
रः॥२४॥ महर्षीणां भृगुरहं गिरामस्म्येकमक्षरं॥ यज्ञानां जपयज्ञोऽस्मि स्थावराणां
हिमालयः॥२५॥

तानि सरांसि तेषां सागरोऽस्मि॥२४॥ महर्षिरिति॥ महर्षी
णां भृगुरहं॥ गिरां वाचां पदलक्षणानामेकमक्षरमोंकारोऽस्मि॥ यज्ञानां जपयज्ञो
स्मि॥ स्थावराणां स्थितिमतां हिमालयः॥२५॥ ॥ ॥ ॥

गी·भा·
१४२
291

अश्वत्थेति ॥ अश्वत्थः सर्ववृक्षाणां ॥ देवर्षीणां च देवाश्च संत ऋषित्वं प्राप्ता मंत्रदर्शित्वा
त्ते देवर्षयः तेषां नारदोऽस्मि ॥ गंधर्वाणां चित्ररथो नाम गंधर्वोऽहं ॥ सिद्धानां जन्मनैव ध
र्मज्ञानवैराग्यैश्वर्यातिशयं प्राप्तानां कपिलो नाम मुनिरहं ॥ २६ ॥ उच्चैःश्रव इति ॥ उच्चैःश्र

अश्वत्थः सर्ववृक्षाणां देवर्षीणां च नारदः ॥ गंधर्वाणां चित्ररथः सिद्धानां कपिलो मुनिः
२६ ॥ उच्चैःश्रवसमश्वानां विद्धि माममृतोद्भवं ॥ ऐरावतं गजेंद्राणां नराणां च नराधिपं ॥ २७ ॥

वसमश्वानां उच्चैःश्रवा नामाश्वस्तं मां विद्धि जानीहि ॥ अमृतोद्भवं अमृतनिमित्तमथ
नोद्भवं ॥ ऐरावतं इरावत्या अपत्यं गजेंद्राणां हस्तीश्वराणां तं मां विद्धीत्यनुवर्तते ॥ १४२
नराणां मनुष्याणां नराधिपं राजानं मां विद्धि ॥ २७ ॥ ॥ ॥ ॥

292

आयुध इति ॥ आयुधानामहं वज्रं दधीचेरस्थिसंभवं ॥ धेनूनां दोग्ध्रीणामस्मि कामधुक् व
सिष्ठस्य सर्वकामानां दोग्ध्री सा नाम्ना वा कामधुक् प्रजनेति ॥ प्रजनः पितास्मि कंदर्पः का
मः सर्पाणां सर्पभेदानामस्मि वासुकिः सर्पराजः ॥२८॥ अनंत इति ॥ अनंतो नाम चास्मि ना
गानां नागभेदानां नागराजः ॥ वरुणो यादसामहं वरुणो नाम राजाहं ॥ पितॄणामर्यमा

आयुधानामहं वज्रं धेनूनामस्मि कामधुक् ॥ प्रजनश्चास्मि कंदर्पः सर्पाणामस्मि वा
सुकिः ॥२८॥ अनंतश्चास्मि नागानां वरुणो यादसामहं ॥ पितॄणामर्यमा चास्मि यमः
संयमतामहं ॥२९॥ प्रह्लादश्चास्मि दैत्यानां कालः कलयतामहं ॥ मृगाणां च मृगेंद्रो
हं वैनतेयश्च पक्षिणां ॥३०॥

नाम पितृराजश्चास्मि ॥ यमः संयमतां संयमनं कुर्वतामहं
२९ ॥ प्रह्लादो नाम चास्मि दैत्यानां दितिवंश्यानां ॥ कालः कलयतां कलनं गणनं कुर्व
तामहं ॥ मृगाणां च मृगेंद्रः सिंहो व्याघ्रो वाहं ॥ वैनतेयश्च पक्षिणां गरुत्मान्विनता

भ॰ गी॰ टीकायां वि॰ ॥ १० ॥ ॥

गी·भा· पवन इति ॥ पवनो वायुः पवनां पावयितॄणामस्मि ॥ रामः शस्त्रभृतां शस्त्राणां धारयि
१५५ तॄणां दाशरथी रामो हं ॥ झषाणां मत्स्यादीनां मकरो नाम जातिविशेषस्तथास्मि
स्रोतसां स्रवंतीनामस्मि जाह्नवी गंगा ॥ ३१ ॥ सर्गाणामिति ॥ सर्गाणां सृष्टीनामादिरं
293 तश्च मध्यं चैवाहं ॥ उत्पत्तिस्थितिप्रलयाः ॥ अर्जुन ॥ भूतानां जीवाधिष्ठानानामेवादि

पवनः पवतामस्मि रामः शस्त्रभृतामहं ॥ झषाणां मकरश्चास्मि स्रोतसामस्मि जा
ह्नवी ॥ ३१ ॥ सर्गाणामादिरंतश्च मध्यं चैवाहमर्जुन ॥ अध्यात्मविद्या विद्यानां वादः प्रवद
तामहं ॥ ३२ ॥

रंतश्चेत्युक्तमुपक्रमे इदं तु सर्वस्यैव सर्गमात्रस्येति विशेषः ॥ अध्या
त्मविद्या विद्यानां मोक्षार्थत्वात्प्रधानमस्मि ॥ वादोर्थनिर्णयहेतुत्वात्प्रवदतां पृथ
तेषतः सोहमस्मि प्रवक्तृद्वारेण वदतां भेदानामेव ॥ इह वादजल्पवितंडानां १५५
ग्रहणं प्रवदतामिति ॥ ३२ ॥

अक्षरादिति॥ अक्षराणां वर्णानामकारोस्मि॥ द्वंद्वः समासोस्मि सामासिकस्य च समास
294 समूहस्य॥ किंच॥ अहमेवाक्षयोऽक्षीणः कालः प्रसिद्धः क्षणाद्यः परो वा ईश्वरः क
लस्यापि कालोस्मि॥ धाताहं कर्मफलस्य विधाता जगतो विश्वतोमुखः सर्वतोमुखः
३३॥ मृत्युरिति॥ मृत्युर्हि विधोपयनहरः प्राणादस्य॥ तत्र सर्वहरो य उच्यते सोहं॥ अथ

अक्षराणामकारोस्मि द्वंद्वः सामासिकस्य च॥ अहमेवाक्षयः कालो धाताहं विश्वतो
मुखः॥ ३३॥ मृत्युः सर्वहरश्चाहमुद्भवश्च भविष्यतां॥ कीर्तिः श्रीर्वाक्च नारीणां स्मृति
र्मेधा धृतिः क्षमा॥ ३४॥

वा पर ईश्वरः प्रलये सर्वहरणात्॥ सर्वहरः सोहं॥ उद्भवः उ
त्कर्षाभ्युदयः तत्प्राप्तिहेतुश्चाहं॥ केषां भविष्यतां भाविकल्याणानामुत्कर्षप्राप्ति
योग्यानामित्यर्थः॥ कीर्तिः श्रीर्वाक्च नारीणां स्मृतिर्मेधा धृतिः क्षमा॥ इत्येता उत्त।
मास्त्रीणामहमस्मि यासामाभासमात्रसंबंधेनापि लोकः कृतार्थतामात्मनो मन्य ते ३५

गी॰भा॰
२९५
295

बृहदिति॥ बृहत्सामतया साम्नां मोक्षप्रतिपादकसामवेदविशेषः प्रधानमस्मि॥ गायत्री
छंदसामहं गायत्र्यादिछंदोवशिष्टानां ऋचां गायत्री ऋगहमित्यर्थः॥ मासानां मार्ग
शीर्षोहं॥ ऋतूनां कुसुमाकरो वसंतः॥ ३५॥ द्यूतमिति॥ द्यूतमक्षदेवनादि लक्षणं छल
यतां छलस्य कर्तॄणामस्मि तेजस्तेजस्विनामहं॥ जयोस्मि जेतॄणां॥ व्यवसायोस्मि व्य

बृहत्साम तथा साम्नां गायत्री छंदसामहं॥ मासानां मार्गशीर्षोहमृतूनां कुसुमाकरः
३५॥ द्यूतं छलयतामस्मि तेजस्तेजस्विनामहं॥ जयोस्मि व्यवसायोस्मि सत्त्वं सत्त्ववताम
हं॥ ३६॥ वृष्णीनां वासुदेवोस्मि पांडवानां धनंजयः॥ मुनीनामप्यहं व्यासः कवीनामुश
नाकविः॥ ३७॥

वसायिनां॥ सत्त्वं सत्त्ववतां सात्त्विकानामहं॥ ३६॥ वृष्णीति॥ वृष्णीनां वासु
देवोस्मि स्वयमेवाहं तत्सखः पांडवानां धनंजयस्त्वमेव मुनीनां मननशीलानां सर्व २९५
पदार्थज्ञानामहं व्यासः॥ कवीनां [illegible]ः क्रांतदर्शिनामुशना कविरस्मि॥ ३७॥

५७८

दंडोदमयतांदमयितॄणामस्मि अदांतानांदमनकारणमस्मि ॥ नीतिरस्मि जिगीषतां जेतुमिच्छतां ॥ मौनं चैवास्मि गुह्यानां गोप्यानां ॥ ज्ञानं ज्ञानवतामहं ॥ ३८ ॥ यच्चापि सर्वभूतानां बीजं प्ररोहकारणं तदहं प्रकरणोपसंहरणार्थं विभूतिसंक्षेपमाह ॥ न तदस्ति चरमचरं वा मया विना यत्स्यात् भवेत् मयापकृष्टं निरात्मकं स्यात् हि त

दंडो दमयतामस्मि नीतिरस्मि जिगीषतां ॥ मौनं चैवास्मि गुह्यानां ज्ञानं ज्ञानवतामहं ॥ ३८ ॥ यच्चापि सर्वभूतानां बीजं तदहमर्जुन ॥ न तदस्ति विना यत्स्यान्मया भूतं चराचरं ॥ ३९ ॥ नांतोस्ति मम दिव्यानां विभूतीनां परंतप ॥ एष तूद्देशतः प्रोक्तो विभूतेर्विस्तरो मया ॥ ४० ॥

स्मात् ॥ सर्वो मदात्मकं सर्वमित्यर्थः ॥ ३९ ॥ नांतोस्ति म
स्मात् ॥ सर्वो मदात्मकं सर्वमित्यर्थः ॥ ३९ ॥ नांतोस्ति मम दिव्यानां विभूतीनां विस्तराणां परंतप ॥ न हीश्वरस्य सर्वात्मनो दिव्यानां विभूतीनामियत्ता शक्या वक्तुं ज्ञातुं वा केनचित् ॥ एष तूद्देशतः एकदेशेन प्रोक्तो वि

गी. यद्यदिति॥ यद्यल्लोके विभूतिमत् विभूतियुक्तं॥ सत्वं वस्तु॥ श्रीमदूर्जितमेव वा॥ श्रीर्ल
१४८ क्ष्मीस्तया सहितं श्रीमत् ऊर्जितमेव वा॥ उत्साहोपेतं वा॥ तत्तदेवावगच्छ त्वं जानीहि
मम ईश्वरस्य तेजोंऽशसंभवं तेजसोंऽश एकदेशः संभवो यस्य तत्तेजोंऽशसंभवमित्यवगच्छ त्वं॥ ४१॥
297 अथवेति॥ अथवा बहुना एतेन एवमादिना किं ज्ञातेन तवार्जुन स्यात्॥ सावशेषेण

यद्यद्विभूतिमत्सत्वं श्रीमदूर्जितमेव वा॥ तत्तदेवावगच्छ त्वं मम तेजोंऽशसंभवं॥ ४१॥
अथवा बहुनैतेन किं ज्ञातेन तवार्जुन॥ विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जग
त्॥ ४२॥

अशेषतस्त्वमिममुच्यमानमर्थं शृणु॥ विष्टभ्य विशेषतः स्तंभनं दृढं कृत्वा
इदं कृत्स्नं जगदेकांशेन एकावयवेन एकपादेन सर्वभूतस्वरूपेणेत्येतत्॥ तथा च मं
त्रवर्णः पादोऽस्य विश्वा भूतानीति स्थितोऽहमिति॥ ४२॥ इति श्रीपरमहंसपरिव्राजका १४८
चार्यश्रीशंकरभगवत्कृतौ भगवद्गीताभाष्ये विभूतिर्नाम दशमोऽध्यायः॥ १०॥

भगवतो विभूतय उक्तास्तत्र विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगदिति भगवताभि-
हितं श्रुत्वाथ जगदात्मस्वरूपमाद्यमैश्वरं तस्मात्तान्द्रष्टुमिच्छन्नर्जुन उवाच ॥ मदनु इति ॥
298 मदनुग्रहाय मदनुग्रहार्थं परमं निरतिशयं गुह्यं गोप्यमध्यात्मसंज्ञितं आत्मानात्मवि-
वेकविषयं ॥ यत्त्वयोक्तं वचो वाक्यं तेन वचसा मोहोऽयं विगतो मम अविवेकबुद्धिरपगता

अर्जुन उवाच ॥ मदनुग्रहाय परमं गुह्यमध्यात्मसंज्ञितं ॥ यत्त्वयोक्तं वचस्तेन मोहोऽयं
विगतो मम ॥१॥ भवाप्ययौ हि भूतानां श्रुतौ विस्तरशो मया ॥ त्वत्तः कमलपत्राक्ष माहा-
त्म्यमपि चाव्ययं ॥२॥

ममेत्यर्थः ॥१॥ किंच ॥ भवाप्य इति ॥ भव उत्पत्तिः अप्ययः प्रलयो भूता-
नां तौ भवाप्ययौ श्रुतौ विस्तरशो न संक्षेपतो मया त्वत्तः त्वत्सकाशात् ॥ कमलपत्राक्ष क-
मलस्य पत्रे कमलपत्रे तद्वदक्षिणी यस्य तव स त्वं कमलपत्राक्ष तादृक्कमलपत्राक्ष ॥ मा-
हात्म्यं महात्मनो भावो माहात्म्यं ॥ अपि चाव्ययं अक्षयं श्रुतमित्यनुवर्तते ॥२॥ ॥ ॥

एवंइति॥ एवमेतत्नान्यथायथायेनप्रकारेणआत्थकथयसित्वमात्मानंपरमेश्वर॥तथा
पिद्रष्टुमिच्छामितेतवज्ञानैश्वर्यशक्तिबलवीर्यतेजोभिः॥संपन्नमैश्वरंवैष्णवंरूपंपुरुषो।
त्तम॥३॥ मन्यसेइति॥ मन्यसेचिंतयसि॥ यदिमयार्जुनेनतत्शक्यंद्रष्टुमिति॥प्रभोस्वा।

एवमेतद्यथात्थत्वमात्मानंपरमेश्वर॥ द्रष्टुमिच्छामितेरूपमैश्वरंपुरुषोत्तम ॥३॥
मन्यसेयदितच्छक्यंमयाद्रष्टुमितिप्रभो॥ योगेश्वरततोमेत्वंदर्शयात्मानमव्ययं॥४॥

मिन्॥ योगेश्वरयोगिनोयोगास्तेषामीश्वरोयोगेश्वरः॥हेयोगेश्वर॥यस्मादहमतीव।
वार्थीद्रष्टुंततस्तस्मान्मेमदर्थंदर्शयत्वमात्मानमव्ययं॥ ॥४॥ ॥ ॥ ॥

शिव॥ ॥शिव॥ ॥शिव

300

एवं चोक्तोऽर्जुनेन श्रीभगवानुवाच ॥ पश्यमिति ॥ पश्य मे मम पार्थ रूपाणि शतशोऽथ
सहस्रशः ॥ अनेकशः इत्यर्थः ॥ तानि च नानाविधानि अनेकप्रकाराणि ॥ दिव्यानि।
दिवि भवानि अप्राकृतानि ॥ नानावर्णाकृतीनि च ॥ नानाविलक्षणा नीलपीतादिप्र
कारा वर्णास्तथा आकृतयश्च अवयवसंस्थानविशेषा येषां रूपाणां तानि नानावर्णाकृ नाथ

भगवानुवाच ॥ पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः ॥ नानाविधानि दिव्या
नि नानावर्णाकृतीनि च ॥५॥ पश्यादित्यान्वसून्रुद्रानश्विनौ मरुतस्तथा ॥ बहू
न्यदृष्टपूर्वाणि पश्याश्चर्याणि भारत ॥६॥

पूर्वं न दृष्टानि अनुपलब्धानि

तीनि ॥५॥ पश्यादिति ॥ पश्य आदित्यान् द्वा
दश ॥ वसून् अष्टौ ॥ रुद्रान् एकादश ॥ अश्विनौ द्वौ ॥ मरुतः सप्तसप्तगणा ये तान् ॥ तथा
बहून्यन्यान्यपि ॥ अदृष्टपूर्वाणि मनुष्यलोके त्वया त्वत्तो अन्येन वा केन चित् ॥ प
श्य आश्चर्याणि अद्भुतानि भारत ॥६॥ ॥ ॥ ॥

नकेवलमेतावदेव॥ इहैवइति॥ इहएकस्थंएकस्मिन्स्थितंजगत्॥ कृत्स्नंसमस्तं
पश्याद्यइदानींसचराचरंसहचरेणाचरेणाच॥ ममदेहेगुडाकेश॥ यच्चान्यज्जय।
पराजयादिशंकसेयद्वाजयेमयदिवानोजयेयुरितियदवोचस्तदपिद्रष्टुंयदीच्छ
सि॥ ७॥ किंतु॥ नतुइति॥ नतुमांशक्यसेविश्वरूपधरंद्रष्टुंअनेनैवस्वचक्षुषा

इहैकस्थंजगत्कृत्स्नंपश्याद्यसचराचरं॥ ममदेहेगुडाकेशयच्चान्यद्द्रष्टु
मिच्छसि॥ ७॥ नतुमांशक्यसेद्रष्टुमनेनैवस्वचक्षुषा॥ दिव्यंददामितेचक्षुः
पश्यमेयोगमैश्वरं॥ ८॥॥ ॥ ॥ ॥ ॥शिव

स्वेनचक्षुषाप्राकृतेन॥ येनतुशक्यसेद्रष्टुंतद्दिव्यंददामितेतुभ्यंचक्षुस्तेन।
मेपश्य॥ ममयोगमैश्वरंईश्वरस्यममैश्वरंयोगंशक्त्यतिशयमित्यर्थः॥ ८॥
शिव॥ ॥ ॥शिव॥ ॥शिव

302

एवं इति ॥ एवं यथोक्तप्रकारेण रूपमुक्त्वा ॥ ततोऽनंतरं राजन् हे धृतराष्ट्र ॥ महायोगेश्वरो म
हांश्चासौ योगेश्वरश्चेति महायोगेश्वरो हरिर्नारायणो दर्शयामास दर्शितवान् ॥ पार्थाय पृ
थात्मजाय परमं रूपं विश्वरूपमैश्वरं ॥९॥ अनेक इति ॥ अनेकवक्त्रनयनं अनेकानि वक्त्रा।
णि नयनानि च यस्मिन् रूपे तदनेकवक्त्रनयनं ॥ अनेकाद्भुतदर्शनं ॥ अनेकान्यद्भुता।

संजय उवाच ॥ एवमुक्त्वा ततो राजन् महायोगेश्वरो हरिः ॥ दर्शयामास पार्थाय परमं रूप
मैश्वरं ॥९॥ अनेकवक्त्रनयनमनेकाद्भुतदर्शनं ॥ अनेकदिव्याभरणं दिव्यानेकोद्युता
युधं ॥१०॥

नि विस्मापकानि दर्शनानि यस्मिंस्तदनेकाद्भुतदर्शनं रूपं ॥ तथा अनेकदिव्या
भरणं अनेकानि दिव्यान्याभरणानि यस्मिन् रूपे तदनेकदिव्याभरणं ॥ तथा दिव्या।
नेकोद्यतायुधं दिव्यान्यनेकानि अस्मादीन्युद्यतानि आयुधानि यस्मिन् ॥ तद्दिव्याने।
कोद्यतायुधं दर्शयामासेति पूर्वेण संबंधः ॥१०॥ ॥ ॥ ॥ ॥

गी॰भा॰ किंच॥ दिव्येति॥ दिव्यमाल्यांबरधरं॥ दिव्यानि माल्यानि पुष्पाणि वराणि वस्त्राणि च
१५९ ध्रियंते येन स धरस्तं दिव्यमाल्यांबरधरं॥ दिव्यगंधानुलेपनं॥ दिव्यगंधानुलेपनं यस्य
303 स्य तं दिव्यगंधानुलेपनं॥ सर्वाश्चर्यमयं॥ सर्वाश्चर्यप्रायं देवमनंतं॥ नास्यांतोऽस्तीत्य
नंतस्तं विश्वतोमुखं॥ सर्वतोमुखं॥ सर्वभूतात्मत्वात्॥ तं दर्शयामास॥ अर्जुनोपिद

दिव्यमाल्यांबरधरं दिव्यगंधानुलेपनं॥ सर्वाश्चर्यमयं देवमनंतं विश्वतोमुखं॥११॥
दिवि सूर्यसहस्रस्य भवेद्युगपदुत्थिता॥ यदि भाः सदृशी सा स्याद्भासस्तस्य महात्मनः
॥१२॥

दर्श इत्यध्याह्रियते॥ या पुनर्भगवतो विश्वरूपस्य भास उपमा उच्यते॥ दिवीति
दिवि अंतरिक्षे तृतीयस्यां वा दिवि सूर्याणां सहस्रं तस्य युगपदुत्थितस्य या युगपदु।
त्थिता भाः॥ सा यदि सदृशी स्यात्तस्य महात्मनो विश्वरूपस्य भासो यदि वा न स्यात्॥ ततो
विश्वरूपस्य भा अतिरिच्यत इत्यभिप्रायः॥१२॥ ॥ ॥ ॥ १५९

किंच ॥ तत्रैवेति ॥ तत्र तस्मिन् विश्वरूपे एकस्मिन् स्थितमेकस्थं जगत्कृत्स्नं प्रविभक्त-
304 मनेकधा देवपितृमनुष्यादिभेदैः प्रपश्यद्दृष्टवान् ॥ देवदेवस्य हरेः शरीरे पाण्डवोऽर्जु-
नस्तदा ॥ १३ ॥ ततः इति ॥ ततस्तं दृष्ट्वा स विस्मयाविष्टो विस्मयेनाविष्टः विस्मयाविष्टः

तत्रैकस्थं जगत्कृत्स्नं प्रविभक्तमनेकधा ॥ अपश्यद्देवदेवस्य शरीरे पाण्डवस्तदा ॥ १३ ॥
ततः स विस्मयाविष्टो हृष्टरोमा धनंजयः ॥ प्रणम्य शिरसा देवं कृताञ्जलिरभाषत
॥ १४ ॥

हृष्टरोमाः हृष्टानि रोमाणि यस्य सोऽयं हृष्टरोमा अभवद्धनंजयः ॥ प्रणम्य प्रक-
र्षेण नत्वा प्रह्वीभूय ततः सन् शिरसा देवं विश्वरूपधरं ॥ कृताञ्जलिर्नमस्कारार्थं संपुटी-
कृतहस्तः सन्नभाषत उक्तवान् ॥ १४ ॥ ॥ ॥ ॥

305
कथंयत्त्वयादर्शितंविश्वरूपंतदहंपश्यामीतिस्वानुभवमाविःकुर्वन्‌॥पश्यामित्युपल
मे॥हेदेवतवदेहे॥देवान्‌सर्वान्‌॥तथाभूतविशेषसंघान्‌भूतविशेषाणांस्थावर
जंगमानांनानासंस्थानविशिष्टानांसंघाभूतविशेषसंघास्तान्‌॥किंचब्रह्माणंचतुर्मु

अर्जुनउवाच॥पश्यामिदेवांस्तवदेवदेहे॥सर्वांस्तथाभूतवि
शेषसंघान्‌॥ब्रह्माणमीशंकमलासनस्थमृषींश्चसर्वानुरगांश्चदि
व्यान्‌॥१५॥

खंईशमीशितारंप्रजानांकमलासनस्थंपृथिवीपद्ममध्येमेरुक
र्णिकासनस्थमित्यर्थः॥ऋषींश्चवशिष्ठादीन्सर्वानुरगांश्चवासुकिप्रभृतीन्दि १५०
व्यान्दिविभवान्‌॥१५॥॥

किंच॥अनेकेति॥अनेकबाहूदरवक्त्रनेत्रंअनेकानिबहूनि॥उदराणिवक्त्राणि
306 नेत्राणियस्यतवसत्वंअनेकबाहूदरवक्त्रनेत्रःतंअनेकबाहूदरवक्त्रनेत्रं॥पश्या
मित्वां॥सर्वतोऽनंतरूपं॥सर्वत्रानंतरूपंअनंतानिरूपाणियस्यतिअनंतरूपस्तम

अनेकबाहूदरवक्त्रनेत्रंपश्यामित्वांसर्वतोनंतरूपं ॥ नांत
नमध्यंनपुनस्तवादिंपश्यामिविश्वेश्वरविश्वरूपं ॥१६॥ ॥

नंतरूपं॥नांतंअंतोवसानं॥नमध्यंमध्यंनामद्वयोः॥कोट्योरंतरं॥नपुनस्तवा
दिंनचदेवस्यांतंपश्यामि॥नमध्यंपश्यामि॥नपुनरादिंपश्यामिहेविश्वेश्वर
विश्वरूप ॥१६॥ ॥ ॥ ॥ ॥श्रीव

गी·भा·
१५१
307

किंच॥ किरीटिनमिति॥ किरीटिनं किरीटो नाम शिरोभूषणविशेषः तद्यस्यास्ति स किरीटी तं
किरीटिनं॥ तथा गदास्य विद्यत इति स गदी तं गदिनं॥ चक्रिणं च चक्रमस्यास्तीति चक्री
तं चक्रिणं तेजोराशिं तेजःपुंजः सर्वतोदीप्तिमंतं सर्वतोदीप्तिर्यस्यास्ति सर्वतोदी
प्तिमानतं सर्वतोदीप्तिमंतं॥ पश्यामि त्वां दुर्निरीक्ष्यं दुःखेन निरीक्ष्यो दुर्निरीक्ष्यस्तं

किरीटिनं गदिनं चक्रिणं च तेजोराशिं सर्वतोदीप्तिमंतं॥ प
श्यामि त्वां दुर्निरीक्ष्यं समंतात् दीप्तानलार्कद्युतिमप्रमेयं॥१७॥

दुर्निरीक्ष्यं समंतात्समंततः सर्वत्र॥ दीप्तानलार्कद्युतिं अनलश्च अर्कश्च अनलार्कौ
दीप्तानलार्कयोः॥ द्युतिरिव द्युतिस्तेजो यस्य स त्वं दीप्तानलार्कद्युतिस्तं त्वां दीप्तान
लार्कद्युतिं॥ अप्रमेयं अशक्यपरिच्छेदमित्येतत्॥ अत एव ते योगशक्तिदर्शनादनु १५१
मिनोमि॥१७॥ ॥ ॥

त्वमइति ॥ त्वमक्षरं न क्षरतीत्यक्षरं ॥ परमं ब्रह्म वेदितव्यं ज्ञातव्यं मुमुक्षुभिः ॥ त्वमस्य
308 विश्वस्य समस्तस्य जगतः परं प्रकृष्टं निधानं निधीयते तस्मिन्निति निधानं परमाश्रय इत्य

त्वमक्षरं परमं वेदितव्यं त्वमस्य विश्वस्य परं निधानं ॥ त्वमव्ययः
शाश्वतधर्मगोप्ता सनातनस्त्वं पुरुषो मतो मे ॥१८॥ ॥

र्थः ॥ किं च त्वमव्ययो न तव व्ययो विद्यत इत्यव्ययः ॥ शाश्वतधर्मगोप्ता शाश्वद्भवः शा
श्वतो नित्यो धर्मस्तस्य गोप्ता ॥ सनातनश्चिरंतनः त्वं पुरुषः परो मतोऽभिप्रेतो मम ॥१८॥

किंच॥ अनादीति॥ अनादिमध्यांतमादिश्च मध्यं चांतश्च न विद्यते यस्य सोऽनादिमध्यांत
स्तं त्वा अनादिमध्यांतं॥ अनंतवीर्यं अनंतं वीर्यं यस्यानंतोस्तीत्यनंतवीर्यस्तं त्वामनंतवीर्यं॥
अनंतबाहुं अनंता बाहवो यस्य तं तव सत्वमनंतबाहुं तं त्वामनंतबाहुं॥ शशिसूर्यनेत्रं

अनादिमध्यांतमनंतवीर्यमनंतबाहुं शशिसूर्यनेत्रं॥ पश्या
मि त्वां दीप्तहुताशवक्त्रं स्वतेजसा विश्वमिदं तपंतं ॥१९॥ ॥

शशिसूर्यौ नेत्रे यस्य तं चंद्रादित्यनयनं॥ पश्यामि त्वां दीप्तहुताशवक्त्रं दीप्तश्चासौ हु
ताशश्चेति दीप्तहुताशः स वक्त्रं यस्य तं वसत्वं दीप्तहुताशवक्त्रः तं त्वां स्वतेजसा
विश्वमिदं समस्तं तपंतं संतापयंतं ॥१९॥ ॥ ॥ शिव

द्यावाइति॥द्यावापृथिव्योरिदंअंतरंअंतरिक्षंव्याप्तंत्वयाविश्वरूपधरेणएकेनहिदिश
श्चसर्वाश्चसर्वाव्याप्ताःदृष्ट्वाउपलभ्यअद्भुतंविस्मापकंरूपमिदंतवउग्रंक्रूरंलोक
310 त्रयंलोकानांत्रयंप्रव्यथितंप्रचलितंवा॥हेमहात्मनअत्यंतदुःखभाव॥२०॥अथाधुनापु
रायद्वाजयेमयदिवानोजयेयुरित्यर्जुनस्यसंशयआसीत्तन्निर्णयायपांडवानांजय
मैकांतिकंदर्शयिष्यामीति॥प्रवृत्तोभगवांस्तत्प्रपंचयन्नाह॥किंच॥अमीइति॥अमीहि

द्यावापृथिव्योरिदमंतरंहिव्याप्तंत्वयैकेनदिशश्चसर्वाः॥दृष्ट्वाद्भुतंरूपमिदंतवोग्रंलो
कत्रयंप्रव्यथितंमहात्मन्॥२०॥अमीहित्वांसुरसंघाविशंतिकेचिद्भीताःप्रांजलयोगृ
णंति॥स्वस्तीत्युक्त्वामहर्षिसिद्धसंघाःस्तुवंतित्वांस्तुतिभिःपुष्कलाभिः॥२१॥ ॥

युध्यमानायोधारस्त्वांसुरसंघायेभूभारावतरणायावतीर्णावस्वादिदेवसंघामनुष्य
संस्थानास्त्वांविशंतिप्रविशंतोदृश्यंते॥अत्रकेचिद्भीताःप्रांजलयःसंतोगृणंति।
स्तुवंतित्वामन्येपलायनेप्यशक्ताःसंतोयुद्धेप्रत्युपस्थिते॥उत्पातादिनिमित्तानु
पलक्ष्यस्वस्त्यस्तुजगतइत्युक्त्वामहर्षिसिद्धसंघामहर्षीणांसिद्धानांसंघाःस्तुवंति

किंवान्यत॥ रुद्रेति॥ रुद्रादित्यावसवोयेचसाध्याविश्वेश्विनौविश्वेदेवाःअश्विनौचदेवौ
मरुतः॥ऊष्मपाश्चपितरःगंधर्वयक्षासुरसिद्धसंघाः॥गंधर्वाहाहाहूहूप्रभृतयःयक्षाः
कुबेरप्रभृतयः॥असुराविरोचनादयःसिद्धाःकपिलादयःतेषांसंघागंधर्वयक्षासुरसि
द्धसंघाः॥वीक्षंतेत्वांविस्मिताविस्मयमापन्नाःसंतस्तएवसर्वे॥यस्मात्॥२२॥रु

रुद्रादित्यावसवोयेचसाध्याविश्वेश्विनौमरुतश्चोष्मपाश्च॥गंधर्वयक्षासुरसिद्धसं
घावीक्षंतेत्वांविस्मिताश्चैवसर्वे॥२२॥रूपंमहत्तेबहुवक्त्रनेत्रंमहाबाहोबहुबा
हूरुपादं॥बहूदरंबहुदंष्ट्राकरालंदृष्ट्वालोकाःप्रव्यथितास्तथाहं॥२३॥॥

पश्यति॥रूपंमहदतिप्रमाणंतेतवबहुवक्त्रनेत्रंबहूनिवक्त्राणिमुखानिनेत्राणिच
चक्षूंषिचयस्मिंस्तत्रूपंबहुवक्त्रनेत्रं॥हेमहाबाहोबहुबाहूरुपादंबहवोबाहवःऊ
रवःपादाश्चयस्मिंस्तद्रूपंतद्बहुबाहूरुपादं॥किंच॥बहूदरंबहूनुदराणियस्मिंस्तद्बहू
दरं॥बहुदंष्ट्राकरालं॥बह्वीभिर्दंष्ट्राभिःकरालंविकृतंतद्बहुदंष्ट्राकरालं॥दृष्ट्वारूपमी
दृशंलोकालौकिकाःप्राणिनःप्रव्यथिताःप्रचलिताभयेन॥तथाहमपितवेदंकारणं ॥२३॥

312

नमः इति॥नभःस्पृशंद्युस्पृशमित्यर्थः॥दीप्तंप्रज्वलितंअनेकवर्णाभयंकरानानासं
स्थानायस्मिन्त्वयितंत्वामनेकवर्णंव्यात्ताननंव्यात्तानिविवृतानिआननानिमुखा
नियस्मिन्त्वयितंत्वांव्यात्ताननं॥दीप्तविशालनेत्रंदीप्तानिप्रज्वलितानिविशाला
निविस्तीर्णानिनेत्राणियस्मिन्त्वयितंत्वांदीप्तविशालनेत्रं॥दृष्ट्वाहित्वांप्रव्यथितां

नभःस्पृशंदीप्तमनेकवर्णंव्यात्ताननंदीप्तविशालनेत्रं॥दृ
ष्ट्वाहित्वांप्रव्यथितान्तरात्माधृतिंनविंदामिशमंचविष्णो॥२४॥

नरात्माप्रव्यथितोंतरात्मामनोयस्यममसोहंप्रव्यथितांतरात्मासन्॥धृतिंनविं
दामिधैर्यंनलभे॥शमंचउपशमंमनस्तुष्टिंहेविष्णो॥कस्मात्॥२४॥॥॥॥॥
शिवायनमः॥॥ॐ॥
॥शिव॥

दंष्ट्रा इति ॥ दंष्ट्राकरालानि च दंष्ट्राभिः करालानि विकृतानि ते तव मुखानि दृष्ट्वैव उपलभ्य का
लानलसन्निभानि प्रलयकाले लोकानां दाहकाग्निः कालानलः तत्सन्निभानि सदृशानि
कालानलसदृशानि मुखानि दृष्ट्वैव न तत् ॥ दिशः पूर्वापरविवेकेन न जाने ॥ दिङ्मूढो ।

दंष्ट्राकरालानि च ते मुखानि दृष्ट्वैव कालानलसन्निभानि ॥ दिशो
न जाने न लभे च शर्म प्रसीद देवेश जगन्निवास ॥ २५ ॥ ॥ ॥

जातोऽस्मि ॥ ततो न लभे च नोपलभे शर्म सुखं च ॥ अतः प्रसीद प्रसन्नो भव ॥ हे देवेश ज
गन्निवास ॥ येभ्यो मम पराजयाशंका प्रागेव
आसीत् सा चापगता ॥ २५ ॥

१५५

यतः ॥ अमी इति ॥ अमी च त्वां धृतराष्ट्रस्य पुत्राः दुर्योधनादयः त्वरमाणा विशंतीति व्य
वहितेन संबंधः सर्वे सहैव संहिताः अवनिपालसंघैः ॥ अवनीं पृथ्वीं पालयंतीति
314 अवनिपालास्तेषां संघैः ॥ किंच ॥ भीष्मः द्रोणः सूतपुत्रः तथासौ सहास्मदीयैर्धृष्ट
द्युम्नप्रभृतिभिरपि योधमुख्यैः योधानां मुख्यैः प्रधानैः सह ॥ २६ ॥ वक्त्राणीति ॥ वक्त्राणि

अमी च त्वां धृतराष्ट्रस्य पुत्राः सर्वे सहैवावनिपालसंघैः ॥ भीष्मो द्रोणः सूतपुत्रस्त
थासौ सहास्मदीयैरपि योधमुख्यैः ॥ २६ ॥ वक्त्राणि ते त्वरमाणा विशंति दंष्ट्राकराला
नि भयानकानि ॥ केचिद्विलग्ना दशनांतरेषु संदृश्यंते चूर्णितैरुत्तमांगैः ॥ २७ ॥

मुखानि ते तव त्वरमाणाः त्वरायुक्ताः संतो विशंति ॥ किंविशिष्टानि दंष्ट्राकरालानि
भयानकानि भयंकराणि ॥ किंच ॥ केचित्त्वन्मुखानि प्रविष्टानां मध्ये विलग्नाः दशनांत
रेषु मांसमिव भक्षितं संदृश्यंते उपलभ्यंते ॥ चूर्णितैः चूर्णीकृतैः उत्तमांगैः शिरोभिः २७

कथंप्रविशंतिमुखानीत्याह॥यथाइति॥यथानदीनांस्रवंतीनांबहवोऽनेकेंऽबूनांवेगाः
अंबुवेगाःत्वराविशेषाःसमुद्रमेवाभिमुखाःप्रतिमुखाःसंमुखाद्रवंतिविशंति॥तथात
वतवअमीभीष्मादयोनरलोकवीरामनुष्यलोकेशूराविशंतिवक्त्राण्यभितोपरि

यथानदीनांबहवोंबुवेगाःसमुद्रमेवाभिमुखाद्रवंति॥तथातवामीनरलोकवी
राविशंतिवक्त्राण्यभितोज्वलंति॥२८॥यथाप्रदीप्तंज्वलनंपतंगाविशंतिनाशाय
समृद्धवेगाः॥तथैवनाशायविशंतिलोकास्तवापिवक्त्राणिसमृद्धवेगाः २९

तःज्वलंतिप्रकाशमानानि॥२८॥तेकिमर्थंविशंतिकथंवाइत्याह॥यथाइति॥यथाप्र
दीप्तंज्वलनंज्वलितमग्निंपतंगाःद्वद्रुपतंगाःपक्षिणःविशंतिनाशायविनाशायस
मृद्धवेगाःसमृद्धउद्भूतोवेगोगतिर्येषांतेसमृद्धवेगाः॥तथैवनाशायविशंतिलो। १५५
काःप्राणिनःतवापिवक्त्राणिसमृद्धवेगाः॥२९॥

त्वं पुनः॥ लेलिह्यसे इति॥ लेलिह्यसे आस्वादयसि॥ ग्रसमानोऽन्तः प्रवेशयन्॥ समंतात् समंत
तः लोकान्समग्रान्॥ वदनैर्ज्वलद्भिः दीप्यमानैः तेजोभिरापूर्य संव्याप्य जगत्सम
ग्रं॥ तद्भासः ग्रासमस्तमित्यन्वयः॥ किंच भासो दीप्तयः तवोग्राः क्रूराः प्रतपंति संतापं
कुर्वंति॥ हे विष्णो व्यापनशील॥ यस्मादेवमुग्रस्वभावोऽतः॥३०॥ आख्याहि इति॥ आख्या॥

लेलिह्यसे ग्रसमानः समंताल्लोकान्समग्रान्वदनैर्ज्वलद्भिः॥ तेजोभिरापूर्य जग
त्समग्रं भासस्तवोग्राः प्रतपंति विष्णो॥३०॥ आख्याहि मे को भवानुग्ररूपो नमोऽस्तु
ते देववर प्रसीद॥ विज्ञातुमिच्छामि भवंतमाद्यं न हि प्रजानामि तव प्रवृत्तिं॥३१॥

हि कथय मे मह्यं को भवानेवमुग्ररूपः क्रूराकारः॥ नमोऽस्तु ते तुभ्यं हे देववर देवानां
प्रधान प्रसीद प्रसादं कुरु॥ विज्ञातुं विशेषेण ज्ञातुं इच्छामि भवंतं॥ आद्यो भवं आद्यं।
न हि यस्मात् प्रजानामि तव त्वदीयां प्रवृत्तिं चेष्टां॥३१॥ ॥ ॥॥

कालोऽस्मीति ॥ कालोऽस्मि लोकक्षयकृत् लोकानां क्षयं करोतीति लोकक्षयकृत् ॥ प्रवृद्धो वृ
द्धिंगतो यदर्थं प्रवृत्तः ऋतेपि विना त्वां न भविष्यति ॥ भीष्मद्रोणकर्णप्रभृतयः सर्वे
येभ्यस्त्वाशंका येऽवस्थिताः प्रत्यनीकेषु योधाः अनीकमनी ✕ तत्स्थाः ॥ लोकान्समा

श्रीभगवानुवाच ॥ कालोऽस्मि लोकक्षयकृत्प्रवृद्धो लोकान्समाहर्तुमिह प्रवृत्तः
ऋतेपि त्वां न भविष्यंति सर्वे येऽवस्थिताः प्रत्यनीकेषु योधाः ॥३२॥ ॥ ॥

हर्तुं संहर्तुं इहास्मिन् ॥ लोके प्रवृत्तः ✕ कं प्रति प्रतिपक्षभूतेषु अनीकेषु योधा।
योद्धारः यस्मादेवं ॥२२॥ ॥ ॥
॥शिव॥॥

तस्माद्विति॥ तस्मात्वमुत्तिष्ठ भीष्मद्रोणप्रभृतयो रतिरथाः अजेया देवैरपि अर्जुनेन जिता इति यशो लभस्व केवलपुण्यैर्हि तल्लभ्यते॥ जित्वा शत्रून् दुर्योधनप्रभृतीन्॥ भुंक्ष्व राज्यं॥ समृद्धं॥ अकंटकं समृद्धं मयैवैते निहताः प्राणैर्वियोजि।

तस्मात्त्वमुत्तिष्ठ यशो लभस्व जित्वा शत्रून् भुंक्ष्व राज्यं समृद्धं॥ मयैवैते निहताः पूर्वमेव निमित्तमात्रं भव सव्यसाचिन्॥ ३३॥॥

ताः पूर्वमेव निमित्तमात्रं भव॥ हे सव्यसाचिन्॥ वामेन हस्तेन शरक्षेपात्।
सव्यसाचीत्युच्यतेऽर्जुनः॥ ३३॥
॥ शिवजी॥

गी॰भा॰
१५८
319

द्रोणंइति॥द्रोणंचयेषुयेषुअर्जुनस्याशंकातांस्तान्व्यपदिशतिभगवान्॥मयाह
तानिति॥तत्रद्रोणभीष्मयोस्तावत्प्रसिद्धमाशंकाकारणं।द्रोणोधनुर्वेदाचार्योदि
व्यास्त्रसंपन्नःआत्मनोविशेषतोगुरुर्गरिष्ठश्च॥भीष्मःस्वच्छंदमृत्युःदिव्यास्त्रसंप
न्नःपरशुरामेणद्वंद्वयुद्धमगमन्नचपराजितः॥तथाजयद्रथोयस्यपितातपश्च

द्रोणंचभीष्मंचजयद्रथंचकर्णंतथान्यानपियोधवीरान्॥मया
हतांस्त्वंजहिमाव्यथिष्ठायुध्यस्वजेतासिरणेसपत्नान्॥३४॥

तिममपुत्रस्यशिरोभूमौपातयिष्यतियःतस्यापिशिरःपतिष्यतीति॥कर्णोपिवा
सवदत्तयाशक्त्याअमोघयासंपन्नःसूर्यपुत्रःकानीनोयतोऽतस्तन्नाम्नैवनिर्दे।
शः मयाहतांस्त्वंजहिनिमित्तमात्रेणमाव्यथिष्ठास्तेभ्योभयंमाकार्षीःयुध्यस्वजेता १५८
सिदुर्योधनप्रभृतीन्रणेयुद्धेसपत्नान्शत्रून्॥३४॥

एतद् इति॥ एतच्छ्रुत्वा वचनं केशवस्य सर्वोक्तं कृतांजलिः सन् वेपमानः कंपमानः कि
रीटी नमस्कृत्वा भूयः पुनरेवाह उक्तवान् कृष्णं सगद्गदं भयाविष्टस्य दुःखाभिघाता
त्स्नेहाविष्टस्य च हर्षोद्भवात् अश्रुपूर्णनेत्रत्वे सति श्लेष्मणा कंठावरोधः ततश्च वाचोऽ
पाटवं मंदमंदशब्दत्वं यत्स गद्गद॥ स्तेन सह वर्तत इति सगद्गदं वचनमाहेति कि

संजय उवाच॥ एतच्छ्रुत्वा वचनं केशवस्य कृतांजलिर्वेपमानः किरीटी॥ नमस्कृ
त्वा भूय एवाह कृष्णं॥ सगद्गदं भीतभीतः प्रणम्य ॥३५॥ ॥ ॥ ॥ ॥

याविशेषणमेतत्॥ भीतभीतः पुनः पुनर्भयाविष्टचेताः सन् प्रणम्य प्रह्वीभूत्वा आ
हेति व्यवहितेन संबंधः अत्रावसरे संजयवचनं साभिप्रायं॥ कथं द्रोणादिचतुर्ष्वर्जुनेन।
निहतेष्वजेयेषु चतुर्षु निराश्रयो दुर्योधनो निहत एवेति मत्वा धृतराष्ट्रो जयं प्रति
निराशः सन् संधिं करिष्यति ततः शांतिरुभयेषां भविष्यतीति तदपि नाश्रौषीद्धृतराष्ट्रो

गी·भा·
१५८
321

स्थानेइति॥स्थानेयुक्तंकिंतत्तवप्रकीर्त्यात्वन्महात्म्यकीर्तनेन श्रुतेनहृषीकेशायज्जग
त्प्रहृष्यतिहर्षमुपैतीतत्स्थानेयुक्तमित्यर्थः॥अथवाविषयविशेषणंपदंस्थानेइति
युक्तोहर्षादिविषयोभगवान्यतईश्वरःसर्वात्मासर्वभूतसुहृच्चेति॥तथानुरज्यतेच

अर्जुनउवाच॥स्थानेहृषीकेशतवप्रकीर्त्याजगत्प्रहृष्यत्यनुरज्यतेच ॥ रक्षांसि
भीतानिदिशोद्रवंतिसर्वेनमस्यंतिचसिद्धसंघाः ॥३६॥ ॥ ॥ ॥॥

अनुरागंचोपैति॥तच्चविषयइतिव्याख्येयं॥किंच॥रक्षांसिभीतानिभयावि
ष्टानिदिशोद्रवंतिगच्छंति॥तच्चस्थानेविषये ॥ सर्वेनमस्यंतिनमस्कुर्वंतिच १५८
सिद्धसंघाःसिद्धानांसमुदायाःकपिलादीनां ॥३६॥ ॥ ॥॥ ॥॥

तत्र स्थाने भगवतो हर्षादिविषयत्वे हेतुं दर्शयति ॥ कस्मादिति ॥ कस्माच्च हेतोस्ते तुभ्यं ।
न नमेरन् न नमस्कुर्युः हे महात्मन् गरीयसे गुरुतराय यतो ब्रह्मणो हिरण्यगर्भस्या
322 प्यादिकर्त्ता कारणं ततस्तस्मै ब्रह्मादिकर्त्रे कथमेते न नमस्कुर्युः अतो हर्षादीनां
नमस्कारस्य च स्थाने त्वम्महो विषय इत्यर्थः ॥ हे अनंत देवेश जगन्निवास ॥ त्वमक्षरं

ओं कस्माच्च ते न नमेरन्महात्मन् गरीयसे ब्रह्मणोऽप्यादिकर्त्रे ॥ अनंत
देवेश जगन्निवास त्वमक्षरं सदसत्तत्परं यत् ॥ ३७ ॥ ॥ ॥

तत्परं यद्वेदांतेषु श्रूयते ॥ किं तत् सदसत् सत् यद्विद्यमानं असच्च यत्र नास्तीति
बुद्धिः ते उपधानभूते सदसती यस्याक्षरस्य तद्द्वारेण सदसदित्युपचर्यते परमा
र्थतस्तु सदसतः परं यदक्षरं वेदविदो वदंति तत्त्वमेव नान्यदित्यभिप्रायः ॥ ३
७ ॥ ॥ ॥ शिव ॥

पुनरपिस्तौति॥ त्वमादिरिति॥ त्वमादिदेवोजगतःस्रष्टृत्वात्पुरुषःपुरुषायनात्पुरा
णश्चिरंतनः॥ त्वमेवास्यविश्वस्यपरंप्रकृष्टं॥ निधानंनिधीयतेयस्मिन्जगत्सर्वंम
हाप्रलयादाविति॥ किंचवेत्तासिवेदितासिसर्वस्यैववेद्यजातस्य॥ यच्चवेद्यंवेदना
र्हंतच्चासि॥ परंचधामपरंपदंवैष्णवं॥ ३८॥ त्वयाततंव्याप्तंविश्वंसमस्तं॥ अनंतरूपअनंत

ॐत्वमादिदेवःपुरुषःपुराणस्त्वमस्यविश्वस्यपरंनिधानं॥ वेत्तासिवेद्यंचपरंचधा
मत्वयाततंविश्वमनंतरूप॥ ३८॥ ॐवायुर्यमोऽग्निर्वरुणःशशांकःप्रजापतिस्त्वं
प्रपितामहश्च॥ नमोनमस्तेस्तुसहस्रकृत्वःपुनश्चभूयोपिनमोनमस्ते॥ ३९॥

नविद्यतेन्तोयस्यवरूपाणांकिंच॥ वायुस्त्वंयमश्चाग्निर्वरुणोऽपांपतिःशशांकःचंद्रमाः
प्रजापतिस्त्वंकश्यपादिःप्रपितामहश्चपितामहस्यापिपिताप्रपितामहःपितामहो
ब्रह्माब्रह्मणोपिपितेत्यर्थः॥ नमोनमस्तेतुभ्यमस्तु॥ सहस्रकृत्वःपुनश्चभूयोपि
नमोनमस्ते॥ बहुशोनमस्कारक्रियाभ्यासावृत्तिगणनंकृत्वसुचोच्यते॥ पुनश्चभूय

१५५

324 नमः इति ॥ नमः पुरस्तात्पूर्वस्यां दिशि तुभ्यं ॥ अथ पृष्ठतोपि ते नमोस्तु ते ॥ सर्वत ॥ एव सर्वा
सु दिक्षु सर्वतः स्थिताय ते सर्व अनंतवीर्यामितविक्रमः ॥ अनंतवीर्यं यस्य वीर्यम
मितो विक्रमोः स्य विक्रमः ॥ वीर्यवानपि कश्चिच्छस्त्रादि विषये न पराक्रमते मंद पराक्रमो
वा ॥ त्वं तु अनंतवीर्यामितपराक्रमश्चेति अनंतवीर्यामितविक्रमः ॥ सर्वं समस्तं जगत् ॥

ॐ नमः पुरस्तादथ पृष्ठतस्ते नमोस्तु ते सर्वत एव सर्व ॥ अनंत
वीर्यामितविक्रमस्त्वं सर्वं समाप्नोषि ततोसि सर्वः ॥४०॥ ॥

त्समाप्नोषि सम्यगेकात्मना आप्नोषि यतस्ततस्तस्मादसि भवसि ॥ सर्वः त्वया वि
नाभूतं न किंचिदस्तीत्यर्थः ॥ यतोहं त्वन्माहात्म्यापरिज्ञानादपराद्धोतः ॥४०॥
॥ ॥ ॐ नमः
ॐ नमः ॥ ॥ ॥ ॥ शिवाय ॥
शिवाय ॥

सखाइति॥सखासमानवयाइतिमत्वाज्ञात्वाविपरीतबुद्ध्याप्रसभमभिभूयप्रसह्ययदुक्तं
हेकृष्णहेयादवहेसखेतिच॥अजानताअज्ञानिनामूढेन॥किमजानतात्वादृ॥महि
मानंमाहात्म्यं॥तवेदमीश्वरस्यविश्वरूपंनदेवमहिमानमजाननेतिवैयधिकरण्येन
संबंधः॥तवेमंइतिपाठोयस्मिंस्तदासमानाधिकरण्यमेव॥मयाप्रमादाद्विक्षिप्तचि
त

सखेतिमत्वाप्रसभंयदुक्तंहेकृष्णहेयादवहेसखेति ॥ अजा
नतामहिमानंतवेदंमयाप्रमादात्प्रणयेनवापि ॥ ४१॥॥॥॥

त्ततया॥प्रणयेनवापिप्रणयोनामस्नेहनिमित्तोविस्रंभः तेनापिकारणेनयदुक्त
वानस्मि ॥४१॥॥ ॥शिवायनमः॥ ॥ ॥ ॥शिव

यच्चाइति॥यच्चावहासार्थंपरिहासप्रयोजनायासत्कृतःपरिभूतोसिभवसि॥क्वविहा।
326 रशय्यासनभोजनेषुविहरणंविहारःशयनंशय्याआसनमास्थायिकाभोजनमद
नंइत्येतेषुविहारशय्यासनभोजनेषु॥एकःपरोक्षःसन्नसत्कृतोसिपरिभूतोसि॥

यच्चावहासार्थमसत्कृतोसिविहारशय्यासनभोजनेषु॥एकोथ
वाप्यच्युततत्समखंतत्खामयेत्वामहमप्रमेयं॥४२॥॥॥

अथवाहेअच्युततत्समखंतत्खहः॥क्रियाविशेषणार्थःप्रत्यक्षंवाअसत्कृतोसित
त्सर्वमपराधजातंत्वामहंखामयेखमांकारयेत्वामहमप्रमे
यं॥यतस्त्वा॥४२॥॥

गी॰भा॰
१९१
327

पितेति॥ पितासि जनयितासि लोकस्य प्राणिजातस्य चराचरस्य स्थावरजंगमस्य न केवलं
पितासि त्वमस्य जगतः पूज्यश्च पूजार्हो यतो गुरुर्गरीयान्॥ गुरुतरः कस्माद्गुरुत्वमित्या
ह॥ न त्वत्समः त्वत्तुल्योस्ति नहीश्वरद्वयं संभवति अनेकेश्वरत्वे व्यवहारानुपपत्तेः त्वत्स
मएव द्वन्यो न संभवति॥ कुत एवान्योभ्यधिकः स्यात् लोकत्रयेपि सर्वस्मिन्॥ अप्रतिम
प्रभाव प्रतिमीयते यया सा प्रतिमा न विद्यते प्रतिमा यस्य तव प्रभावस्य स त्वमप्रतिमप्रभा

पितासि लोकस्य चराचरस्य त्वमस्य पूज्यश्च गुरुर्गरीयान्॥ न त्वत्समोस्त्यभ्यधिकः कुतो
न्यो लोकत्रयेप्यप्रतिमप्रभाव॥४३॥ तस्मात्प्रणम्य प्रणिधाय कायं प्रसादये त्वामहमी
शमीड्यं॥ पितेव पुत्रस्य सखेव सख्युः प्रियः प्रियायार्हसि देव सोढुं॥४४॥ ॥ ॥॥

वः॥ हे अप्रतिमप्रभाव निरतिशयप्रभावेत्यर्थः॥४३॥ तस्मादिति॥ तस्मात्प्रणम्य नमस्कृ
त्वा प्रणिधाय प्रकर्षेण नीचैः कृत्वा कायं शरीरं॥ प्रसादये प्रसादं कारये त्वामहं ईशमीशि
तारं ईड्यं स्तुत्यं त्वं पुनः पुत्रस्यापराधं यथा पिता क्षमते सर्वं॥ सखा इव सख्युरपराधं॥ य
था वा प्रियः॥ प्रियाया अपराधं क्षमते॥ एवमर्हसि हे देव सोढुं प्रसहितुं क्षंतुमित्यर्थः॥४४॥ १९१

328

अदृष्टइति॥अदृष्टपूर्वंनकदाचिदपिदृष्टपूर्वमिदंविश्वरूपंतवमयाअन्यैर्वातदहं
दृष्ट्वाहृषितोस्मि॥भयेनप्रव्यथितंमनोमे॥अतस्तदेवमेदर्शयदेवरूपंयन्मनस्त्वावंप्र
सीददेवेशजगन्निवासोजगन्निवासःहेजगन्निवास॥४५॥किंच॥किरीटिनंकिरीटि

अदृष्टपूर्वंहृषितोस्मिदृष्ट्वाभयेनचप्रव्यथितंमनोमे॥तदेवमेदर्शयदेवरूपं
प्रसीददेवेशजगन्निवास॥४५॥किरीटिनंगदिनंचक्रहस्तंइच्छामित्वांद्रष्टुमहं
तथैव॥तेनैवरूपेणचतुर्भुजेनसहस्रबाहोभवविश्वमूर्ते॥४६॥ ॥ ॥

वंतं॥तथागदिनंगदावंतं॥चक्रहस्तंइच्छामिप्रार्थयेत्वांद्रष्टुमहंतथैवपूर्ववदि
त्यर्थः॥यतएवंतस्मात्तेनैवरूपेणवसुदेवपुत्ररूपेणचतुर्भुजेन॥सहस्रबाहोव
र्तमानिकेनविश्वरूपेणभवविश्वमूर्तेउपसंहृत्यविश्वरूपंतथैवपूर्वरूपेणभवेत्यर्थः ५६

अर्जुनं भीतमुपलभ्य संहृत्य विश्वरूपं प्रियवचनेनाश्वासयन् ॥ मया इति ॥ मया प्रसन्नेन
प्रसादो नाम त्वय्यनुग्रहबुद्धिः तद्वता ॥ प्रसन्नेन मया तवेदं हे अर्जुन ॥ इदं परं रूपं विश्वा
रूपं दर्शितं मायात्मयोगात् आत्मन ऐश्वर्यस्य सामर्थ्यात् ॥ तेजोमयं तेजःप्रायं विश्वं समस्तं ॥ अ
नन्तं अन्तरहितं ॥ आद्यं भवमाद्यं ॥ यद्रूपं मे मम त्वदन्येन त्वत्तोऽन्येन केनचिन्न दृष्टपूर्वं
४७ ॥ मम रूपदर्शनेन कृतार्थ एव त्वं संवृत्त इति स्तौति ॥ न वेदयज्ञाध्ययनैश्चतुर्णाम

श्रीभगवानुवाच ॥ मया प्रसन्नेन तवार्जुनेदं ॥ रूपं परं दर्शितमात्मयोगात् ॥ तेजोमयं वि
श्वमनन्तमाद्यं यन्मे त्वदन्येन न दृष्टपूर्वं ॥ ४७ ॥ न वेदयज्ञाध्ययनैर्न दानैर्न च क्रिया।
भिर्न तपोभिरुग्रैः ॥ एवंरूपः शक्य अहं नृलोके द्रष्टुं त्वदन्येन कुरुप्रवीर ॥ ४८ ॥ ॥

पि वेदानामध्ययनैर्यज्ञाध्ययनैश्च वेदाध्ययनेनैव यज्ञाध्ययनस्य सिद्धत्वात् पृथग्यज्ञाध्यय
नग्रहणं यज्ञविज्ञानोपलक्षणार्थं ॥ न च दानैस्तुलापुरुषादिभिः न च क्रियाभिः अग्निहोत्रादिभिः श्रौ
तादिभिः ॥ नापि तपोभिरुग्रैश्चान्द्रायणादिभिरुग्रैर्घोरैः ॥ एवंरूपो यथा दर्शितं विश्वरूपं
यस्य सोऽहमेवंरूपः शक्यो न प्राप्तुं ॥ अहं नृलोके मनुष्यलोके द्रष्टुं त्वदन्येन त्वत्तोऽन्ये

१६२

मा ते इति ॥ मा ते व्यथा मा भूत् ते भयं ॥ मा च विमूढभावो विमूढचित्तता ॥ दृष्ट्वा उपलभ्य
330 रूपं घोरमीदृक् ॥ यथा दर्शितं मम इदं व्यपेतभीर्विगतभयः प्रीतमना त्वं पुनः भूयः ॥
त्वं तदेव मे मम चतुर्भुजं शंखचक्रगदाधरं तवेष्टं रूपं इदं प्रपश्य ॥४९॥ इत्य इति इत्ये
वमेवमर्जुनं वासुदेवस्तथाभूतं वचनं उक्त्वा ॥ स्वकं वसुदेवगृहे जातं रूपं दर्शयामास ।

मा ते व्यथा मा च विमूढभावो दृष्ट्वा रूपं घोरमीदृङ्ममेदं ॥ व्यपेतभीः प्रीतमनाः पु
नस्त्वं तदेव मे रूपमिदं प्रपश्य ॥४९॥ संजय उवाच ॥ इत्यर्जुनं वासुदेवस्तथोक्त्वा
स्वकं रूपं दर्शयामास भूयः ॥ आश्वासयामास च भीतमेनं भूत्वा पुनः सौम्यवपुर्म
हात्मा ॥५०॥ अर्जुन उवाच ॥ दृष्ट्वेदं मानुषं रूपं तव सौम्यं जनार्दन इदानीमस्मि सं
वृत्तः सचेताः प्रकृतिं गतः ॥५१॥

मां दर्शितवान् ॥ भूयः पुनः ॥ आश्वासयामास
आश्वासितवांश्च भीतमेनं भूत्वा पुनः सौम्यवपुः प्रसन्नदेहो महात्मा ॥ दृष्ट्वा इदं मा
नुषं रूपं मत्सावप्रसन्नं ॥ तव सौम्यं जनार्दन ॥ इदानीमस्मि संवृत्तः संजातः किं सचे
ताः प्रसन्नचित्तः प्रकृतिं स्वभावं गतः स्थास्मि ॥५१॥ ॥ ॥ शिव

गी॰ भा॰
१६३
331

सुदुर्दर्शेति ॥ सुदुर्दर्शं सुष्ठु दुःखेन दर्शनमस्येति सुदुर्दर्शमिदं रूपं दृष्टवानसि यन्मम देवा
अप्यस्य मम रूपस्य नित्यं सर्वदा दर्शनकांक्षिणो दर्शनेप्सवः न तु त्वमिव दृष्टवंतो द्रक्ष्यंतीति
त्यभिप्रायः ॥ ५२ ॥ कस्मात् ॥ नाहमिति ॥ नाहं वेदैः ऋग्यजुःसामाथर्ववेदैश्चतुर्भिरपि ॥ न तप
सा उग्रेण चान्द्रायणादिना ॥ न दानेन गोभूहिरण्यादिना ॥ न चेज्यया यज्ञेन पूजया वा ॥ श

श्रीभगवानुवाच ॥ सुदुर्दर्शमिदं रूपं दृष्टवानसि यन्मम ॥ देवा अप्यस्य रूपस्य नित्यं दर्शन
कांक्षिणः ॥ ५२ ॥ नाहं वेदैर्न तपसा न दानेन न चेज्यया ॥ शक्य एवंविधो द्रष्टुं दृष्टवानसि
मां यथा ॥ ५३ ॥ भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन ॥ ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च
पा२ परंतप ॥ ५४ ॥

क्य एवंविधो यथादर्शितप्रकारो द्रष्टुं दृष्टवानसि मां यथा त्वं ॥ ५३ ॥ कथं पुनः
शक्य इत्युच्यते ॥ भक्त्येति किं विशिष्टया इत्याह ॥ अनन्यया पृथगभूतया भगवतोऽन्यत्र
पृथक् न कदाचिदपि या भवति सा अनन्या भक्तिः सर्वैरपि करणैर्वासुदेवादन्यो नोपलभ्य
ते ॥ या या सा अनन्या भक्तिस्तया भक्त्या शक्योऽहमेवंविधो विश्वरूपप्रकारः ॥ हेऽर्जुन ज्ञातुं १६३
शास्त्रतो न केवलं ज्ञातुं शास्त्रतो द्रष्टुं च साक्षात्कर्तुं तत्त्वेन तत्त्वतः प्रवेष्टुं च मोक्षं मयि परंतप नव ५५

अधुना सर्वगीताशास्त्रस्य सारभूतोर्थो निःश्रेयसार्थोनुष्ठेयत्वेन समुच्चित्योच्यते ॥ मत्कर्म
इति ॥ मत्कर्मकृत् मत्कर्म करोतीति मत्कर्मकृत् ॥ मत्परमः करोति भृत्यः स्वा
मिकर्म न त्वात्मनः परमा प्रेत्य गंतव्या गतिस्स्वामिनं प्रतिपद्यते अयं तु मत्कर्मकृत् ॥ मत्पर
मोहं परमः परा गतिर्यस्य सोयं मत्परमः ॥ तथा मद्भक्तः मामेव सर्वप्रकारैः सर्वात्मना सर्वो
त्साहेन भजतीति मद्भक्तः ॥ संगवर्जितः ॥ धनपुत्रमित्रकलत्रबंधुभोगेषु संगवर्जितः स्ने

ॐ मत्कर्मकृन्मत्परमो मद्भक्तः संगवर्जितः ॥ निर्वैरः सर्वभूतेषु यः समामेति पांडव ॥ ५५ ॥

हः प्रीतिस्तद्वर्जितः धनमित्रकलत्रबंधुभोगेषु ॥ निर्वैरो निर्गतवैरः सर्वभूतेषु शत्रु
भावरहितः ॥ आत्मनोत्यंतापकारप्रवृत्तेष्वपि य ईदृशः समामेति अहमेव तस्य परा ग
तिर्नान्या काचिद्भवति ॥ अयं तवोपदेशो मयोपदिष्टो हे पांडवेति ॥ ५५ ॥ इति श्रीम
त्परमहंसपरिव्राजकाचार्यश्रीशंकरभगवत्कृतौ गीताभा
ष्ये एकादशोध्यायः ॥ ११ ॥ ॥ ॥ ॥

द्वितीयप्रभृतिष्वध्यायेषुविभूत्यंतेषुपरमात्मनोब्रह्मणोऽक्षरस्यविध्वस्तसर्वविशेषणस्योपा
सनमुक्तं॥सर्वयोगैश्वर्यसर्वज्ञानशक्तिमत्त्वोपाधेरीश्वरस्यतवचोपासनंतत्रतत्रोक्तं॥विश्वरूपा
ध्यायेचैश्वरमाद्यंसमस्तजगदात्मरूपंविश्वरूपंत्वदीयंदर्शितंउपासनार्थमेवत्वयातद्द
र्शयित्वा॥उक्तवानसिमत्कर्मकृदितिअतोहमनयोरुभयोःपक्षयोर्विशिष्टतरवुभुत्स

अर्जुनउवाच॥एवंसततयुक्तायेभक्तास्त्वांपर्युपासते
येचाप्यक्षरमव्यक्तंतेषांकेयोगवित्तमाः ॥१॥

यात्वांपृच्छामीत्यर्जुनउवाच॥एवंइति॥एवमित्यतीतानंतरश्लोकेनोक्तमर्थंपरामृशतिमत्क
र्मकृदित्यादिनाएवंसततयुक्तानैरंतर्येणभगवत्कर्मादौयथोक्तेऽर्थेसमाहिताःसंतः
प्रवृत्ताइत्यर्थः॥येभक्ताअनन्यशरणाःसंतःत्वांयथादर्शितंविश्वरूपंपर्युपासतेध्याय १६४
ति॥येचाप्यन्येत्यक्तसर्वैषणाःसंन्यस्तसर्वकर्माणोयथाविशेषितंब्रह्माक्षरंनिरस्त।

334

सर्वोपाधिवत्वादव्यक्तं नकरणगोचरं ॥ यद्धि लोके करणगोचरं तद्व्यक्तमुच्यते ॥ अञ्जेरर्हतोस्त
कर्मकत्वादिदं त्वतत्त्वं तद्विपरीतं शिष्टैश्चाचर्यमाणैर्विशेषणैर्विशिष्टं तत् ॥ ये चापि पर्युपासते
तेषामुभयेषां मध्ये के योगवित्तमाः के प्रतिपाद्येन योगविदस्त्वं पृष्टः ॥१॥ यस्त्वत्र तेषां सकाः
समस्यादर्शिनोऽभिष्टं तेषां तत्तावत्तिष्ठतु तान्प्रति यद्वक्तव्यं तदुपरिष्टाद्वक्ष्यामः । ये त्वितरे ॥ म

श्रीभगवानुवाच ॥ मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते
श्रद्धया परयोपेतास्ते मे युक्ततमा मताः ॥२॥ ॥॥॥॥॥॥॥

य्यावेश्येति ॥ मयि विश्वरूपे परमेश्वरे आवेश्य समाधाय मनो ये भक्ताः सन्तः मां सर्वयोगेश्वरा
णामीश्वरं सर्वज्ञं ॥ विमुक्तरागादिक्लेशतिमिरदृष्टिं नित्ययुक्ता अतीतानन्तराध्यायान्तो
क्तश्लोकार्थन्यायेन सततयुक्ताः सन्त उपासते ॥ श्रद्धया परया प्रकृष्टया उपेताः ये ते मे मम
मता अभिप्रेता युक्ततमा इति । नैरन्तर्येण हि मच्चित्ततया अहोरात्राण्यतिवाहयन्ति अतो

गी॰भा॰
१६५
335

किंतुतान्प्रतियद्वक्तव्यंतच्छृणु॥२॥ ये त्विति॥ येत्वक्षरमनिर्देश्यमव्यक्तंअव्यक्तत्वादशब्दगोच
रत्वेननिर्देष्टुंशक्यतेअतोऽनिर्देश्यं॥ अव्यक्तंनकेनापिप्रमाणेनव्यज्यतइत्यव्यक्तं॥ पर्यु
पासतेपरिसमंतादुपासतेउपासनंनामयथाशास्त्रमुपास्यस्यार्थस्यविषयीकरणेनसा
मीप्यमुपगम्यतैलधारावत्समानप्रत्ययप्रवाहेणदीर्घकालंयदासनंतदुपासनमाच
क्षते॥ अक्षरस्यविशेषणमाह॥ सर्वत्रगंव्योमवद्व्यापि अव्यक्तत्वादचिंत्यंचयद्धिकर

येत्वक्षरमनिर्देश्यमव्यक्तंपर्युपासते॥ सर्वत्रगमचिंत्यंचकूटस्थमचलंध्रुवं॥३॥

णगोचरंतन्मनसापिचिंत्यंतद्विपरीतत्वादचिंत्यं॥ अतःकूटस्थंदृश्यमानगुणवदं
तर्दोषवस्तुकूटंकूटरूपंकूटसाक्ष्यमित्यादौकूटशब्दःप्रसिद्धोलोके॥ तथाचाविद्याद्य
नेकसंसारबीजमंतर्दोषंमायाव्याकृतादिशब्दवाच्यतया॥ मायांतुप्रकृतिंविद्यान्मायि
नंतुमहेश्वरंममामायादुरत्ययाइत्यादौप्रसिद्धंयत्तत्कूटंतस्मिन्कूटेस्थितंकूटस्थंतदध्य
क्षतया॥ अथवाराशिरिवस्थितंकूटस्थंअतएवाचलं॥ यस्मादचलंतस्माद्ध्रुवंनित्यमित्य

श्रीः॥रा॥
१६५

सन्निइति ॥ सन्नियम्य संहृत्य इंद्रियग्रामं इंद्रियसमुदायं ॥ सर्वत्र सर्वस्मिन्काले समबुद्धयः समात
336 ल्याबुद्धिर्येषां इष्टानिष्टप्राप्तौ ते समबुद्धयः ॥ य एवं विधास्ते वक्रमे संन्यासिनस्ते प्राप्नुवंति मामे
व सर्वभूतहिते रताः ॥ नतु तेषां वक्तव्यं मां ते प्राप्नुवंतीति ॥ ज्ञानी त्वात्मैव मे मतमित्युक्तं ॥ नहि
भगवत्स्वरूपाणां सतां युक्ततमायुक्ततमत्वं वाच्यं ॥४॥ किंतु ॥ क्लेशोधिकतरो यद्यपि मत्कर्मा

सन्नियम्येंद्रियग्रामं सर्वत्र समबुद्धयः ॥ ते प्राप्नुवंति मामेव सर्वभूतहिते रताः ॥४॥ क्लेशो
धिकतरस्तेषामव्यक्तासक्तचेतसां ॥ अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते ॥५॥ ॥ ॥

दिपरायणानामधिक एव क्लेशोधिकतरस्त्वदात्मनां परमार्थदर्शिनां देहाद्यभिमानप
रित्यागनिमित्तः ॥ अव्यक्तासक्तचेतसां अव्यक्ते आसक्तं चेतो येषां ते ॥ अव्यक्तासक्तचेतसः
तेषामव्यक्तासक्तचेतसां ॥ अव्यक्ता हि यस्मात् गतिरक्षरात्मिका दुःखं देहवद्भिर्देहाभि
मानवद्भिरवाप्यते अतः क्लेशोधिकतरः अक्षरोपासकानां यद्वर्त्तनं तदुपरिष्टाद्वक्ष्यामः ५

गी॰भा॰ येतइति॥ येतुसर्वाणिकर्माणिमयिईश्वरेसंन्यस्य॥ मत्पराः अहंपरोयेषांतेमत्पराःसंतः
१९९ अनन्येनैवअविद्यमानमन्यदालंबनंविश्वरूपंदेवमात्मानंमुक्त्वायस्यसोऽनन्यःतेना
337 नन्येनैवयोगेनसमाधिनामांध्यायंतउपासते॥ ६॥ तेषांकिं॥ तेषामिति॥ तेषांमदुपास
नैकपरायणानांअहमीश्वरःसमुद्धर्ता॥ कुतइत्याह॥ मृत्युसंसारसागरात्॥ मृत्युयु

येतुसर्वाणिकर्माणिमयिसंन्यस्यमत्पराः॥ अनन्येनैवयोगेनमांध्यायंतउपासते॥ ६॥
तेषामहंसमुद्धर्तामृत्युसंसारसागरात्॥ भवामिनचिरात्पार्थमय्यावेशितचेतसां॥ ७॥

क्तःसंसारोमृत्युसंसारःसएवसागरइवसागरोदुस्तरत्वात्॥ तस्मान्मृत्युसंसारसागरा
दहंतेषांसमुद्धर्ता॥ भवामिनचिरात्॥ किंतर्हिक्षिप्रमेवहेपार्थ॥ मय्यावेशितसमाहितं १९९
चेतोयेषांतेमय्यावेशितचेतसःतेषां॥ ७॥
॥ ॥ ॥ ॥

338

यत एवं तस्मात् ॥ मय्येवेति ॥ मय्येव विश्वरूपे ईश्वरे मनः संकल्पविकल्पकं आधत्स्व
स्थापय ॥ मय्येवाध्यवसायं कुर्वती बुद्धिं चाधत्स्व निवेशय ॥ ततस्ते किं स्यादिति तत्राह ॥
निवसिष्यसि निवत्स्यसि निश्चयेन मदात्मना मय्येव वासं करिष्यस्येव अतः शरीरपाता
दूर्ध्वं न संशयः संदेहोऽत्र न कर्तव्यः ॥८॥ अथेति ॥ अथ एवं यथाऽवोचाम न तथा मयि चि

मय्येव मन आधत्स्व मयि बुद्धिं निवेशय ॥ निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः ॥८॥
अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरं ॥ अभ्यासयोगेन ततो मामिच्छाप्तुं धनंजय ॥९॥

त्तं समाधातुं स्थापयितुं स्थिरमचलं न शक्नोषि चेत् ततः पश्चादभ्यासयोगेन चित्तस्यैकस्मि
न्नालंबने सर्वतः समाहृत्य पुनःपुनः स्थापनमभ्यासस्तत्स्वं को योगः समाधानलक्ष
णः ॥ तेनाभ्यासयोगेन मामाविश्वरूपं इच्छा प्रार्थयस्व
आप्तुं हे धनंजय ॥९॥

अभ्यासे इति॥ अभ्यासेऽप्यसमर्थोसि अशक्तोसि मत्कर्मपरमो भव मदर्थं कर्म मत्कर्म तत्प
रमो मत्कर्मप्रधान इत्यर्थः॥ अभ्यासेन विना मदर्थमपि कर्माणि कुर्वन् सिद्धि
सत्वशुद्धियोगज्ञानप्राप्तिद्वारेणावाप्स्यसि॥१०॥ अथ इति॥ अथ पुनरेतदपि यदुक्तम।

अभ्यासेऽप्यसमर्थोसि मत्कर्मपरमो भव॥ मदर्थमपि कर्माणि कुर्वन् सिद्धिमवाप्स्य
सि॥१०॥ अथैतदप्यशक्तोसि कर्तुं मद्योगमाश्रितः सर्वकर्मफलत्यागं ततः कुरु यता
त्मवान्॥११॥

कर्मपरमत्वं त्वं तत्कर्तुमशक्तोसि मद्योगमाश्रितो मयि क्रियमाणानि कर्माणि संन्य
स्य यत्करणं तेषामनुष्ठानं स मद्योगस्तमाश्रितः सन्॥ सर्वकर्मफलत्यागं सर्वेषां
कर्मणां फलसंन्यासं सर्वकर्मफलसंन्यासं ततोनंतरं कुरु॥ यतात्मवान् संयतचित्तः

340

इदानीं सर्वकर्मफलत्यागं स्तौति ॥ श्रेयो हि ज्ञानमभ्यासात्प्रशस्यतरं ज्ञानं कस्मादविवेक
पूर्वकादभ्यासात् ॥ तस्मादपि ज्ञानपूर्वकं ध्यानं विशिष्यते ॥ ज्ञानवतो ध्यानादपि कर्म
फलत्यागो विशिष्यते इत्यनुषज्यते ॥ एवं कर्मफलत्यागात्पूर्वविशेषणवतः शान्तिरु
पशमः सहेतुकस्य संसारस्यानंतरमेव स्यात् न तु कालांतरमपेक्षते ॥ अज्ञस्य कर्म
णि प्रवृत्तस्य पूर्वोपदिष्टोपायानुष्ठानाशक्तौ सर्वकर्मणां फलत्यागः श्रेयःसाधनमु

श्रेयो हि ज्ञानमभ्यासाज्ज्ञानाद्ध्यानं विशिष्यते ॥ ध्यानात्कर्मफलत्यागस्त्यागाच्छांतिरनं
तरं ॥१२॥

पदिष्टं न प्रथममेव ॥ अतः श्रेयो हि ज्ञानमभ्यासादित्युत्तरोत्तरविशिष्टतोपदे
शेन सर्वकर्मफलत्यागः स्तूयते संपन्नसाधनानुष्ठानाशक्तावनुष्ठेयत्वेन श्रुतत्वात्
केन साधर्म्येण स्तुतिः ॥ यदा सर्वे प्रमुच्यंत इति ॥ सर्वकामप्रहाणादमृतत्वमुक्तं तच्च
सिद्धं ॥ कामाश्च सर्वे श्रौतस्मार्तसर्वकर्मणां फलानि तत्त्यागे च विदुषो ध्याननिष्ठस्या
नंतरैव शांतिरिति ॥ सर्वकामकर्मत्यागसामान्यात् ॥ अज्ञस्य कर्मफलत्यागस्यास्तीति

स्सामान्यात्कर्मफलत्यागस्तुतिरियंप्ररोचनार्था॥ यथागस्त्येनब्राह्मणेनसमुद्रः
पीतः इदानींतना अपिब्राह्मणाब्राह्मणत्वसामान्यात्स्तूयंते॥ एवंकर्मफलत्यागात्कर्म
योगस्यश्रेयःसाधनत्वमभिमतं॥ अत्रचात्मेश्वरभेदमाश्रित्यविश्वरूपईश्वरेचेतःसमाधा
नलक्षणोयोगउक्तः॥ ईश्वरार्थंकर्मानुष्ठानादिच॥ अथैतदप्यशक्तोसीत्यादिनाज्ञानका
र्यसूचनान्नाभेददर्शिनोऽक्षरोपासकस्यकर्मयोगउपपद्यतइतिदर्शयति॥ तथाकर्मयो
गिनोक्षरोपासनानुपपत्तिंदर्शयतिभगवान्॥ तेप्राप्नुवंतिमामेवइत्यक्षरोपासकानां
पा० कैवल्यप्राप्तौस्वातंत्र्यमुक्त्वा॥ इतरेषांपरतंत्रतयेश्वराधीनतांदर्शितवान्तेषामहंसमुद्धर्ते
ति॥ यदिहीश्वरस्यात्मभूतास्तेमताअभेददर्शित्वादक्षरस्वरूपाएवतइतिसमुद्धरणकर्म
वचनं॥ तान्प्रत्यपेशलंस्यात्॥ यस्माच्चार्जुनस्यात्यंतहितैषीभगवांस्तस्यसम्यग्दर्श
नानन्वितंकर्मयोगंभेददृष्टिमंतमेवोपदिशति॥ नचात्मानमीश्वरंप्रमाणतोबुद्ध्वाकस्य
चिद्गुणभावंजिगमिषतिकश्चिद्विरोधात्तस्मादक्षरोपासकानांसम्यग्दर्शननिष्ठानांसं
न्यासिनांत्यक्तसर्वैषणानामद्वेष्टासर्वभूतानामित्यादिधर्मपूगंसाक्षादमृतत्वकारणंव

अद्वेष्टेति अद्वेष्टा सर्वभूतानां न द्वेष्टा आत्मनो दुःखहेतुमपि न किंचिद् द्वेष्टि सर्वाणि भूता-
नि आत्मत्वेन हि पश्यति मैत्रः मित्रभावो मैत्री मित्रतया वा वर्त्तत इति मैत्रः करुण एव
342 च करुणा कृपा दुःखितेषु दया तद्वान् करुणः सर्वभूताभयप्रदः संन्यासीत्यर्थः ॥ नि-

अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च ॥ ॥ निर्म-
मो निरहंकारः समदुःखसुखः क्षमी ॥ १३ ॥ ॥

र्ममो ममेति प्रत्ययवर्जितः ॥ निरहंकारः निर्गताहंप्रत्ययः समदुःखसुखः समे
दुःखसुखे द्वेषरागयोरप्रवर्त्तके यस्य स समदुःखसुखः क्षमी क्षमावान् आक्रुष्टो ह-
तो वाऽविक्रिय एवास्ते ॥ १३ ॥ ॥ ॥ ॥ शिव

गी॰ भा॰
१२९
343

अद्वेष्टेति अद्वेष्टा सर्वभूतानां न द्वेष्टा आत्मनो दुःखहेतुमपि न किंचिद्द्वेष्टि सर्वाणि भूतानि
आत्मत्वेन ॥ संतुष्ट इति ॥ संतुष्टः सततं योगी नित्यं देहस्थितिकारणस्य लाभे लाभे चोत्पन्नालंप्रत्य
यः ॥ तथा गुणवल्लाभविपर्यये च संतुष्टः सततं योगी समाहितचित्तः ॥ यतात्मा संयतस्व
भावः ॥ दृढनिश्चयः दृढः स्थिरो निश्चयोऽध्यवसायो यस्यात्मतत्त्वविषये स दृढनिश्च
यः ॥ मय्यर्पितमनोबुद्धिः संकल्पात्मकं मनोऽध्यवसायलक्षणा बुद्धिस्ते मय्यर्पिते यस्या

संतुष्टः सततं योगी यतात्मा दृढनिश्चयः ॥ मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः ॥ १४ ॥
लो॰ २ यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः ॥ हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः ॥ १५ ॥

चिते यस्य संन्यासिनः स मय्यर्पितमनोबुद्धिः य ईदृशो मद्भक्तः स मे प्रियः प्रियो हि ज्ञानि-
नोऽत्यर्थमहं स च मम प्रिय इति सप्तमेऽध्याये सूचितं तदिह प्रपञ्च्यते ॥ ४ ॥ यस्मादिति ॥ यस्मा
त्संन्यासिनः लोको द्विजते न उद्वेगं गच्छति न संतप्यते न संक्षुभ्यते लोकः तथा लोकान्नोद्वि
जते च यः ॥ हर्षामर्षभयोद्वेगैः हर्षश्चामर्षश्च भयं च उद्वेगश्च तैर्हर्षामर्षभयोद्वेगैर्मुक्तः ॥
हर्षः प्रियलाभे अन्तःकरणोत्कर्षो रोमाञ्चनाश्रुपातादिलिंगः ॥ अमर्षोऽभिलषितप्रतिघा

अनइति॥ देहेंद्रियविषयसंबंधादिषु अपेक्षाविषयेषु अनपेक्षो निःस्पृहः॥ शुचिर्बाह्येना
भ्यंतरेण च शौचेन संपन्नः॥ दक्षः प्रत्युत्पन्नेषु कार्येषु सद्यो यथावत्प्रतिपत्तुं समर्थः॥
344 उदासीनो न कस्यचिन्मित्रादेः पक्षं भजते यः स उदासीनो यतिः॥ गतव्यथः गतभयः
सर्वारंभपरित्यागी आरभ्यंत इत्यारंभाः इहामुत्रफलभोगार्थानि कर्माणि सर्वारंभा

अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः॥ सर्वारंभपरित्यागी यो मद्भक्तः स मे प्रियः
१६॥ यो न हृष्यति न द्वेष्टि न शोचति न कांक्षति॥ शुभाशुभपरित्यागी भक्तिमान्यः स
मे प्रियः॥१७॥

स्तान्परित्यक्तुं शीलं यस्य स सर्वारंभपरित्यागी॥ यो मद्भक्तः स मे प्रियः॥१६॥
किंच॥ यो न हृष्यति इष्टप्राप्तौ न द्वेष्टि अनिष्टप्राप्तौ॥ न शोचति प्रियवियोगे॥ न कां
क्षति चाप्राप्तं॥ शुभाशुभपरित्यागी॥ शुभाशुभे कर्मणी परित्यक्तुं शीलं यस्य स शुभाशु
भपरित्यागी॥ भक्तिमान्यः स मे प्रियः॥ १७ ॥ ॥ ॥

समः इति॥ समः शत्रौ च मित्रे च तथा मानापमानयोः पूजापरिभवयोः॥ शीतोष्णसुखदुःः
खेषु समः सर्वत्र संगविवर्जितः॥१॥ तुल्य इति॥ तुल्यनिंदास्तुतिः निंदा च स्तुतिश्च निंदास्तु
ती ते तुल्ये यस्य स तुल्यनिंदास्तुतिः॥ मौनी मौनवान् संयतवाक्॥ संतुष्टो येन केन चित्
शरीरस्थितिहेतुमात्रेण तथा चोक्तं॥ येन केन चिदाछिन्नो येन केन चिदाशितः॥ यत्र क्व
चन शायी स्यात्तं देवा ब्राह्मणं विदुः॥ किं च॥ अनिकेतः निकेत आश्रयो निवासो नियतो

समः शत्रौ च मित्रे च तथा मानापमानयोः॥ शीतोष्णसुखदुःखेषु समः संगविवर्जि
तः॥१॥ तुल्यनिंदास्तुतिर्मौनी संतुष्टो येन केन चित्॥ अनिकेतः स्थिरमतिर्भक्तिमा
न्मे प्रियो नरः॥१८॥

न विद्यते यस्य सोऽनिकेतो नागारे इति स्मृत्यंतरात् न कृत्स्नो
दके संगा न चैलेन त्रिपुष्करे॥ नागारे नासने नान्ने यस्य वै मनः क्षण एव सः स्थिरमतिः स्थि
रा परमार्थवस्तुविषया स्थिरा मतिर्यस्य स स्थिरमतिः॥ भक्तिमान्मे प्रियो नरः॥ १८०
॥१९॥ ॥ ॥ ॥ ॥ शिव

346

अद्वेष्टासर्वभूतानामित्यादिनाक्षरोपासकानांसंन्यासिनांनिवृत्तसर्वैषणानांपरमार्थ
ज्ञाननिष्ठानांधर्मजातमुपसंहृयते॥येतुइति॥येतुसंन्यासिनः॥धर्म्यामृतंधर्मसम्बन्धमा
मृतंचतद्धर्म्यामृतं॥अमृतत्वहेतुत्वादिदंयथोक्तमद्वेष्टासर्वभूतानामित्यादिनापर्युपा
सतेऽनुतिष्ठंति॥श्रद्दधानाःश्रद्धायुक्ताःसंतोमत्परमायथोक्तोहमक्षरात्मापरमोनिरतिश
योगतिर्येषांतेमत्परमाः॥मद्भक्ताश्चउत्तमांपरमार्थज्ञानलक्षणांभक्तिमाश्रिताः॥तेतीव

ॐयेतुधर्म्यामृतमिदंयथोक्तंपर्युपासते॥ श्रद्दधानामत्पर
माभक्तास्तेतीवमेप्रियाः॥२०॥इति [illegible] द्वादशोध्यायः॥१२॥

मेप्रियाः॥प्रियोहिज्ञानिनोत्यर्थमित्युपक्षिप्तंतद्व्याख्यायोपसंहृतं॥भक्तास्तेतीव
मेप्रियाइति॥यस्माद्धर्म्यामृतमिदंयथोक्तमनुतिष्ठन्भगवतोविष्णोःपरमेश्वरस्या
तीवप्रियोभवति॥तस्मादिदंधर्म्यामृतंमुमुक्षुणायथावत्यत्नतोऽनुष्ठेयंविष्णोः
परंधामजिगमिषुणेतिवाक्यशेषः॥२०॥इतिश्रीशंकराचार्यकृतौद्वादशोध्यायः॥१२॥

गी॰भा॰ सप्तमेध्यायेसूचितेद्वेप्रकृतीईश्वरस्यत्रिगुणात्मिकाष्टधाभिन्नाऽपरासंसारहेतुत्वात् प
१७१ राचान्याजीवभूताक्षेत्रज्ञलक्षणाईश्वरात्मिकायाभ्यांप्रकृतिभ्यांईश्वरोजगदुत्पत्तिस्थि
तिप्रलयहेतुत्वंप्रतिपद्यते॥तत्रक्षेत्रक्षेत्रज्ञलक्षणप्रकृतिद्वयनिरूपणद्वारेणतद्वत
347 ईश्वरस्यतत्त्वनिर्धारणार्थंक्षेत्राध्यायआरभ्यते॥अतीतानंतराध्यायेचाद्वेष्टासर्वभू
तानामित्यादिनायावदध्यायपरिसमाप्तिस्तावत्तत्त्वज्ञानिनांसंन्यासिनांनिष्ठायथातेव

ॐइदंशरीरंकौंतेयक्षेत्रमित्यभिधीयते॥एतद्योवेत्तितंप्राहुःक्षेत्रज्ञइतितद्विदः॥१॥

र्तंतइत्येतदुक्तं॥केनपुनस्तत्त्वज्ञानेनयुक्तायथोक्तधर्माचरणाद्भगवतःप्रियाभवंती
त्येवमर्थोयमध्यायआरभ्यतेप्रकृतिश्चत्रिगुणात्मिकासर्वकार्यकरणविषा
१३ याकारेणपरिणतापुरुषस्यभोगापवर्गार्थकर्तव्यतयादेहेंद्रियाकारेणसंहन्य
ते॥सोयंसंघातइदंशरीरं॥तदेतद्भगवानुवाच॥इदमिति॥इदमिति।
सर्वनाम्नोक्तंविशिनष्टिशरीरमिति॥हेकौंतेय॥क्षतात्त्राणात्॥क्षयात्क्षरणात् १७१

क्षेत्रवद्वास्मिन्कर्मफलनिष्पत्तेः क्षेत्रमिति ॥ इतिशब्दः प्रकारपदार्थकः क्षेत्रमित्येवम
348 भिधीयते कथ्यते एतच्छरीरं क्षेत्रं यो वेत्ति विजानाति आपादतलमस्तकं ज्ञानेन विष
यीकरोति ॥ स्वाभाविकेन ॥ औपदेशिकेन वा ज्ञानेन विषयीकरोतीति विभागशः ॥ तं वे
दितारं प्राहुः कथयंति ॥ क्षेत्रज्ञ इति ॥ इतिशब्दः प्रकारपदार्थक एवं सर्ववत्क्षेत्रज्ञ

क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत ॥ क्षेत्रक्षेत्र
ज्ञयोर्ज्ञानं यत्तज्ज्ञानं मतं मम ॥२॥ ॥ ॥

इत्येवं ॥ केन तद्विदः तौ क्षेत्रक्षेत्रज्ञौ ये विदंति ते तद्विदः ॥ एवं क्षेत्रक्षेत्रज्ञावुक्तौ ॥१॥
किमेतावन्मात्रेणाज्ञानेन तज्ज्ञानं स्याद्विति नेत्युच्यते ॥ क्षेत्रज्ञ इति ॥ क्षेत्रज्ञं च योक्त
लक्षणं ॥ अपि मां परमेश्वरमसंसारिणं विद्धि विजानीहि ॥ सर्वक्षेत्रेषु यः क्षेत्रज्ञो ब्र
ह्मादिस्तंबपर्यंतानेकक्षेत्रोपाधिप्रविभक्तस्तं निरस्तसर्वोपाधिभेदं सदसदादि।

गी॰ भा॰ १७२ 349

ग्राह्यमन्यथागोचरं विहितमित्यभिप्रायः हे भारत ॥ यस्मात्क्षेत्रक्षेत्रज्ञयाथात्म्यव्यति
रेकेण न ज्ञानगोचरमन्यदवशिष्टमस्ति ॥ तस्मात्क्षेत्रक्षेत्रज्ञयोर्ज्ञेयभूतयोर्यज्ज्ञा
नं क्षेत्रक्षेत्रज्ञौ येन ज्ञानेन विषयीक्रियेते तज्ज्ञानं सम्यग्ज्ञानमिति ॥ मतमभिप्रायो मम
ईश्वरस्य विष्णोः ॥ ननु सर्वक्षेत्रेष्वेक ईश्वरो नान्यस्तद्व्यतिरिक्तो भोक्ता ततः ईश्वरस्य संसा
रित्वं प्राप्तं ॥ ईश्वरव्यतिरेकेण वा संसारिणोऽन्यस्याभावात् ॥ संसाराभावप्रसंगात् तच्चोभ
यमनिष्टं ॥ बंधमोक्षतद्धेतुशास्त्रानर्थक्यप्रसंगात् ॥ प्रत्यक्षादिप्रमाणविरोधाच्च ॥
प्रत्यक्षेण तावत्सुखदुःखतद्धेतुलक्षणः संसार उपलभ्यते ॥ जगद्वैचित्र्योपलब्धे
श्च धर्माधर्मनिमित्तः संसारोऽनुमीयते ॥ सर्वमेतदनुपपन्नमात्मेश्वरैकत्वे ॥ न ॥ ज्ञाना
ज्ञानयोरन्यत्वेनोपपत्तेः ॥ दूरमेते विपरीते विषूची अविद्या या च विद्येति ज्ञाता ॥ तथा च
तयोर्विद्याविद्याविषययोः फलभेदोऽपि विरुद्धो निर्दिष्टः श्रेयश्च प्रेयश्चेति ॥ विद्याविष
यः श्रेयः प्रेयस्त्वविद्याकार्यमिति ॥ तथा च व्यासः द्वाविमावथ पंथानावित्यादि ॥ इमौ १७२
द्वावेव पंथानावित्यादि च ॥ इह च द्वे निष्ठे उक्ते ॥ अविद्या च सह कार्येण विद्यया हात

घेतिश्रुतिस्मृतिन्यायेभ्योवगम्यते॥ श्रुतयस्तावत्॥ इहचेदवेदीदथसत्यमस्ति॥ नचेदि
हावेदीन्महतीविनष्टिः तमेवविद्वानमृतइहभवति॥ नान्यःपंथाविद्यतेयनाय॥ विद्वा
न्नबिभेतिकुतश्चन॥ अविद्वषस्तस्ययत्नस्यभयंभवति॥ अविद्यायामंतरेवर्तमानाः॥ ब्रह्मवे।
दब्रह्मैवभवति॥ अन्योसावन्योहमस्मीतिनसवेदयथापशुरेवंसदेवानां॥ आत्मविद्यःस
इहैसर्वैभवति॥ यदाचर्मवदाकाशमित्याद्याःसहस्रशः स्मृतयश्च॥ अज्ञानेनावृतंज्ञानंते
नमुह्यंतिजंतवः॥ इहैवतैर्जितःसर्गोयेषांसाम्येस्थितंमनः॥ समंपश्यन्हिसर्वत्रेत्या
द्याः॥ न्यायतश्च॥ सर्वान्क्लेशान्प्राणिनोयोदयानंतात्मानमनुष्याःपरिवर्जयंति॥ अज्ञान
तत्त्वंपश्यंतीतिकेचिद्विद्वानेफलंपश्यपश्ययथाविशिष्टं॥ तथाचदेहादिष्वनात्मस्वात्मबुद्धिर
विहायरागद्वेषादिप्रयुक्तोधर्माधर्मानुष्ठानकृज्जायतेम्रियतेचेत्यवगम्यते॥ देहादिव्य
तिरिक्तात्मदर्शिनोरागद्वेषादिप्रहाणापेतधर्माधर्मप्रवृत्त्युपशमान्मुच्यंतइतिन
केनचित्प्रत्याख्यातुंशक्यंन्यायतः॥ तत्रैवंसतिदेवदत्तस्येश्वरस्यैवसतोविद्याकृतोपाधि
भेदकृतःसंसारित्वमेवभवति॥ यथादेहाद्यात्मत्वमात्मनः॥ सर्वजंतूनांहिप्रसिद्धोदेहा

दिक्षनात्मस्वात्मभावोनिश्चितोऽविद्याकृतः यथा स्थाणौ पुरुषस्य॥ तथा न चैतन्यं देहस्य॥ दे
हधर्मो वा चैतन्यस्य॥ एवं सुखदुःखमोहात्मकत्वादिरात्मनो न युक्तोऽविद्याकृतत्वाविशे
षाज्जरामरणवत्॥ न॥ अतुल्यत्वादिति चेत्॥ स्थाणुपुरुषौ ज्ञेयावेव संतौ ज्ञात्रान्योन्यस्मि
न्नध्यस्तावविद्यया॥ देहात्मनोस्तु ज्ञेयज्ञात्रोरेवेतरेतराध्यास इति न समो दृष्टांतः अ
तो देहधर्मो ज्ञेयोपि ज्ञातुरात्मनो भवतीति चेन्न॥ अचैतन्यादिप्रसंगात्॥ यदि हि ज्ञेय
स्य देहादेः क्षेत्रस्य धर्माः सुखदुःखमोहेच्छादयो ज्ञातुर्भवंति॥ ज्ञेयस्य क्षेत्रस्य धर्माः
केचनात्मनो भवंति॥ अविद्यारोपिता जरामरणादयो न भवंतीति विशेषहेतुर्वक्त
व्यो न भवंतीति॥ अस्त्यनुमानमविद्याध्यारोपितत्वाज्जरादिवदिति हेयत्वादुपादे
यत्वाच्चेत्यादि॥ तत्रैवं सति कर्तृत्वभोक्तृत्वलक्षणः संसारो ज्ञेयस्थो ज्ञातर्यविद्या
ध्यारोपित इति न तेन ज्ञातुः किंचिद्दुष्यति यथा बालैरध्यारोपितेनाकाशस्य तलम
लवत्त्वादिना एवं च सति सर्वक्षेत्रेष्वपि सतो भगवतः॥ क्षेत्रज्ञस्येश्वरस्य संसारित्वगंध
मात्रमपि नाशंक्यं॥ न हि क्वचिदपि लोके अविद्याध्यस्तेन धर्मेण कस्यचिदुपकारोपका

रोग[illegible]भावाद्दृष्टः यत्र क्षेत्रज्ञे न मम मोहः दृष्टान्त इति न दर्शित॥ कथं॥ अविद्याध्यासमात्रे हि दृ
352 ष्टान्तदार्ष्टान्तिकयोः साधर्म्यं विवक्षितं तत्र व्यभिचरति॥ यत्तु ज्ञातरि व्यभिचरतीति
मन्यसे॥ तस्याप्यनैकान्तिकत्वं दर्शितं जरादिभिः॥ अविद्यावत्वात्क्षेत्रज्ञस्य संसारि
त्वमिति चेन्न॥ अविद्यायास्तामसत्वात्तामसो हि प्रत्ययस्यावरणात्मकत्वादविद्यावि
परीतग्राहकः संशयोपस्थापको वा॥ अग्रहणात्मको वा विवेकप्रकाशभावे तदभा
वात्॥ तामसे चावरणात्मके तिमिरादिदोषे सत्यग्रहणादेरविद्यात्रयस्योपलब्धेः॥ अत्रा
ह॥ एवं तर्हि ज्ञातृधर्मोऽविद्या न॥ करणे चक्षुषि तैमिरिकत्वादिदोषोपलब्धेः॥ यत्तु
मन्यसे ज्ञातृधर्मोऽविद्या तदेव चाविद्याधर्मवत्वं क्षेत्रज्ञस्य संसारित्वं॥ तत्र यदुक्तं ज्ञा
त एव क्षेत्रज्ञो न संसारीत्येतदयुक्तमिति॥ तन्न यथा करणे चक्षुषि विपरीतग्राह
कादिदोषस्य दर्शनान्न विपरीतादिग्रहणं तन्निमित्तो वा तैमिरिकत्वादिदोषो ग्रही
तुः॥ चक्षुषः संस्कारेण तिमिरेऽपनीते ग्रहीतुरदर्शनान्न ग्रहीतुर्धर्मः यथा॥ तथा सर्व
त्रैवाग्रहणविपरीतसंशयप्रत्ययास्तन्निमित्ताः करणस्यैव कस्यचिद्भवितुमर्हन्ति न

गी.भा.
१७४
353

ज्ञातुः क्षेत्रज्ञस्य॥ संवेद्यत्वाच्च तेषां प्रदीपप्रकाशवज्ज्ञातृधर्मत्वं॥ संवेद्यत्वादेव स्वात्मव्य
तिरिक्तसंवेद्यत्वं॥ सर्वकरणवियोगे च कैवल्ये सर्ववादिभिरविद्यादिदोषवत्त्वानभ्युप
गमादात्मनो॥ यदि क्षेत्रज्ञस्याग्न्युष्णवत्स्वो धर्मस्ततो न कदाचिदपि तेन वियोगः स्याद
विक्रियस्य व्योमवत्॥ सर्वगतस्यामूर्तस्यात्मनः केनचित्संयोगवियोगानुपपत्तेः सि
द्धं क्षेत्रज्ञस्य नित्यमेवेश्वरत्वं॥ अनादित्वान्निर्गुणत्वादित्यादीश्वरवचनाच्च॥ नन्वेवं
संसारसंसारित्वाभावे शास्त्रानर्थक्यादिदोषः स्यादिति॥ न॥ सर्वैरभ्युपगमात्॥ सर्वै
रात्मवादिभिरभ्युपगतो दोषो नैकेन परिहर्तव्यो भवति॥ कथमभ्युपगत इति॥ मु
क्तात्मनां संसारसंसारित्वव्यवहाराभावः सर्वैरेवात्मवादिभिरिष्यते न च तेषां शास्त्रा
नर्थक्यादिदोषप्राप्तिरभ्युपगता॥ तथा नः क्षेत्रज्ञानामीश्वरैकत्वे सति शास्त्रानर्थक्यं
भवत्वविद्याविषये चार्थवत्त्वं यथा द्वैतिनां सर्वेषां बन्धावस्थायामेव शास्त्राद्यर्थवत्त्वं न मु
क्तावस्थायामपि॥ न चात्मनो बन्धमुक्तावस्थे परमार्थ एव वस्तुभूते द्वैतिनां नः सर्वेषां स्या
तो हेयोपादेयतत्साधनसद्भावे शास्त्राद्यर्थवत्त्वं स्यादद्वैतिनां पुनर्द्वैतस्यापरमार्थत्वाद १७४

354

इन्योन्य ३

विद्याकृतत्वेबंधावस्थायाआत्मनोपारमार्थिकत्वेनिर्विषयत्वाच्छास्त्रानर्थक्यमितिचेन्न॥आ
त्मनोऽवस्थाभेदानुपपत्तेः॥यदितावदात्मनोबंधमुक्तावस्थेयुगपत्स्यातांक्रमेणवायु
गपत्तावविरोधान्नसंभवतःस्थितिगतीवएकस्मिन्॥क्रमभावित्वेचेदन्यान्यनिमित्त
केऽनिर्मोक्षप्रसंगोऽन्यनिमित्तत्वेचस्वतोऽभावादपारमार्थिकत्वप्रसंगः॥तथाचसत्यभ्यु
पगमहानिः॥किंचबंधमुक्तावस्थयोःपौर्वापर्यनिरूपणायांबंधावस्थापूर्वंकल्प्या
नादिमत्यंतवतीचतच्चप्रमाणविरुद्धंतथामोक्षावस्थाऽऽदिमत्यनंताचप्रमाणवि
रुद्धैवाभ्युपगम्यतेनचावस्थावतोऽवस्थांतरंगच्छतोनित्यत्वमुपपादयितुंशक्यं॥अ
थानित्यत्वदोषपरिहारायबंधमुक्तावस्थाभेदोनकल्प्यते॥अतोद्वैतिनामपिशा
स्त्रानर्थक्यादिदोषापरिहार्यत्वमेवेतिसमानत्वाद्द्वैतवादिनापरिहर्तव्योदोषः॥नच
शास्त्रानर्थक्यंयथाप्रसिद्धाविद्वत्पुरुषविषयत्वाच्छास्त्रस्यअविदुषांहिफलहेत्वोर
नात्मदर्शनेनविदुषां॥विदुषांचफलहेतुभ्यामात्मनोऽन्यत्वदर्शनेसतितयोरहमि
त्यात्मदर्शनानुपपत्तेः॥नह्यत्यंतमूढउन्मत्तादिरपिजलाग्न्योश्छायाप्रकाशयोर्वाय

गी·भा·
१७५
355

कात्मानं पश्यति किं त्वविवेकी ॥ तस्माद्विधिप्रतिषेधशास्त्रं तावत्फलहेतुभ्यामात्म
नोन्यत्वदर्शिनो भवति ॥ नहि देवदत्त त्वमिदं कुर्विति कस्मिंश्चित्कर्मणि नियुक्ते विष्णु
मित्रोहं नियुक्त इति तटस्थो नियोगं शृण्वन्नपि प्रतिपद्यते ॥ नियोगविषयविवेकाग्रह
णात्तु प्रतिपद्यते प्रतिपत्तिस्तथा फलहेत्वोरपि ॥ ननु प्राक्तनसंबंधापेक्षया युक्तैव प्रति
पत्तिः शास्त्रार्थविषया फलहेतुभ्यामन्यात्मत्वदर्शनेपि सतीष्टफलहेतौ प्रवर्ति
तोस्म्यनिष्टफलहेतोश्च निवर्तितोस्मीति यथा पितृपुत्रादीनामितरेतरात्मान्य
त्वदर्शने सत्यपि ॥ अन्योन्यनियोगप्रतिषेधार्थप्रतिपत्तिः ॥ न ॥ व्यतिरिक्तात्मदर्शि
त्वप्रतिपत्तेः प्रागेव फलहेत्वोरात्माभिमानस्य प्रसिद्धत्वात् ॥ प्रतिपन्ननियोगप्रतिषे
धार्थो हि फलहेतुभ्यामात्मनोऽन्यत्वं प्रतिपद्यते न पूर्वं ॥ तस्माद्विधिप्रतिषेधशास्त्र
मविद्वद्विषयमिति सिद्धं ॥ ननु स्वर्गकामो यजेत न कलंजं भक्षयेदित्यादावात्मव्यति
रेकदर्शिनामप्रवृत्तौ केवलदेहात्मदृष्टीनां च अतः कर्तुरभावाच्छास्त्रानर्थक्यमिति
॥ न ॥ यथाप्रसिद्धित एव प्रवृत्तिनिवृत्त्युपपत्तेः ॥ ईश्वरक्षेत्रज्ञैकत्वदर्शी ब्रह्मविन्नाव १७५

नप्रवर्त्तते॥ तथानैरात्म्यवाद्यपिनास्तिपरलोकइति॥ नप्रवर्त्तते॥ यथाप्रसिद्धस्तुवि
धिप्रतिषेधशास्त्रश्रवणान्यथानुपपत्त्यानुमितात्मास्तित्वआत्मविशेषानभिज्ञःफल
संजाततृष्णः॥ श्रद्दधानतयाचप्रवर्त्ततइति॥ सर्वेषांनःप्रत्यक्षमतोनशास्त्रानर्थ
क्यं॥ विवेकिनामप्रवृत्तिदर्शनात्तदनुगामिनामप्रवृत्तौशास्त्रानार्थक्यमितिचेन्न॥
कस्यचिदेवविवेकोपपत्तेः॥ अनेकेषुहिप्राणिषुकश्चिदेवविवेकीस्याद्यथेदानींन
चविवेकिनमनुप्रवर्त्ततेमूढाःरागादिदोषपरतन्त्रत्वात्प्रवृत्तेः॥ अभिचरणादौच
प्रवृत्तिदर्शनात्स्वाभाव्याच्चप्रवृत्तेः॥ स्वभावस्तुप्रवर्त्ततइत्युक्तं॥ तस्मादविद्यामात्रः
संसारोयथादृष्टविषयएव॥ नक्षेत्रज्ञस्यकेवलस्याविद्यातत्कार्यंच॥ नचमिथ्या
ज्ञानंपरमार्थवस्तुदूषयितुंसमर्थं॥ नह्यूषरदेशंस्नेहेनपङ्कीकर्त्तुंशक्नोतिमरी
च्युदकं॥ तथाऽविद्याक्षेत्रज्ञस्यनकिंचित्कर्त्तुंशक्नोति अतइदमुक्तंक्षेत्रज्ञंचापि।
मांविद्धि॥ अज्ञानेनावृतंज्ञानंइतिच॥ अथकिमिदंसंसारिणामिवअहमेवंममेदमि
तिपण्डितानामपि॥ शृणुइदंतत्पाण्डित्यंयत्क्षेत्रएवात्मदर्शनं॥ यदिपुनःक्षेत्रज्ञं

गी·भा·
१७९
357

मत्विक्रयेणप्रयुःततोनभोगंकर्मवाकांक्षेयुर्ममस्यादितिविक्रयस्येवहिभोगकर्मणोऽप्येवं
सतिफलार्थित्वाद्विद्वान्प्रवर्तते॥विदुषःपुनरविक्रियात्मदर्शिनःफलार्थित्वाभावात्।
प्रवृत्त्यनुपपत्तौकार्यकरणसंघातव्यापारोपरमेनिवृत्तिरुपचर्यते॥इदंचान्यत्पांडि
त्यंकस्यचिदस्तुक्षेत्रज्ञईश्वरएवक्षेत्रंचान्यत्क्षेत्रज्ञस्यविषयःअहंतुसंसारीसुखीदुःखी
चसंसारोपरमश्चममकर्तव्यःक्षेत्रक्षेत्रज्ञविज्ञानेनध्यानेनचेश्वरंक्षेत्रज्ञंसाक्षात्कृत्वात
त्स्वरूपावस्थानेनेति॥यश्चैवंबुध्यतेयश्चबोधयतिनासौक्षेत्रज्ञइत्येवंमत्वानोयःसपं
डितापसदःसंसारमोक्षयोःशास्त्रस्यार्थवत्त्वंकरोमीत्यात्महास्वयंमूढोन्यांश्चव्यामो
हयतिशास्त्रार्थसंप्रदायरहितत्वात्श्रुतहानिमश्रुतकल्पनांचकुर्वन्॥तस्मादसंप्र
दाय~~रहितत्वात्श्रुतहानिमश्रुतकल्पनांचकुर्वन्~~वित्सर्वशास्त्रविदपिमूर्खवदेवो
पेक्षणीयः॥नचयदुक्तंईश्वरस्यक्षेत्रज्ञैकत्वेसंसारित्वंप्राप्नोतीति॥क्षेत्रज्ञानांचेश्वरैकत्वेसं
सारित्वाभावात्संसाराभावप्रसंगइत्येतौदोषौप्रत्युक्तौ॥विद्याविद्ययोर्वैलक्षण्याभ्युपग
मादिति॥कथमविद्यापरिकल्पितदोषेणतद्विषयंवस्तुपारमार्थिकंनदुष्यतीति॥तथा १७९

चेद्दृष्टांतो दर्शितो मरीच्यंभसा ऊषरदेशो न पंकीक्रियत इति॥ संसारिणोऽभावात्संसारा
358 भावप्रसंगाद्दोषोपि संसारसंसारिणोरविद्याकल्पितत्वोपपत्त्या प्रत्युक्तः॥ नन्वविद्यावत्व
मेव क्षेत्रज्ञस्य संसारित्वदोषस्तत्कृतं च दुःखित्वादि प्रत्यक्षमुपलभ्यते॥ न॥ ज्ञेयस्य क्षे
त्रधर्मत्वात्॥ ज्ञातुः क्षेत्रज्ञस्य तत्कृतदोषानुपपत्तेः यावत्किंचित्क्षेत्रज्ञस्य दोषजातमवि
द्यमानमासंजयसि तस्य ज्ञेयत्वोपपत्तेः क्षेत्रधर्मत्वमेव न क्षेत्रज्ञधर्मत्वं न च तेन क्षेत्रज्ञो
दुष्यति ज्ञेयेन ज्ञातुः संसर्गानुपपत्तेः यदि हि संसर्गः स्यात् ज्ञेयत्वमेव नोपपद्येत॥ य
द्यात्मनो धर्मोऽविद्यावत्त्वं दुःखित्वादि च कथं भोः प्रत्यक्षमुपलभ्यते कथं वा क्षेत्रज्ञधर्मः
ज्ञेयं च सर्वं क्षेत्रं ज्ञातैव क्षेत्रज्ञ इत्यवधारितेऽविद्यादुःखित्वादेः क्षेत्रज्ञधर्मत्वं तस्य च प्र
त्यक्षोपलभ्यत्वमिति विरुद्धमुच्यतेऽविद्यामात्रावष्टंभात्केवलं॥ अत्राह साविद्या कस्येति॥
यस्य दृश्यते तस्यैव॥ कस्य दृश्यत इति॥ अत्रोच्यते॥ अविद्या कस्य दृश्यत इति प्रश्नो निरर्थ
कः॥ कथं॥ दृश्यते चेदविद्या तद्वंतमपि पश्यसि न च तद्वत्युपलभ्यमाने सा कस्येति प्र
श्नो युक्तः न हि गोमत्युपलभ्यमाने गावः कस्येति प्रश्नोऽर्थवान् भवेत्॥ ननु विषमो दृष्टा

तोगवांनहितत्प्रत्यक्षत्वात्संबंधोपिप्रत्यक्षइतिप्रश्नोनिरर्थकःनतथाअविद्यातद्वांश्चप्रत्य
क्षौयतःप्रश्नोनिरर्थकःस्यात्॥ अप्रत्यक्षेणाविद्यावताविद्यासंबंधेज्ञातेकिंतवस्यात्
अविद्यायाश्चानर्थहेतुत्वात्परिहर्तव्यास्यात्॥ यस्याविद्यासतांपरिहरिष्यति॥ ननुममै
वाविद्या॥ जानासितर्हिअविद्यांतद्वंतंचात्मानं॥ जानामिनतुप्रत्यक्षेणअनुमाने
नचेत्जानासिकथंसंबंधग्रहणं॥ नहितवज्ञातुर्ज्ञेयभूतयाविद्ययातत्कालेसं
बंधोग्रहीतुंशक्यते॥ अविद्यायाविषयत्वेनैवज्ञातुरुपयुक्तत्वात्नचज्ञातुरविद्याया।
श्चसंबंधस्ययोग्रहीताज्ञानंचान्यत्तद्विषयंसंभवतिअनवस्थाप्राप्तेःयदिज्ञातापि
ज्ञेयसंबंधोज्ञायेतअन्योज्ञाताकल्प्यःस्यात्तस्याप्यन्यः॥ तस्याप्यन्यइत्यनवस्थाप
रिहार्यायदिपुनरविद्याज्ञेयाअन्यद्वाज्ञेयंज्ञेयमेवतथाज्ञातापिज्ञातैवनज्ञेयंभवति॥
यदाचैवंनदाविद्यादुःखित्वाद्यैर्नज्ञातुःक्षेत्रज्ञस्यकिंचिद्दुष्यति॥ नन्वयमेवदोषोयद्दोषव
त्क्षेत्रविज्ञातृत्वं॥ न॥ विज्ञानस्वरूपस्यैवाविक्रियस्यविज्ञातृत्वोपचारात्यथोष्णतामात्रे
ग्नेस्तप्तिक्रियोपचारस्तद्वत्यत्रभगवताक्रियाकारकफलात्मत्वाभावआत्मनिस्वतएवदर्शितः

अविद्याध्यारोपितमेव क्रियाकारकाद्यात्मनि उपचर्यते ॥ तथा तत्र तत्र च पश्यन्नेवेविद्वं
360 तारः प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः नादत्ते कस्यचिदित्यादिप्रकरणे
षुदर्शितः ॥ तथैव च व्याख्यातमस्माभिः उत्तरेषु प्रकरणेषु दर्शयिष्यामः ॥ हन्त तर्ह्या
त्मनि क्रियाकारकफलात्मतायाः स्वतोऽभावेऽविद्ययाध्यारोपितत्वे कर्माण्यविद्व
त्कर्तव्यान्येव न विदुषामिति प्राप्तं ॥ सत्यमेवं प्राप्तमेतदेव च न हि देहभृता शक्य
मित्यत्र दर्शयिष्यामः सर्वशास्त्रार्थोपसंहारप्रकरणे च ॥ समासेनैव कौन्तेय निष्ठा ज्ञा
नस्य या परा इत्यत्र विशेषतो दर्शयिष्यामः ॥ अलमिह
बहुप्रपंचेनेत्युपसंह्रियते ॥ इदं शरीरमित्या
दिश्लोकोपदिष्टस्य क्षेत्राध्यायार्थस्य संग्र ग्र
हश्लोकोयमुपन्यस्यते ॥ तत्क्षेत्रं यच्चेत्या
दिव्याचिख्यासितस्य ह्यर्थस्य संग्रहोपन्या
सो न्याय्य इति ॥ २ ॥ ॥

तदिति ॥ यन्निर्दिष्टमिदं शरीरमिति तत्तच्छब्देन परामृशति ॥ यच्चेदं निर्दिष्टं क्षेत्रं तद्या।
दृक्‌यादृशं स्वकीयैर्धर्मैः चशब्दः समुच्चयार्थः यद्विकारि यो विकारो यस्य तद्यद्विकारि
यतो यस्माच्च यत्कार्यमुत्पद्यत इति वाक्यशेषः ॥ स च यः क्षेत्रज्ञो निर्दिष्टः स यत्प्र

तत्क्षेत्रं यच्च यादृक्च यद्विकारि यतश्च यत्
स च यो यत्प्रभावश्च तत्समासेन मे शृणु ॥ ३ ॥

भावः ये प्रभावा उपाधिकृताः शक्तयो यस्य स यत्प्रभावश्च तत् क्षेत्रक्षेत्रज्ञयोर्याथात्म्यं
यथाविशेषितं ॥ समासेन संक्षेपेण ॥ मे मम वाक्यतः
शृणु श्रुत्वावधारयेत्यर्थः ॥ ३ ॥ ॥

362

तत्क्षेत्रक्षेत्रज्ञयाथात्म्यं विवक्षितं स्तौति श्रोतृबुद्धिप्ररोचनार्थं ॥ ऋषिभिरिति ॥ ऋषिभिर्वसि
ष्ठादिभिः बहुधा बहुप्रकारं गीतं कथितं छंदोभिश्छंदांसि ऋगादीनि तैश्छंदोभिर्विवि
धैर्नानाप्रकारैः पृथक् विवेकतो गीतं ॥ किंच ॥ ब्रह्मसूत्रपदैश्चैव ब्रह्मणः सूचका

ऋषिभिर्बहुधा गीतं छंदोभिर्विविधैः पृथक् ॥ ब्रह्म
सूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः ॥४॥ ॥ ॥

नि वाक्यानि ब्रह्मसूत्राणि तैः पद्यते ज्ञायते ब्रह्म इति पदान्युच्यंते ॥ तैरेव च क्षेत्रक्षेत्रज्ञ
याथात्म्यं गीतमित्यनुवर्त्तते ॥ आत्मेत्येवोपासीतेत्यादिभिर्हि ब्रह्मसूत्रपदैरात्मा ज्ञाय
ते ॥ हेतुमद्भिर्युक्तियुक्तैर्विनिश्चितैर्निःसंशयरूपैः निश्चितप्रत्ययोत्पादकैरित्यर्थः ॥४॥

गी·भा·
१७५
363

क्तत्वाभिप्रायविशिष्टतयार्जुनायाह भगवान् ॥ महाइति ॥ महाभूतानि महांति च तानि भूता
नि सर्वविकारव्यापकत्वात् ॥ भूतानि च सूक्ष्माणि स्थूलानींद्रियगोचरशब्देनाभिधास्य
ते ॥ अहंकारो महाभूतकारणं अहंप्रत्ययलक्षणो अहंकारकारणं बुद्धिरध्यवसायल
क्षणा तत्कारणमव्यक्तमेव च न व्यक्तं ॥ अव्यक्तं अव्याकृतमीश्वरशक्तिर्मायाममभाया
दुरत्ययेत्युक्तं ॥ एवशब्दः प्रकृत्यवधारणार्थः ॥ एतावत्येवाष्टधाभिन्ना प्रकृतिः ॥ चशब्दः

महाभूतान्यहंकारो बुद्धिरव्यक्तमेव च ॥ इंद्रियाणि दशैकं च पंच चेंद्रियगोचराः ॥५॥

उक्तसमुच्चयार्थः ॥ इंद्रियाणि दश श्रोत्रादीनि पंच बुद्ध्युत्पादकत्वाद्बुद्धींद्रियाणि वा
क्पाणिपादपायूपस्थाख्यानि पंच कर्मनिर्वर्तकत्वात्कर्मेंद्रियाणि तानि दश
एकं च किं तन्मनः एकादशं संकल्पाद्यात्मकं ॥ पंच चेंद्रियगोचराः शब्दादयो वि
षयाः तान्येतानि सांख्याश्चतुर्विंशतितत्वान्याचक्षते ॥५॥ ॥ राम ॥ राम ॥ १७५

अथेदानीमात्मगुणा इति यानाचक्षते वैशेषिकाः तेऽपि क्षेत्रधर्मा एव न तु क्षेत्रज्ञस्येत्याह भ
364 गवान् ॥ इच्छेति ॥ इच्छा यज्जातीयं सुखहेतुमर्थमुपलब्धवान् पूर्वं पुनस्तज्जातीयमु
पलभमानस्तमादातुमिच्छति सुखहेतुरिति सेयमिच्छान्तःकरणधर्मः ज्ञेयत्वात् ॥

इच्छा द्वेषः सुखं दुःखं संघातश्चेतना धृतिः ॥ एतत्
क्षेत्रं समासेन सविकारमुदाहृतम् ॥ ६ ॥ ॥॥॥

क्षेत्रं ॥ तथा द्वेषो यज्जातीयमर्थं दुःखहेतुत्वेनानुभूतवान् पूर्वं पुनस्तज्जातीयमनुभ
वन् ॥ तं द्वेष्टि सोऽयं द्वेषो ज्ञेयत्वात् क्षेत्रमेव ॥ तथा सुखमनुकूलं प्रसन्नं सत्त्वात्मकं ज्ञेय
त्वात् ॥ क्षेत्रमेव ॥ दुःखं प्रतिकूलात्मकं ज्ञेयत्वात्तदपि क्षेत्रं ॥ संघातो देहेन्द्रियाणां संह

तिः तस्मिन्नभिव्यक्तांतःकरणाद्दृत्तितप्त इव लोहपिंडेऽग्निरात्मचैतन्याभासरसविद्धा चे
तना सा च क्षेत्रं ज्ञेयत्वात् ॥ धृतिर्यया अवसादप्राप्तानि देहेंद्रियाणि ध्रियंते सा च ज्ञेयत्वात्
क्षेत्रं ॥ सर्वांतःकरणधर्मोपलक्षणार्थमिच्छादिग्रहणं यदुक्तं तदुपसंहरति ॥ एतत् ॥
क्षेत्रं समासेन सविकारं सह विकारेण महदादिनोदाहृतमुक्तं ॥ यस्य क्षेत्रभेदजा
तस्य संहतिरिदं शरीरं क्षेत्रमित्युक्तं तत् ॥ क्षेत्रं व्याख्यातं महा
भूतादिभेदभिन्नं धृत्यंतं ॥ क्षेत्रज्ञो वक्ष्यमाणविशेष
णो यस्य सप्रभावस्य क्षेत्रज्ञस्य परिज्ञानादमृतत्वं
भवति ॥ ज्ञेयं यत्तत्प्रवक्ष्यामीत्यादिना स
विशेषणं स्वयमेव वक्ष्य
ति भगवान्
॥।५॥।
॥ ॐ ॥

अधुनातज्ज्ञानसाधनगणंअमानित्वादिलक्षणंयस्मिन्सतितज्ज्ञेयविज्ञानेयोग्योधिकृतोभ
366 वतियत्परःसंन्यासीज्ञाननिष्ठउच्यतेतममानित्वादिगणंज्ञानसाधनत्वाज्ज्ञानशब्दवाच्यं
विदधातिभगवान्॥अमानीति॥अमानित्वंमानिनोभावोमानित्वंआत्मनःश्लाघनंतद्
भावोऽमानित्वं॥अदंभित्वंस्वधर्मप्रकटीकरणंदंभित्वंतदभावोऽदंभित्वंअहिंसाअहिं
सनंप्राणिनामपीडनं क्षांतिःपरापराधप्राप्तावविक्रिया॥आर्जवंऋजुभावोऽवक्रत्वं

अमानित्वमदंभित्वमहिंसाक्षांतिरार्जवं॥आचार्योपासनंशौचंस्थैर्यमात्मविनि
ग्रहः॥७॥

आचार्योपासनंमोक्षसाधनोपदेष्टुराचार्यस्यशुश्रूषादिप्रयोगेन
सेवनं॥शौचंकायमलानांमृज्जलाभ्यांप्रक्षालनं॥अंतश्चप्रतिपक्षभावनयारा
गादिमलानामपनयःशौचं॥स्थैर्यंस्थिरभावःमोक्षमार्गएवकृतव्यवसायत्वमा
त्मविनिग्रहःआत्मोपकारकस्यात्मशब्दवाच्यस्यकार्यकरणसंघातस्यविनिग्र
हःस्वभावेनसर्वतःप्रवृत्तस्यसन्मार्गएवनिरोधआत्मविनिग्रहः॥७॥

किंच॥ इंद्रियेति॥ इंद्रियार्थेषु शब्दादिषु दृष्टादृष्टभोगेषु विरागभावो वैराग्यं॥ अनहंकारो
अहंकारभाववर्जित एव च॥ जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनं॥ जन्म च मृत्यु
श्च जरा च व्याधयश्च दुःखानि च तेषु जन्मादिषु दुःखान्तेषु प्रत्येकं दोषानुदर्शनं॥ जन्म
नि गर्भवासयोनिद्वारनिःसरणदोषस्यानुदर्शनमालोचनं तथा मृत्यौ दोषानुदर्श
ने॥ तथा जरायां प्रज्ञाशक्तितेजोनिरोधदोषानुदर्शनं परिभूतता चेति॥ तथा व्याधिषु शि

इंद्रियार्थेषु वैराग्यमनहंकार एव च॥ जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनं॥ ८॥

रोरोगादिषु दोषानुदर्शनं॥ तथा दुःखेष्वाध्यात्मिकाधिभूताधिदैवनिमित्तेषु अथवा
दुःखान्येव दोषो दुःखदोषः तस्यानुदर्शनं दुःखं जन्म दुःखं मृत्युर्दुःखं जरा दुःखं व्याध
यः दुःखनिमित्तत्वात् जन्मादयो दुःखं दुःखानि पुनः स्वरूपेणैव दुःखमिति॥ एवं जन्मा ॥ १८१॥
दिषु दुःखदोषानुदर्शनादिंद्रियविषयाणां भोगेषु वैराग्यमुपजायते॥ ततः प्रत्यगात्म
निप्रवृत्तिः कारणानामात्मदर्शनाय॥ एवं ज्ञानहेतुत्वाज्ज्ञानमुच्यते जन्मादिषु दुःखानु दर्शनं॥ ८॥

368 अमृश्ति॥ असक्तिः सक्तिः संगनिमित्तेषु विषयेषु प्रीतिमात्रं तदभावोऽसक्तिः अनभिष्वंगोऽभि
ष्वंगाऽभावः अभिष्वंगो नामासक्तिविशेष एवाऽनन्यात्मभावनालक्षणः यथान्यस्मिन
सुखिनि दुःखिनि वा अहमेव सुखी दुःखी च जीवति मृते वा अहमेव जीवामि मरिष्यामि चेति
क्वेत्याह॥ पुत्रदारगृहादिषु पुत्रेषु दारेषु गृहेषु आदिग्रहणादन्येष्वप्यत्यन्तेष्टेषु दासवर्गादिषु

असक्तिरनभिष्वंगः पुत्रदारगृहादिषु ॥ नित्यं च स
मचित्तत्वमिष्टानिष्टोपपत्तिषु ॥९॥

तच्चाभयं ज्ञानार्थत्वाज्ज्ञानमुच्यते॥ नित्यं च समचित्तत्वं तुल्यचित्तता॥ क्क इष्टानिष्टोप
पत्तिषु॥ इष्टानामनिष्टानां चोपपत्तयः संप्राप्तयः तासु इष्टानिष्टोपपत्तिषु॥ इष्टोपपत्ति
षु न हृष्यति न कुप्यति वा अनिष्टोपपत्तिषु॥ तच्चैतन्नित्य
समचित्तत्वं ज्ञानं ॥९॥

किंच॥ मयिचेति॥ मयिचईश्वरे॥ अनन्ययोगेनअपृथक्योगसमाधिनानान्योभगवतोवा
सुदेवात्परोऽस्ति॥ अतःसएवनोगतिरित्येवंनिश्चिताऽव्यभिचारिणीबुद्धिरनन्ययोगः॥
तेनभजनंभक्तिःनव्यभिचरणशीलाऽव्यभिचारिणीसाचज्ञानं॥ विविक्तदेशसेवित्वंवि
विक्तःस्वभावतःसंस्कारेणवाऽशुच्यादिभिःसर्पव्याघ्रभयादिभिश्चरहितोऽरण्यनदीपु
लिनदेवगृहादिर्विविक्तोदेशःतंसेवितुंशीलमस्येतिविविक्तदेशसेवीतस्यभावोविवि

मयिचानन्ययोगेनभक्तिरव्यभिचारिणी॥ विविक्तदेशसेवित्वमरतिर्जनसंसदि ॥१०॥

क्तदेशसेवित्वं॥ विविक्तेषुहिदेशेषुचित्तंप्रसीदतियतः॥ ततआत्मादिभावनाविविक्तउ
पजायतेअतोविविक्तदेशसेवित्वंज्ञानमुच्यते॥ अरतिररमणं॥ जनसंसदिजनानांप्रा।
कृतानांसंस्कारशून्यानांअविनीतानांकलहोत्सवतचित्तानांसंसत्समवायोजनसंस
त्॥ नसंस्कारवतांविनीतानांसंसत्तस्यास्तानोपकारकत्वादतःप्राकृतजनसंसद्यरति १८२

अध्यात्मेति॥ अध्यात्मज्ञाननित्यत्वं आत्मादिविषयं ज्ञानमध्यात्मज्ञानं तस्मिन्नित्यभावो
370 नित्यत्वं॥ अमानित्वादीनां ज्ञानसाधनानां भावनापरिपाकनिमित्तं तत्त्वज्ञानं तस्यार्थो
मोक्षः संसारोपरमः तस्यालोचनं तत्त्वज्ञानार्थदर्शनं॥ तत्त्वज्ञानफलालोचने हि तत्सा

अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनं॥ ए
तज्ज्ञानमिति प्रोक्तमज्ञानं यदतोन्यथा॥११॥

धनानुष्ठाने प्रवृत्तिः स्यादिति॥ तदमानित्वादितत्त्वज्ञानार्थदर्शनांतमुक्तं ज्ञानमि
ति प्रोक्तं ज्ञानार्थत्वात्॥ अज्ञानं यदतस्माद्यथोक्तादन्यथा विपर्ययेण मानित्वद
म्भित्वं हिंसाक्षान्त्यनार्जवमित्याद्यज्ञानं विज्ञेयं परिहरणाय संसारप्रवृत्तिकारण त्वादिति ॥११॥

गी·भा· यथोक्तेन ज्ञानेन ज्ञातव्यं किमित्याकांक्षायामाह॥ ज्ञेयं यत्तदित्यादि॥ ननु यमा निय।
१८२ माश्चामानित्वादयो न तैर्ज्ञेयं ज्ञायते न ह्यमानित्वादि कस्यचिद्वस्तुनः परिच्छेदकं दृष्ट
371 म्सर्वत्रैव च यद्विषयं यज्ज्ञानं तदेव तस्य ज्ञेयस्य परिच्छेदकं दृश्यते न ह्यन्यविषयेण ज्ञा।
नेनान्यदुपलभ्यते यथा घटविषयेण ज्ञानेनाग्निः॥ नैष दोषः ज्ञाननिमित्तत्वाज्ज्ञा

ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वामृतमश्नुते ॥ अ
नादिमत्परं ब्रह्म न सत्तन्नासदुच्यते ॥१२॥ ॥

नमुच्यते इत्यवोचाम ज्ञानसहकारिकारणत्वाच्च॥ ज्ञेयं इति॥ ज्ञेयं ज्ञातव्यं यत्तत्प्र।
वक्ष्यामि प्रकर्षेण यथावद्वक्ष्यामि किं फलं तदिति प्ररोचनेन श्रोतुरभिमुखीकरणा ॥
याह॥ यज्ज्ञेयं ज्ञात्वामृतममृतत्वमश्नुते न पुनर्म्रियत इत्यर्थः॥ अनादिमत्त्वादि ॥१८॥
रस्यास्तीत्यादिमत् आदिमन्न भवतीत्यनादिमत्॥ किं तत्परं निरतिशयं ब्रह्म ज्ञेयमि ॥
ति।

तिप्रकृतं ॥ अत्र केचिदनादिमत्परमितिपदं छिंदंति ॥ बहुव्रीहिणा कोर्थमत्तपर्यवसान
372 र्थकमनिष्टं स्यादिति ॥ अर्थविशेषं च दर्शयंति ॥ अहं वासुदेवाख्या परा शक्तिर्यस्य तत्
त्मत्परमिति ॥ सत्यमेवमपुनरुक्तं स्यात् दर्थे प्रत्तमभवति नत्वर्थः संभवति ॥ अब्रह्मणः स
र्वविशेषप्रतिषेधेनैव निरूपयितव्यत्वात् न सत्तन्नासदुच्यत इति ॥ विशिष्टप्राप्तिम
न्तप्रदर्शनेन विशेषप्रतिषेधस्त्विति विप्रतिषिद्धं ॥ तस्मान्मत्परो बहुव्रीहिणा समाना
२ र्थत्वेपि प्रयोगः श्लोकपूरणार्थः ॥ अमृतत्वफलं ज्ञेयं मया वाच्यं तद् इति प्ररोचनेनाभिमु
खीकृत्याह ॥ न सत्तद्ब्रह्म यन्मयोच्यते नाप्यसत्तदुच्यते ॥ ननु महता कंठरवेण ज्ञेयं यत्तत्
प्रवक्ष्यामीत्यनन्तरं ह्यननुरूपमुक्तं न सत्तन्नासदुच्यत इति ॥ न ॥ अनुरूपमेवोक्तं ॥ कथं ॥ सर्वा
सूपनिषत्सु ज्ञेयं ब्रह्म नेति नेत्यस्थूलमनण्वित्यादिविशेषप्रतिषेधेनैव निर्दि
श्यते नेदं तदिति वाचोऽगोचरत्वात् ॥ ननु न तदस्ति यद्वस्त्वस्तिशब्देन नोच्यते ॥ अथा
स्तिशब्देन नोच्यते नास्ति सद्द्वयं ॥ विप्रतिषिद्धं च ज्ञेयं तदस्ति नास्तिशब्देन नोच्यत इति

नतावद्ब्रह्मास्तिनास्तिबुद्ध्यविषयत्वात्॥ननुसर्वाबुद्धयोऽस्तिनास्तिबुद्ध्यनुगताएवतत्रै
वंसतिज्ञेयमप्यस्तिबुद्ध्यनुगतप्रत्ययविषयंवास्यान्नास्तिबुद्ध्यनुगतप्रत्ययविषयंवा।
स्यात्॥न॥तस्यातींद्रियत्वेनोभयबुद्ध्यनुगतप्रत्ययाविषयत्वात्॥यद्धींद्रियगम्यंवस्तुघ
टादिकंतदस्तिबुद्ध्यनुगतप्रत्ययविषयंवास्यान्नास्तिबुद्ध्यनुगतप्रत्ययविषयंवास्या
त्॥इदंतुज्ञेयमतींद्रियत्वेनशब्दैकप्रमाणगम्यत्वान्नघटादिवदुभयबुद्ध्यनुगतप्रत्य
यविषयमिति॥अतोनसत्तन्नासदुच्यते॥यत्तूक्तंविरुद्धमुच्यतेज्ञेयंतन्नसत्तन्नास
दुच्यतइतिनविरुद्धं॥अन्यदेवतद्विदितादथोअविदितादधीतिश्रुतेः॥श्रुतिरपिवि
रुद्धार्थेतिचेद्यथायज्ञायशालामारभ्यकोहितद्वेदयद्यमुष्मिंल्लोकेअस्तिवान
वेतीत्येवमितिचेन्न॥विदिताविदितान्यश्रुतेरवश्यविज्ञेयार्थप्रतिपादनपरत्वात्
यद्यमुष्मिन्नित्यादितुविधिशेषोर्थवादः॥उपपत्तेश्चसदसदादिशब्दैर्ब्रह्मनोच्यतइति १८४
सर्वोहिशब्दोर्थप्रकाशनायप्रयुक्तः॥श्रूयमाणश्चश्रोतृभिर्जातिक्रियागुणसंबंध।

द्वारेणसंकेतग्रहणसव्यपेक्षोर्थंप्रत्याययंतिनान्यथादृष्टत्वात्॥तद्यथागौरश्वइ
374 तिवाजातितः॥पचतिपठतीतिचक्रियातः॥शुक्लःकृष्णइतिवागुणतः॥धनीगोमानि
तिवासंबंधतः॥ब्रह्मतुनतज्जातिमत्॥अतोनसदादिशब्दवाच्यं॥नापिगुणवत्
येनगुणशब्देनोच्येतनिर्गुणत्वात्॥नापिक्रियाशब्दवाच्यंनि
ष्क्रियत्वात्॥निष्क्रियंशांतमितिश्रुतेः॥नचसंबंधीएक
त्वादद्वयत्वादविषयत्वादात्मत्वाच्चनकेन
चिच्छब्देनोच्यतइतियुक्तं॥यतो
वाचोनिवर्तंतइत्या
दिश्रुतिभ्य
श्च॥१२॥
ॐॐ
॥ॐ॥

सद्बुद्धिप्रत्ययाविषयत्वादसत्त्वाशंकायां ज्ञेयस्य सर्वप्राणिकरणोपाधिद्वारेण तदस्तित्वं प्रति
पादयंस्तदाशंकानिवृत्त्यर्थमाह॥ सर्वत इति॥ सर्वतः पाणिपादं तत्॥ सर्वत्र पाणयः पा।
दाश्चास्येति सर्वतः पाणिपादं तत् ज्ञेयं॥ सर्वप्राणिकरणोपाधिभिः क्षेत्रज्ञोऽस्तित्वे विभाव्य
ते क्षेत्रज्ञश्च क्षेत्रोपाधित उच्यते॥ क्षेत्रं च पाणिपादादिभिरनेकधा भिन्नं क्षेत्रोपाधिभेद

सर्वतःपाणिपादं तत्सर्वतोऽक्षिशिरोमुखं॥ सर्व
तःश्रुतिमल्लोके सर्वमावृत्य तिष्ठति॥१३॥॥॥॥

कृतं च विशेषजातं मिथ्यैव क्षेत्रज्ञस्येति तदपनयेन ज्ञेयत्वमुक्तं न सत्तन्नासदुच्यत इति
उपाधिकृतं मिथ्यारूपमप्यस्तित्वाधिगमाय ज्ञेयधर्मवत्परिकल्प्योच्यते सर्वतः पा।
णिपादमित्यादि॥ तथा हि संप्रदायविदां वचनं॥ अध्यारोपापवादाभ्यां निःप्रपंचं प्रपंच्य
त इति॥ सर्वत्र सर्वदेहावयवत्वेन गम्यमानाः पाणिपादादयो ज्ञेयशक्तिसद्भावनि

376

मिति स्वकार्यैरिति॥ ज्ञेयं सद्भावलिंगानि ज्ञेयस्य तूपचारत उच्यते॥ तथा व्याख्येयमन्यत्
सर्वतः पाणिपादं तद्धि ज्ञेयं सर्वतोक्षिशिरोमुखं सर्वत्राक्षीणि शिरांसि मुखानि च यस्य तत्स
र्वतोक्षिशिरोमुखं॥ सर्वतः श्रुतिमत् श्रुतिः श्रवणेंद्रियं तद्यस्यास्ति तच्छ्रुतिमत् लो
के प्राणिनिकाये॥ सर्वमावृत्य संव्याप्य तिष्ठति स्थितिं लभते न चलतीत्यर्थः॥१३॥
उपाधिभूतपाणिपादादींद्रियाध्यारोपणाज्ज्ञेयस्य तद्वत्ताशंका माभूदित्येवमर्थः श्लो

सर्वेंद्रियगुणाभासं सर्वेंद्रियविवर्जितं॥ असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च
॥१४॥

कारंभः॥ सर्वेति॥ सर्वेंद्रियगुणाभासं सर्वाणि च तानि इंद्रियाणि श्रोत्रादीनि
बुद्धींद्रियकर्मेंद्रियाख्यानि चेति॥ अंतःकरणे च बुद्धिमनसी ज्ञेयोपाधित्वस्य तुल्यत्वा
त्॥ सर्वेंद्रियग्रहणेन गृह्यंते अपि चांतःकरणोपाधिभूतैः सर्वेंद्रियगुणैरध्यवसा
यसंकल्पश्रवणवचनादिभिरवभासत इति सर्वेंद्रियगुणाभासं॥ सर्वेंद्रियव्यापा

द्वारेणैव श्रोत्रादीनामप्युपाधित्वमिति सूत्रे तां तःकरण बहिःकरणोपाधिर

गी॰भा॰ रैर्व्याप्तमिव तज्ज्ञेयमित्यर्थः॥ ध्यायतीव लेलायतीवेति श्रुतेः॥ कस्मात्पुनः कारणाद्
१९६ व्याप्तं तज्ज्ञेयमेवेति निगद्यत इत्याह॥ सर्वेन्द्रियविवर्जितं सर्वकरणरहितमित्यर्थः॥
377 अतो न करणव्यापारैर्व्याप्तं तज्ज्ञेयं॥ यत्त्वयं मंत्रोऽपाणिपादो जवनो ग्रहीता पश्यत्य
चक्षुः स शृणोत्यकर्ण इत्यादि॥ स सर्वेन्द्रियोपाधिगुणानुगुण्यभजनशक्तिमत्त
ज्ज्ञेयमित्येवं प्रदर्शनार्थो न तु साक्षादेव जवनादिक्रियावत्त्वप्रदर्शनार्थः॥ अंधो म
णिमविंददित्यादिमंत्रार्थवत्तस्य मंत्रस्यार्थः॥ यस्मात्सर्वकरणवर्जितं ज्ञेयं तस्मा
दसक्तं सर्वसंश्लेषवर्जितं॥ यद्यप्येवं तथापि सर्वभृच्चैव सदास्पदं हि सर्वं॥ सर्वत्र
सद्बुद्ध्यनुगमान्नहि मृगतृष्णादयोपि निरास्पदा भवंत्यतः
सर्वभृत्सर्वं बिभर्तीति स्यात्॥ इदं चान्यज्ज्ञेयस्य सत्ताधिगमद्वारं॥ निर्गुणं स
त्त्वरजस्तमसां शब्दादिद्वारेण सुखदुःखमोहाकारपरिणतानां भोक्तृ चो
पलब्धृ तज्ज्ञेयमित्यर्थः॥१४॥ श्रु ३ १९६

सत्त्वरजस्तमांसि गुणाः तैर्वर्जितं तज्ज्ञेयं तथापि गुणभोक्तृ च गुणा
नां ३

378

किंच॥ बहिरिति॥ बहिस्त्वक्पर्यंतं देहमात्मत्वेनाविद्याकल्पितमपेक्ष्य तमेवावधिं कृ
त्वा बहिरुच्यते॥ तथा प्रत्यगात्मानमपेक्ष्य देहमेवावधिं कृत्वांतरुच्यते॥ बहिरंतश्चे।
त्युक्ते मध्येऽभावे प्राप्ते इदमुच्यते॥ अचरं चरमेव च॥ यच्चराचरं देहाभासमपि तत्तदेव ज्ञे
यं॥ यथा रज्जुः सर्पाभासा॥ यद्यचरं चरमेव च व्यवहारविषयं सर्वं ज्ञेयं किमर्थमिदमिति

बहिरंतश्च भूतानामचरं चरमेव च॥ ॥सूक्ष्मत्वा
त्तदविज्ञेयं दूरस्थं चांतिके च तत्॥१५॥ ॥ ॥

सर्वैर्न विज्ञेयमित्युच्यते॥ सत्यं सर्वाभासं तथा व्योमवत्सूक्ष्मं॥ अतः सूक्ष्मत्वात्स्व
रूपेणातज्ज्ञेयमप्यविज्ञेयमविदुषां॥ विदुषां त्वात्मैवेदं सर्वं ब्रह्मैवेदं सर्वमित्यादि
प्रमाणतो नित्यविज्ञातं॥ अविज्ञाततया दूरस्थं वर्षसहस्रकोट्यापि अविदुषाम
प्राप्यत्वात्॥ अंतिके च तत् आत्मत्वाद्विदुषां॥१५॥ ॥ ॥ ॥शिव

गी॰भा॰
१८६
379

किंच॥अविभक्तमिति॥अविभक्तं च प्रतिदेहं व्योमवत्तदेकं भूतेषु सर्वप्राणिषु॥विभक्तमिव च
स्थितं देहेष्वेव विभाव्यमानत्वात्॥भूतभर्तृ च भूतानि तद्बिभर्तीति तज्ज्ञेयं भूतभर्तृ स्थिति
काले॥प्रलयकाले ग्रसिष्णु ग्रसनशीलं॥उत्पत्तिकाले प्रभविष्णु च प्रभवनशीलं॥यथा र
ज्ज्वादिः सर्पादेर्मिथ्याकल्पितस्य॥१६॥किंच॥सर्वत्र विद्यमानमपि सन्नोपलभ्यते चेज्ज्ञेयं तत्
तमस्तर्हि॥न॥किं तर्हि॥ज्योतिरिति॥ज्योतिषामादित्यादीनामपि तज्ज्ञेयं ज्योतिः॥आत्मचै

अविभक्तं च भूतेषु विभक्तमिव च स्थितं॥भूतभर्तृ च तज्ज्ञेयं ग्रसिष्णु प्रभविष्णु च॥१६॥ज्यो
तिषामपि तज्ज्योतिस्तमसः परमुच्यते॥ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य धिष्ठितं॥१७॥

तत्र ज्योतिषो ह्यादित्यादीनि ज्योतींषि दीप्यन्ते॥येन सूर्यस्तपति तेजसेद्धः॥
तस्य भासा सर्वमिदं विभातीत्यादि श्रुतिभ्यः॥स्मृतेश्चेहैव॥यदादित्यगतं तेज इत्यादि
त्यादेः॥तमसोऽज्ञानात्परमस्पृष्टमुच्यते॥ज्ञानादेर्दुःसंपादनबुद्ध्या प्राप्तावसा
दस्योत्तम्भनार्थमाह॥ज्ञानममानित्वादि॥ज्ञेयं ज्ञेयं यत्तत्प्रवक्ष्यामीत्यादिनोक्तं॥ज्ञानग
म्यं ज्ञेयमेव ज्ञातं सत् ज्ञानफलमिति ज्ञानगम्यमुच्यते॥ज्ञायमानं तु ज्ञेयं॥तदेतत्त्रयमपि।

हृदि बुद्धौ सर्वस्य प्राणिजातस्य धिष्ठि
तं विशेषेण स्थितं तत्रैव हि यं वि
भाव्यते॥१७॥

380

यथोक्तार्थोपसंहारार्थोयंश्लोकआरभ्यते॥ इत्येवंक्षेत्रंमहाभूतादिधृत्यंतं॥ तथाज्ञान
ममानित्वादितत्वज्ञानार्थदर्शनपर्यंत॥ ज्ञेयंचज्ञेयंयत्तदित्यादितमसःपरमुच्यत
इतिपर्यंतमुक्तं॥ समासतःसंक्षेपतः॥ एतावान्हिसर्वोवेदार्थोगीतार्थश्चोपसंहृत्यो
क्तोऽस्मिन्सम्यग्दर्शनेकोधिक्रियतइतिउच्यते॥ मद्भक्तोमयीश्वरेसर्वज्ञेपरमगुरौ।

इतिक्षेत्रंतथाज्ञानंज्ञेयंचोक्तंसमासतः॥ मद्भक्त
एतद्विज्ञायमद्भावायोपपद्यते ॥१८॥ ।।। ॥।

वासुदेवेसमर्पितसर्वात्मभावोयत्पश्यतिशृणोतिस्पृशतिवासर्वमेवभगवा।
न्वासुदेवइत्येवंग्रहाविष्टबुद्धिर्मद्भक्तःसएतत्यथोक्तंसम्यग्दर्शनंविज्ञाय॥
मद्भावायममभावोमद्भावःपरमात्मभावः॥ तस्मैमद्भावाय॥ उपपद्यतेमोक्षंग
च्छति ॥१८॥ ॥ ॥ ॥ शिव॥

तत्रममेईश्वरस्यद्वे प्रकृती उपन्यस्ते परापरे क्षेत्रक्षेत्रज्ञलक्षणे पूर्वयोनी निमित्तानीति चो
क्ते क्षेत्रक्षेत्रज्ञप्रकृतिद्वययोनित्वं कथं भूतानामिति यम्वयोऽधुनोच्यते॥ प्रकृतिं॥ प्रकृ भि२
तिं पुरुषं चैव ईश्वरस्य प्रकृती॥ तौ प्रकृतिपुरुषावुभावप्यनादी विद्धि न विद्यते आदिर्य
योस्तावनादी नित्यत्वादीश्वरस्य तत्प्रकृत्योरपि युक्तं नित्यत्वेन भवितुं॥ प्रकृतिद्वय।

प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि॥ विकारांश
श्च गुणांश्चैव विद्धि प्रकृतिसंभवान्॥ १९॥ ॥

तमेव हीश्वरस्येश्वरत्वं याभ्यां प्रकृतिभ्यामीश्वरो जगदुत्पत्तिस्थितिप्रलयहेतुः॥
ते द्वे अनादी सत्यौ संसारस्य कारणं॥ न आदी अनादी इति तत्पुरुषसमासं के
चिद्वर्णयन्ति तेन किलेश्वरस्य कारणत्वं सिद्ध्यति॥ यदि पुनः॥ प्रकृतिपुरुषावे १८८
वा नित्यौ स्यातां तत्कृतमेव जगन्नेश्वरस्य जगत्कर्तृत्वं॥ तदसत्॥ प्राक्प्रकृतिपुरुषयो।

नित्यत्वेरीशितव्याऽभावादीश्वरत्वाऽनीश्वरत्वप्रसंगात्संसारस्यनिर्निमित्तत्वेऽनिर्मो
क्षप्रसंगात्शास्त्रानर्थक्यप्रसंगात् ॥ बंधमोक्षाभावप्रसंगाच्च ॥ नित्यत्वेपुनरीश्वरस
382 प्रकृत्योः सर्वमेतदुपपन्नंभवेत् ॥ कथं ॥ विकारांश्चगुणांश्चैववक्ष्यमानान् ॥ बुद्ध्या
दिदेहेंद्रियांतान्गुणांश्चसुखदुःखमोहप्रत्ययाकारपरिणतान्
विद्धिजानीहिप्रकृतिसंभवान् ॥ प्रकृतिरीश्वर
स्यविकारकारणशक्तिस्त्रिगुणात्मिका
मायासासंभवोयेषांविकाराणांगुणा
नांचतान्विकारान्गुणांश्चवि
द्धिप्रकृतिसंभवान्प्रकृ
तिपरिणामान्
॥१९॥ ॥
॥ॐ॥

केचुनस्तेविकारागुणाश्चप्रकृतिसंभवाः॥कार्य्यकरणकर्तृत्वेकार्य्यंशरीरंकरणानितत्स्था
नित्रयोदश देहस्यारंभकानिभूतानिविषयाश्चप्रकृतिसंभवाविकाराः पूर्वोक्ताइह।
कार्य्यग्रहणेनगृह्यंते॥गुणाश्चप्रकृतिसंभवाःसुखदुःखमोहात्मकाःकरणाश्रयत्वात्
करणग्रहणेनगृह्यंते॥तेषांकार्य्यकरणानांकर्तृत्वमुत्पादकत्वंयत्तत्कार्य्यकरणकर्तृ

कार्यकरणकर्तृत्वेहेतुः प्रकृतिरुच्यते॥पुरु
षः सुखदुःखानांभोक्तृत्वेहेतुरुच्यते॥२०॥

त्वंतस्मिन्कार्य्यकरणानांकर्तृत्वेहेतुःकारणमारंभकत्वेनप्रकृतिरुच्यते॥एवंकार्य्यकर
णकर्तृत्वेनसंसारस्यकारणंप्रकृतिः कार्य्यकारणकर्तृत्वइत्यस्मिन्नपिपाठेकार्य्यंयद्यस्यविप
रिणामस्तत्तस्यकार्य्यंविकारः॥विकारिकारणंतयोर्विकारविकारिणोःकार्य्यकारणयोःकर्तृ
त्वइति॥अथवाषोडशविकाराःकार्य्यंसप्तप्रकृतिविकृतयःकारणंतान्येवकार्य्यकरण

त्युच्यते॥ तेषां कर्तृत्वे हेतुः प्रकृतिरुच्यते आरंभकत्वेनेव॥ पुरुषश्च संसारस्य कारणं
384 यथा स्यात्तदुच्यते॥ पुरुषो जीवः क्षेत्रज्ञः भोक्ता सुखदुःखानां भोग्यानां भोक्तृत्वे उप
लब्धृत्वे हेतुरुच्यते॥ कथं पुनरनेन कार्यकारणकर्तृत्वेन सुखदुःखभोक्तृत्वेन च
प्रकृतिपुरुषयोः संसारस्य कारणत्वमुच्यत इति॥ अत्रोच्यते॥ कार्यकारणसुखदुः
खरूपेण हेतुफलात्मना प्रकृतेः परिणामाभावे पुरुषस्य च चेतनस्यासति तदुप
लब्धृत्वे कुतः संसारः स्यात्॥ यदा पुनः कार्यकारणरूपेण हेतुफलात्मना परिण
तया प्रकृत्या भोग्यया पुरुषस्य तद्विपरीतस्य भोक्तृत्वेनाविद्यारूपः संयोगः स्यात्त
दा संसारः स्यादिति॥ अतो यत्प्रकृतिपुरुषयोः कार्यकरणकर्तृत्वेन सुखदुःख।
भोक्तृत्वेन च संसारकारणत्वमुक्तं तद्युक्तं॥ कः पुनरयं संसारो नाम स
सुखदुःखसंभोगः संसारः पुरुषस्य च सुखदुःखा
नां भोक्तृत्वं संसारित्व
मिति ॥२०॥

यत्पुरुषस्य सुखदुःखानां भोक्तृत्वं संसारित्वमित्युक्तं तस्य किंनिमित्तमित्युच्यते ॥ पुरुष इति
पुरुषो भोक्ता प्रकृतिस्थः प्रकृतावविद्यालक्षणायां स्थितः प्रकृतिमात्मत्वेन गत इत्ये
तत् हि यस्मात्तस्माद्भुंक्ते उपलभत इत्यर्थः ॥ प्रकृतिजान् प्रकृतितो जातान् सुखदुः
खमोहाकाराभिव्यक्तान् गुणान् सुखी दुःखी मूढः पंडितोहमित्येवं सत्यामप्यविद्यायां
सुखदुःखमोहेषु गुणेषु भुज्यमानेषु यः संगआत्मभावः स प्रधानं कारणं जन्मनः स

पुरुषः प्रकृतिस्थो हि भुंक्ते प्रकृतिजान् गुणान् ॥ कारणं गुणसंगोस्य सदसद्योनिजन्म
सु ॥२१॥

यथाकामो भवति तत्क्रतुर्भवतीत्यादिश्रुतेः ॥ तदेतदाह ॥ कारणं हेतुः गुणसंगः
गुणेषु संगोस्य पुरुषस्य भोक्तुः ॥ सदसद्योनिजन्मसु सत्यश्चासत्यश्च योनयः तासु सद
सद्योनिषु जन्मानि सदसद्योनिजन्मानि तेषु सदसद्योनिजन्मसु विषयभूतेषु कार
णं गुणसंगः ॥ अथवा सदसद्योनिजन्मसु अस्य संसारस्य कारणं गुणसंग इति संसार
पदमध्याहार्यं ॥ सद्योनयो देवादियोनयः असद्योनयः पश्वादियोनयः सामर्थ्यात्

प्रकृतिस्थत्वाख्याऽविद्या गुणेषु च संगः संसारस्य कारणमिति तस्य परिवर्जनायोच्यते
386 अस्य च निवृत्तिकारणं ज्ञानवैराग्ये ससंन्यासे गीताशास्त्रे प्रसिद्धे ॥ तच्च ज्ञानं पुरस्तादुप
न्यस्तं क्षेत्रक्षेत्रज्ञविषयं यज्ज्ञात्वामृतमश्नुत इत्युक्तं ॥ अन्यापोहेनातद्धर्माध्यारोपेण
न च तस्यैव पुनः साक्षान्निर्देशः क्रियते ॥ उपद्रष्टेति ॥ उपद्रष्टा समीपस्थः सन्द्रष्टा स्व
यमव्यापृतः ॥ यथा ऋत्विग्यजमानेषु यज्ञकर्मव्यापृतेषु तटस्थोऽन्यो ऽव्यापृतो य

उपद्रष्टानुमन्ता च भर्ता भोक्ता महेश्वरः ॥ परमात्मेति चाप्युक्तो देहेऽस्मिन्पुरुषः प
रः ॥२२॥

ज्ञविद्याकुशलः ऋत्विग्यजमानव्यापारगुणदोषाणामीक्षिता ॥ तद्वत्का
र्यकरणव्यापारेष्वव्यापृतोऽन्यो विलक्षणस्तेषां कार्यकरणानां स्वव्यापाराणां सा
मीप्येन द्रष्टोपद्रष्टा ॥ अथवा देहचक्षुर्मनोबुद्ध्यात्मानो द्रष्टारः ॥ तेषां बाह्यो द्र
ष्टा देहः ॥ ततः आरभ्यान्तरतमः प्रत्यक्समीप आत्मा द्रष्टा यतः परोऽन्तरतरो नास्ति ।
द्रष्टा सोऽतिशयसामीप्येन द्रष्टृत्वादुपद्रष्टा स्यात् ॥ यज्ञोपद्रष्टृवद्वा सर्वविषयीकर

णाउपद्रष्टा॥ अनुमंताअनुमोदनमनुमननंकुर्वत्सुतत्क्रियासुपरितोषस्तेषुकर्तृष्वनुमं
ता॥ अथवानुमंताकार्यकरणप्रवृत्तिषुस्वयमप्रवृत्तोपिप्रवृत्तइवतदनुकूलोवि
भाव्यतेनानुमंता॥ अथवाप्रवृत्तान्स्वव्यापारेषुतत्साक्षिभूतःकदाचिदपिननिवार
यतीत्यनुमंता॥ भर्त्ताचभरणंनामदेहेंद्रियमनोबुद्धीनांसंहतानांचैतन्यात्मपारार्थ्येन
निमित्तभूतेनचैतन्याभासानांयत्स्वरूपधारणंतच्चैतन्यात्मकृतमेवेतिभर्त्तात्मोच्य
ते॥ भोक्ताअग्न्युष्णवन्नित्यचैतन्यस्वरूपेणबुद्धेःसुखदुःखमोहात्मकाःप्रत्ययाः
सर्वविषयविषयाश्चैतन्यात्मग्रस्ताइवजायमानाविभक्ताविभाव्यंतइतिभोक्तात्मो
च्यते॥ महेश्वरःसर्वात्मकत्वात्स्वतंत्रत्वाच्चमहानीश्वरश्चेतिमहेश्वरः॥ परमात्मादेहा
दिबुद्ध्यंतानांप्रत्यगात्मत्वेनकल्पितानामविद्ययापरमउपद्रष्टृत्वादिलक्षणआत्मा।
त्मेतिपरमात्मासोतःपरमात्मेत्यनेनशब्देनचाप्युक्तःकथितःश्रुतौक्वासावस्मि।
न्देहेपुरुषःपरोव्यक्तात्उत्तमःपुरुषस्त्वन्यःपरमात्मेत्युदाहृतइतियोवक्ष्यमा
णः॥ क्षेत्रज्ञंचापिमांविद्धीत्युपन्यस्तोव्याख्यायोपसंहृतश्च ॥२२॥ ॥ ॥॥॥ १८८

तमेवयथोक्तलक्षणमात्मानं॥यएवंवेत्ति॥यएवंयथोक्तप्रकारेणवेत्तिपुरुषंसाक्षादात्म
388 भावेनायमहमस्मीति॥प्रकृतिंचयथोक्तामविद्यालक्षणांगुणैःस्वविकारैःसहनिवर्त्ति
तां॥अभावमापादितांविद्यया॥सर्वथासर्वप्रकारेणवर्त्तमानोपि॥नसभूयःपुनर॥
पिपतितेस्मिन्विद्वच्छरीरेदेहान्तरायनाभिजायतेनोत्पद्यतेदेहान्तरंनगृह्णातीत्य

यएवंवेत्तिपुरुषंप्रकृतिंचगुणैःसह॥सर्वथा
वर्त्तमानोपिनसभूयोभिजायते ॥२३॥॥॥॥॥

र्थः॥अपिशब्दात्किमुवक्तव्यंस्ववृत्तस्थोनजायतइत्यभिप्रायः॥ननुयद्यपिज्ञा॥
नोत्पत्त्यनन्तरंपुनर्जन्माभावउक्तः तथापिप्राक्ज्ञानोत्पत्तेःकृतानांकर्मणांउ
त्तरकालभाविनांचयानिचातिक्रान्तानेकजन्मकृतानितेषांफलमदत्वानाशो
नयुक्तइतितस्मात्स्युःत्रीणिजन्मानिकृतविप्रणाशोहिनयुक्तइति॥यथाफलेप्रवृत्ता

गी·भा·
१५८
389

नामारब्धजन्मनां कर्मणां न चैककर्मणां विशेषोऽवगम्यते॥ तस्मात्त्रिप्रकाराण्यपि क
र्माणि क्षीणानि जन्मान्यारभेरन्॥ संहतानि वा सर्वाण्येकं जन्मारभेरन्॥ अन्यथा कृतवि
प्रणाशे सति सर्वत्रानाश्वासप्रसंगः शास्त्रानर्थक्यं च स्यादिति अत इदमयुक्तमुक्तं न स भू
योऽभिजायत इति॥ न॥ क्षीयते चास्य कर्माणि॥ ब्रह्म वेद ब्रह्मैव भवति॥ तस्य तावदेव
चिरं मिथो कालत्वत्सर्वाणि कर्माणि प्रहूयन्त इत्यादिश्रुतिशतेभ्यः॥ इहापि चोक्तं य
थैधांसीत्यादिना सर्वकर्मदाहः वक्ष्यति च उपपत्तेश्चाविद्याकामक्लेशबीजनिमि
त्तानि हि कर्माणि जन्मान्तराङ्कुरमारभन्ते॥ इहापि च साहंकाराभिसंधीनि कर्माणि
फलारम्भकानि नेतराणीति तत्र तत्र भगवतोक्तं॥ बीजान्यग्न्युपदग्धानि न रोहन्ति
यथा पुनः॥ ज्ञानदग्धैस्तथा क्लेशैर्नात्मा संपद्यते पुनरिति च॥ अस्तु तावज्ज्ञानोत्तरका
लकृतानां कर्मणां ज्ञानेन दाहो ज्ञानसहभावित्वात् न त्विह जन्मनि ज्ञानोत्पत्तेः प्राक्
कृतानामतीतानेकजन्मान्तरकृतानां च दाहो युक्तः॥ न॥ सर्वकर्माणीति विशेष १५८
णात्॥ ज्ञानोत्तरकालभाविनामेव सर्वकर्मणामिति चेत्॥ न॥ संकोचकारणान्

पपते॥ यत्तूक्तं यथा वर्त्तमानजन्मारंभकानि कर्म्माणि न दीयंते फलदानाय प्रवृ
390 त्तान्येवं तत्त्वविज्ञानेन तथाऽनारब्धफलानामपि कर्म्मणां तद्योनयुक्त इति॥ तदस
त्॥ कथं तेषामुक्तेषु वस्तुवृत्तफलत्वात्॥ यथाह्यवेलक्ष्यवेधाय मुक्त इषुर्धनुषो ला
लक्ष्यवेधानंतरं कालमप्यारब्धवेगतया पतनेनैव निवर्त्तते॥ एवं शरीरारंभकं कर्म
णा शरीरस्थितिप्रवृत्तिनिमित्तानारब्धवेगत्वमनक्षीयनविप्रयुक्तोऽप्युपसंहृतः येन तया
नारब्धफलानि कर्म्माणि साश्रयस्यात्मविज्ञानेन तानि वीजीकृ
येत इति॥ पतितेऽस्मिन् विद्वच्छरीरे न स पुनर्योऽभि
जायत इति युक्तमेवोक्तमिति सि
द्धं भवति ॥२३॥॥
शिवायन
मोन
॥मः॥

गी॰भा॰ आत्मदर्शनोपायविकल्पा इमे ध्यानादय उच्यन्ते॥ ध्यानेनेति॥ ध्यानेन ध्यानं नाम शब्दा
१९८ दिभ्यो विषयेभ्यः श्रोत्रादीनि करणानि मनस्युपसंहृत्य मनश्च प्रत्यक्चेतयितर्येका
391 ग्रतया मनसि यच्चिन्तनं तद्ध्यानं॥ तथा ध्यायतीव बकः ध्यायतीव पृथिवी ध्यायन्तीव
पर्वताः॥ इत्युपमोपादानात् तैलधारावत्संततोऽविच्छिन्नः प्रत्ययो ध्यानं तेन ध्यानेना
त्मनि बुद्धौ पश्यन्ति॥ आत्मानं प्रत्यक्चेतनं॥ आत्मना ध्यानसंस्कृतेनान्तःकरणेन के

ध्यानेनात्मनि पश्यन्ति केचिदात्मानमात्मना॥ अन्ये सांख्येन योगेन कर्म्मयोगेन चा
परे॥२४॥

चिद्योगिनः॥ अन्ये सांख्येन योगेन सांख्यं नाम इमे सत्वरजस्तमांसि गुणाः त
द्व्यापारसाक्षिभूतो नित्यो गुणविलक्षण आत्मेति चिन्तनं एष सांख्यो योगः तेन पश्यं
त्यात्मानमात्मनेति वर्त्तते॥ कर्म्मयोगेन कर्म्मैव योगः ईश्वरार्पणबुद्ध्यानुष्ठीयमानं १९८
घटनरूपं योगार्थत्वाद्योग उच्यते गुणतः तेन सत्वशुद्धिज्ञानोत्पत्तिद्वारेण चापरे॥२४॥

392

अन्ये इति॥ अन्ये तु एषु विकल्पेषु अन्यतरेणापि॥ एवं यथोक्तमात्मानमजानंतोऽन्येभ्य
आचार्येभ्यः श्रुत्वा इदमेव चिंतयतेत्युक्ता उपासते श्रद्दधानाः संतश्चिंतयंति॥ ते
पि चातितरंत्येव मृत्युं मृत्युयुक्तं संसारमित्येतत् श्रुतिपरायणाः श्रुतिः श्रव
णं परमयनं गमनं मोक्षमार्गप्रवृत्तौ परं साधनं येषां ते श्रुतिपरायणाः केवलपरोपदे
शप्रमाणाः स्वयं विवेकरहिता इत्यभिप्रायः॥ किमु वक्तव्यं प्रमाणं प्रति स्वतंत्रा वि

अन्ये त्वेवमजानंतः श्रुत्वान्येभ्य उपासते॥ तेपि चातितरंत्येव मृत्युं श्रुतिपरायणाः
२५॥ यावत्संजायते किंचित्सत्त्वं स्थावरजंगमं॥ क्षेत्रक्षेत्रज्ञसंयोगात्तद्विद्धि भरतर्ष
भ॥२६॥

क्षेत्रज्ञेश्वरैकत्वविषयं ज्ञानं मो
वेकिनो मृत्युमतितरंतीत्यभिप्रायः॥ क्षेत्रक्षेत्रज्ञेश्वरैकत्वविषयं ज्ञानं मो
क्षसाधनं यज्ज्ञानान्मृत्युमत्येत इत्युक्तं तत्कस्माद्धेतोरिति तद्धेतुप्रदर्शनार्थः श्लोक
आरभ्यते॥ यस्मात्॥ यावदिति॥ यावद्यत्किंचित्संजायते समुत्पद्यते॥ सत्त्वं वस्तु किम
विशेषेणेत्याह॥ स्थावरजंगमं स्थावरं जंगमं च॥ क्षेत्रक्षेत्रज्ञसंयोगाज्जायत इत्येवं वि

गी॰ भा॰ १९३ द्धिविज्ञानीहिहे भरतर्षभ कः पुनरयं क्षेत्रक्षेत्रज्ञयोः संयोगोऽभिप्रेतः ॥ न तावद्रज्ज्वेव घटस्या
वयवसंश्लेषद्वारकः संबंधविशेषः संयोगः क्षेत्रेण क्षेत्रज्ञस्य संभवति आकाशवन्निरवय
वत्वात् ॥ नापि समवायलक्षणः तंतुपटयोरिव क्षेत्रक्षेत्रज्ञयोरितरेतरकार्यकारणभा
393 वानभ्युपगमादिति ॥ उच्यते ॥ क्षेत्रक्षेत्रज्ञयोर्विषयविषयिणोर्भि[illegible]न्नस्वभावयोरितरेतरध
र्माध्यासलक्षणः संयोगः क्षेत्रक्षेत्रज्ञस्वरूपविवेकाभावनिबंधनो ॥ रज्जुशुक्तिकादीनां
तद्विवेकज्ञानाभावादध्यारोपितसर्परजतादिसंयोगवत् ॥ सोऽयमध्यासस्वरूपः क्षेत्रक्षेत्र
ज्ञसंयोगो मिथ्याज्ञानलक्षणो ॥ यथाशास्त्रं क्षेत्रक्षेत्रज्ञलक्षणभेदपरिज्ञानपूर्वकं प्रा
ग्दर्शितरूपात् क्षेत्रात् मुंजादिवेषीकां यथोक्तलक्षणं क्षेत्रज्ञं प्रविभज्य न सत्तन्नासदु
च्यत इत्यनेन निरस्तसर्वोपाधिविशेषं ज्ञेयं ब्रह्मस्वरूपेण यः पश्यति क्षेत्रं च मायानि
र्मितहस्तिस्वप्नदृष्टवस्तुगंधर्वनगरादिवदसदेव सदिवावभासत इत्येवं निश्चितवि
ज्ञानो यः तस्य यथोक्तसम्यग्दर्शनविरोधादपगच्छति मिथ्याज्ञानं तस्य जन्महेतोर
पगमात् य एवं वेत्ति पुरुषं प्रकृतिं च गुणैः सह इत्यनेन विद्वान् भूयो नाभिजायत इति यदु

वे१

न स भूयोभिजायत इति सम्यग्दर्शनफलमविद्यादिसंसारबीजनिवृत्तिद्वारेण जन्माभाव
394 उक्तः जन्मकारणं चाविद्यानिमित्तकः क्षेत्रक्षेत्रज्ञसंयोग उक्तः। ततस्तस्या अविद्याया नि
वर्तकं सम्यग्दर्शनमुक्तमपि पुनः शब्दान्तरेणोच्यते॥ सममिति॥ समं निर्विशेषं॥ तिष्ठन्तं
स्थितिं कुर्वन्तं॥ क्व सर्वेषु समस्तेषु ब्रह्मादिस्थावरान्तेषु भूतेषु प्राणिषु॥ कं परमेश्वरं

समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरं॥ विनश्यत्स्व
विनश्यन्तं यः पश्यति स पश्यति ॥२७॥ ॥५॥

देहेन्द्रियमनोबुद्ध्यव्यक्तात्मनोऽपेक्ष्य परमश्चासावीश्वरश्चेशनशीलत्वादिति परमे।
श्वरः। तं सर्वेषु भूतेषु समं तिष्ठन्तं॥ तानि विशिनष्टि॥ विनश्यत्स्विति तं च परमेश्वर
मविनश्यन्तमिति॥ भूतानां परमेश्वरस्य चात्यन्तवैलक्षण्यप्रदर्शनार्थं कथं सर्वेषां।
भावविकाराणां जनिलक्षणो भावविकारो मूलं जन्मोत्तरभाविनोऽन्ये सर्वे भावविका।

एषांतिनित्यत्वेभावविकारोनन्त्यत्वेनन्योनत्वभाविन्यो विनाशंगताः विनाशात्परोनक
श्चिदस्तिभावविकारः सतिहिधर्मिणिधर्माभवंतीति॥ अतोंत्यभावविकाराभावानुवा
देनपूर्वभाविनः सर्वेभावविकाराः प्रतिषिद्धाभवंतितस्मात्सर्वभूतेषुवैलक्षण्यमनन्य
त्वमेवपरमेश्वरस्यसिद्धंनिर्विशेषत्वमेकत्वंच॥ यएवंपरमेश्वरंयथोक्तंपश्यतिसप
श्यति॥ ननुसर्वोलोकः पश्यतिसपश्यतीतिकिंविशेषणेनेति॥ सत्यंपश्यतिकिंतु
विपरीतंपश्यतिअतोविशिनष्टिसएवपश्यतीति॥ यथातिमिरदृष्टिरनेकंचंद्रंपश्य
तितमपेक्ष्यैकचंद्रदर्शीविशिष्यतेसएवपश्यतीतितथेहाप्येकमविभक्तंयथोक्त
मात्मानंयः पश्यतिसविभक्तानेकात्मविपरीतदर्शिभ्योविशिष्यते
सएवपश्यतीतिइतरेपश्यंतोपिनपश्यंतिविप
रीतदर्शित्वादनेकचंद्रदर्शिव
दित्यर्थः ॥२७॥
॥ॐ॥

396

यथोक्तसम्यग्दर्शनस्य फलवचनेन स्तुतिः कर्तव्येति श्लोक आरभ्यते ॥ समं पश्यन्नुप
लभमानो ॥ हि यस्मात् ॥ सर्वत्र सर्वभूतेषु ॥ समवस्थितं तुल्यतयावस्थितं ॥ ईश्वरमती
तानंतरश्लोकोक्तलक्षणमित्यर्थः समं पश्यन् किं न हिनस्ति हिंसां न करोति स्वात्म
नात्मनैव स्वात्मानं ॥ ननु तदा हि स्वयं स्वमात्मानं न हिनस्ति कथमुच्यते अप्राप्तं न हिन
स्तीति ॥ यथा न पृथिव्यामग्निश्चेतव्यो नांतरिक्षे इत्यादि ॥ नैष दोषः ॥ अज्ञानामात्मतिर

समं पश्यन् हि सर्वत्र समवस्थितमीश्वरं ॥ न हिनस्त्यात्मनात्मानं ततो याति परां गतिं ॥ २८ ॥

स्कारोपपत्ते ॥ सर्वो ह्यज्ञोऽत्यंतप्रसिद्धं साक्षादपरोक्षमप्यात्मानं तिरस्कृत्यानात्मा।
नमात्मत्वेन परिगृह्य तमपि धर्माधर्मौ कृत्वा उपात्तमात्मानं हत्वाऽन्यमात्मानमु
पादत्ते नवं ॥ एवमेवमुपात्तमुपात्तमात्मानं हंतीत्यात्महा सर्वोऽज्ञः ॥ यस्तु परमार्था
त्माऽसावपि सर्वदाऽविद्यया हत एव विद्यमानफलाभावादिति सर्वे आत्महन एवा
विद्वांसः ॥ यस्त्वितरो यथोक्तात्मदर्शी स उभयथाप्यात्मनात्मानं न हिनस्ति ततो याति

सर्वभूतस्थमीशं समं पश्यन्हि न हिनस्त्यात्मनात्मानमित्युक्तं तदनुपपन्नं स्वगुणकर्मवैलक्ष
ण्यभेदभिन्नेष्वात्मस्विति प्राप्तं दोषं वारयन्नाह ॥ प्रकृत्येति ॥ प्रकृत्या प्रकृतिर्भगवतो माया त्रिगुणा
त्मिका ॥ मायां तु प्रकृतिं विद्यादित्यादिमंत्रवर्णात् ॥ तया प्रकृत्यैव च महदादिकार्यकार
णाकारपरिणतया नान्येन कर्माणि वाङ्मनःकायारभ्याणि क्रियमाणानि निर्वर्त्यमा

प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वशः ॥ यः पश्यति तथात्मानमकर्तारं स पश्यति ॥२९॥

मा१

नानि सर्वशः सर्वप्रकारैर्यः पश्यति उपलभते ॥ तथात्मानं क्षेत्रज्ञमकर्तारं सर्वोपाधि
विवर्जितं यः पश्यति स पश्यति परमार्थदर्शीत्यभिप्रायः ॥ निर्गुणस्याकर्तुर्निर्विशे
षस्याकाशस्येव भेदे प्रमाणानुपपत्तिरित्यर्थः ॥२९॥

॥राम॥

पुनरपि तदेव सम्यग्दर्शनं शब्दान्तरेणाह प्रपञ्चयन् ॥ यदा इति ॥ यदा यस्मिन्काले भूतपृथ
ग्भावं भूतानां पृथग्भावं पृथक्त्वं ॥ एकस्थमेकस्मिन्नात्मनि स्थितं एकस्थमनुपश्यति
398 शास्त्राचार्योपदेशमनु आत्मनः प्रत्यक्षेण पश्यति ॥ आत्मैवेदं सर्वमिति ॥ तत एव त।
स्मादेव च ॥ विस्तारमुत्पत्तिं विकाशं ॥ आत्मनः प्राण आत्मन आशा आत्मनः स्मर।
आत्मन आकाश आत्मनस्तेज आत्मन आप आत्मन आविर्भावतिरोभावौ चात्मनः

यदा भूतपृथग्भावमेकस्थमनुपश्यति ॥ तत एव च विस्तारं ब्रह्म संपद्यते तदा ॥ ३०॥
अनादित्वान्निर्गुणत्वात्परमात्मायमव्ययः ॥ शरीरस्थोपि कौन्तेय न करोति न लिप्य

तुमित्येवमादिप्रकारैर्विस्तारं च यदा पश्यति ॥ ब्रह्म संपद्यते ब्रह्मैव भवति ते ॥ ३१ ॥
तदा तस्मिन्काले इत्यर्थः ॥ ३० ॥ एकस्यात्मनः सर्वदेहात्मत्वे तद्दोषसंबन्धे प्राप्ते इ
दमुच्यते ॥ अनादि इति ॥ अनादित्वादनादेर्भावो अनादित्वं आदिः कारणं तद्यस्य नास्ति
तदनादि ॥ यो ह्यादिमान्स तेनात्मना व्येति ॥ अयं त्वनादित्वान्निरवयव इति कृत्वा न व्येति
तथा निर्गुणत्वात्सगुणो गुणव्ययाद्व्येति अयं तु निर्गुणत्वाच्च न व्येति ॥ परमात्मा।

गी॰भा॰ १९६ 399

यमव्ययः नास्य व्ययो विद्यत इत्यव्ययः॥ यत एवं अतः शरीरस्थोपि शरीरेष्वात्मन उपलब्धि
र्भवतीति शरीरस्थ उच्यते॥ तथापि न करोति तदकरणादेव तत्फलेन न लिप्यते यो हि क
र्त्ता स कर्मफलेन लिप्यते अयं त्वकर्त्ता अतो न लिप्यत इत्यर्थः॥ कः पुनर्देहे करोति लि
प्यते च॥ यदि तावदन्यः परमात्मनो देही करोति च लिप्यते च तत इदमनुपपन्नमुक्तं क्ष
त्रज्ञं चापि मां विद्धीत्यादि॥ अथ नात्मनोन्यो देही कः करोति लि
प्यते चेति वाच्यं॥ परो वा नास्तीति सर्वं दुर्विज्ञेयं दुर्वाच्यं चेति भगवतोक्तमौपनिषदं
दर्शनं परित्यक्तं वैशेषिकैः सांख्यार्हतबौद्धैश्च॥ तत्रायं परिहारो भगवतैव स्वेनोक्तो
क्तः स्वभावस्तु प्रवर्त्तत इति अविद्यामात्रं स्वभावो हि करोति लिप्यत इति व्यवहारो भ
वति॥ न तु परमार्थतः॥ एकस्मिन्परमात्मनि तदस्ति॥ अत एतस्मिन्परमार्थसांख्यदर्श
ने स्थितानां ज्ञाननिष्ठानां परमहंसपरिव्राजकानां तिरस्कृताविद्याव्यवहाराणां कर्माधिकारो ना
स्तीति तत्र तत्र दर्शितं भगवता ॥३२॥ १९६

शिव॥॥

400

किमिव न करोति न लिप्यत इत्यत्र दृष्टांतमाह ॥ यथा इति ॥ यथा सर्वगतं व्यापि अपि
सत् सौक्ष्म्यात् सूक्ष्मभावादाकाशं नोपलिप्यते न संबध्यते ॥ सर्वत्रावस्थितो देहे
तथात्मा नोपलिप्यते ॥ ३२ ॥ किंच ॥ यथा इति यथा प्रकाशयत्यवभासयति ॥ एकः कृ।

यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते ॥ सर्वत्रावस्थितो देहे तथात्मा नोपलिप्य
ते ॥ ३२ ॥ यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः ॥ क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाश
यति भारत ॥ ३३ ॥

कृत्स्नं लोकमिमं रविः सविता आदित्य ॥ तथा महाभूतादिधृत्यंतं देहे
क्षेत्रमेकः सन् प्रकाशयति कः क्षेत्री परमात्मेत्यर्थः ॥ रविदृष्टांतोऽत्रात्मन उभयार्थो
विभवति ॥ रविवत्सर्वदेहेष्वेकस्यात्मानुलेपकश्चेति ॥ ३३ ॥ ॥ ॥

समस्ताध्यायार्थोपसंहारार्थः श्लोकः॥ क्षेत्रइति॥ क्षेत्रक्षेत्रज्ञयोर्यथाव्याख्यातयोरेवंयथा
प्रदर्शितप्रकारेण॥ अंतरमितरेतरवैलक्षण्यविशेषं॥ ज्ञानचक्षुषाशास्त्राचार्योपदेशज
नितमात्मप्रत्ययिकंज्ञानंचक्षुस्तेनज्ञानचक्षुषा॥ भूतप्रकृतिमोक्षंचभूतानांप्रकृति

क्षेत्रक्षेत्रज्ञयोरेवमंतरंज्ञानचक्षुषा ॥ भूतप्रकृतिमोक्षंच
येविदुर्यांतितेपरं॥३४॥ इतिश्रीत्रयोदशोध्यायः॥१३॥

रविद्यालक्षणाअव्यक्ताख्यातस्याभूतप्रकृतेर्मोक्षणमभावगमनंचयेविदुर्जानंति
यांतिगच्छंतितेपरंपरमात्मतत्त्वंब्रह्मनपुनर्देहमाददतइत्यर्थः॥ इतिश्रीशंकरा १९७
चार्यकृतौगीताभाष्येत्रयोदशोध्यायः॥१३॥

सर्वं मन्यमानं क्षेत्रक्षेत्रज्ञसंयोगाज्जायत इत्युक्तं तत्कथमिति तत्प्रदर्शनार्थं परं भू
402 य इत्यादिरध्याय आरभ्यते ॥ अथवा ईश्वरपरतंत्रयोः क्षेत्रक्षेत्रज्ञयोर्जगत्कारणत्वं न तु सां
ख्यानामिव स्वतंत्रयोरित्येवमर्थं प्रकृतिस्थत्वं गुणेषु च संगः संसारकारणमित्युक्तं ॥ कस्मि
न् गुणे कथं संगः के वा गुणाः कथं वा ते बध्नंतीति गुणेभ्यश्च मोक्षणं कथं स्यान्मुक्तस्य
च लक्षणं वक्तव्यमित्येवमर्थं सर्वं ॥ परं इति ॥ परं ज्ञानमिति व्यवहितेन संबंधः भूयः पुनः

श्रीभगवानुवाच ॥ परं भूयः प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमं ॥ यज्ज्ञात्वा मुनयः सर्वे परां
सर्वेष्वध्यायेष्वसकृदुक्तमपि ॥ प्रवक्ष्यामि तच्च परं परवस्तुविषय सिद्धिमितो गताः ॥ १ ॥
यत्वात् ॥ किं तत् ज्ञानानां सर्वेषां ज्ञानानामुत्तमं उत्तमफलत्वात् ॥ ज्ञानानामिति न मानित्वादी
नां ॥ किं तर्हि यज्ञादिज्ञेयवस्तुविषयाणामिति तानि न मोक्षाय ॥ इदं तु मोक्षायेति परोत्तम
शब्दाभ्यां स्तौति श्रोतृरुच्युत्पादनार्थं ॥ यज्ज्ञात्वा यज्ज्ञानं प्राप्य ॥ मुनयः संन्यासिनो मनन
शीलाः सर्वे परां सिद्धिं मोक्षाख्यामितो अस्माद्देहबंधनादूर्ध्वं गताः प्राप्ताः ॥ १ ॥ ॥

गी॰भा॰
१९८
403

तस्यास्त्वसिद्धेरैकांतिकत्वं दर्शयति ॥ इदं इति ॥ इदं ज्ञानं यथोक्तमाश्रित्य ज्ञानसाधनमनुष्ठाय ते
तत ॥ मम मद्धे स्वरूपस्य साधर्म्यमत्स्वरूपतां ॥ आगताः प्राप्ता इत्यर्थः ॥ न तु समानधर्मतां साधर्म्यं
देवज्ञस्वरयोर्भेदानभ्युपगमात ॥ गीताशास्त्रे फलवादश्चायं स्तुत्यर्थं उच्यते ॥ सर्गेपि सृष्टिका
लेपि नोपजायंते नोत्पद्यंते ॥ प्रलये ब्रह्मणोपि विनाशकाले न व्यथयंति व्यथां नापद्यंते

इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः ॥ सर्गेपि नोपजायंते प्रलये न व्यथंति च ॥ २ ॥ देव
देवज्ञसंयोगईदृशो भूतकारणं ॥ ॐ मम योनिर्महद्ब्रह्म तस्मिन्गर्भं दधाम्यहं ॥ संभवः
सर्वभूतानां ततो भवति भारत ॥ ३ ॥

॥ २ ॥ देवत्रदेवज्ञसंयोगईदृशो भूतकारणमित्याह
मम इति ॥ मम स्वभावभूता मदीया माया त्रिगुणात्मिका ॥ प्रकृतिर्योनिः सर्वभूतानां स
र्वकार्येभ्यो महत्वात्कारणत्वाच्च स्वविकाराणां महद्ब्रह्मेति च योनिरेव विशिष्यते ॥ तस्मि
न्महति ब्रह्मणि योनौ गर्भं सर्वभूतजन्मकारणं हिरण्यगर्भजन्मबीजं दधामि क्षिपामि

१९८

क्षेत्रक्षेत्रज्ञप्रकृतिद्वयशक्तिमानीश्वरोहमविद्याकामकर्मोपाधिस्वरूपानुविधायि
404 नंक्षेत्रज्ञंक्षेत्रेणसंयोजयामीत्यर्थः ॥ संभवः उत्पत्तिः सर्वभूतानां ब्रह्मादिस्थावरांता
नां हिरण्यगर्भोत्पत्तिद्वारेण तेन मूलकारणात् ॥ ततस्तस्माद्गर्भाधानाद्भवति हे भा
रत ॥ ३ ॥ सर्व इति ॥ देवपितृमनुष्यपशुमृगादिसर्वयोनिषु ॥ कौंतेय मूर्तयो देहसं।
२२

सर्वयोनिषु कौंतेय मूर्तयः संभवंति याः ॥ ॥ तासां
ब्रह्म महद्योनिरहं बीजप्रदः पिता ॥ ४ ॥ ॥ ॥

स्थानलक्षणाः मूर्छितांगावयवा मूर्तयः संभवंति याः ॥ तासां मूर्तीनां ब्रह्म मह
त्सर्वावस्थं योनिः कारणं ॥ अहमीश्वरो बीजप्रदो गर्भाधान
स्य कर्ता पिता ॥ ४ ॥ ॥ ॥

गी॰ भा॰ के गुणाः कथं बध्नंतीत्युच्यते॥ सत्वं इति॥ सत्वंरजस्तम इत्येवंनामानो गुणा इति पारिभाषिकः
१९९ शब्दो न रूपादिवद्द्रव्याश्रिताः॥ न च गुणगुणिनोरन्यत्वमत्र विवक्षितं॥ तस्माद्गुणा इव नि
405 त्यपरतंत्राः क्षेत्रज्ञं प्रति॥ अविद्यात्मकत्वात्॥ क्षेत्रज्ञं बध्नंतीव तमास्पदीकृत्यात्मानं प्रति
लभंत इति निबध्नंतीत्युच्यते ते च प्रकृतिसंभवाः॥ भगवन्मायासंभवा निबध्नंतीव॥ हे

सत्वंरजस्तम इति गुणाः प्रकृतिसंभवाः॥ निबध्नं
ति महाबाहो देहे देहिनमव्ययं ॥५॥ ॥ ॥॥

महाबाहो महांतौ समर्थतराववाजानुलंबौ बाहू यस्य स महाबाहुः॥ हे महाबाहो॥ देहे
शरीरे देहिनं देहवंतं॥ अव्ययं अस्मिन् शास्त्रे अव्ययत्वं चोक्तमनादित्वादित्यादिश्लोकेन॥ न
नु देही न लिप्यत इत्युक्तं तत्कथमिह निबध्नंतीत्यन्यथोच्यते॥ परिहृतमस्माभिरिव॥ १९९
शब्देन निबध्नंतीवेति ॥५॥ ॥

तत्र इति॥ तत्र सत्त्वादीनां सत्त्वस्य तावल्लक्षणमुच्यते॥ निर्मलत्वात्स्फटिकमणिरिव प्र
406 काशकमनामयं॥ निरुपद्रवं सत्त्वं निबध्नाति कथं॥ सुखसंगेन सुख्यहमिति विषयधर्म
स्य सुखस्य विषयिण्यात्मनि संश्लेषापादनं मृषैव सुखसंजननमेषा ह्यविद्या॥ न हि विष
यधर्मो विषयिणो भवति॥ इच्छादि च धृत्यन्तं क्षेत्रस्यैव विषयस्य धर्म इत्युक्तं भगवता।
अतोऽविद्ययैव स्वकीयधर्मभूतया विषयविषय्यविवेकलक्षणयाऽस्वात्मभूते सुखे

तत्र सत्त्वं निर्मलत्वात्प्रकाशकमनामयं॥ सुखसंगे
न बध्नाति ज्ञानसंगेन चानघ ॥६॥ ॥ ॥

संजयतीव असक्तं सक्तमिव करोति॥ असुखिनं सुखिनमिव तथा ज्ञानसंयोगेन च ज्ञा
नमति॥ सुखसाहचर्यात॥ क्षेत्रस्यैवान्तःकरणस्य धर्मो नात्मनः॥ आत्मधर्मत्वे सं।
गानुपपत्तेर्बन्धनानुपपत्तेश्च सुखवदेव ज्ञानादौ संगो मन्तव्यः॥ हे अनघ अव्यसन
॥ ॥
६॥ ॥

गी॰भा॰
२००
407

रजोइति ॥ रजोरागात्मकं रंजनाद्रागो गैरिकादिवत् रागात्मकं विद्धि विजानीहि ॥ तृष्णासंग
समुद्भवं ॥ तृष्णा अप्राप्ताभिलाषः आसंगः प्राप्ते विषये मनसः ॥ प्रीतिलक्षणः संश्लेषः
तृष्णासंगयोः समुद्भवं तृष्णासंगसमुद्भवं ॥ तन्निबध्नाति तद्रजः ॥ कौंतेय कर्मसंगेन दृ
ष्टादृष्टार्थेषु कर्मसु संजनं तत्परता कर्मसंगस्तेन निबध्नाति रजो देहिनं ॥ ७ ॥ तमस्त्विति

रजोरागात्मकं विद्धि तृष्णासंगसमुद्भवं ॥ तन्निबध्नाति कौंतेय कर्मसंगेन देहिनं ॥ ७ ॥
तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनां ॥ प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत ॥ ८ ॥

तमस्तृतीयो गुणः अज्ञानजं अज्ञानाज्जातमज्ञानजं विद्धि ॥ मोहनं मोहकरमविवेक।
करं सर्वदेहिनां सर्वेषां देहवतां ॥ प्रमादालस्यनिद्राभिः प्रमादश्चालस्यं च निद्रा च प्र।
मादालस्यनिद्रास्ताभिस्तत्तमो निबध्नाति भारत ॥ ८ ॥ २

॥ शिव ॥

पुनर्गुणानां व्यापारः संक्षेपत उच्यते ॥ सत्वमिति ॥ सत्वं सुखे संजयति संश्लेषयति ॥ रजः क
408 र्म्मणि भारत संजयतीति वर्त्तते ॥ ज्ञानं सत्वकृतं विवेकमावृत्य आच्छाद्य तु तमः ॥ स्वेना
वरणात्मना प्रमादे संजयत्युत प्रमादः प्राप्तकर्त्तव्याकरणं ॥ ९ ॥ उक्तं कार्यं कदा कुर्वंति
गुणा इत्युच्यते ॥ रजस्तमिति ॥ रजस्तमश्चोभेऽप्यभिभूय सत्वं भवति उद्भवति वर्द्धते यदा ।

सत्वं सुखे संजयति रजः कर्म्मणि भारत ॥ ज्ञानमावृत्य तु तमः प्रमादे संजयत्युत ॥ ९ ॥
रजस्तमश्चाभिभूय सत्वं भवति भारत ॥ रजः सत्वं तमश्चैव तमः सत्वं रजस्तथा ॥ १० ॥

तदा लब्धात्मकं सत्वं स्वकार्यं ज्ञानसुखाद्यारभते ॥ भारत ॥ तथा रजोगुणः सत्वं तमश्चो
भे अप्यभिभूय वर्द्धते ॥ यदा तदा कर्म्म तृष्णादि स्वकार्यमारभते ॥ तमआख्योपि गुणः
सत्वं रजश्चोभे अप्यभिभूय तथैव वर्द्धते यदा तदा ज्ञानावरणादि स्वकार्यमारभते ॥ शिव
१० ॥ ॥

यदायोगुणउद्भूतोभवति॥तदातस्यकिंलिंगमित्युच्यते॥सर्वइति॥सर्वद्वारेष्वात्मनउ
पलब्धिद्वाराणिश्रोत्रादीनिसर्वाणिकरणानितेषुसर्वद्वारेषु॥अंतःकरणस्यबुद्धेर्वृत्तिः
प्रकाशोदेहेस्मिन्नुपजायते॥प्रकाशशब्दवाच्य॥तदेवज्ञानं॥यदैवंप्रकाशोज्ञानाख्यउ
पजायते॥तदाज्ञानप्रकाशेनलिंगेनविद्यात्॥विवृद्धमुद्भूतंसत्वमित्युतापि॥११॥रज

सर्वद्वारेषुदेहेस्मिन्प्रकाशउपजायते॥ज्ञानंयदातदाविद्याद्विवृद्धंसत्वमित्युत॥११॥
लोभःप्रवृत्तिरारंभःकर्मणामशमःस्पृहा॥रजस्येतानिजायंतेविवृद्धेभरतर्षभ॥१२॥

सउद्भूतस्येदंचिह्नं॥लोभःप्रइति॥लोभःपरद्रव्यादित्सा॥प्रवृत्तिःप्रवर्तनंसामान्यचेष्टा
आरंभःउद्यमःकस्यकर्मणः॥अशमोनुपशमःहर्षरागादिप्रवृत्तिःस्पृहासर्वसामा
न्यवस्तुविषयातृष्णा॥रजसिगुणेप्रवृद्धेएतानिलिंगानि
जायंते॥हेभरतर्षभ ॥१२॥ ॥

410

अप्रवृत्ति॥ अप्रकाशोऽविवेकोऽत्यंतं अप्रवृत्तिश्च प्रवृत्त्यभावः तत्कार्यं॥ प्रमादो मोह एव च
अविवेको मूढ इव चित्तेनेत्यर्थः॥ तमसि गुणे विवृद्धे एतानि लिंगानि जायंते॥ देह कुरुनंदन
१३॥ मरणाद्धोरेणापि यत्फलं प्राप्यते तदपि संगादेवं सर्वगुणानामेवेति दर्शयन्नाह॥ य
दा इति॥ यदा सत्त्वे प्रवृद्धे तु उद्भूते॥ प्रलयं मरणं याति प्रतिपद्यते देहभृत् आत्मा॥ तदो।

अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोह एव च॥ तमस्येतानि जायंते विवृद्धे कुरुनंदन॥१३॥
यदा सत्त्वे प्रवृद्धे तु प्रलयं याति देहभृत्॥ तदोत्तमविदां लोकानमलान्प्रतिपद्यते॥१४॥

तमविदां महदादितत्त्वविदामित्येतत्॥ लोकानमलान् मलरहितान्प्रतिपद्यते॥ शिव
प्राप्नोतीत्येतत् ॥१४॥ ॥ ॥

गी·भा·
२·२

रज इति॥ रजसि गुणे प्रवृद्धे प्रलयं मरणं गत्वा प्राप्य कर्म्मसंगिषु कर्म्मासक्तियुक्तेषु म-
नुष्येषु जायते॥ तथा तद्वत् प्रलीनो मृतः तमसि विवृद्धे मूढयोनिषु पश्वादियोनिषु
जायते॥ ॥ ॥ अतीतश्लोकार्थस्यैव संक्षेप उच्यते॥ कर्म्म इति॥ कर्म्मणः सुकृतस्य सात्विक-
स्येत्यर्थः॥ आहुः शिष्टाः सात्विकमेव निर्मलं फलमिति॥ रजसस्तु राजसस्य कर्म्मण इ-

रजसि प्रलयं गत्वा कर्म्मसंगिषु जायते॥ तथा प्रलीनस्तमसि मूढयोनिषु जायते॥१५॥
कर्म्मणः सुकृतस्याहुः सात्विकं निर्मलफलं॥ रजसस्तु फलं दुःखमज्ञानं तमसः फलं॥१६॥
सत्वात्संजायते ज्ञानं रजसो लोभ एव च॥ प्रमादमोहौ तमसो भवतोऽज्ञानमेव च॥१७॥

त्यर्थः॥ कर्म्माधिकारात्फलमपि दुःखमेव कारणानुरूप्याद्राजसमेव॥ तथाऽज्ञानं तमस
तामसस्य कर्म्मणोऽधर्म्मस्य फलं पूर्ववत्॥१६॥ किंच गुणेभ्यो भवति॥ सत्वादिति॥ सत्वा-
ल्लघ्वात्मकात्संजायते समुत्पद्यते ज्ञानं॥ रजसो लोभ एव च॥ प्रमादमोहौ प्रमादश्च मो-
हश्च उभौ तमसो भवतः॥ अज्ञानमेव च भवति॥१७॥ ॥ ॥ २·२

412

किंच ॥ ऊर्द्धमिति ॥ ऊर्द्धं गच्छंति देवलोकादिषूत्पद्यंते ॥ सत्वगुणवृत्तस्थाः ॥ मध्ये तिष्ठंति म
नुष्येषु राजसाः ॥ जघन्यगुणवृत्तस्थाः जघन्यश्चासौ गुणश्चेति जघन्यगुणस्तमस्तस्य वृत्तिः।
निद्रालस्यादिस्तस्मिन्स्थिता जघन्यगुणवृत्तस्था मूढाः ॥ अधो गच्छंति पश्वादिषूत्पद्यंते
तामसाः ॥ १८ ॥ पुरुषस्य प्रकृतिस्थत्वरूपेण मिथ्याज्ञानेन युक्तस्य भोग्येषु गुणेषु सुखदुः

ऊर्द्धं गच्छंति सत्वस्था मध्ये तिष्ठंति राजसाः ॥ जघन्यगुणवृत्तस्था अधो गच्छंति तामसाः
१८ ॥ नान्यं गुणेभ्यः कर्तारं यदा द्रष्टानुपश्यति ॥ गुणेभ्यश्च परं वेत्ति मद्भावं सोऽधिगच्छति ॥ १९ ॥

खमोहात्मकेषु सुखी दुःखी मूढोऽहमस्मीति एवंरूपो यः संगस्तत्कारणं पुरुषस्य सद।
सद्योनिजन्मप्राप्तिलक्षणस्य संसारस्येति समासेन पूर्वाध्याये यदुक्तं तदिह सत्वं रजस्त
म इति गुणाः प्रकृतिसंभवा इत्यारभ्य गुणस्वरूपं गुणवृत्तं स्ववृत्तेन च गुणानां बंध।
कत्वं गुणवृत्तनिबद्धस्य पुरुषस्य या गतिरित्येतत्सर्वं मिथ्याज्ञानमज्ञानमूलं बंधकार

गी॰ भा॰ णविस्तरेणोक्ताः॥ अधुना सम्यग्दर्शिनां मोक्षो वक्तव्य इत्याह भगवान्॥ नान्यमिति। नान्यं का
२३ र्यकरणविषयाकारपरिणतेभ्यो गुणेभ्यः कर्तारमन्यं॥ यदा द्रष्टा विद्वान् सन् न अनुपश्य
413 ति गुणा एव सर्वावस्थाः सर्वकर्मणां कर्तार इत्येवं पश्यति॥ गुणेभ्यश्च परं गुणव्यापारसा
क्षिभूतमात्मानं वेत्ति॥ मद्भावं मम भावं वासुदेवत्वं वासुदेवः सर्वमित्येवं पश्यन् स द्रष्टा

गुणानेतानतीत्य त्रीन् देही देहसमुद्भवान्॥ जन्म
मृत्युजरादुःखैर्विमुक्तोऽमृतमश्नुते ॥२०॥ ॥

अधिगच्छति॥ प्राप्नोति॥ १९॥ कथमधिगच्छतीत्युच्यते॥ गुणा इति॥ गुणानेतान् यथोक्तानती
त्य जीवन्नेवातिक्रम्य॥ मायोपाधिभूतांस्त्रीन्॥ देही आत्मा॥ देहसमुद्भवान् देहोत्पत्तिवी
जभूतान्॥ जन्ममृत्युजरादुःखैर्जन्म च मृत्युश्च जरा च दुःखानि च तैर्जीवन्नेव विमुक्तः स २३
न् विद्वान्॥ अमृतमश्नुते॥ एवं मद्भावमधिगच्छतीत्यर्थः॥ ॥२०॥ ॥

414

जीवन्नेव तान् गुणान् अतीत्यामृतम् अश्नुते इति प्रश्नबीजं प्रतिलभ्यार्जुन उवाच॥ कैर्लिंगैः इति

कैर्लिंगैस्त्रीन् एतान् गुणान् अतीतो भवति प्रभो॥ किमाचा

र इति॥ कथं केन प्रकारेण॥ एतांस्त्रीन् गुणान् अतिवर्तते॥ २१॥ गुणातीतत्वं गुणातीतत्वो

पायश्चार्जुनेन पृष्टो सिन्व [illegible] प्रश्नद्वयस्य प्रतिवचनं॥ श्रीभगवानुवाच॥ यतावकैर्लिं

कैर्लिंगैस्त्रीन् गुणान् एतान् अतीतो भवति प्रभो॥ किमाचारः कथं चैतांस्त्रीन् गुणान् अतिवर्त

ते॥ २१॥ भगवानुवाच ~~[illegible] गुणातीतो भवति~~॥ प्रकाशं च प्रवृत्तिं च मो

हमेव च पाण्डव॥ न द्वेष्टि संप्रवृत्तानि न निवृत्तानि कांक्षति॥ २२॥ ॥ ॥

गैर्युक्तो गुणातीतो भवति तच्छृणु॥ प्रकाश इति॥ प्रकाशं च सत्त्वकार्यं॥ प्रवृत्तिं च रजःका

र्यं मोहमेव च तमःकार्यं॥ इत्येतानि न द्वेष्टि संप्रवृत्तानि सम्यग्विषयभावेनोद्भूता

नि मम तामसः प्रत्ययो जातः तेनाहं मूढः तथा राजसी प्रवृत्तिर्ममोत्पन्ना दुःखा त्मि

415

कालेनाहं रजसा प्रवर्तितः प्रचलितः सत्त्वं प्रकाशं ममवर्तते योयं सत्त्वरूपावस्थानादुःशः
तथा॥ सात्त्विको गुणः प्रकाशात्मा मां विवेकित्वमापादयन् सृजेच्च संजयन् सावष्टभातीति
तानि द्वेष्टि सम्यग्दर्शित्वेन न तेद्वं गुणातीतो न द्वेष्टि संप्रवृत्तानि॥ तथा च॥ न निवृत्तानि
कांक्षति॥ यथा सात्त्विकादिः पुरुषः सत्वादिकार्याणि आत्मानं प्रति प्र
काश्य निवृत्तानि कांक्षतीत्यर्थः॥ न तथा गुणातीतो निवृत्तानि कां
क्षतीत्यर्थः॥ एतन्न परप्रत्यक्षं लिंगं किं तर्हि स्वात्मप्रत्य
क्षत्वादात्मविषयमेवैतल्लक्षणं॥ नहि
स्वात्मविषयं द्वेषं कांक्षां वा
परः पश्यति
॥२२॥ २२॥
॥२२॥२२॥
॥२२॥
॥

416

अथेदानीं गुणातीतः किमाचार इति प्रश्नस्य प्रतिवचनमाह ॥ उदासीइति ॥ उदासीनवत् ॥ यथा
उदासीनो न कस्यचित्पक्षं भजते ॥ तथायं गुणातीतत्वोपायमार्गे वस्थित आसीन आत्मवि
त् ॥ गुणैर्यः सत्वासीन विचाल्यते विवेकदर्शनावस्थानात् ॥ तदेतत्स्फुटीकरोति ॥ गुणाः
कार्यकरणविषयाः कारपरिणता अन्योन्यस्मिन्वर्तन्त इति योवतिष्ठति ॥ छंदोभंगभया
त्परस्मैपदप्रयोगः ॥ योनुतिष्ठतीति वा पाठांतरं ॥ नेंगते न चलति स्वरूपावस्थ एव भवतीत्य

उदासीनवदासीनो गुणैर्यो न विचाल्यते ॥ गुणा वर्तन्त इत्येवं योवतिष्ठति नेंगते ॥२३॥
समदुःखसुखः स्वस्थः समलोष्टाश्मकांचनः ॥ तुल्यप्रियाप्रियो धीरस्तुल्यनिंदात्मसंस्तु ॥ति॥२४॥

र्थः ॥ किंच ॥ समद इति ॥ समदुःखसुखः समे दुःखसुखे यस्य स समदुःखसुखः
स्वस्थः स्वस्मात्मनि स्थितः प्रसन्नः समलोष्टाश्मकांचनः लोष्टं च अश्मा च कांचनं च समा
मानि यस्य ॥ प्रियाप्रिये ॥ तुल्यप्रियाप्रियः प्रियं चाप्रियं च तुल्ये समे [illegible] यस्य सोयं
तुल्यप्रियाप्रियः ॥ धीरो धीमान् ॥ तुल्यनिंदात्मसंस्तुतिः स्तुतिश्च तुल्ये निंदात्मसंस्तुती ॥ ॥
यस्य यतेः स तुल्यनिंदात्मसंस्तुतिः ॥२४॥

किंच॥मानापमानयोरिति॥मानापमानयोस्तुल्यः समो निर्विकारः॥तुल्यो मित्रारिपक्षयोः यद्यप्युदासीना भवन्ति केचित्स्वाभिप्रायेण तथापि पराभिप्रायेण मित्रारिपक्षयोरिव भवन्तीति तुल्यो मित्रारिपक्षयोरित्याह॥सर्वारंभपरित्यागी दृष्टादृष्टार्थानि कर्माण्यारभ्यन्त इत्यारंभाः सर्वारंभान्परित्यक्तुं शीलमस्येति सर्वारंभपरित्यागी॥देहधारणमात्रनिमित्तव्यति

मानापमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयोः॥स
र्वारंभपरित्यागी गुणातीतः स उच्यते॥२५॥

रेकेण सर्वकर्मपरित्यागीत्यर्थः॥गुणातीतः स उच्यते॥उदासीनवदासीन इत्यादि गु
णातीतः स उच्यत इत्येतदन्तमुक्तं॥यावद्यत्नसाध्यं तावत्संन्यासिनानुष्ठेयं गुणातीत
त्वसाधनं मुमुक्षोः। स्थिरीभूतं तु स्वसंवेद्यं सद्गुणातीतस्य यतेः २५
लक्षणं भवति॥२५॥

अथुनाकथंचत्रीन्गुणाँतिवर्त्तनमितिप्रश्नस्यप्रतिवचनमाह ॥ मांचइति ॥ मांचेश्वरंनारा
418 यणंसर्वभूतहृदयाश्रितंयोयतिःकर्म्मीवाऽव्यभिचारेणनकदाचिद्योव्यभिचरति
भक्तियोगेनभजनंभक्तिःसैवासैवयोगस्तेन[illegible]योगेज्ञानसमुद्भवनविवेकविज्ञाना
त्मकेनहिभक्तियोगपुरःसरोभगवदनुग्रहप्रसादजोभवतिभक्तियोगेनसेवते ॥ स
गुणानसमतीत्यएतान्यथोक्तान ॥ ब्रह्मभूयायभवनंभूयःब्रह्मभूयायब्रह्मभवनायमो

मांचयोऽव्यभिचारेणभक्तियोगेनसेवते ॥ सगुणान्समतीत्यैतान्ब्रह्मभूयायकल्पते ॥२६॥
ब्रह्मणोहिप्रतिष्ठाहममृतस्याव्ययस्यच ॥ शाश्वतस्यचधर्मस्यसुखस्यैकांतिकस्यच
॥२७॥

क्षायकल्पतेसमर्थोभवतीत्यर्थः ॥२६॥ कुतएतदित्युच्यते ॥ ब्रह्मणीति ॥ ब्रह्मणःपर
मात्मनोहियस्मात्प्रतिष्ठाहंप्रतितिष्ठत्यस्मिन्नितिप्रतिष्ठा ॥ अहंप्रत्यगात्मा ॥ कीदृशस्य
तस्यब्रह्मणःअमृतस्याविनाशिनो ॥ अव्ययस्याविकारिणः ॥ शाश्वतस्यनित्यस्यचधर्म
स्यधर्मज्ञानस्यज्ञानयोगधर्मप्राप्यस्य ॥ सुखस्यानंदरूपस्यैकांतिकस्याव्यभिचारिणःश्च

मृतादिस्वभावस्यपरमात्मनः प्रत्यगात्माप्रतिष्टा॥सम्यग्ज्ञानेनपरमात्मतयानिश्चीय
तेतदेतद्ब्रह्मभूयायकल्पतेइत्युक्तं॥ययेश्वरशक्त्याभक्तानुग्रहादिप्रयोजनायब्रह्मप्र
तिष्टतेप्रवर्त्तते॥साशक्तिर्ब्रह्मैवाहं॥शक्तिशक्तिमतोरनन्यत्वात्॥इत्यभिप्रायः॥अथ।
वाब्रह्मशब्दवाच्यत्वात्सविकल्पंब्रह्म॥तस्यब्रह्मणोनिर्विकल्पोहमवाच्यः प्रतिष्टा।
आश्रयः॥किंविशिष्टस्यामृतस्यामरणधर्मकस्याव्ययस्यव्ययरहितस्य॥किंच॥शाश्व
तस्यचनित्यस्यधर्मस्यज्ञाननिष्टालक्षणस्य॥सुखस्यतज्जनितस्य॥एकांति
कस्यएकांतनियतस्यचप्रतिष्टाहमितिवर्त्तते॥ ॥२७॥

इति श्रीपरमहंसपरिव्राजकाचार्य
श्रीशंकरभगवत्कृतौ गीता
भाष्ये चतुर्दशोध्या
यः॥१४॥ ॥
ॐ॥ॐ

नहिसंसारवृक्षादस्मात्समूलाज्ज्ञेयोन्योऽणुमात्रोप्यवशिष्टोस्ति॥अतःसर्वज्ञःसयोवेदा
 र्थविदिति॥यस्मात्संसारवृक्षेसमूलेसर्वंज्ञेयमंतर्भवतितस्मात्समूलवृक्षज्ञानंस्तौति
तस्यैवसंसारवृक्षस्यावयवकल्पनोच्यते॥अधश्चेति॥अधोमनुष्यादिभ्योयावत्स्थाव
रं॥ऊर्ध्वंचयावद्ब्रह्माविश्वसृजोधामइत्यन्तमिदंत॥यथाकर्मयथाश्रुतंज्ञानकर्म्मफलानित

अधश्चोर्ध्वंप्रसृतास्तस्यशाखागुणप्रवृद्धाविषयप्रवालाः॥अध
श्चमूलान्यनुसंततानिकर्म्मानुबंधीनिमनुष्यलोके॥२॥

स्यवृक्षस्यशाखाइवशाखाःप्रसृताःप्रगताः॥गुणप्रवृद्धाःगुणैःसत्वरजस्तमोभिःप्रवृ
द्धाःस्थूलीकृताःउपादानभूतैःविषयप्रवालाःविषयाःशब्दादयःप्रवालाइवदेहादि
कर्म्मफलेभ्यःशाखाभ्योऽङ्कुरीभवन्तीवतेनविषयप्रवालाःशाखाःसंसारवृक्षस्यपर
मंमूलमुपादानेपूर्वमुक्तं अथेदानींकर्मफलजनितरागद्वेषादिवासनामूलानीव

धर्माधर्मप्रवृत्तिकारणान्यवांतरभावीनीतितान्यधश्चदेवाद्यपेक्षयामूलान्यनुसंततानि।
अनुप्रविष्टानि॥ कर्मानुबंधीनि कर्म धर्माधर्मलक्षणमनुबंधः पश्चाद्भावि येषामुद्भूति
मनुभवंति तानि कर्मानुबंधीनि॥ मनुष्यलोके विशेषतोऽत्र हि मनुष्याणां कर्माधिका
रः प्रसिद्धः॥२॥ यस्त्वयं वर्णितः संसारवृक्षः॥ न रूपमिति॥ न रूपमस्येह यथा वर्णितं॥ तथा
नैवोपलभ्यते॥ स्वप्नमरीच्युदकमायागंधर्वनगरसमत्वात्॥ दृष्टनष्टस्वरूपो हि स इति

न रूपमस्येह तथोपलभ्यते नांतो न चादिर्न च संप्रतिष्ठा॥ अश्व
त्थमेनं सुविरूढमूलमसंगशस्त्रेण दृढेन छित्वा॥३॥ ॥ ॥

अत एव नांतो न पर्यंतो निष्ठा समाप्तिर्वा विद्यते॥ तथा न चादिरित आरभ्यायं प्रवृत्त इति न के
नचिद्गम्यते॥ न च संप्रतिष्ठा स्थितिर्मध्यमस्य केनचिदुपलभ्यते॥ अश्वत्थमेनं यथोक्तं सुवि
रूढमूलं॥ सुष्ठु विरूढानि विरोहं गतानि सुदृढानि मूलान्यस्य तमेनं सुविरूढमूलं॥ असंगश
स्त्रेणासंगः पुत्रवित्तलोकैषणाभ्यो व्युत्थानं तेनासंगशस्त्रेण॥ दृढेन परमात्माभिमुख्यनि
श्चयदृढीकृतेन पुनः पुनर्विवेकाभ्यासाश्मनिशितेन छित्वा संसारवृक्षं सबीजमुद्धृत्य॥३॥

422 ततःइति॥ततःपश्चाद्यहेलवंपदंतत्परिमार्गितव्यंपरिमार्गणमन्वेषणंज्ञातव्यमित्यर्थः
यस्मिन्पदेगताःप्रविष्टाननिवर्त्ततिनावर्त्ततेभूयःपुनःसंसाराय॥कथंपरिमार्गितव्य
मित्याह॥तमेवचयःपदप्राप्त्येनोक्तःआद्यमादौभवंयंपुरुषंप्रपद्येइत्येवंपरिमार्गितव्यं

ततःपदंतत्परिमार्गितव्यंयस्मिन्गतानानिवर्त्ततिभूयः॥त
मेवचाद्यंपुरुषंप्रपद्येयतःप्रवृत्तिःप्रसृतापुराणी॥४॥

तच्छरणतयेत्यर्थः॥कोसौपुरुषइत्युच्यते॥यतोयस्मात्पुरुषात्संसारमायायाःप्र
वृत्तिःप्रसृतानिस्सृतायेंद्रजालिकादिवमायापुरा
णीचिरंतनी॥४॥

गी·भा·
२५
423

कथंभूतास्तत्पदंगच्छंतीत्युच्यते॥निर्माइति॥निर्माणमोहाःमानश्चमोहश्चमानमोहौतौनि
र्गतौयेभ्यस्तेनिर्माणमोहाः॥मानमोहवर्जिताः जितसंगदोषाः संगएवदोषः संगदोषः
जितःसंगदोषोयैस्तेजितसंगदोषाः॥अध्यात्मनित्याःपरमात्मस्वरूपालोचनेनित्यास्तत्प
राः॥विनिवृत्तकामाः विशेषतोनिर्लेपत्वेननिवृत्ताःकामायेषांतेविनिवृत्तकामाःयतयः
संन्यासिनः॥द्वंद्वैःप्रियाप्रियादिभिर्विमुक्ताःसुखदुःखसंज्ञैः॥परित्यक्ताःगच्छंत्यमूढा

निर्माणमोहाजितसंगदोषाअध्यात्मनित्याविनिवृत्तकामाः॥द्वंद्वैर्विमुक्ताःसुखदुःखसं
ज्ञैर्गच्छंत्यमूढाःपदमव्ययंतत्॥५॥नतद्भासयतेसूर्योनशशांकोनपावकः॥य
द्गत्वाननिवर्त्तंतेतद्धामपरमंमम॥६॥

मोहवर्जिताःपदमव्ययंतत्॥५॥यथोक्तं॥तदे
वपदंपुनर्विशिष्यते॥नतदिति॥तद्धामेतिव्यवहितेनयथासंबंधः धामतेजोमयंपदं
नभासयतेसूर्यआदित्यःसर्वावभासनशक्तिमत्वेपिसति॥तथानशशांकःचंद्रः॥नपा
वकोऽग्निरपि॥यद्धामवैष्णवंपदंगत्वाप्राप्यननिवर्त्तंते॥यच्चसूर्यादिर्नभासयतेतद्धाम

परमंपदंममवि[illegible]ः॥अ॥
२५

424

कानितानिच॥ श्रोत्रंइति॥ श्रोत्रंचक्षुःस्पर्शनंत्वगिंद्रियंरसनंघ्राणमेवच॥ मनःषष्ठंप्रत्येक
मिंद्रियाणांसंनिधिष्ठायदेहस्थोविषयान्शब्दादीनुपसेवते॥ एवंदेहगतंदेहात्॥ उत्क्राम
ति॥ उत्क्रामंतंपरित्यजंतंदेहंसर्वोपात्तं॥ स्थितंवापिदेहेतिष्ठंतं॥ भुंजानंवाशब्दादीन्
पलभमानं॥ गुणान्वितंसुखदुःखमोहाद्यैर्गुणैरन्वितंअनुगतंसंप्रयुक्तमित्यर्थः॥ एवं

श्रोत्रंचक्षुःस्पर्शनंचरसनंघ्राणमेवच अधिष्ठायमनश्चायंविषयानुपसेवते॥९

उत्क्रामंतंस्थितंवापि॥ भुंजानंवागुणान्वितं॥ वि
मूढानानुपश्यंतिपश्यंतिज्ञानचक्षुषः॥१०॥

भूतमप्येनंअत्यंतदर्शनगोचरप्राप्तंविमूढादृष्टादृष्टफलभोगलवाकृष्टचेतस्तत्त
याअनेकधामूढानानुपश्यंति॥ अहोकष्टंवर्त्ततइत्यनुक्रोशतिभगवान्॥ येतुपु
नःप्रमाणजनितज्ञानचक्षुषोतएनंपश्यंतिज्ञानचक्षुषोविविक्तदृष्टयइत्यर्थः॥ ॥ ॥
१०॥ ॥

केचित्तु ॥ यतंत इति ॥ यतंतः प्रयत्नं कुर्वंतः योगिनः समाहितचित्ताः एनं प्रकृतं आत्मानं पश्यं
ति अयमहमस्मि इत्युपलभंते ॥ आत्मनि स्वस्यां बुद्धौ अवस्थितं ॥ यतंतोपि शास्त्रादिप्रमा

यतंतो योगिनश्चैनं पश्यंत्यात्मन्यवस्थितं ॥ यतं
तोप्यकृतात्मानो नैनं पश्यंत्यचेतसः ॥ ११ ॥ ॥

णैरकृतात्मानोऽसंस्कृतात्मानः तपसेंद्रियजयेन च दुश्चरितादनुपरताः अशांतदर्पाः
प्रयत्नं कुर्वंतोपि नैवैनं पश्यंति अचेतसोऽविवेकिनः ॥ ११ ॥ ॥

यस्य पदस्योक्तमनवधिप्रमाणोनी वाघटा का प्रादयइवाकाशस्याप्ताः २

यत्पदं सर्वस्यावभासकमपि आदित्यादिकं ज्योतिर्नावभासयते यत्प्राप्ताश्च मुमुक्ष
426 वः पुनः संसाराभिमुखा न निवर्तन्ते तत्पदस्य सर्वात्मत्वं सर्वव्यवहारास्पदत्वं च।
विवक्षुस्त्रिभिः श्लोकैर्विभूतिसंक्षेपमाह भगवान्॥ यदादित्येति॥ यदादित्यगतमादित्या
श्रयं॥ किं तत्॥ तेजो दीप्तिः प्रकाशः जगद्भासयते प्रकाशयति अखिलं समस्तं यच्चन्द्र
मसि प्राणभृति तेजोऽवभासकं वर्तते॥ यच्चाग्नौ हुतवहे तत्तेजो विद्धि विजानीहि मामक

यदादित्यगतं तेजो जगद्भासयतेऽखिलं॥ यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकं॥१२॥

कं मदीयमिति॥ अथवा यदादित्यगतं तेजश्चैतन्यात्मकं ज्योतिर्यच्चन्द्रमसि यच्चाग्नौ।
तत्तेजो विद्धि मामकं मदीयं विष्णोः तज्ज्योतिः॥ ननु स्थावरेषु जंगमेषु च तत्समानं चै।
तन्यात्मकं ज्योतिः तत्र कथमिदं विशेषणं यदादित्यगतमित्यादि नैष दोषः सत्त्वा।
धिक्यादाधिक्योपपत्तेः आदित्यादिषु सत्त्वमत्यन्तभास्वरमतस्तत्रैवाविस्तारो ज्योतिरि
ति तद्विशिष्यते॥ यथा हि लोके तुल्येऽपि मुखसंस्थाने न काष्ठकुड्यादौ मुखमाविर्भवति ॥ ॥
आदर्शादौ च स्वच्छे स्वच्छतरे तारतम्येनाविर्भवतीति तद्वत्॥१२॥

गी॰भा॰ किंच॥गामाइति॥गांपृथिवीमाविश्यप्रविश्यभूतानिधारयामिभूतानिजगदहं॥ओज
२१२ साबलेन॥तद्बलंकामरागविवर्जितंपेश्वरंजगद्विधारणायपृथिव्यामाविष्टयेनपृथि
427 थिवीनाधःपततिनविदीर्यतेच॥तथाचमंत्रवर्णः॥येनद्यौरुग्रापृथिवीचदृढेतिसदा
धारपृथिवीमित्यादिश्च॥अतोगामाविश्यचभूतानिचराचराणिधारयामि॥किंच॥पु

गामाविश्यचभूतानिधारयाम्यहमोजसा॥पु
ष्णामिचौषधीःसर्वाःसोमोभूत्वारसात्मकः॥१३॥

थिव्यांजाताओषधीःसर्वाव्रीहियवाद्याःपुष्णामिपुष्टिमतीरसस्वादुमतीश्चकरोमि सो
मोभूत्वारसात्मकःसोमःसन्रसात्मकोरसस्वभावःसर्वरसानामाकरःसोमःसहि २१२
सर्वाओषधीःस्वात्मरसाननुप्रवेशयन्पुष्णामि ॥१३॥ ॥ शिवजी ॥

428

किंच ॥ अहं वैश्वानर इति ॥ अहमेव वैश्वानरः उदरस्थोऽग्निर्भूत्वा अयमग्निर्वैश्वानरो योऽयमन्तः पुरुषे
येनेदमन्नं पच्यते इत्यादि श्रुतेः वैश्वानरः सन् प्राणिनां प्राणवतां देहमाश्रितः प्रवि
ष्टः ॥ प्राणापानसमायुक्तः प्राणापानाभ्यां समायुक्तः संयुक्तः पचामि पक्तिं करोमि ॥ अन्नं
चतुर्विधं भोज्यं भक्ष्यं चोष्यं लेह्यं च ॥ भोक्ता वैश्वानरोऽग्निः अन्नं भोज्यमन्नं सोमः एतदुभयं
अग्नीषोमौ सर्वमिति पश्यतोऽन्नदोषलेपो न भवति ॥ १४ ॥ किंच ॥ सर्वस्येति ॥ सर्वस्य प्राणिजा

अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः ॥ प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधं ॥ १४ ॥
सर्वस्य चाहं हृदि संनिविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च ॥ वेदैश्च सर्वैरहमेव वेद्यो वे
दान्तकृद्वेदविदेव चाहं ॥ १५ ॥

तस्य अहमात्मा सन् हृदि बुद्धौ संनिविष्टः अतो मत्तः आ
त्मनः सर्वप्राणिनां स्मृतिर्ज्ञानं तदपोहनं च ॥ तेषां पुण्यकर्मिणां पुण्यकर्मानुरोधेन
ज्ञानस्मृती भवतः पापकर्मिणां पाप॥कर्मानुरूपेण स्मृतिज्ञानयोरपोहनं च अपोहन
मपगमनं ॥ वेदैश्च सर्वैरहमेव परमात्मा वेद्यो वेदितव्यः ॥ वेदान्तकृद्वेदान्तार्थसंप्रदाय
कृदित्यर्थः ॥ वेदविद्वेदार्थविदेव चाहं ॥ १५ ॥ ॥ ॥

गी॰भा॰
२१३
429

भगवत ईश्वरस्य नारायणाख्यस्य विभूतिसंक्षेप उक्तः विशिष्टोपाधिकृतो यदादित्यगतं
तेज इत्यादिना॥ अथाधुना तस्यैव क्षराक्षरोपाधिप्रविभक्ततया निरुपाधिकस्य केवलस्य
स्वरूपनिर्दिधारयिषया उत्तरे श्लोका आरभ्यंते॥ द्वाविमाविति॥ द्वाविमौ पृथग्राशीकृतौ पुरु-
षाविति उच्येते॥ लोके संसारे॥ क्षरश्चाक्षरश्च॥ क्षरतीति क्षरो विनाश्येको राशिरपरः पुरुषो
क्षरः तद्विपरीतो भगवतो मायाशक्तिः क्षराख्यस्य पुरुषस्योत्पत्तिबीजमनेकसंसारिजं-

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ॥ क्षरः
सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥१६॥

तुकामकर्मादिसंस्काराश्रयोऽक्षरः पुरुष उच्यते॥ कौ तौ पुरुषावित्याह स्वयमेव भगवा-
न्॥ क्षरः सर्वाणि भूतानि समस्तं विकारजातमित्यर्थः॥ कूटस्थः कूटो राशिः राशिरिव स्थि-
तः॥ अथवा कूटो माया वंचना जिह्मता कुटिलतेति पर्यायाः अनेकमायादिप्रकारेण
स्थितः कूटस्थः संसारबीजानंत्यान्न क्षरतीत्यक्षर उच्यते॥ आभ्यां क्षराक्षराभ्यां विलक्षण २१३
क्षराक्षरोपाधिद्वयदोषेणास्पृष्टो नित्यशुद्धबुद्धमुक्तस्वभावः ॥१६॥ ॥ ॥

430

उत्तम इति ॥ उत्तमः उत्कृष्टतमः पुरुषस्त्वन्योऽत्यंतविलक्षणः आभ्यां ॥ परमात्मेति ॥ परम
श्चासौ देहाद्यविद्याकृतात्मभ्यो ऽन्नमयादिभ्यः पंचभ्यः आत्मा च सर्वभूतानां प्रत्यक्चे
तन इति अतः परमात्मेत्युदाहृतः ॥ उक्तो वेदांतेषु ॥ स एव विशिष्यते ॥ यो लोकत्रयमा

उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ॥ यो लो
कत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥१७॥

भूर्भुवः स्वराख्यं स्वकीयया बलशक्त्या आविश्य प्रविश्य बिभर्ति स्वरूपसद्भावमात्रेण
धारयति ॥ अव्ययो नास्य व्ययो विद्यत इत्यव्ययः ॥ ईश्वरः सर्वज्ञो नारायणाख्यः ईश
नशीलः ॥१७॥

यथाव्याख्यातस्येश्वरस्यपुरुषोत्तमइत्येतन्नामप्रसिद्धं॥तस्यनामनिर्वचनप्रसिद्ध्यापिएव
त्वंनामास्तीत्यादर्शयन्निरतिशयोहमीश्वरइत्यात्मानंदर्शयतिभगवान्॥यस्मादिति॥यस्मा
त्क्षरमतीतोहंसंसारमायावृक्षमश्वत्थाख्यंक्षरं॥अक्षरादपिसंसारवृक्षबीजभूताद
पिचोत्तमउत्कृष्टतमऊर्ध्वतमोवाअतःक्षराक्षराभ्यामुत्तमत्वादस्मिभवामि॥लोकेवेदेच
प्रथितःप्रख्यातःपुरुषोत्तमइत्येवंमांभक्तजनाविदुःकवयःकाव्यादिषुचइदंनाम।

यस्मात्क्षरमतीतोहमक्षरादपिचोत्तमः॥अतोस्मिलोकेवेदेचप्रथितःपुरुषोत्तमः॥१८
योमामेवमसंमूढोजानातिपुरुषोत्तमं॥ससर्वविद्भजतिमांसर्वभावेनभारत ॥१९॥

निबध्नंति॥१८॥अथेदानींयथानिरुक्तमात्मानंयोवेदतस्येदंफलमुच्यते॥योमामिति॥
योमामीश्वरंयथोक्तविशेषणं॥एवंयथोक्तेनप्रकारेण॥असंमूढःसंमोहवर्जितःस
न्॥जानाति॥अयमहमस्मीतिपुरुषोत्तमं॥ससर्वविन्सर्वंवेत्तीतिसर्वविन्सर्वज्ञःस
र्वभूतस्थंसर्वात्मनाभजतिसमांसर्वभावेनसर्वात्मचित्ततयाभारत ॥१९॥ ॥ ॥ ॥

432

अस्मिन्नध्याये भगवत्तत्त्वज्ञानं मोक्षफलमुक्तम् । अथेदानीं तत्स्तौति ॥ इतीति ॥ इति एतद्गुह्य
तमं गोप्यतमम् अत्यन्तरहस्यमित्येतत् ॥ किं तत् ॥ शास्त्रं यद्यपि गीताख्यं समस्तं शास्त्रमुच्यते ।
तथाप्ययमेवाध्याय इह शास्त्रमिति स्तूयते स्तुत्यर्थं प्रकरणात् ॥ सर्वो हि गीताशास्त्रार्थो ।
स्मिन्नध्याये समासेनोक्तो न केवलं सर्वश्च वेदार्थ इह परिसमाप्तः यस्तं वेद स वेदवित्
वेदैश्च सर्वैरहमेव वेद्य इति चोक्तं ॥ इदमुक्तं कथितं मयानघ ॥ एतच्छास्त्रं यथादर्शितार्थं
बुद्ध्वा बुद्धिमान् स्यात् ॥ भवेन्नान्यथा ॥ कृतकृत्यश्च भारत कृतं कृत्यं कर्तव्यं येन स कृ।

इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ ॥ एतद्बुद्ध्वा बुद्धिमान्स्यात्कृतकृत्यश्च भारत ॥२०॥

तकृत्यः विशिष्टजन्मप्रसूतेन ब्राह्मणेन यत्कर्तव्यं तद्भगवत्तत्त्वे विदिते कृतं भवेदित्य ते७
र्थः ॥ न चान्यथा कर्तव्यं परिसमाप्यते कस्यचिदित्यभिप्रायः ॥ सर्वं कर्माखिलं पार्थ ज्ञा
ने परिसमाप्यत इति चोक्तं ॥ एतद्धि जन्मसामर्थ्यमिति मानवं वचनं ॥ यत एतत्परमार्थत
त्त्वं मत्तः श्रुतवानसि अतः कृतार्थस्त्वं भारतेति ॥२०॥ इति श्रीशंकराचार्यकृतौ पंचदशोध्या य:५५

गी॰ भा॰
२५
433

दैवासुरीराक्षसी चेति प्राणिनां प्रकृतयो नवमेऽध्याये सूचिताः ॥ तासां विस्तरेण प्रदर्शनाय अभयं सत्त्वसंशुद्धिरित्यादिरध्याय आरभ्यते ॥ तत्र संसारमोक्षाय दैवी प्रकृतिः निबंधाय आसुरी राक्षसी चेति ॥ दैव्या आदानाय प्रदर्शनं क्रियते इतरयोः परिवर्जनाय ॥ अभयमिति अभयम् अभीरुता ॥ सत्त्वसंशुद्धिः सत्त्वस्यांतःकरणस्य व्यवहारेषु परवंचनामायानृतादिवर्जनं शुद्धसत्त्वभावेन व्यवहार इत्यर्थः ॥ ज्ञानयोगव्यवस्थितिः ॥ ज्ञानं शास्त्रत आचार्य-

श्रीभगवानुवाच ॥ अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः ॥ दानं दमश्च यज्ञश्च स्वाध्याय-
यस्तप आर्जवं ॥ १ ॥

तश्चात्मादिपदार्थानामवगमः इति ॥ अवगतानामिंद्रियादिउप-
संहारेणैकाग्र्यतया स्वात्मसंवेद्यतापादनं योगः तयोर्ज्ञानयोगयोर्व्यवस्थितिर्व्यवस्थानं ।
तन्निष्ठता एषा प्रधाना दैवी सात्त्विकी संपत् ॥ यत्र यत्र येषां अधिकृतानां या प्रकृतिः इदंशी सं-
भवति सात्त्विकी सोच्यते ॥ दानं यथाशक्ति संविभागो न्नादीनां ॥ दमश्च बाह्यकरणानामुप-
शमः अंतःकरणस्योपशमं शांतिं वक्ष्यति ॥ यज्ञश्च श्रौतोऽग्निहोत्रादिः स्मार्तश्च देवयज्ञा- २५

दि॥ स्वाध्यायोध्ययनऋग्वेदादिअध्ययनमदृष्टार्थं तपोवक्ष्यमाणंशारीरादि॥ आर्जवंअ-
434 जुत्वंसर्वदा॥१॥ किंच॥ अहिंसेति॥ अहिंसाअहिंसनंप्राणिनांपीडावर्जनं॥ सत्यम-
प्रियानृतवर्जितं॥ यथाभूतार्थवचनं॥ अक्रोधः परैराक्रुष्टस्याभिहतस्यवाप्राप्त-
स्यक्रोधोपशमनं॥ त्यागः संन्यासः पूर्वंदानस्योक्तत्वात्॥ शांतिरंतःकरणस्योपशमः

अहिंसासत्यमक्रोधस्त्यागः शांतिरपैशुनं॥ दया
भूतेष्वलोलुत्वंमार्दवंह्रीरचापलं॥२॥ ॥॥॥॥

अपैशुनमपिशुनतापरस्मैपरंध्रप्रकटीकरणंपैशुनंतदभावोऽपैशुनं॥ दयाकृपाभू-
तेषुदुःखितेषु॥ अलोलुत्वंइंद्रियाणांविषयसन्निधौअविक्रिया॥ मार्दवंमृदुता
अक्रौर्यं॥ ह्रीर्लज्जाअचापलंअसतिप्रयोजनेवाक्पाणिपादादीनांअव्यापारयि-
तृत्वं॥२॥ ॥ ॥ ॥शिव

गी॰भा॰ २१८ 435

किंच॥तेजःइति॥तेजःप्रागल्भ्यंनत्वग्गतादीप्तिःक्षमाआक्रुष्टस्यताडितस्यवांतर्विक्रिया
नुत्पत्तिः॥उत्पन्नायांविक्रियायांप्रशमनमक्रोधइत्यवोचामइत्थंक्षमायाअक्रोधस्यचवि
शेषः धृतिर्देहेंद्रियेष्ववसादंप्राप्तेषुतस्यप्रतिषेधकोंतःकरणवृत्तिविशेषोयेनोत्तंभि
तानिकरणानिदेहश्चनावसीदंति॥शौचंद्विविधंमृज्जलकृतंबाह्यमाभ्यंतरंमनोबुद्ध्यो
नैर्मल्यंमायारागादिकालुष्याभावः॥एवंद्विविधंशौचं॥अद्रोहःपरजिघांसाभावोऽहिं

तेजःक्षमाधृतिःशौचमद्रोहोनभिमानिता॥भवंतिसंपदंदैवीमभिजातस्यभारत॥३॥

सनं॥नभिमानिताअत्यर्थंमनोऽभिमानःसयस्यविद्यतेसोभिमानीतद्भावोनभिमा
निताआत्मनःपूज्यताअतिशयभावनाभावइत्यर्थः भवंतिअभयादीनिएतदंतानि
संपदमभिजातस्यकिंविशिष्टांसंपदंदैवीदेवानांसंपत्॥तामभिलक्ष्यजातस्यदेववि
भूत्यर्हस्यभाविकल्याणस्येत्यर्थः॥हेभारत ॥३॥ ॥ ॥ ॥शिव २१८

अथेदानीमासुरीसंपदुच्यते ॥ दंभो इति ॥ दंभो धर्मध्वजित्वं ॥ दर्पो धनस्वजनादिनिमित्त
उत्सेकः ॥ अभिमानः पूर्वोक्तः ॥ क्रोधश्च पारुष्यमेव च परुषवचनं ॥ यथा काणं चक्षुष्मा
नविरूपं रूपवान् हीनाभिजनमुत्तमाभिजन इत्यादि ॥ अज्ञानं च अविवेकज्ञानं मिथ्या
ज्ञानं कर्तव्याकर्तव्यविषयं ॥ अभिजातस्य हे पार्थ ॥ किमभिजातस्येत्याह ॥ संपदमा
सुरीमसुराणां संपदं तामभिलक्ष्य जातस्येत्यर्थः ॥ ४ ॥ अनयोः संपदोः कार्यमुच्यते

दंभो दर्पोभिमानश्च क्रोधः पारुष्यमेव च ॥ अज्ञानं चाभिजातस्य पार्थ संपदमासुरी ॥ ४ ॥
दैवी संपद्विमोक्षाय निबंधायासुरी मता ॥ मा शुचः संपदं दैवीमभिजातोसि पांडव ॥ ५ ॥

दैवी इति ॥ दैवी संपद्या सा विमोक्षाय संसारबंधनात् ॥ निबंधाय ततो बंधो निबंधः त
दर्थमासुरी संपत् ॥ मता अभिप्रेता तथा राक्षसी ॥ तत्रैवमुक्ते अर्जुनस्यान्तर्गतं भावं किं
मह्यमासुरीसंपद्युक्तः किं वा दैवीसंपद्युक्तः एवमालोचनारूपं भावमालोक्याह भ
गवान् ॥ मा शुचः शोकं माकार्षीः संपदं दैवीमभिजातोसि अभिलक्ष्य जातोसि भावि

द्वौभूतइति॥द्वौद्विसंख्याकौभूतसर्गौभूतानांमनुष्याणांसर्गौसृष्टीसृज्येतेइतिसर्गौभूतान्ये
वसृज्यमानानिदैवासुरसंपद्युक्तानिइतिभूतसर्गावुच्यते॥द्वयाहप्राजापत्यादेवाश्चा
सुराश्चइतिश्रुतेःलोकेस्मिन्संसारेमनुष्यलोकेसर्वेषांद्वैविध्योपपत्तेःकौतावित्याह

द्वौभूतसर्गौलोकेस्मिन्दैवआसुरएवच॥दैवो
विस्तरशःप्रोक्तआसुरंपार्थमेशृणु॥६॥ ॥

गी६

प्रकृतावेवदैवश्चासुरएवच॥उक्तयोरेवपुनरनुवादप्रयोजनमाह॥दैवोभूतसर्गोऽभय
ंसत्वसंशुद्धिरित्यादिनाविस्तरशोविस्तरप्रकारैःप्रोक्तःकथितःनत्वासुरोविस्तरशः
अतस्तत्परिवर्जनार्थमासुरंपार्थमेममवचनादुच्यमानंविस्तरशःशृणुअवधारय॥६॥

आध्यायपरिसमाप्तेरासुरीसंपत्प्राणिविशेषत्वेनप्रदर्शयन्नेप्रत्यक्षीकरणेनवर्जनायतेष्व
438 स्याःपरिवर्जनंकर्तुमिति॥प्रवृत्तिमिति॥प्रवृत्तिंचप्रवर्तनंयस्मिन्पुरुषार्थसाधनेकर्तव्ये
याप्रवृत्तिःतांप्रवृत्तिं॥निवृत्तिंचतद्विपरीतांयस्मादनर्थहेतोर्निवर्तितव्यंतांनिवृत्तिंता
च॥जनाआसुरानविदुःनजानन्ति॥नकेवलंप्रवृत्तिनिवृत्तीनविदुः॥नशौचंनापिचा
चारोनसत्यंतेषुविद्यते॥अशौचावाअनाचाराःमायाविनोऽनृतवादिनोह्यासुराः॥७॥किं
प्रवृत्तिंचनिवृत्तिंचजनानविदुरासुराः॥नशौचंनापिचाचारोनसत्यंतेषुविद्यते॥७॥अ
सत्यमप्रतिष्ठंतेजगदाहुरनीश्वरं॥अपरस्परसंभूतंकिमन्यत्कामहैतुकं॥८॥

च॥असत्यमिति॥असत्यंयथावयमनृतप्रायाःतथेदंजगत्सर्वमप्रतिष्ठंनास्यधर्माधर्मौ
प्रतिष्ठाअतोऽप्रतिष्ठंच॥इतितेआसुराजनाःजगदाहुःअनीश्वरंनचधर्माधर्मसव्य
पेक्षकमस्यशासितेश्वरोविद्यतइति॥किंच॥अपरस्परसंभूतंकामप्रयुक्तयोःस्त्रीपुरुषयो
रन्योन्यसंयोगाज्जगत्सर्वंसंभूतंकिमन्यत्कामहैतुकंकामहेतुकमेवकामहेतुकं ८

गी॰भा॰
२१५
439

किमन्यज्जगतः कारणं न किंचिददृष्टं धर्माधर्मादिकारणं नरं विद्यते जगतः काम एव प्राणि-
नां कारणमिति लोकायतिकदृष्टिरियं ॥ एतां दृष्टिमवष्टभ्य नष्टात्मानो[illegible] आश्रित्य नष्टात्मा-
नो नष्टस्वभावाः विभ्रष्टपरलोकसाधनाः अल्पबुद्धयः विषयविषया अल्पैव बुद्धिर्येषां ते
अल्पबुद्धयः ॥ प्रभवंति उद्भवंति ॥ उग्रकर्माणः क्रूरकर्माणो हिंसात्मकाः क्षयाय जगतः

एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः ॥ प्रभवंत्युग्रकर्माणः क्षयाय जगतोऽहिताः ॥९॥
काममाश्रित्य दुष्पूरं दंभमानमदान्विताः ॥ मोहाद्गृहीत्वासद्ग्राहान्प्रवर्ततेऽशुचिव्रताः ॥१०॥

प्रभवंतीति संबंधः जगतोऽहिताः शत्रव इत्यर्थः ॥९॥ ते च ॥ काममिति ॥ कामं आश्रित्य अव-
ष्टभ्य ॥ दुःपूरं अशक्यपूरणं ॥ दंभमानमदान्विताः ॥ दंभश्च मानश्च मदश्च तैरन्विताः दंभमा-
नमदान्विताः ॥ मोहाद् अविवेकतः ॥ गृहीत्वा उपादाय ॥ असद्ग्राहान् अशुभनिश्चयान्
प्रवर्तंते लोके ॥ अशुचिव्रताः अशुचीनि व्रतानि येषां ते
अशुचिव्रताः ॥१०॥ ॥ २१५

किंच ॥ चिंताइति ॥ चिंतामपरिमेयां च न परिमातुं शक्यते यस्याश्चिंताया इयत्ता सा अपरि
440 मेया तां प्रलयांतां मरणांतां उपाश्रिताः सदा चिंतापरा इत्यर्थः ॥ कामोपभोगपरमाः का
म्यंत इति कामाः शब्दादयः तदुपभोगपरमाः ॥ अयमेव परमः पुरुषार्थ इति कामोपभो
गः इति ॥ एतावदिति ॥ निश्चिताः एवं निश्चितात्मानः ॥११॥ किंच ॥ आशाइति ॥ आशापाशश

चिंतामपरिमेयां च प्रलयांतामुपाश्रिताः ॥ कामोपभोगपरमा एतावदिति निश्चिताः ॥११॥
आशापाशशतैर्बद्धाः कामक्रोधपरायणाः ॥ ईहंते कामभोगार्थमन्यायेनार्थसंचया
न् ॥१२॥

तैः ॥ आशा एव पाशास्तेषां शतैः आशापाशशतैर्बद्धाः संतः सर्वतः आकृष्यमाणाः
कामक्रोधपरायणाः ॥ ईहंते चेष्टंते कामभोगार्थं कामभोगप्रयोजनाय न तु धर्मार्थं ॥ अन्या
येन परस्वापहरणादिना अर्थसंचयान् अर्थप्रचयान् ॥ ईदृशाश्च तेषामभिप्रा
यः ॥१२॥ ॥

गी॰भा॰ इदंद्य इति ॥ इदं द्य इदानीं मया लब्धं ॥ इदं अन्यत् प्राप्स्ये मनोरथं मनसः तुष्टिकरं ॥ इदं चा
२२ स्ति ॥ इदमपि मे भविष्यति ॥ आगामिनि संवत्सरे पुनर्धनं तेनाहं धनी विख्यातो भविष्यामि
441 ॥१३॥ असौ इति ॥ असौ मया देवदत्तनामा हतो दुर्जयः शत्रुः ॥ हनिष्ये चापरान् वराकानन्यान
पि किमेते करिष्यन्ति तपस्विनः सर्वथा नास्ति मत्तुल्यः ॥ ईश्वरोहं अहं भोगी सर्वप्रकारेण च
नकेवल सिद्धोहं संपन्नः पुत्रैर्नप्तृभिः स्त्रीभिश्चलं मानुषो बलवान् सुखी चाहमेव ॥१४॥ अन्ये तु भूमि

इदमद्य मया लब्धमिमं प्राप्स्ये मनोरथं ॥ इदमस्तीदमपि मे भविष्यति पुनर्धनं ॥१३॥ असौ
मया हतः शत्रुर्हनिष्ये चापरानपि ॥ ईश्वरोहमहं भोगी सिद्धोहं बलवान् सुखी ॥१४॥ आढ्यो
भिजनवानस्मि कोन्योस्ति सदृशो मया ॥ यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः ॥१५॥

भारा अवतीर्णाः ॥ आढ्यो धनेन ॥ अभिजनवान् सप्तपुरुषं श्रोत्रियत्वादिसंपन्नः तेनापि न मत्
तुल्योस्ति कश्चित् ॥ कोन्योस्ति सदृशः तुल्यो मया ॥ किंच ॥ यक्ष्ये यागेनान्यानभिभविष्यामि
दास्यामि नटादिभ्यः ॥ मोदिष्ये हर्षं चातिशयं प्राप्स्यामि ॥ इत्येवमज्ञानविमोहिताः वि। २२
विधमोहिताः अविवेकभावमापन्नाः ॥१५॥

अनेकेति अनेकचित्तविभ्रान्ताः उक्तप्रकारैरनेकैश्चित्तैर्विविधं भ्रान्ताः अनेकचित्तविभ्रान्ताः
मोहजालसमावृताः मोहोऽविवेकस्तेनेदं जालमिवावरणात्मकत्वात् ॥ तेन समा
वृताः प्रसक्ताः कामभोगेषु तत्रैव निषण्णाः सन्तः तेनोपचितकल्मषाः ॥ पतन्ति नरके अशुचौ
वैतरण्यादौ ॥१६॥ आत्मेति आत्मसंभाविताः सर्वगुणविशिष्टतया आत्मनैव संभाविताः

अनेकचित्तविभ्रान्ता मोहजालसमावृताः ॥ प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचौ ॥१६॥
आत्मसंभाविताः स्तब्धा धनमानमदान्विताः ॥ यजन्ते नामयज्ञैस्ते दंभेनाविधिपूर्वकं ॥१७॥

५२

धनमानमदान्विताः धननिमित्तो मानो धनमानम
नसाधुभिः ॥ स्तब्धाः अप्रणतात्मानः ॥ धनमानमदान्विताः धननिमित्तो मानो धनमा [illegible] मात्रैर्यजंते ते दं
दम्भेनाभ्यां धनमानमदाभ्यामन्विताः ॥ यजंते नामयज्ञैः नाम [illegible]
भेन धर्मध्वजितया ॥ अविधिपूर्वकं विहिताङ्गेतिकर्त
व्यतारहितैः ॥१७॥

अहंइति॥अहंकारंअहंकरणमहंकारः विद्यमानैरविद्यमानैश्चगुणैरात्मन्यध्यारोपितैर्विशि
ष्टमात्मानमहमितिमन्यतेसोहंकारोऽविद्याख्यःकष्टतमःसर्वदोषाणांमूलंसर्वानर्थप्रवृ
त्तीनांचतथापरिग्रहः॥तथाबलंपराभिभवनिमित्तंकामरागान्वितं॥दर्पंदर्पोनामयस्योद्भवेधर्म
मतिक्रमतिसोयमंतःकरणाश्रयोदोषविशेषः॥कामंस्त्र्यादिविषयं॥क्रोधमनिष्टविषयं

अहंकारंबलंदर्पंकामंक्रोधंचसंश्रिताः॥ मामा
त्मपरदेहेषुप्रद्विषंतोभ्यसूयकाः॥१८॥॥ ॥॥

एतानन्यांश्चमहतोदोषान्संश्रिताः॥किंच॥तेमामीश्वरमात्मपरेषांस्वपरदेहेषुचतद्बुद्धि
कर्मसाक्षिभूतंप्रद्विषंतोमच्छासनातिवर्तित्वंप्रद्वेषस्तंकुर्वंतः॥अभ्यसूयकाःसन्मार्गस्था
नांगुणेष्वसहमानाः ॥१८॥ ॥ ॥शिव २२१
॥

तानहं इति॥ तानहं सन्मार्गप्रतिपक्षभूतान् साधुद्वेषिणो द्विषतश्च मां क्रूरान् संसारेष्वेव
445 नरकसंसरणमार्गेषु नराधमान् अधर्मदोषवत्त्वात्॥ क्षिपामि प्रक्षिपामि॥ अजस्रं सत
तं अशुभान् अशुभकर्मणः॥ आसुरीष्वेव क्रूरतमासु व्याघ्रसिंहादियोनिषु क्षिपामी।
त्यनेन संबंधः॥ १९॥ आसुरीं इति॥ आसुरीं योनिमापन्नाः प्रतिपन्नाः॥ मूढा अविवेकिनः

तानहं द्विषतः क्रूरान्संसारेषु नराधमान्॥ क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु॥१९॥
आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि॥ मामप्राप्यैव कौंतेय ततो यांत्यधमां गतिं
॥२०॥

जन्मनि जन्मनि प्रतिजन्म तमोबहुलास्वेव योनिषु जायमाना मामीश्वरं अप्राप्य
अनासाद्य एव कौंतेय ततस्तस्मादपि यांति अधमां गतिं निकृष्टतमां गतिं मामप्राप्य
तिनमस्माप्तौ कदाचिदाशंकाप्यस्तितेनामच्छिष्टसाधुमार्गमपि अप्राप्यैवेत्यर्थः॥२०॥ शिव
॥॥॥
शिव

सर्वस्या आसुर्याः संपदः संक्षेपोयमुच्यते यस्मिंस्त्रिविधे सर्वोप्यासुरीसंपद्भेदोऽनंतो
प्यन्तर्भवति यत्परिहारेण परिहृतस्स भवति॥ यन्मूलं सर्वस्यानर्थस्य तदेतदुच्यते॥ त्रि
विधमिति॥ त्रिविधं त्रिप्रकारं नरकस्य नरकप्राप्तौ इदं द्वारं नाशनमात्मनः नाशं नयद्द्वारं प्र
विशन्नेव नश्यत्यात्मा न कस्मैचित्पुरुषार्थाय योग्यो भवतीत्यर्थः॥ अत उच्यते द्वारं ना
शनमात्मन इति॥ किं तत् कामः क्रोधः तथा लोभः तस्मादेतत्त्रयं त्यजेत्॥ यत एतद्द्वा

त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः॥ कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजे
त्॥२१॥ एतैर्विमुक्तः कौन्तेय तमोद्वारैस्त्रिभिर्नरः॥ आचरत्यात्मनः श्रेयस्ततो याति परां
गतिम्॥२२॥

रं नाशनमात्मनस्तस्मात्कामादित्रयमेतत्त्यजेत् त्यागस्तुतिरियं॥ एतै
रिति॥ एतैर्विमुक्तः कौन्तेय तमोद्वारैस्तमसो नरकस्य दुःखमोहात्मकस्य द्वाराणि।
कामादयः तैरेतैस्त्रिभिर्विमुक्तो नर आचरति अनुतिष्ठति॥ किं आत्मनः श्रेयः य
त्प्रतिबद्धः पूर्वं नाचरति तदपगमादाचरति॥ ततस्तदाचरणात् याति परां गतिं मो

२२२

सर्वस्यैतस्यआसुरसंपत्परिवर्जनस्यश्रेयआचरणस्यचशास्त्रंकारणंशास्त्रप्रमाणादुभ
446 यमेतत्कर्तुंनान्यथा ॥ अतः ॥ यः शास्त्रइति ॥ यः शास्त्रविधिंशास्त्रंवेदस्तस्यविधिंकर्तव्या
कर्तव्यज्ञानकारणंविधिप्रतिषेधाख्यं ॥ उत्सृज्यत्यक्त्वावर्ततेकामकारतः कामप्रयुक्तः
सन् ॥ नससिद्धिंपुरुषार्थयोग्यतामवाप्नोति ॥ नाप्यस्मिन्लोकेसुखंनपरांप्रकृष्टांगतिं
स्वर्गंमोक्षंवा ॥ २३ ॥ तस्मादिति ॥ तस्माच्छास्त्रंप्रमाणंज्ञानसाधनंतेतवकार्याकार्यव्यवस्थि।

यः शास्त्रविधिमुत्सृज्यवर्ततेकामकारतः ॥ नससिद्धिमवाप्नोतिनसुखंनपरांगतिं ॥ २३
तस्माच्छास्त्रंप्रमाणंतेकार्याकार्यव्यवस्थितौ ॥ ज्ञात्वाशास्त्रविधानोक्तंकर्मकर्तुमिहा र्हसि ॥ २४ ॥

तौ कर्तव्याकर्तव्यव्यवस्थायां ॥ अतोज्ञात्वाबुद्ध्वाशास्त्रविधानोक्तंविधिर्विधा
नंशास्त्रमेवविधानंशास्त्रविधानंकुर्यान्नकुर्यादित्येवंलक्षणं ॥ तेनोक्तंस्वकर्मयत्तत्कर्तुमि
हार्हसि ॥ इहेतिकर्माधिकारभूमिप्रदर्शनार्थमिति ॥ २४ ॥ इति श्रीपरमहंसपरिव्रा
जिकाचार्यश्रीशंकरभगवत्कृतौगीताभाष्ये
षोडशोध्यायः १६ ॥ ॥ ॥ ॥

तस्माच्छास्त्रप्रमाणंतइतिभगवद्वाक्याल्लब्धप्रश्नबीजो ॥ येशाइति ॥ येकेचिदविशेषिताः
शास्त्रविधिंशास्त्रविधानंश्रुतिस्मृतिशास्त्रचोदनामुत्सृज्यपरित्यज्ययजंतेदेवादीन् ॥
पूजयंति ॥ श्रद्धयाआस्तिक्यबुद्ध्याअन्विताःसंयुक्ताःसंतःश्रुतिलक्षणंस्मृतिलक्षणं
वाकिंचिच्छास्त्रविधिमपश्यंतोवृद्धव्यवहारदर्शनादेवश्रद्दधानतयायेदेवादीन्पू
जयंतितइहयेशास्त्रविधिमुत्सृज्ययजंतेश्रद्धयान्विताइतिगृह्यंते ॥ येपुनःकिंचिच्छा

अर्जुन उवाच ॥ येशास्त्रविधिमुत्सृज्ययजंतेश्रद्धयान्वि
ताः ॥ तेषांनिष्ठातुकाकृष्णसत्त्वमाहोरजस्तमः ॥ १ ॥

स्त्रविधिमुपलभमानाएवतमुत्सृज्ययथाविधिंदेवादीन्पूजयंतितइहयेशास्त्रवि
धिमुत्सृज्ययजंतइतिनगृह्यंते ॥ कस्मात्श्रद्धयान्वितत्वविशेषणात् ॥ देवादिपूजा
विधिपरंकिंचिच्छास्त्रविधिंपश्यंतएवतमुत्सृज्याश्रद्दधानतयातद्विहितायांदेवादि २२३
पूजायांश्रद्धयान्विताःप्रवर्त्तंतइतिनशक्यंपरिकल्पयितुंयस्मात्तस्मात्पूर्वोक्ताएवये

स्त्रविधिमुत्सृज्य यजंते श्रद्धयान्विता इति यदुक्तं ते ॥ तेषामेवंभूतानां निष्ठा तु का कृ-
448 ष्ण सत्वमाहो रजस्तमः ॥ किं सत्वनिष्ठा अवस्थानं आहो रजो अथवा तमः इति पृष्टं उक्तं भव-
ति ॥ या तेषां देवादिविषया पूजा सा किं सात्विकी अहो स्विद्राजसी उत तामसी ॥१॥ ताम-
त्य विषयः प्रश्नो ना प्रविभज्य प्रतिवचनमर्हतीति ॥ त्रिविधेति ॥ त्रिविधा त्रिप्रकारा भवति

श्रीभगवानुवाच ॥ त्रिविधा भवति श्रद्धा देहिनां सा स्वभा-
वजा ॥ सात्विकी राजसी चैव तामसी चेति तां शृणु ॥२॥

त्रिविधा त्रिप्रकारा भवति श्रद्धा यस्यां निष्ठायां त्वं पृष्टवानसि देहिनां तु सा ॥ सा स्वभावजा जन्मा-
न्तरकृतो यो धर्मो धर्मादिसंस्कारो मरणकाले अभिव्यक्तः स्वभाव उच्यते स्वभावतो जाता
स्वभावजा ॥ सात्विकी सत्वनिर्वृत्ता देवपूजादिविषया राजसी रजोनिर्वृत्ता यक्षरक्षः-
पूजादिविषया ॥ तामसी तमोनिर्वृत्ता प्रेतपिशाचादिपूजाविषया ॥२॥ ॥ ॥ ॥

इत्येवं त्रिविधानामनुष्ठानानां श्रद्धानां स्वरूप ॥ सैवं त्रिविधा भवति ॥ सत्वा इति ॥ सत्वानुरूपा विशिष्टसंस्कारोपेतान्तःकरणानुरूपा सर्वस्य प्राणिजातस्य श्रद्धा भवति भारत ॥ यद्येवं ततः ॥ किं स्यादित्यत आह ॥ श्रद्धामयः श्रद्धाप्रायः ॥ अयं पुरुषः संसारी जीवः ॥ कथं यो यच्छ्रद्धः या श्रद्धा यस्य जीवस्य स यच्छ्रद्धः स एव श्रद्धानुरूप स जीव एव ॥ ३ ॥ ततश्च का

सत्वानुरूपा सर्वस्य श्रद्धा भवति भारत ॥ श्रद्धामयोयं पुरुषो यो
यच्छ्रद्धः स एव सः ॥ ३ ॥ यजंते सात्विका देवान्यक्षरक्षांसि राज
साः ॥ प्रेतान्भूतगणांश्चान्ये यजंते तामसा जनाः ॥ ४ ॥ ॥

येषां लिंगेन देवादिपूजया सत्वादिनिष्ठानुमेयेत्याह ॥ यजंत इति ॥ यजंते पूजयंति । सात्विकाः सत्वनिष्ठाः देवान् ॥ यक्षरक्षांसि राजसाः ॥ प्रेतान्भूतगणांश्च सप्तमातृकादींश्चान्ये यजंते तामसा जनाः ॥ ४ ॥ ॥

450

एवंकार्यतोनिर्णीताः सत्वादिनिष्ठाः शास्त्रविध्युत्सर्गे ॥ तत्रकश्चिद्देवसहस्रेषुदेवपू
जादिपरः सत्वनिष्ठोभवति ॥ बाहुल्येनतुरजोनिष्ठाः तमोनिष्ठाश्चैवप्राणिनोभवंति
कथं ॥ अशास्त्रेति ॥ अशास्त्रविहितंनशास्त्रविहितंघोरंपीडाकरंप्राणिनामात्मनश्च
तपस्तप्यंतिनिर्वर्तयंतियेजनाः ॥ तेचदंभाहंकारसंयुक्ताः दंभश्चाहंकारश्च
दंभाहंकारौताभ्यांसंयुक्ताः दंभाहंकारसंयुक्ताः ॥ कामरागबलान्विताःकामश्चरागश्च

अशास्त्रविहितंघोरंतप्यंतेयेतपोजनाः ॥ दंभाहंकारसंयुक्ताः कामरागबलान्विताः
॥५॥ कर्षयंतः शरीरस्थंभूतग्राममचेतसः ॥ मांचैवांतः शरीरस्थंतान्विद्ध्यासुरनिश्चया
न् ॥६॥

श्चकामरागौतत्कृतंबलंतेनान्विताः ॥५॥ कर्षयंतः कृशीकुर्वंतः शरीरस्थंभू
तग्रामंभूतसमुदायंकरणग्रामं ॥ अचेतसोऽविवेकिनः ॥ मांचैवांतः शरीरस्थंतत्क
मेवबुद्धिसाक्षिभूतंचांतः शरीरस्थं ॥ कर्शयंतोमदनुशासनाकरणमेवमत्कर्शनं ॥ ता
न्विद्ध्यासुरनिश्चयानासुरोनिश्चयोयेषांतेआसुरनिश्चयाः तान्परिहरणार्थंवि

गी·भा·
२२५
451

आहाराणां रस्यास्निग्धादिवर्गत्रयरूपेणाभिन्नानां यथाक्रमं सात्विकराजसतामसपुरुष
प्रियत्वदर्शनमिह क्रियते यतो रस्यास्निग्धादिषु आहारविशेषेषु आत्मनः प्रीत्यतिरे
केण लिंगेन सात्विकत्वतामसत्व चतुर्दा राजसत्वमो लिंगानामाहाराणां परिवर्जनार्थं
सत्वलिंगानां चोपादानार्थं तथा यज्ञादीनामपि सत्वादिगुणभेदेन त्रिविधत्व प्रतिपा

आहारस्त्वपि सर्वस्य त्रिविधो भवति प्रियः ॥ यज्ञ
स्तपस्तथा दानं तेषां भेदमिमं शृणु ॥ ७ ॥

दनं ॥ इह राजसतामसान् उद्वाकयं तु नाम परित्यजेत् ॥ सात्विकानेवानुतिष्ठेदित्ये
वमर्थं ॥ आहार इति ॥ आहारस्त्वपि सर्वस्य भोक्तुस्त्रिविधो भवति प्रिय इष्टः ॥ तथा यज्ञः त
था तपः ॥ तथा दानं तेषामाहारादीनां भेदमिमं वक्ष्य
माणं शृणु ॥ ७ ॥

आयुः इति ॥ आयुश्च सत्वं च बलं च आरोग्यं च सुखं च प्रीतिश्च तासां परिवर्द्धनाः आयुःस
452 त्वबलारोग्यसुखप्रीतिविवर्द्धनाः ॥ ते च रस्याः रसोपेताः स्निग्धाः स्नेहवन्तः स्थिराः चिर
कालस्थायिनो देहे ॥ हृद्याः हृदयप्रियाः आहाराः सात्विकप्रियाः सात्विकस्येष्टाः ॥ ८ ॥ क

आयुःसत्वबलारोग्यसुखप्रीतिविवर्द्धनाः ॥ रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्वि
कप्रियाः ॥ ८ ॥ कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः ॥ आहारा राजसस्येष्टा दुःख
शोकामयप्रदाः ॥ ९ ॥

ट्विति ॥ कटुः अम्लः लवणः ॥ अत्युष्णः अतिशब्दः कट्वा
दिषु सर्वत्र योज्यः अतिकटु अतिविदाहीत्येवं कट्वम्ललवणात्युष्णतीक्ष्णरूक्षवि
दाहिनः आहारा राजसस्येष्टाः दुःखशोकामयप्रदाः ॥ दुःखं शोकं आमयं च प्रयच्छ
॥ ॥ ॥॥
न्तीति दुःखशोकामयप्रदाः ॥ ९ ॥

गी·भा· यातइति॥ यातयामं मंदपक्वं निर्वीर्यस्य गतरसेनोक्तत्वात्॥ गतरसं रसविमुक्तं पूतिदुर्गं-
२२९ धि पर्युषितं च पक्वं सद्रात्र्यन्तरितं च यत्॥ उच्छिष्टमपि भुक्तशिष्टं॥ अमेध्यमयज्ञार्हं
ईदृशं तामसप्रियं॥१०॥ अथेदानीं यज्ञस्त्रिविध उच्यते॥ अफ इति॥ अफलाकांक्षिभिर-
फलार्थिभिः॥ यज्ञो विधिदृष्टः शास्त्रचोदनादृष्टो यो यज्ञ इज्यते निर्वर्त्यते॥ यष्टव्यमे-

यातयामं गतरसं पूति पर्युषितं च यत्॥ उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियं॥१०॥
अफलाकांक्षिभिर्यज्ञो विधिदृष्टो य इज्यते॥ यष्टव्यमेवेति मनः समाधाय स सात्विकः॥११॥
अभिसंधाय तु फलं दंभार्थमपि चैव यत्॥ इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसं॥१२॥

वेति यज्ञस्वरूपनिर्वर्तनमेव कार्यमिति॥ मनः समाधाय नान्येन मम पुरुषार्थः कर्त-
व्य इत्येवं निश्चित्य स सात्विको यज्ञ उच्यते॥११॥ अभि इति॥ अभिसंधाय तु फलं दृष्टं॥ २२९
फलं॥ दंभार्थमपि चैव यत् इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसं॥१२॥ ॥ ॥

454

विधिहीनमिति ॥ विधिहीनं यथाचोदितविपरीतं ॥ असृष्टान्नं ब्राह्मणेभ्यो न सृष्टमन्नं यस्मिन्
यज्ञे सोऽसृष्टान्नस्तं मन्त्रहीनं मन्त्रतः स्वरतो वर्णतश्च तेन वियुक्तं मन्त्रहीनं अदक्षिणं
मुक्तदक्षिणारहितं ॥ श्रद्धाविरहितं यज्ञं तामसं परिचक्षते तेन तमोनिर्वृत्तं कथयन्ति ॥ १३ ॥
अथेदानीं तपस्त्रिविधमुच्यते ॥ देवेति ॥ देवाश्च द्विजाश्च गुरवश्च प्राज्ञाश्च देवद्विजगु

विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणं ॥ श्रद्धाविरहितं यज्ञं तामसं परिचक्षते ॥ १३ ॥
देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवं ॥ ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते ॥ १४ ॥

रुप्राज्ञाः तेषां पूजनं देवद्विजगुरुप्राज्ञपूजनं शौचं स्मार्जवं ऋजुत्वं ब्रह्मचर्यं अहिं
सा च ॥ शारीरं तप उच्यते शरीरेण निर्वर्त्यं शारीरं शारीरप्रधानैः सर्वैरेव कर्त्रादिभिः
साध्यं शारीरं तप उच्यते ॥ १४ ॥

॥ ॥ ॥

गी॰ भा॰
२२७
455

यं चैतेन सहेतव इति वदति ॥ अनुद्वेगकरमिति ॥ अनुद्वेगकरं प्राणिनामदुःखकरं वाक्यं ॥ सत्यं प्रिय
हितं च यत् ॥ प्रियहिते दृष्टादृष्टार्थे ॥ अनुद्वेगकरत्वादिभिर्धर्मैर्वाक्यं विशिष्यते ॥ विशेषणधर्मसमु
च्चयार्थश्चकारः ॥ परप्रत्ययार्थं प्रयुक्तस्य वाक्यस्य सत्यप्रियहितानुद्वेगकरत्वानामन्यतमेन
द्वाभ्यां त्रिभिर्वा हीनता स्याद्यदि न तद्वाङ्मयं तपः ॥ तथा सत्यवाक्यस्येतरेषामन्यतमेन द्वा॥
भ्यां त्रिभिर्वा हीनतायां न वाङ्मयं तपस्त्वं ॥ तथा प्रियवाक्यस्यापीतरेषामन्यतमेन द्वाभ्यां॥

स्प२

अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत् ॥ स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते ॥१५॥

त्रिभिर्वा विभक्तस्य न वाङ्मयं तपस्त्वं ॥ तथा हितवाक्यस्यापीतरेषामन्यतमेन द्वाभ्यां त्रिभि
र्वा विभक्तस्य न वाङ्मयं तपस्त्वं किं पुनस्तत्तपः । यत्सत्यं वाक्यमनुद्वेगकरं प्रियं हितं च ॥ तत्त
पो वाङ्मयं ॥ यथा शान्तो भव वत्स स्वाध्यायं योगं चानुतिष्ठ तथा ते श्रेयो भविष्यतीति ॥ स्वाध्या॥ २२७
याभ्यसनं चैव यथाविधि वाङ्मयं तप उच्यते ॥१५॥ ॥ ॥

प२

456

मनःशुद्धिः ॥ मनःप्रसादो मनसः प्रशान्तिः स्वच्छतापादनं प्रसादः ॥ सौम्यत्वं यत्सौमनस्यमाकृतः मु
खादिप्रसादकार्यान्तःकरणवृत्तिः ॥ मौनं वाक्संयमः वाक्संयमोपि मनःसंयमपूर्वको भव
तीति कार्येण कारणमुच्यते मनःसंयमो मौनमिति ॥ आत्मविनिग्रहो मनोनिरोधः सर्वतः सामा
न्यरूप आत्मविनिग्रहः ॥ वाग्विषयस्यैव मनःसंयमो मौनमिति विशेषः ॥ भावसंशुद्धिः परैर्व्य
वहारकालेऽमायावित्वं भावसंशुद्धिरित्येतत्तपो मानसमुच्यते ॥१६॥ यथोक्तं कायिकं वाचि

मनःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः ॥ भावसंशुद्धिरित्येतत्तपो मानसमुच्यते ॥१६॥
श्रद्धया परया तप्तं तपस्तत्त्रिविधं नरैः ॥ अफलाकाङ्क्षिभिर्युक्तैः सात्त्विकं परिचक्षते ॥१७॥

कं मानसिकं च तपस्तप्तं नरैः सत्त्वादिभेदेन कथं त्रिविधं भवतीति उच्यते ॥ श्रद्धेति ॥ श्रद्धया ।
आस्तिक्यबुद्ध्या परया प्रकृष्टया तप्तं अनुष्ठितं ॥ तपस्तत्प्रकृतं ॥ त्रिविधं त्रिःप्रकारं ॥ अधिष्ठा ।
नं ॥ नरैरनुष्ठातृभिः अफलाकाङ्क्षिभिः फलाकाङ्क्षारहितैः युक्तैः समाहितैः यदीदृशं तपस्त
त्सात्त्विकं सत्त्वनिर्वृत्तं ॥ परिचक्षते कथयन्ति शिष्टाः ॥१७॥ ॥ ॥ ॥

गी॰भा॰ सत्कारइति ॥ सत्कारमानपूजार्थं सत्कारः साधुरयं तपस्वी ब्राह्मण इत्येवमर्थं मानो माननं प्रत्यु
२२८ त्थानाभिवादनादि तदर्थं ॥ पूजार्थं पादप्रक्षालनार्चनाशयितृत्वादि तदर्थं च तपः सत्कार
457 मानपूजार्थं ॥ दंभेन चैव यत्क्रियते तपः ॥ तदिह प्रोक्तं कथितं ॥ राजसं चलं कदाचित्क
फलत्वेनाध्रुवं ॥ १८ ॥ मूढ इति ॥ मूढग्राहेणाविवेकातिप्रायेनात्मनः पीडया क्रियते

सत्कारमानपूजार्थं तपो दंभेन चैव यत् ॥ क्रियते तदिह प्रोक्तं राजसं चलमध्रुवं ॥ १८ ॥ मू
ढग्राहेणात्मनो यत्पीडया क्रियते तपः ॥ परस्योत्सादनार्थं वा तत्तामसमुदाहृतं ॥ १९ ॥
दातव्यमिति यद्दानं दीयतेनुपकारिणे ॥ देशे काले च पात्रे च तद्दानं सात्विकं स्मृतं ॥ २० ॥

यत्तपः ॥ परस्योत्सादनार्थं वा विनाशार्थं वा तत्तामसमुदाहृतं ॥ १९ ॥ इदानीं दानभेद उच्यते
दातव्यमिति ॥ दातव्यमित्येवं मनः कृत्वा यद्दानं दीयते ऽनुपकारिणे प्रत्युपकारासमर्थाय
समर्थायापि निरपेक्षं तद्दीयते ॥ देशे पुण्ये कुरुक्षेत्रादौ ॥ काले च संक्रान्त्यादौ ॥ पात्रे च षडं २२८
गविद्वेदपारगइत्यादौ तद्दानं सात्विकं स्मृतं ॥ २० ॥ ॥ ॥

यत्तु दानं प्रत्युपकारार्थं काले तु अयं मां प्रत्युपकरिष्यतीति एवमर्थं फलं चास्य दानस्य मे भवि
458 ष्यतीति स्वर्गादि उद्दिश्य पुनर्दीयते ॥ परिक्लिष्टं च खेदसंयुक्तं तद्दानं राजसं स्मृतं ॥ २१ ॥ अदेशका
ले यद्दानमपुण्यदेशे म्लेच्छाशुच्यादिसंकीर्णे ॥ अकाले पुण्यहेतुत्वेनाप्रख्याते संक्रान्त्यादिवि
शेषरहिते ॥ अपात्रेभ्यश्च मूर्खतस्करादिभ्यः देशादिसंपत्तौ वा ॥ असत्कृतं प्रियवचनपादप्र

यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः ॥ दीयते च परिक्लिष्टं तद्राजसमुदाहृतं ॥ २१ ॥ अदे
शकाले यद्दानमपात्रेभ्यश्च दीयते ॥ असत्कृतमवज्ञातं तत्तामसमुदाहृतं ॥ २२ ॥ ॐ तत्सदि
ति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः ॥ ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा ॥ २३ ॥ ।

क्षालनाद्यादिरहितं ॥ अवज्ञातं पात्रपरिभवयुक्तं च तद्दानं तामसमुदाहृतं ॥ २२ ॥ यज्ञदानत
पःप्रभृतीनां साद्गुण्यकरणाय यमुपदेश उच्यते ॥ ॐ तदिति ॥ ॐ तत्सदिति एवं निर्देशानि
र्दिश्यते अनेनेति निर्देशः त्रिविधो नामनिर्देशो ब्रह्मणः स्मृतः चिंतितः वेदांतेषु ब्रह्मविद्भिः
ब्राह्मणास्तेन निर्देशेन त्रिविधेन वेदाश्च यज्ञाश्च विहिताः प्रवर्तिताः निर्मिताः पुरा सर्वमिति

गी॰भा॰ निर्देशस्तत्प्रयोगमुच्यते ॥ तस्मादिति ॥ तस्मात् ॐ इति उदाहृत्य उच्चार्य ॥ यज्ञदानतपःक्रि
२२६ याः यज्ञादिस्वरूपाः क्रियाः ॥ प्रवर्तन्ते विधानोक्ताः शास्त्रनोदिताः ॥ सततं सर्वदा ॥ ब्रह्म
459 वादिनां ब्रह्मवदनशीलानां ॥ २४ ॥ तदिति ॥ तदित्यनभिसंधायतत् इति ब्रह्माभिधान

तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः ॥ प्रवर्तन्ते विधानोक्ताः सत
तं ब्रह्मवादिनां ॥ २४ ॥ तदित्यनभिसंधाय फलं यज्ञतपःक्रियाः
दानक्रियाश्च विविधाः क्रियन्ते मोक्षकांक्षिभिः ॥ २५ ॥ ॥ ॥॥॥

मुच्चार्य अनभिसंधाय कर्मणः फलं ॥ यज्ञक्रियाश्च तपःक्रियाश्च यज्ञतपःक्रिया दान
क्रियाश्च विविधाः ॥ क्षेत्रहिरण्य ॥ दानादिलक्षणाः क्रियन्ते निर्वर्त्यन्ते मोक्षकांक्षि २२६
भिः मुमुक्षुभिः ॥ २५ ॥

ॐ तत्सच्छब्दयोर्विनियोग उक्तः अथेदानीं सच्छब्दस्य विनियोगः कथ्यते ॥ सद्भावे इति ॥ सद्भा
460 वे असतः सद्भावे ॥ यथा अविद्यमानस्य पुत्रस्य जन्म ॥ तथा साधुभावे असद्वृत्तस्य साधुवृत्त
तासाधुभावस्तस्मिन्साधुभावे च सदित्येतदभिधानं ब्रह्मणः प्रयुज्यते तत्र चोच्यते अभि
धीयते ॥ प्रशस्ते कर्म्मणि तथा विवाहादौ सच्छब्दः पार्थ युज्यते प्रयुज्यत इत्येतत् ॥२६॥

सद्भावे साधुभावे च सदित्येतत्प्रयुज्यते ॥ प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यते ॥२६॥
यज्ञे तपसि दाने च स्थितिः सदिति चोच्यते ॥ कर्म्म चैव तदर्थीयं सदित्येवाभिधीयते ॥२७॥

यज्ञे इति ॥ यज्ञे यज्ञकर्म्मणि या स्थितिस्तथा तपसि या स्थितिर्या दाने च या स्थितिः सा स।
दित्युच्यते विद्वद्भिः कर्म्म चैव तदर्थीयं यज्ञदानतपोर्थीयं ॥ अथवा यस्याभिधानत्रयं प्र
कृतं तदर्थीयमीश्वरार्थीयमित्येतत् ॥ सदित्ये
वाभिधीयते ॥२७॥

गी॰भा॰ तदेततनयज्ञतनपआदिकम्मअसात्विकंसंपादितंभवति विगुणमपिश्रद्धापूर्वकंब्रह्मणो
२२० भिधानत्रयप्रयोगेनसगुणंसात्विकंसंपादितंभवति॥तत्रचसर्वत्रश्रद्धाप्रधानतयास
461 र्वंसंपाद्यतेयस्मात्तस्मात्॥अश्रद्धइति॥अश्रद्धयाहुतंहवनंकृतं॥दत्तंब्राह्मणेभ्योऽश्र

अश्रद्धयाहुतंदत्तंतपस्तप्तंकृतंचयत्॥असदि
त्युच्यतेपार्थनचतत्प्रेत्यनोइह ॥२८॥ ॥

द्धयातपस्तप्तंअनुष्टितंअश्रद्धतयाअश्रद्धयायत्कृतंचयत्स्तुतिनमस्कारादितत्।
सर्वम्असदित्युच्यते॥मत्प्राप्तिसाधनमार्गबाह्यत्वात्॥पार्थनचतत् बहुलायासमपिप्रे २३
त्यफलाय॥नोऽपीहार्थंसाधुभिर्निंदितत्वादिति॥२८॥इतिश्रीसप्तदशोध्यायः॥१७॥

सर्वस्येवगीताशास्त्रस्यार्थोस्मिन्नध्यायेउपसंहृत्यसर्वश्चवेदार्थोवक्तव्यइत्येवमर्थोय।
मध्यायआरभ्यते॥सर्वोह्यतीतेषध्यायेषुउक्तोर्थोस्मिन्नध्यायेऽवगम्यते॥अर्जुनस्तुसंन्या
सत्यागशब्दार्थयोर्विशेषबुभुत्सुरुवाच॥संन्यासइति॥संन्यासस्यसंन्यासशब्दार्थस्य

अर्जुनउवाच॥संन्यासस्यमहाबाहोतत्वमिछामिवे
दितुं॥त्यागस्यचहृषीकेशपृथकेशिनिषूदन॥१॥

त्स्वतत्त्व॥महाबाहो॥तत्वंतस्यभावस्तत्वंयाथार्थ्यमित्येतत्॥त्यागस्यचहृषीकेश॥पृथ
गितरेतरविभागतः॥केशिनिषूदनकेशीनामहयछद्मासुरस्तंनिसूदितवान्भ
गवान्वासुदेवःतेनतन्नाम्नासंबोध्यतेअर्जुनेन॥१॥ ॥ ॥

नचनतुनिर्दिष्टौसंन्यासत्यागशब्दौनानिर्लुठितार्थौसर्वेष्वध्यायेषुअतोनिर्णयायएष्व
तेनत्रिणिर्णयाय॥काम्यानामिति॥काम्यानामश्वमेधादीनांकर्मणांन्यासंपरित्यागंसंन्यासं
संन्यासशब्दार्थंअनुष्ठेयत्वेनप्राप्तस्याननुष्ठानंकवयःपंडिताःकेचिद्विद्वांसःविजानंति
नित्यनैमित्तिकानामनुष्ठीयमानानांसर्वकर्मणामात्मसंबंधितयाप्राप्तस्यफलस्यप
रित्यागःसर्वकर्मफलत्यागः॥तंप्राहुःकथयंतित्यागंत्यागशब्दार्थंविचक्षणाःपंडि

श्रीभगवानुवाच॥काम्यानांकर्मणांन्यासंसंन्यासंकवयोविदुः॥सर्वकर्मफलत्या
गंप्राहुस्त्यागंविचक्षणाः॥२॥

ताः॥यदिकाम्यकर्मपरित्यागःफलपरित्यागोवार्थोवक्तव्यः
सर्वथापित्यागमात्रंसंन्यासत्यागशब्दयोरेकोऽर्थःनघटपटशब्दाविवजात्यंतरभूता
र्थौ॥ननुनित्यनैमित्तिकादीनांकर्मणांफलमेवनास्तीत्याहुःकथमुच्यतेतेषांफल
त्यागइति॥यथावंध्यायाःपुत्रत्यागः॥नैषदोषः॥नित्यानामपिकर्मणांभगवताफ। २३२
लवत्त्वस्येष्टत्वात्॥वक्ष्यतिहिभगवाननिष्टमिष्टमिति॥नतुसंन्यासिनामिति॥२॥

464

संन्यासिनामेव हि केवलं कर्मफलासंबंधं दर्शयन् ॥ असंन्यासिनां नित्यकर्मफलप्राप्ति
मेव तत्त्यागेनाप्रेत्येति दर्शयति ॥ त्याज्यमिति ॥ त्याज्यं त्यक्तव्यं ॥ दोषवत् दोषोऽस्यास्तीति दो
षवत् ॥ किं तत् कर्म बंधनहेतुत्वात्सर्वमेव ॥ अथवा दोषो यथा रागादिस्त्यज्यते तथा त्याज्य
मित्येके कर्म प्राहुः मनीषिणः सांख्यादिदृष्टिमाश्रिताः अधिकृतानां कर्मिणामपीति न

त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः ॥ यज्ञदानत
पःकर्म न त्याज्यमिति चापरे ॥३॥ ॥ ॥

चैव यज्ञदानतपःकर्म न त्याज्यमिति चापरे ॥ कर्मिण एवाधिकृतानपेक्ष्यैते विकल्पाः
न तु ज्ञाननिष्ठान्व्युत्थायिनः संन्यासिनोऽपेक्ष्य ॥ ज्ञानयोगेन सांख्यानां निष्ठा मया
पुरा प्रोक्तेति कर्माधिकारादपोहृता ये न तान्प्रति चिंता ॥ ननु कर्मयोगेन योगिना
मित्यधिकृताः पूर्वं विभक्ता निष्ठा अपि इह शास्त्रोपसंहारप्रकरणे यथा विचार्यते।

:कर्मकुर्वंतः (

गी॰ भा॰
२३२
465

तथासंन्यास्यपिसन्ज्ञाननिष्ठाविचारार्थंनामेति॥न॥तेषांमोहदुःखनिमित्तत्यागावुपपद्येतेः
नकायक्लेशदुःखंसंन्यासाआत्मनिपश्यंतिइच्छादीनांदेहधर्मत्वेनैवदर्शितत्वात्॥अत।
स्तेनकायक्लेशदुःखभयात्कर्मपरित्यजंतिनापिकर्माण्यात्मनिनेपश्यंतियेननियतंक
र्ममोहात्परित्यजेयुःगुणानांकर्मनैवकिंचित्करोमीतिहितेसंन्यस्यंति॥सर्वकर्माणि
मनसासंन्यस्येत्यादिभिर्हितत्त्वविदःसंन्यासप्रकारउक्तःतस्माद्येऽधिकृताःकर्मण्य
नात्मविदस्तेषांचमोहात्त्यागःसंभवतिकायक्लेशभयाच्चेत्येवनामसात्त्विकत्यागिनोरा
जसात्त्वेतिनिंद्यंतेकर्मिणामनात्मज्ञानांकर्मफलत्यागस्तुत्यर्थं॥सर्वारंभपरित्यागीमौनीसं त्याग
तुष्टोयेनकेनचित्॥अनिकेतः॥स्थिरमतिरितिगुणातीतलक्षणेचपरमार्थसंन्यासि।
नोविशेषितत्वात्॥वक्ष्यतिच॥ज्ञानस्ययापरानिष्ठेतितस्माज्ज्ञाननिष्ठाः॥संन्यासि
नोनेहविवक्षिताःकर्मफलत्यागएवसात्त्विकत्वेनगुणेनताम
सत्वाद्यपेक्षया॥संन्यासउच्यतेनमुख्यःसर्वकर्मसंन्यासः २३२

सर्वकर्मसंन्यासासंभवे न हि देहभृता इति देहवचनात्साख्यप्रवेति चेन्न॥ देहवच
466 नस्य कृत्यर्थत्वात्॥ यथा त्यागाच्छांतिरनंतरमिति कर्मफलत्यागस्तुति देव॥ यथोक्ता
नेकपक्षानुष्ठानाशक्तिमतमज्ञं न प्रतिविधानात्तद्येदमपि न हि देहभृता शक्यमिति
कर्मफलत्यागस्तुत्यर्थं न सर्वकर्माणि मनसा संन्यस्यैनैव कुर्वन्नकारयन्नास्ते इत्या।
स्यपक्षस्यापवादः केनचिद्दर्शयितुं शक्यः॥ तस्मात्कर्मण्यधिकृतान्प्रत्येवैष संन्या
सत्यागविकल्पः॥ यत्तु परमार्थदर्शिनः सांख्यास्तेषां ज्ञान
निष्ठायामेव सर्वकर्मसंन्यासलक्षणायामधिका
रो नान्यत्रेति न ते विकल्पार्हाः॥ तच्चोपपादि
तमस्माभिर्वेदाविनाशिनमित्यस्मि
न्प्रदेशे तृतीयादौ च॥ ३॥
॥ ॐ ॥ ॐ ॥
॥ ॐ ॥

तत्रतेषुविकल्पभेदेषु॥निश्चइति॥निश्चयंशृणुअवधारय॥मेममतत्रत्यागेत्यागसं
न्यासविकल्पेयथादर्शिते॥भरतसत्तमभरतानांसाधुतम॥त्यागोहित्यागसंन्यास
शब्दवाच्योहियोर्थःसएकएवेत्यभिप्रेत्याहत्यागोहीति॥पुरुषव्याघ्र॥त्रिविधः॥
त्रिप्रकारःतामसादिप्रकारैःसंप्रकीर्तितःसम्यक्शास्त्रेषुकथितःयस्मात्ताम।

निश्चयंशृणुमेतत्रत्यागेभरतसत्तम॥त्यागो
हिपुरुषव्याघ्रत्रिविधःसंप्रकीर्तितः॥४॥।

सादिभेदेनत्यागसंन्यासशब्दवाच्योर्थोऽधिकृतस्यकर्मिणोनात्मज्ञस्यत्रिविधःसंभ
वतिनपरमार्थदर्शिनइत्ययमर्थोदुर्ज्ञानस्तस्मादत्रतत्त्वंनान्योवक्तुंसमर्थःतस्मा
न्निश्चयंपरमार्थशास्त्रविषयंअध्यवसायमैश्वरंमेशृणु ॥४॥ ॥ ॥॥

468 कः पुनरसौ निश्चय इत्याह ॥ यज्ञेति ॥ यज्ञो दानं तप इत्येतत्त्रिविधं कर्म न त्याज्यं न त्यक्त्वा
कार्यं करणीयमित्येतत् ॥ कस्मात् ॥ यज्ञो दानं तपश्च पावनानि शुद्धिकराणि मनीषि।
णां फलानभिसंधिनामित्येतत् ॥ ५ ॥ एताइति ॥ एतान्यपि तु कर्माणि यज्ञदानतपांसि
पावनानि उक्तानि ॥ संगं त्यक्त्वा संगमासक्तिं तेषु त्यक्त्वा फलानि च तेषां परित्यज्य क

यज्ञो दानं तपः कर्म न त्याज्यं कार्यमेव तत् ॥ यज्ञो दानं तपश्चैव पावनानि मनीषिणां ५ ॥
एतान्यपि तु कर्माणि संगं त्यक्त्वा फलानि च ॥ कर्तव्यानीति मे पार्थ निश्चितं मतमु
त्तमं ॥ ६ ॥

र्तव्यानि अनुष्ठेयानीति मे मम निश्चितं मतमुत्तमं ॥ निश्चयं शृणु मे तत्रे
ति प्रतिज्ञाय पावनत्वं च हेतुमुक्त्वा एतान्यपि कर्माणि कर्तव्यानीत्येतन्निश्चितं
मतमुत्तममिति ॥ प्रतिज्ञातार्थोपसंहार एव नापूर्वार्थं वचनं एतान्यपीति ॥ प्रकृत
संनिकृष्टार्थत्वोपपत्तेः सासंगस्य फलार्थिनो बंधहेतवः एतान्यपि कर्माणि मुमुक्षोः

गी. २३४

469

कर्त्तव्यानीत्यपि प्राह तस्यार्थेन तत्रान्यानि कर्माणि अपेत्य एतान्यपीत्युच्यते ॥ अन्ये वर्णयंति
नित्यानां कर्मणां फलाभावात् संगं त्यक्त्वा फलानि चेति नोपपद्यते एतान्यपीति यानि काम्या
नि कर्माणि नित्येभ्योऽन्यानि एतान्यपि कर्त्तव्यानि किमुत यज्ञदानतपांसि नित्यानीति ॥ त
दसत् ॥ नित्यानामपि फलवत्त्वस्योपपादितत्वात् ॥ यज्ञो दानं तपश्चैव पावनानीत्यादि
वचनेन नित्यान्यपि कर्माणि बंधहेतुत्वाशंकया जिहासोर्मुमुक्षोः अतः काम्येषु संगः
दूरेण ह्यवरं कर्मेति च निंदितत्वात् ॥ यज्ञार्थात्कर्मणोऽन्यत्रेति च काम्यकर्मणां बंध
हेतुत्वस्य निश्चितत्वात् ॥ त्रैगुण्यविषया वेदाः त्रैविद्याः क्षीणे पुण्ये मर्त्यलोकं विशंती
ति हेयत्वव्यवहितत्वाच्च न काम्येषु एतान्यपीति व्यप
देशः ॥ तस्मादस्तस्याधिकं
तस्य मुमुक्षोः ॥ ६ ॥
॥ ॐ ॥ ॐ ॥
॥ ॐ ॥
॥

२३४

नियइति॥ नियतस्यतुनित्यस्यसंन्यासः परित्यागः कर्मणोनोपपद्यते अज्ञस्यपावन
470 त्वेनेष्टत्वात्॥ मोहादज्ञानात्तस्यनियतस्यपरित्यागः नियतंचावश्यकर्त्तव्यंत्यज्य
तेचेदितिप्रतिषिद्धं॥ अतोमोहनिमित्तः परित्यागः तामसः परिकीर्त्तितः मोहश्चतम

नियतस्यतुसंन्यासः कर्मणोनोपपद्यते॥ मोहात्तस्यपरित्यागः तामसः परिकीर्त्ति
तः॥७॥ दुःखमित्येवयत्कर्मकायक्लेशभयात्त्यजेत्॥ सकृत्वाराजसंत्यागंनैवत्याग
फलंलभेत्॥८॥

इति॥ ॥किंच॥ दुःखइति॥ दुःखमित्येवयत्कर्मकायक्लेशभयात्शरीरदुःखभयात्
त्यजेत्परित्यजेत्॥ सकृत्वाराजसंत्यागंरजोनिर्वृत्तंत्यागंनैवत्यागफलंज्ञानपूर्व
कस्यसर्वकर्मपरित्यागस्यफलंमोक्षंनलभेत ॥८॥ ॥ ॥ ॥शिव

कः पुनः सात्विकस्त्यागः ॥ कार्यं कर्तव्यं इत्येव यत्कर्म नियतं नित्यं क्रियते निर्वर्त्यतेऽर्जु
न संगं त्यक्त्वा फलं च एवं नित्यानां कर्मणां फलवत्वे भगवद्वचनं प्रमाणमवोचाम ॥ अ
थवा यद्यपि फलं न श्रूयते नित्यस्य कर्मणः ॥ तथापि नित्यं कर्म कृतं आत्मसंस्कारं प्र
त्यवायपरिहारं वा फलं करोत्यात्मन इति विकल्पयत्येवाज्ञः ॥ तामपि विकल्पनां ।

कार्यमित्येव यत्कर्म नियतं क्रियतेऽर्जुन ॥ संगं
त्यक्त्वा फलं चैव स त्यागः सात्विको मतः ॥ ९ ॥

निवारयति फलं त्यक्त्वा इत्यनेन ॥ अतः साधूक्तं संगं त्यक्त्वा फलं चेति स त्यागो नित्य
कर्मादिषु संगफलत्यागः सात्विकः सत्वनिर्वृत्तः मतोऽभिमतः ॥ ननु कर्मपरित्या
गस्त्रिविधः संन्यास इति च प्रकृतः ॥ तत्र तामसो राजसश्च उक्तस्त्यागः कथमिह सं ॥ २२५ ॥
गफलयोस्त्यागस्तृतीयत्वेनोच्यते यथ त्रयो ब्राह्मणा आगतास्तत्र षडंगविदौ द्वौ क्ष

तीयत्वेनेयः इतितदुक्तं॥ नैषदोषः॥ त्यागसामान्येनस्तुत्यर्थत्वात्॥ अस्तिहिकर्मसंन्यास
स्यफलाभिसंधित्यागस्यचत्यागत्वसामान्यंतत्रराजसतामसत्वेनकर्मत्यागनिंदया
कर्मफलाभिसंधित्यागःसात्त्विकत्वेनस्तूयतेसत्यागःसात्त्विकोमतइति॥९॥यस्त्वधिकृ
तःसंगंत्यक्त्वाफलाभिसंधिंचनित्यंकर्मकरोतितस्यफलरागादिनाअकलुषीक्रिय

नद्वेष्ट्यकुशलंकर्मकुशलेनानुषज्जते॥ त्यागी
सत्त्वसमाविष्टोमेधावीछिन्नसंशयः॥१०॥ ॥

माणमंतःकरणंनित्यैश्चकर्मभिःसंस्क्रियमाणंविशुध्यति॥विशुद्धंचप्रसन्नमात्मा
लोचनक्षमंभवति॥तस्यैवंनित्यकर्मानुष्ठानेनविशुद्धांतःकरणस्यात्मज्ञानाभिमु
खस्यक्रमेणयथातन्निष्ठास्यात्तद्वक्तव्यमित्याह॥नद्वेष्टीति॥नद्वेष्ट्यकुशलंकर्माशोभ
नंकाम्यंकर्मशरीरारंभहेतुद्वारेणसंसारकारणंकिमनेनेत्येवं॥कुशलेशोभनेनित्येकर्म

णासत्वशुद्धिज्ञानोत्पत्तितन्निष्ठाहेतुत्वेनमोक्षकारणं।इदमित्येवंनानुषज्जतेतत्रापिप्रयो।
जनमपश्यन्ननुषंगंप्रीतिंनकरोतीत्येतत्॥कःपुनरसौत्यागीपूर्वोक्तेनसंगफलत्यागेन
तद्वान्त्यागीयःकर्मणिसंगंत्यक्त्वातत्फलंचनित्यकर्मानुष्ठायीसत्यागीकदापुनरसोऽ।
कुशलंकर्मनद्वेष्टिकुशलेचनानुषज्जतइतिउच्यते॥सत्वसमाविष्टोयदासत्वेनआत्माना
त्मविवेकज्ञानहेतुनासमाविष्टःसंव्याप्तःसंयुक्तःइत्येतत्॥अतएवचमेधावीमेधयाआ
त्मज्ञानलक्षणयासंयुक्तःतद्धानमेधावीमेधावित्वादेवछिन्नसंशयःछिन्नोऽविद्याकृतः
संशयोयस्यआत्मस्वरूपावस्थानमेवपरंश्रेयःसाधनंनान्यत्किंचिदित्येवंनिश्चयेनछि
न्नसंशयः॥योधिकृतःपूर्वोक्तेनप्रकारेणकर्मयोगानुष्ठानेनक्रमेणसंस्कृतात्मासन्ज।
न्मादिविक्रियारहितत्वेननिष्क्रियमात्मानमात्मत्वेनसंबुद्धःससर्वकर्माणिमनसासंन्य
स्यनैवकुर्वन्नकारयन्नासीनोनैष्कर्म्यलक्षणांज्ञाननिष्ठामास्थितइति
एतत्पूर्वोक्तस्यकर्मयोगस्यप्रयोजनमनेनश्लोके
नोक्तं॥१०॥॥

474

यः पुनरनधिकृतः सन् देहात्माभिमानित्वेन देहभृत् ॥ अज्ञोऽबाधितात्मकर्तृत्वविज्ञान
तयाहं कर्तेति निश्चितबुद्धिः तस्याशेषकर्मपरित्यागस्याशक्यत्वात् कर्मफलत्या
गेन चोदितकर्मानुष्ठान एवाधिकारो न तत्त्याग इत्येतमर्थं दर्शयितुमाह ॥ न हीति
हि यस्माद्देहभृता देहं बिभर्तीति देहभृत् न देहात्माभिमानवान् देहभृदुच्यते न वि
वेकी स हि वेदाविनाशिनमित्यादिना कर्तृत्वाधिकारान्निवर्तितः ॥ अतस्तेन देहभृता

न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः ॥ यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते
॥११॥

अज्ञेन न शक्यं त्यक्तुं संन्यसितुं कर्माण्यशेषतो निःशेषेण ॥ तस्माद्यस्त्वधिकृ
तोऽज्ञो नित्यानि कर्माणि कुर्वन् कर्मफलत्यागी कर्माभिसंधिमात्रसंन्यासी स त्यागी
त्यभिधीयते ॥ कर्म्यपि सन्निति स्तुत्यभिप्रायेण तस्मात्परमात्मदर्शिनैवादेहभृता
देहात्मभावरहितेनाशेषकर्मसंन्यासः शक्यते कर्तुं ॥११॥ ॥ ॥ ॥

गी. किंतु न स्वरूपत्यागेन यत्सर्वकर्मपरित्यागात्स्यादिति उच्यते॥ अनिष्टं इति॥ अनिष्टं नर
२३७ कतिर्यगादिलक्षणं॥ इष्टं देवादिलक्षणं॥ मिश्रं इष्टानिष्टसंयुक्तं मनुष्यलक्षणं च॥ एवं
 त्रिविधं त्रिप्रकारं कर्मणो धर्माधर्मलक्षणस्य फलं बाह्यानेककारकव्यापारनिष्पन्नं स
दविद्याकृतं इंद्रजालमायोपमं महामोहकरं प्रत्यगात्मोपसर्पीव फलत्वनयालयमदर्शि

अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलं॥ भव
त्यत्यागिनां प्रेत्य न तु संन्यासिनां क्वचित्॥१२॥

नं गछतिइति फलं इति फलनिर्वचनं तदेतद्देवलक्षणं फलं भवति॥ अत्यागिनां अज्ञा
नां कर्मिणां अपरमार्थसंन्यासिनां प्रेत्य शरीरपातादूर्ध्वं॥ न तु परमार्थसंन्यासिनां पर
महंसपरिव्राजकानां केवलज्ञाननिष्ठानां क्वचित्॥ नहि केवलसम्यग्दर्शननिष्ठो ऽवि १३०
द्यादिसंसारबीजं नोन्मूलयति कदाचिदित्यर्थः॥१२॥ ॥ ॥

परमार्थदर्शिन एवाशेषकर्मसंन्यासित्वं संभवति अविद्याध्यारोपितत्वादात्मनि क्रि-
476 याकारकफलानां ॥ न तत्त्वस्याधिष्ठानादीनि क्रियाकर्तॄणि कारकाणि आत्मत्वेन प-
श्यतोऽशेषतः कर्मसंन्यासः संभवति ॥ अविद्याध्यारोपितत्वादात्मनि क्रियाकारक-
फलानां ॥ न तत्त्वस्याधिष्ठानादीनि क्रियाकर्तॄणि कारकाणि आत्मत्वेन पश्यतोऽशे-
षतः कर्मसंन्यासः संभवति ॥ तदेतदुत्तरैः श्लोकैर्दर्शयति ॥ पंचेति ॥ पंच इमानि व-

पंचैतानि महाबाहो कारणानि निबोध मे ॥ सांख्ये कृतांते प्रोक्तानि सिद्धये सर्वकर्मणां
॥ १३ ॥

क्ष्यमाणानि महाबाहो ॥ कारणानि निर्वर्तकानि निबोध मे इति उत्तरत्र चेतः
समाधानार्थं ॥ वस्तुवैषम्यप्रदर्शनार्थं च तानि च कारणानि ज्ञातव्यतया स्तौति ॥ सां-
ख्ये ज्ञातव्याः पदार्थाः संख्यायंते यस्मिन् शास्त्रे तत् सांख्यं वेदांतः कृतांत इति तस्यैव वि-
शेषणं कृतमिति कर्मोच्यते तस्यांतः परिसमाप्तिर्यत्र स कृतांतः कर्मांत इत्येतत् ॥ या-

वानर्थं तु इदमाने ॥ सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते ॥ इत्यात्मज्ञाने संजाते सर्वक
र्म्मणां निवृत्तिं दर्शयति ॥ अतस्तस्मिन्नात्मज्ञानार्थं सांख्ये कृतांते वेदांते प्रोक्तानि कथि
तानि सिद्धये सिद्ध्यर्थं निष्पत्त्यर्थं सर्वकर्मणां ॥ १३ ॥ कानि तानीत्युच्यते ॥ अधिष्ठानमिति अधिष्ठा
नमिच्छाद्वेषसुखदुःखज्ञानादीनामभिव्यक्तेराश्रयो ऽधिष्ठानं शरीरं ॥ तथा कर्त्ता उप।

अधिष्ठानं तथा कर्त्ता करणं च पृथग्विधं ॥ विवि
धाश्च पृथक्चेष्टा दैवं चैवात्र पंचमं ॥ १४ ॥ ॥

धिलक्षणः भोक्ता ॥ करणं च श्रोत्रादि शब्दाद्युपलब्धये पृथग्विधं नानाप्रकारं द्वादशसं
ख्यं ॥ विविधाश्च पृथक्चेष्टा वायवीयाः प्राणापानाद्याः दैवं चैवादृष्टमेवच ॥ अत्रैतेषु च
तुर्षु पंचमं पंचानां पूरणं आदित्यादि चक्षुराद्यनु
ग्राहकं ॥ १४ ॥

शरीरइति॥शरीरवाङ्मनोभिर्यत्कर्मत्रिभिरेतैःप्रारभतेनिर्वर्तयतिनरः॥न्याय्यंवाध
र्म्यंशास्त्रीयं॥विपरीतंवाऽधर्म्यमशास्त्रीयं॥यच्चापिनिमिषितचेष्टितादिजीवनहेतुः
तदपिपूर्वकृतधर्माधर्मयोरेवकार्यमितिन्याय्यविपरीतयोरेवग्रहणेनगृहीतं॥पं
चैतेयथोक्ताःतस्यसर्वस्यैवहेतवःकारणानि॥ननुअधिष्ठानादीनिसर्वकर्मणां

शरीरवाङ्मनोभिर्यत्कर्मप्रारभतेनरः॥न्याय्यंवावि
परीतंवापंचैतेतस्यहेतवः॥१५॥ ॥ ॥॥

निर्वर्तकानिकथमुच्यतेशरीरवाङ्मनोभिःकर्मप्रारभतइति॥नैषदोषः॥विधि
प्रतिषेधलक्षणंसर्वंकर्मशरीरादित्रयप्रधानंतदंगतयादर्शनश्रवणादिचजी
वनलक्षणं॥त्रिधैवराशीकृतमुच्यतेशरीरादिभिरारभ्यतइति॥फलकालेपि
तथैवभुज्यतइतिपंचानामेवहेतुत्वंनविरुध्यते ॥१५॥ ॥ ॥

गी॰भा॰
२३९
479

न वेत्ति॥ न चेति प्रकृतेन तेन संबध्यते॥ एवं सति एवं यथोक्तैः पंचभिर्हेतुभिर्निर्वर्त्ये सति।
कर्मणि न तत्रैवं सतीति दुर्मतित्वस्य हेतुत्वेन संबध्यते॥ तत्रैवं तत्र तु आत्मानमनन्यत्वे।
नाविद्यया परिकल्प्य तैः क्रियमाणस्य कर्मणो अहमेव कर्त्ताऽहमिति कर्त्तारं आत्मानं के-
वलं शुद्धं तु यः पश्यति॥ अविद्वान् कस्मात् वेदान्ताचार्योपदेशन्यायैरकृतबुद्धित्वा-
दसंस्कृतबुद्धित्वात्॥ योपि देहादिव्यतिरिक्तात्मवादी अन्यमात्मानं केवलं कर्त्तारं।

तत्रैवं सति कर्त्तारमात्मानं केवलं तु यः॥ पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः॥१६॥

पश्यति असावप्यकृतबुद्धिरेवातोऽकृतबुद्धित्वान्न स पश्यत्यात्मनस्तत्त्वं कर्मणो वा।
तत्त्वं॥ अतो दुर्मतिः कुत्सिता विपरीता दुष्टा अजस्रं जननमरणप्रतिपत्तिहेतुभूता म-
तिरस्येति दुर्मतिः स पश्यन्नपि न पश्यति यथा तैमिरिकोऽनेकं चन्द्रं॥ यथा वा वाहनउप २३९
विष्टोन्येषु धावत्स्वात्मानं धावंतं पश्यन्नपि न पश्यति ॥१६॥

480

कः पुनः सम्यग्दर्शी यः सम्यक् पश्यतीत्युच्यते ॥ यस्येति ॥ यस्य शास्त्राचार्योपदेशन्यायैः संस्कृ
तात्मनो न भवति अहंकृतो ऽहं कर्तेत्येवंलक्षणो भावो भावना प्रत्ययः ॥ एत एव पंचा
धिष्ठानादयो विषया आत्मनि कल्पिताः सर्वकर्मणां कर्तारो नाहं अहं तु तद्व्यापारा
णां साक्षिभूतोऽप्राणो ह्यमनाः शुभ्रो ऽक्षरात्परतः परः केवलो ऽविक्रिय इत्येवं प

यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते ॥ हत्वा
पि स इमान् लोकान्न हंति न निबध्यते ॥१७॥

श्यति इत्येतत् बुद्धिरंतःकरणं यस्य आत्मन उपाधिभूता न लिप्यते नानुशायिनी
भवति ॥ इदमहमकार्षं तेनाहं नरकं गमिष्यामीति एवं यस्य बुद्धिर्न लिप्यते सो सु
मतिः स पश्यति ॥ हत्वापि स इमान् लोकान् सर्वानिमान् प्राणिन इत्यर्थः ॥ न हंति न ह
ननक्रियां करोति ॥ न निबध्यते नापि तत्कार्येणाधर्मफलेन संबध्यते ॥ ननु हत्वापि

नहंतीतिविप्रतिषिद्धमुच्यतेयद्यपिस्त्वति॥ नैषदोषः लौकिकपारमार्थिकदृष्ट्यपे
क्षयानदुपपत्तेः देहाद्यात्मबुद्ध्याहंताहमितिलौकिकींदृष्टिमाश्रित्यहत्वापीत्या
ह॥ यथादर्शितेनपरमार्थिकींदृष्टिमाश्रित्यनहंतिननिबध्यतइतितदुभयमुपपद्यत
एव॥ नन्वधिष्ठानादिभिःसंभूयकरोत्येवात्माकर्तारमात्मानंकेवलंत्वितिकेवलशब्द
प्रयोगात॥ नैषदोषः॥ आत्मनोऽविक्रियस्वभावत्वेऽधिष्ठानादिभिःसंहतत्वानुपपत्तेः
विक्रियावतोह्यन्यैःसंहननंसंहत्यवाकर्तृत्वंस्यात॥ नत्वविक्रियस्यात्मनःकेन
चित्संहननमस्तीतिनसंभूयकर्तृत्वमुपपद्यते॥ अतःकेवलत्वमात्मनःस्वाभावि
कमितिकेवलशब्दोऽनुवादमात्रं॥ अविक्रियत्वंचात्मनःश्रुतिस्मृतिन्यायप्रसिद्धं अ
विकार्योयमुच्यते॥ गुणैरेवकर्माणिक्रियंते॥ शरीरस्थोपिनकरोतीत्यसकृदुपपादितं
गीतास्वेवतावत॥ श्रुतिषुच ध्यायतीवलेलायतीवेत्येवमादिवाक्यानि॥ न्यायतश्च॥
निरवयवमपरतंत्रमक्रियमात्मतत्त्वमितिराजमार्गः॥ विक्रियावत्त्वाभ्युपगमेप्यात्मनः
स्वकीयैवविक्रियास्वस्यभवितुमर्हतिनाधिष्ठानादीनांकर्माण्यात्मकर्तृकाणिस्युन २५॰

द्धि परस्य कर्म तत्परेणाकृतमागंतुमर्हति ॥ यत्त्वविद्यया गमितं न तत्तस्य यथा रजतत्वं न शुक्ति
482 कायाः यथा वा तलमलत्वं बालैर्गमितं नभसो अविद्यया नाकाशस्य ॥ तथाधिष्ठानादिविक्रिया
पि तेषामेव नात्मनः ॥ तस्माद्युक्तमुक्तमहंकृतत्वबुद्धिलेपाभावे विद्वान्नहंति ॥ न निबध्यत
इति नायं हंति न हन्यत इति प्रतिज्ञाय न जायत इत्यादि हेतुवचनेनाविक्रियत्वमात्म
न उक्त्वा वेदाविनाशिनमिति विदुषः कर्माधिकारनिवृत्तिं शास्त्रादौ संक्षेपत उक्त्वा ।
मध्ये प्रसारितां तत्र तत्र प्रसंगं कृत्वा इह उपसंहरति शास्त्रार्थपिंडीकरणाय विद्वान्नहंति ।
न निबध्यत इति ॥ एवं च सति देहभृत्त्वाभिमानानुपपत्ताववियाकृताशेषकर्मसंन्या
सोपपत्तेः संन्यासिनामनिष्टादि त्रिविधं कर्मणः फलं न भवतीत्युपपन्नं ॥ तद्विपर्ययाच्चा ।
च्चेतरेषां भवतीत्येतच्चापरिहार्यमिति ॥ एष गीताशास्त्रार्थ उपसंहृतः स एष सर्ववेदा
र्थसारो निपुणमतिभिः पंडितैर्विचार्य प्रतिपत्तव्य इति तत्र तत्र प्रकरणविभागेन दर्शि
तोस्माभिः शास्त्रन्यायानुसारेण ॥१७॥
॥ शिव ॥

अथेदानीं कर्मणां प्रवर्त्तकमुच्यते ॥ ज्ञानं इति ॥ ज्ञानं ज्ञायतेऽनेनेति सर्वविषयं अविशेषेणो-
च्यते ॥ तथा ज्ञेयं ज्ञातव्यं तदपि सामान्येनैव सर्वमुच्यते ॥ तथा परिज्ञाता उपाधिलक्षणोऽवि-
द्याकल्पितो भोक्ता इत्येतत्त्रयमविशेषेण सर्वकर्मणां प्रवर्त्तिका त्रिविधा कर्मचो-
दना ॥ ज्ञानादीनां हि त्रयाणां सन्निपाते हानोपादानादिप्रयोजनः ॥ सर्वकर्मारंभः स्यात्
ततः पंचभिरधिष्ठानादिभिरारब्धं वाङ्मनःकायाश्रयभेदेन त्रिधा राशीभूतं त्रिषु कर-

ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना ॥ करणं कर्म कर्तेति त्रिविधः कर्मसंग्रहः ॥ १८ ॥

णादिषु संगृह्यते ॥ तदेतदुच्यते ॥ करणं क्रियतेऽनेनेति बाह्यं श्रोत्रादि ॥ अंतःस्थं बुद्ध्यादिक
र्म ईप्सिततमं कर्तुः क्रियया व्याप्यमानं कर्ता करणानां व्यापारयिता उपाधिलक्षण इति त्रि-
विधः त्रिप्रकारः कर्मसंग्रहः संगृह्यते अस्मिन्निति संग्रहः कर्मणः संग्रहः कर्मसंग्रहः ॥
कर्म एषु त्रिषु समवैतीति तेनायं त्रिविधः कर्मसंग्रहः

॥ १८ ॥ ॥ ॥

अथेदानीं ज्ञानक्रियाकारकफलानां सर्वेषां गुणात्मकत्वात्सत्वरजस्तमोगुणभेदतस्त्रि
484 विधो भेदो वक्तव्य इत्यारभ्यते ॥ ज्ञानं इति ॥ ज्ञानं ज्ञायतेऽनेनेति ॥ कर्म च कर्म क्रिया न कार
कं पारिभाषिकमीप्सिततमं कर्म ॥ कर्ता च निर्वर्त्तकः क्रियाणां त्रिधैवा वक्ष्यमाणगुणव्य
तिरिक्तजात्यंतराभावप्रदर्शनार्थं ॥ गुणभेदतः सत्वादिभेदेनेत्यर्थः प्रोच्यते कथ्यते
गुणसंख्याने कापिलेशास्त्रे ॥ कापिलमपि गुणसंख्यानशास्त्रं गुणभोक्तृविषये प्र

ज्ञानं कर्म च कर्ता च त्रिधैव गुणभेदतः ॥ प्रोच्यते गुणसंख्याने यथावच्छृणु तान्यपि ॥१९॥

माणमेव परमार्थब्रह्मैकत्वविषये यद्यपि विरुध्यते तथापि ते हि कापिला गुणगौ
णव्यापारनिरूपणे अभियुक्ता इति तच्छास्त्रमपि वक्ष्यमाणार्थस्तुत्यर्थत्वेनोपादीय
ते इति न विरोधः ॥ यथावद्यथान्यायं शृणु तान्यपि ज्ञानादीनि तद्भेदजातानि च गु
णभेदकृतानि शृणु वक्ष्यमाणार्थं समाधिं कुरु वि
त्यर्थः ॥१९॥ मन १

ज्ञानस्य तावत्त्रिविधत्वमुच्यते ॥ सर्वेति ॥ सर्वभूतेषु अव्यक्तादि स्थावरांतेषु येन ज्ञानेन ए
कं भावं वस्तु भावशब्दो वस्तुवाची एकमात्मवस्त्वित्यर्थः ॥ अव्ययं न व्येति स्वात्मना धर्मैर्वा
कूटस्थमित्यर्थः ॥ ईक्षते येन ज्ञानेन पश्यति तं च भावमविभक्तं प्रतिदेहं विभक्तेषु देहभे
देषु व्योमवन्निरंतरमित्यर्थः ॥ अद्वैतात्मदर्शनं सात्विकं सम्यग्दर्शनं विद्धीति जानीहि
२ ॥ यानि द्वैतदर्शनानि असम्यग्भूतानि राजसानि तामसानि चेति न साक्षात्संसारोच्छि

सर्वभूतेषु येनैकं भावमव्ययमीक्षते ॥ अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्विकं ॥ २० ॥
पृथक्त्वेन तु यज्ज्ञानं नानाभावान्पृथग्विधान् ॥ वेत्ति सर्वेषु भूतेषु तज्ज्ञानं विद्धि राजसं

त्तये भवंति ॥ पृथक्त्वेति ॥ पृथक्त्वेन तु भेदेन प्रतिशरीरमन्यत्वेन ॥ यज्ज्ञानं नानाभा ॥ २१ ॥
वान्भिन्नानात्मनः पृथग्विधान्पृथक्कारणान्भिन्नलक्षणानित्यर्थः ॥ वेत्ति विजा
नाति यज्ज्ञानं सर्वेषु भूतेषु ज्ञानस्य कर्तृत्वासंभवात् येन ज्ञानेन वेत्तीत्यर्थः ॥ तज्ज्ञानं। २४२
विद्धि राजसं रजोनिर्वृत्तं ॥ २१ ॥

486

यन्नमति ॥ यन्नत्वानेकान्तवत् सममवत् सर्वविषयमिव ॥ एकस्मिन् कार्ये देहवद्दिवा
प्रतिमादौ सक्रमेनावानेवात्मेयरो नानः परमस्तीति ॥ यथा नग्नक्षपणकानां शरीरांतर्व
र्तीदेहपरिमाणो जीव ईश्वरः ॥ पाषाणादौ वदिमात्र इत्येवमेकस्मिन् कार्ये सक्तं ॥ अद्वै
तकं द्वैतवर्जितं निर्युक्तिकं ॥ अनतत्वार्थवत् ॥ यथाभ्रनोर्थोस्तत्वार्थः सोस्यस्येयभ्रतो ॥

यत्तु कृत्स्नवदेकस्मिन् कार्ये सक्तमहैतुकं ॥ अ
तत्वार्थवदल्पं च तत्तामसमुदाहृतं ॥ २२ ॥ ॥

स्तीति तत्वार्थवत् ॥ न तत्वार्थवत् ॥ अतत्वार्थवत् ॥ अहैतुकत्वादेवाल्पं च अल्प
विषयत्वात् ॥ अल्पफलत्वाद्वा ॥ तत्तामसमुदाहृतं ॥ तामसानां हि प्राणिनामविवे
किनां ज्ञानमीदृशं दृश्यते ॥ २२ ॥ ॥ २२ ॥ ॥

अथेदानीं कर्म॥ नियतमिति॥ नियतं नित्यं॥ संगरहितं आसक्तिवर्जितं॥ अरागद्वेषतः कृतं तद्विप
रीतेन कृतं अरागद्वेषतः कृतं॥ अफलप्रेप्सुना फलं प्रेप्सतीति फलप्रेप्सुः फलतृष्णः तद्वि
परीतेन अफलप्रेप्सुना [illegible] ना कर्त्रा कृतं कर्म यत्तत्सात्विकमुच्यते॥२३॥ यत्तु
इति॥ यत्तु कामेप्सुना फलप्रेप्सुनेत्यर्थः कर्म साहंकारेण वेति॥ न तत्त्वज्ञान्यपेक्षया
किं तर्हि लौकिकश्रोत्रियनिरहंकारापेक्षया॥ यो हि परमार्थनिरहंकार आत्मवित्तस्य

नियतं संगरहितमरागद्वेषतः कृतं॥ अफलप्रेप्सुना कर्म यत्तत्सात्विकमुच्यते ॥२३॥
यत्तु कामेप्सुना कर्म साहंकारेण वा पुनः॥ क्रियते बहुलायासं तद्राजसमुदाहृतं॥२४॥

कामेप्सुत्वबहुलायासकर्तृत्वप्राप्तिरस्ति॥ सात्विकस्यापि कर्मणः अनात्मवित्साहंकारः
कर्ता किमु राजसतामसयोः॥ लोके नात्मविदपि श्रोत्रियो निरहंकार उच्यते निरहंका
रोयं ब्राह्मण इति॥ तस्मात्तदपेक्षयैव साहंकारेण वेत्युक्तं॥ पुनः शब्दः पादपूरणार्थः २४३
क्रियते बहुलायासं महता आयासेन निर्वर्त्यते॥ तत्कर्म राजसमुदाहृतं ॥२४॥ ॥ ॥ ॥

अनुइति॥अनुबंधंपश्चाद्भावियद्वस्तुसोनुबंधउच्यतेतमनुबंधंक्षयंयस्मिन्कर्मणिक्रि
यमाणेशक्तिक्षयोऽर्थक्षयोवास्यात्तंक्षयं॥हिंसांप्राणिपीडां अनवेक्ष्यचपौरुषंपुरुषका
रंशक्नोमीदंकर्मसमापयितुंइत्येवमात्मसामर्थ्यंइत्येतान्यनुबंधादीनिअनवेक्ष्यपौरुषा।
नानिमोहादविवेकतआरभ्यतेयत्कर्मतत्तामसमुदाहृतं॥२५॥मुक्तइति॥मुक्तसंगःमुक्तः
परित्यक्तःसंगःसंयोगोयेनसमुक्तसंगः॥अनहंवादीअनहंवदनशीलः॥धृत्युत्साहस

अनुबंधंक्षयंहिंसामनवेक्ष्यचपौरुषं॥मोहादारभ्यतेकर्मयत्तत्तामसमुच्यते॥२५॥मुक्त
संगोनहंवादीधृत्युत्साहसमन्वितः॥सिद्ध्यसिद्ध्योर्निर्विकारःकर्तासात्विकमुच्यते
॥२६॥

मन्वितः धृतिर्धारणंउत्साहउद्यमःताभ्यांसमन्वितःसंयुक्तःसिद्ध्यसिद्ध्योःक्रियमा
णस्यकर्मणःफलसिद्धावसिद्धौचसिद्ध्यसिद्ध्योर्निर्विकारःकेवलशास्त्रप्रमाणप्रयुक्तः
नफलरागादिनायःसनिर्विकारउच्यते एवंभूतःकर्तासात्विकउच्यते ॥२६॥॥
शिव॥ ॥ ॥ ॥

गी·भा·
२४४
489

रागीकर्मफलप्रेप्सु॥ रागीरागोस्यास्तीतिरागी॥ कर्मफलप्रेप्सुकर्मफलार्थी॥ लुब्धःपरद्र
व्येषुसंजाततृष्णः तीर्थादौचस्वद्रव्यापरित्यागी॥ हिंसात्मकःपरपीडास्वभाव॥ अशुचिः
वाह्यांतःशौचवर्जितः॥ हर्षशोकान्वितः॥ इष्टप्राप्तौहर्षः॥ अनिष्टप्राप्ताविष्टवियोगेवशो

रागीकर्मफलप्रेप्सुर्लुब्धोहिंसात्मकोशुचिः
हर्षशोकान्वितःकर्त्ताराजसःपरिकीर्त्तितः॥२७॥

कः ताभ्यांहर्षशोकाभ्यांसमन्वितःसंयुक्तः तस्यैववाकर्मणःसंपत्तिविपत्त्योर्हर्षशोकौ
स्यातां॥ ताभ्यांसंयुक्तोयःकर्त्तासराजसःपरिकी २४४
र्त्तितः ॥२७॥

अयुक्तः इति॥ अयुक्तो असमाहितः प्राकृतः अत्यन्तासंस्कृतबुद्धिः बालिशः स्तब्धः दंडवत्
490 न नमति कस्मैचित्॥ शठो मायावी शक्तिगूहनकारी॥ नैष्कृतिकः परोत्सादनपरः अल
सोऽप्रवृत्तिशीलः कर्तव्येष्वपि विषादी सर्वदावसन्नस्वभावः॥ दीर्घसूत्री च कर्तव्यानां दी
र्घप्रसारणो सर्वदा मंदस्वभावः यदद्य श्वो वा कर्तव्यं तन्मासेनापि न करोति॥ यश्च एवंभू

अयुक्तः प्राकृतः स्तब्धः शठो नैष्कृतिकोऽलसः॥ विषादी दीर्घसूत्री च कर्ता तामस उच्यते
॥२८॥ बुद्धेर्भेदं धृतेश्चैव गुणतस्त्रिविधं शृणु॥ प्रोच्यमानमशेषेण पृथक्त्वेन धनंजय॥२९॥

तः कर्ता तामस उच्यते॥२८॥ बुद्धेरिति॥ बुद्धेर्भेदं धृतेश्चैव गुणतः सत्त्वादिगुणतः॥ त्रि
विधं शृणु इति सूत्रोपन्यासः॥ प्रोच्यमानं कथ्यमानं अशेषेण निरवशेषतः॥ यथा
वत् पृथक्त्वेन विवेकतः धनंजय दिग्विजये मानुषं दैवं च प्रभूतं धनं जितवान्॥ तेना
सौ धनंजयोऽर्जुनः ॥२९॥ ॥ ॥

गी॰भा॰ प्रवृत्तिमिति ॥ प्रवृत्तिः प्रवर्त्तनं शास्त्रविषयो बंधहेतुः कर्ममार्गः निवृत्तिः संन्यासमार्गो मोक्षहे
२५५ तुः बंधमोक्षसमानवाक्यत्वात् प्रवृत्तिनिवृत्ती कर्मसंन्यासमार्गाविति गम्यते ॥ कार्याका
491 र्यविहितप्रतिषिद्धे कर्तव्याकर्तव्ये करणाकरणे इत्येतत् कस्य देशकालाद्यपेक्षया दृष्टा
दृष्टार्थानां कर्मणां भयाभये बिभेत्यस्मादिति भयं तद्विपरीतमभयं भयं चाभयं च भया।
भये दृष्टादृष्टविषये भयाभययोः कारणे इत्यर्थः बंधं सहेतुकं मोक्षं च सहेतुकं ॥ या वेत्ति बुद्धिः

प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये ॥ बंधं मोक्षं च या वेत्ति बुद्धिः सा पार्थ सात्विकी ॥ ३० ॥
यया धर्ममधर्मं च कार्यं चाकार्यमेव च ॥ अयथावत्प्रजानाति बुद्धिः सा पार्थ राजसी ॥ ३१ ॥

सा पार्थ सात्विकी तत्र ज्ञानं तु बुद्धिर्वृत्तिः बुद्धिस्तु वृत्तिमती ॥ धृतिरपि वृत्तिविशेष एव बुद्धेः ॥ ३० ॥
यया धर्ममिति ॥ यया धर्मं शास्त्रचोदितं ॥ अधर्मं प्रतिषिद्धं कार्यं चाकार्यमेव च पूर्वोक्ते एव का।
र्याकार्ये ॥ अयथावत् न यथावत् सर्वतो निर्णयेन न प्रजानाति बुद्धिः सा पा २५५
र्थ राजसी ॥ ३१ ॥ ॥

अधर्ममिति ॥ अधर्मं प्रतिषिद्धं धर्मं विहितमिति या मन्यते जानाति तमसावृता मती ॥ सर्वा
492 र्थान् सर्वानेव ज्ञेयपदार्थान् विपरीतांश्च विपरीतमेव विजानाति बुद्धिः सा पार्थ तामसी ॥ ३२ ॥
धृत्या इति ॥ धृत्या अव्यभिचारिण्या नित्यमवहितेन संबंधः धारयते ॥ किं मनःप्राणेंद्रियक्रियाः
मनश्च प्राणाश्च इंद्रियाणि च मनःप्राणेंद्रियाणि तेषां क्रियाः चेष्टास्ता उच्छास्त्रमार्गप्रवृत्ते

अधर्मं धर्ममिति या मन्यते तमसावृता ॥ सर्वार्थान्विपरीतांश्च बुद्धिः सा पार्थ तामसी ॥ ३२ ॥
धृत्या यया धारयते मनःप्राणेंद्रियक्रियाः ॥ योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्त्विकी
॥ ३३ ॥

धारयति धृत्या हि धार्यमाणा उच्छास्त्रविषया न भवंति ॥ योगेन समाधिना ॥ अव्यभिचा
रिण्या नित्यसमाध्यनुगतया इत्यर्थः एतदुक्तं भवति ॥ अव्यभिचारिण्या धृत्या मनःप्राणेंद्रिय
क्रियाः धारयन् ॥ योगेन धारयतीति या एवं लक्षणा धृतिः सा पार्थ सात्त्विकी ॥ ३३ ॥ ॥ ॥

गी॰भा॰ यया इति॥ यया तु धर्मकामार्थान् धर्मस्य कामस्यार्थस्य धर्मकामार्थाः तान् धृत्या धारयते
२४६ मनसि नित्यकर्तव्यतारूपान् अवधारयति॥ अर्जुन॥ प्रसंगेन यस्य यस्य धर्मादेर्धारणप्रसं
493 गः तेन तेन फलाकांक्षी च भवति यः पुरुषः सा तस्य धृतिः पार्थ राजसी॥ ३४॥ यया इति।

यया तु धर्मकामार्थान् धृत्या धारयतेऽर्जुन॥ प्रसंगेन फलाकांक्षी धृतिः सा पार्थ राजसी ३४॥
यया स्वप्नं भयं शोकं विषादं मदमेव च॥ न विमुंचति दुर्मेधा धृतिः सा पार्थ तामसी॥ ३५॥

विषण्णतां

यया स्वप्नं निद्रां॥ भयं त्रासं॥ शोकं संतापं विषादं अवसादं मदं विषयसेवामात्मनो बहुमा
न्यमानो मत्त इव मदमेव च मनसि नित्यकर्तव्यरूपमानयाकुर्वन्॥ न विमुंचति धारय २४६
त्येव॥ दुर्मेधाः कुत्सितमेधाः पुरुषो यस्य धृतिः सा तामसी मता॥ ३५॥ ॥

494 गुणभेदेनक्रियाणांकारकाणांचत्रिधाभेदउक्तः॥अथेदानींफलस्यसुखस्यत्रिधाभेदउ
च्यते॥सुखमिति॥सुखंत्विदानींत्रिविधंशृणुसमाधानंकुर्वित्यर्थः॥मेममभरतर्षभ॥अ
भ्यासात्परिचयाद्रमते॥रमतेरतिंप्रतिपद्यते॥यत्रयस्मिन्सुखानुभवे॥दुःखांतंचदुः

सुखंत्विदानींत्रिविधंशृणुमेभरतर्षभ ॥ अभ्या
सात्रमतेयत्रदुःखांतंचनिगच्छति ॥३६॥ ॥

खावसानंदुःखोपशमंचनिगच्छति॥ निश्चयेनप्राप्नोति॥३६॥ ॥ ॥ ॥ ॥शिव
शिव॥॥ ॥॥॥ राम
राम ॥॥ ॥॥॥॥ ॥॥ ॥राम

गी-भा-
२५७
495

यत्तदिति॥यत्तत्सुखमग्रेप्रथमसंनिपातेज्ञानवैराग्यध्यानसमाध्यारंभेत्यंतायास
पूर्वकत्वाद्विषमिवदुःखात्मकंभवति॥परिणामेज्ञानवैराग्यादिपरिपाकजंसुखममृ
तोपमंतत्सुखंसात्विकंप्रोक्तंविद्वद्भिः॥आत्मबुद्धिप्रसादजंआत्मनोबुद्धिरात्मबुद्धिः
तस्याःप्रसादोनैर्मल्यंसलिलवत्स्वच्छताततोजातंआत्मबुद्धिप्रसादजं॥आत्मविष
यावाआत्मालंबनावाबुद्धिःआत्मबुद्धिस्तत्प्रसादप्रकर्षाद्वाजातमित्येतत्तस्मात्सात्वि

यत्तदग्रेविषमिवपरिणामेमृतोपमं॥तत्सुखंसात्विकंप्रोक्तमात्मबुद्धिप्रसादजं॥३७॥
विषयेंद्रियसंयोगाद्यत्तदग्रेमृतोपमं॥परिणामेविषमिवतत्सुखंराजसंस्मृतं॥३८॥

कंतत॥३७॥विषइति॥विषयेंद्रियसंयोगाद्यत्सुखंजायते॥अग्रेप्रथमक्षणे॥अमृतो
पमंअमृतसमं॥परिणामेविषमिवबलवीर्यरूपप्रज्ञामेधाधनोत्साहहानिहेतुत्वा
दधर्मतज्जनितनरकादिहेतुत्वाच्च॥परिणामेतदुपभोगपरिणामांतेविषमिव॥त
त्सुखंराजसंस्मृतं॥३८॥ ॥ ॥ ॥ २५७

496

यदितीति॥ यदग्रे अनुबंधे चावसाने चोत्तरकाले सुखं मोहनं मोहकं आत्मनः॥ निद्रालस्य
प्रमादोत्थं निद्रा च आलस्यं च प्रमादश्चेति एतत्सर्वं तेभ्यः समुत्तिष्ठतीति निद्रालस्यप्र
मादोत्थं तत्तामसमुदाहृतं॥३९॥ अथेदानीं प्रकरणोपसंहारार्थः श्लोक आरभ्यते॥ न त

यदग्रे चानुबंधे च सुखं मोहनमात्मनः॥ निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतं॥३९॥
न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः॥ सत्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गुणैः
॥४०॥

इति॥ न तदस्ति न तत्रास्ति पृथिव्यां वा मनुष्यादि सत्वं प्राणिजातं॥ अन्यत्र वा अप्रा
णि॥ दिवि देवेषु वा पुनः सत्वं प्रकृतिजैर्मुक्तं॥ त्रिभिर्गुणैः प्रकृतितो जातैः मुक्तं परि
त्यक्तं स्याद्यद्वेतत्तदस्तीति एवं गुणासंबंधः ॥४०॥ ॥ ॥

गी॰भा॰ सर्वः संसारः क्रियाकारकफललक्षणः सत्वरजस्तमोगुणात्मकोऽविद्यापरिकल्पितः
२४८ समूलोनर्थ उक्तः वृक्षरूपकल्पनया च ऊर्ध्वमूलमित्यादिना तं चासंगशस्त्रेण दृढेन।
छित्वा ततः पदं तत्परिमार्गितव्यम् इति चोक्तं ॥ तत्र च सर्वस्य त्रिगुणात्मत्वात्संसारकारणनिवृत्त्य
497 नुपपत्तौ प्राप्तायां यथा तन्निवृत्तिः स्यात्तथा वक्तव्यं ॥ सर्वश्च गीताशास्त्रार्थ उपसंहर्तव्य ए
तावानेव च सर्वो वेदस्मृत्यर्थः ॥ पुरुषार्थमिच्छद्भिरनुष्ठेय इति ॥ एवमर्थं ब्राह्मणक्षत्रि

ब्राह्मणक्षत्रियविशां ॥ शूद्राणां च परंतप ॥ क
र्माणि प्रविभक्तानि ॥ स्वभावप्रभवैर्गुणैः ॥ ४१ ॥

यविशामित्यादिरारभ्यते ॥ ब्राह्मण इति ॥ ब्राह्मणाश्च क्षत्रियाश्च विशश्च ब्राह्मणक्षत्रियवि
शः तेषां ब्राह्मणक्षत्रियविशां ॥ शूद्राणां च शूद्राणामित्यसमासकरणमेकजातित्वे स
ति वेदानधिकारात् ॥ परंतप कर्माणि प्रविभक्तानि इतरेतरविभागेन व्यवस्थापितानि २४८
केन स्वभावप्रभवैर्गुणैः स्वभाव ईश्वरस्य त्रिगुणात्मिका माया प्रकृतिः ॥ सा प्रभवो या ॥।॥।॥

ये

498

गुणानां ते स्वभावप्रभवाः ॥ तैः शमादीनि कर्माणि प्रविभक्तानि ब्राह्मणादीनां अथवा
ब्राह्मणस्वभावस्य सत्वगुणः प्रभवः कारणं तथा क्षत्रियस्वभावस्य सत्वोपसर्जनं रजः
प्रभवः कारणं वैश्यस्वभावस्य तम उपसर्जनं रजः प्रभवः कारणं शूद्रस्वभावस्य रज उप
सर्जनं तमः प्रभवः कारणं प्रशान्त्यैश्वर्येहामूढस्वभावदर्शनात् ॥ चतुर्णां ॥ अथवा
जन्मान्तरकृतसंस्कारः प्राणिनां वर्तमानजन्मनि स्वकार्याभिमुखत्वेनाभिव्यक्तः ॥
स्वभावः स प्रभवो येषां गुणानां ते स्वभावप्रभवाः गुणाः प्रादुर्भावस्य निःकारणत्वानुप
पत्तेः स्वभावः कारणमिति कारणविशेषोपादनं ॥ एवं स्वभावप्रभवैः सत्वरजस्तमोभि
गुणैः स्वकार्यानुरूपेण शमादीनि कर्माणि प्रविभक्तानि ॥ ननु शास्त्रेण प्रविभक्तानि
शास्त्रेण विहितानि ब्राह्मणादीनां शमादीनि कर्माणि कथमुच्यते सत्वादिगुणप्रवि
भक्तानीति ॥ नैष दोषः शास्त्रेणापि ब्राह्मणादीनां सत्वादिगुणविशेषापेक्षयैव शमा
दीनि कर्माणि प्रविभक्तानि न गुणानपेक्षयेति शास्त्रप्रविभक्तान्यपि कर्माणि गुण ॥ ॥ ॥
प्रविभक्तान्युच्यते ॥ ४१ ॥ ॥

गी॰ भा॰ कानि पुनस्तानि कर्म्माणीत्युच्यंते ॥ शमोऽइति ॥ शमदमौ यथा व्याख्यातार्थौ ॥ तपो यथोक्तं शारी
२४९ रादि ॥ शौचं व्याख्यातं क्षांतिः क्षमा ॥ आर्जवं ऋजुतैव च ॥ ज्ञानं विज्ञानं उक्तार्थं ॥ आस्तिक्यमा
499 स्तिभावः ॥ श्रद्दधानता आगमार्थेषु ब्रह्मकर्म ब्राह्मणजातेः ॥ कर्म्म ब्रह्मकर्म ॥ स्वभाव
जं यदुक्तं स्वभावप्रभवैर्गुणैः प्रविभक्तानीति तदेवोक्तं स्वभावजमिति ॥ ४२ ॥ शौर्यमिति
शौर्यं शूरस्य भावः ॥ तेजः प्रागल्भ्यं धृतिर्धारणां सर्वावस्थासु अनवसादो भवति यया धृत्योत्त

शमो दमस्तपः शौचं क्षांतिरार्जवमेव च ॥ ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजं ॥ ४२ ॥
शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनं ॥ दानमीश्वरभावश्च क्षात्रकर्म स्वभावजं ॥ ४३ ॥

भितस्य ॥ दाक्ष्यं दक्षस्य भावः सहसा प्रत्युत्पन्नेषु कार्येषु अव्यामोहेन प्रवृत्तिः युद्धे चाप्यप
लायनं शत्रुभ्यः अपराङ्मुखीभावः ॥ दानं देयेषु मुक्तहस्तता ॥ ईश्वरभावश्च ईश्वरस्य भावः
प्रभुशक्तिप्रकटीकरणं ईशितव्यान् प्रति ॥ क्षात्रकर्म स्वभावजं क्षत्रजातेर्विहितं कर्म क्षा २४९
त्रकर्म स्वभावजं ॥ ४३ ॥ ॥

500

कृषिरिति॥ कृषिगोरक्ष्यवाणिज्यं कृषिश्च गोरक्ष्यं च वाणिज्यं च कृषिगोरक्ष्यवाणिज्यं कृ
षिर्भूमेर्विलेखनं॥ गोरक्ष्यं गोरक्षतीति गोरक्षः तस्य भावो गोरक्ष्यं पशुपाल्यं॥ वाणिज्यं

कृषिगोरक्ष्यवाणिज्यं वैश्यकर्म स्वभावजं॥ परिचर्या
त्मकं कर्म शूद्रस्यापि स्वभावजं॥४४॥ ॥ ॥

वैश्यजातेः कर्म वैश्यकर्म स्वभावजं।

वणिक्कर्म क्रयविक्रयादिलक्षणं वैश्यकर्म स्वभावजं॥ परिचर्यात्मकं कर्म शुश्रूषा
स्वभावकर्म शूद्रस्यापि स्वभावजं॥४४॥ ॥ ॥ ॥शिव

गी·भा· एतेषां जातिविहितानां कर्मणां सम्यगनुष्ठितानां स्वर्गप्राप्तिः फलं स्वभावतः वर्णाश्र
२५· माश्च स्वकर्मनिष्ठाः प्रेत्य कर्मफलमनुभूय ततः शेषेण विशिष्टदेशजातिकुलधर्मा
युःश्रुतसुखवित्तमेधसो जन्म प्रतिपद्यंत इत्यादिकस्मृतिभ्यः पुराणेभ्यश्च ॥ वर्णाना
501 माश्रमिणां च लोकफलभेदविशेषस्मरणात् ॥ कारणांतरात्तु विंदत्यमानामश्रेण

स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः ॥ स्वकर्म
निरतः सिद्धिं यथा विंदति तच्छृणु ॥४५॥ ॥

स्वे स्वे इति ॥ स्वे स्वे यथोक्तभेदे कर्मण्यभिरतः तत्परः संसिद्धिं स्वकर्मानुष्ठानादशुद्धिक्षये
सति कायेंद्रियाणां ज्ञाननिष्ठायोग्यतालक्षणां लभते प्राप्नोति नरोऽधिकृतः पुरुषः किं
स्वकर्मनिष्ठात एव साक्षात् सिद्धिः न किं तर्हि स्वकर्मनिरतः सिद्धिं यथा येन प्रकारेण वि

502 यतोइति॥ यतो यस्मात् प्रवृत्तिरुत्पत्तिश्चेष्टा वा यस्मादंतर्यामिन ईश्वराद्भूतानां प्राणिनां।
स्यात्॥ येनेश्वरेण सर्वमिदं जगत्ततं व्याप्तं॥ स्वकर्मणा पूर्वोक्तेन प्रतिवर्णोक्तं तमीश्वरमभ्य
र्च्य पूजयित्वा आराध्य॥ केवलज्ञाननिष्ठायोग्यतालक्षणां सिद्धिं विंदति मानवः॥४६॥ य
तएवमतः॥ श्रेयानिति॥ श्रेयान् प्रशस्यतरः स्वोधर्मः स्वधर्मः॥ विगुणोपीत्यपिशब्दोध्याहार्यः

यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततं॥ स्वकर्मणा तमभ्यर्च्य सिद्धिं विंदति मानवः॥४६॥
श्रेयान् स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्॥ स्वभावनियतं कर्म कुर्वन्नाप्नोति कि
ल्बिषं॥४७॥

ह्यः॥ परधर्मात्स्वनुष्ठितात्॥ स्वभावनियतं स्वभावेन नियतं यदुक्तं स्वभा
वजमिति तदेवोक्तं स्वभावनियतमिति॥ यथा विषजातस्य कृमेर्विषं न दोषकरं
तथा स्वभावनियतं॥ कर्म कुर्वन्नाप्नोति किल्बिषं पापं॥४७॥ ॥ ॥

स्वभावनियतंकर्मकुर्वाणोविषजातइवकृमिःकिल्बिषंनाप्नोतीत्युक्तं॥परधर्मश्चभयावह
इति॥अनात्मज्ञश्चनहिकश्चित्क्षणमप्यकर्मकृत्तिष्ठतीत्यतः॥सहजमिति॥सहजंसहज
न्मनैवोत्पन्नं॥किंतत्कर्म॥कौन्तेयसदोषमपित्रिगुणात्मकत्वान्नत्यजेत्॥सर्वारंभाःआरभ्यंतइत्या
रंभाःसर्वकर्माणीत्येतत्प्रकरणाद्यःकश्चिदारंभःस्वधर्मःपरधर्मश्चतेसर्वेहियस्मात्सदोषाः

सहजंकर्मकौन्तेयसदोषमपिनत्यजेत् ॥ सर्वा
रंभाहिदोषेणधूमेनाग्निरिवावृताः ॥४८॥।।

त्रिगुणात्मकत्वमत्रहेतुः॥त्रिगुणात्मकत्वाद्दोषेणधूमेनसहजेनाग्निरिवावृ
ताः॥सहजस्यकर्मणःस्वधर्माख्यस्यपरित्यागेनपरधर्मानुष्ठानेपिदोषान्
॥नैवमुच्यते॥भयावहश्चपरधर्मः॥नचशक्यतेऽशेषतस्त्यक्तुमज्ञेनकर्म॥ २५।
यतस्तस्मान्नत्यजेदित्यर्थः॥।।॥ किमशेषतस्त्यक्तुमशक्यंकर्मेतिनत्यजेत्॥

किंवासहजस्य कर्मणस्त्यागो दोषो भवतीति॥ किंचातो यदि तावदशेषतस्त्यक्तुमशक्य
504 मिति न त्याज्यं सहजं कर्म॥ एवं तर्ह्यशेषतस्त्यागो गुण एव स्यादिति सिद्धं भवति॥ सत्यमे
वं स्वशेषतस्त्याग एव नोपपद्यत इति चेत्॥ किं नित्यप्रचलितात्मकः पुरुषो यथा सांख्या
नां गुणाः किं वा क्षणिक एव कारकं यथा बौद्धानां पंचस्कंधाः क्षणप्रध्वंसिनः॥ उभयथापि क
र्मणोऽशेषतस्त्यागो न संभवति॥ अथ तृतीयोपि पक्षो यदा करोति तदा सक्रियं वस्तु य
दा न करोति तदा निःक्रियं तदैव तच्छक्यं सत्यशाक्यं कर्माशेषतस्त्यक्तुं॥ अयं तु तस्मिन्पक्षे
विशेषः॥ न नित्यप्रचलितं वस्तु नापि क्रियैव कारकं॥ किं तर्हि द्रव्यं व्यवस्थिते द्रव्ये विद्य
माना क्रियोत्पद्यते विनाना च विनश्यति शुद्धं द्रव्यं शक्तिमत्॥ अवतिष्ठति एवमाहुः का
णादाः तदेव कारकं इत्यस्मिन्पक्षे को दोष इति॥ अयमेव तु दोषो यतस्त्वभागवतं मत
मिदं॥ कथं ज्ञायते॥ यत आह भगवान्॥ नासतो विद्यते भाव इत्यादि॥ काणादानां ह्यस
तो भावः॥ सतश्चाभाव इतीदं मतमभागवतं॥ अभागवतत्वेपि न्यायवच्चेत्को दोष इति
चेदुच्यते॥ दोषवत्त्विदं सर्वप्रमाणविरोधात्॥ कथं॥ यदि तावद्द्व्यणुकादि द्रव्यं प्रागुत्पत्तेः।

गी·भा·
२५२
505

नैरंतर्यतमेवासतः ॥ सत्वमापद्यते ॥ उत्पन्नं च स्थित्वैकं चित्कालं पुनरत्यंतमसत्वमापद्य
ते तथा च सति असदेव संजायते अभावो भावी भवति भावश्चाभाव इति ॥ तत्राभावो
जायमानः ॥ प्रागुत्पत्तेः शशविषाणकल्पः समवाय्यसमवायिनिमित्ताख्यकारण
मपेक्ष्य जायत इति ॥ न चैवमभाव उत्पद्यते कारणं वापेक्षत इति शक्यं वक्तुं ॥ असं
तो शशविषाणादीनामदर्शनात् ॥ भावात्मकाश्च घटादय उत्पद्यमानाः किंचिदभि
व्यक्तिमात्रे कारणमपेक्ष्योत्पद्यंत इति शक्यं प्रतिपत्तुं ॥ किंचासतः सद्भावे सतश्चासद्भा
वे न कश्चित् प्रमाणप्रमेयव्यवहारे विश्वासः कस्यचित्स्यात् सत्सदेव असदसदेवेति
निश्चयानुपपत्तेः ॥ किंच ॥ उत्पद्यत इति द्व्यणुकादेर्द्रव्यस्य स्वकारणसत्तासंबंधमात्रः
प्रागुत्पत्तेश्चासत्पश्चात्कारकव्यापारमपेक्ष्य स्वकारणैः परमाणुभिः सत्तया च सम
वायलक्षणेन संबंधेन संबद्धं सत्कारणैः समवेतं सद्भवति ॥ तत्र वक्तव्यं कथमसतः
सत्कारणैः संबंधो वा केन चित् न हि वंध्यापुत्रस्य स्वं वा संबंधो वा कारणैर्वा के २५२
न चित् प्रमाणैः परिकल्पयितुं शक्यं ॥ ननु नैवं वैशेषिकैरभावस्य संबंधः कल्प्य

506 तेह्व्यणुकादीनां हि द्रव्याणां स्वकारणेन समवायलक्षणः संबंधः सतामेवोच्यत इति
चेतन संबंधात् ॥ शक्तत्वानभ्युपगमात् ॥ नहि वैशेषिकैः कपालादौ घटादिव्याप्या
रात् प्राक् घटादीनामस्तित्वमिष्यते ॥ न च संबंध एव घटोत्पादकारणमिति न तस्यास
त एव संबंधः पारिशेष्यादिष्टो भवति ॥ ननु असतोपि समवायलक्षणः संबंधः न वि
रुद्धः ॥ न वंध्यापुत्रादीनामदर्शनात् ॥ घटादेरेव प्रागभावस्य स्वकारणसंबंधो भवति न
वंध्यापुत्रादेरभावस्य तुल्यत्वेपीति विशेषोऽभावस्यवक्तव्यः एकस्याभावो द्वयोरभावः
सर्वस्याभावः प्रागभावः प्रध्वंसाभावः इतरेतराभावः ॥ अत्यंताभाव इति लक्षणतो न।
केनचिद्विशेषो दर्शयितुं शक्यः असति च विशेषे घटस्य प्रागभाव एव कुलालादिभिर्व्य
वहारमापद्यते संबध्यते ॥ भावेन कपालाख्येन स्वकारणेन सर्वव्यवहारयोग्यश्च भ
वति ॥ न तु घटस्यैव प्रध्वंसाभावो भावत्वे सत्यपि इति ॥ प्रध्वंसाभावस्य न कश्चिद्व्यवहार
योग्यत्वं प्रागभावस्यैव द्व्यणुकादिद्रव्याख्यस्य उत्पत्त्यादिव्यवहारार्हत्वमित्येतदसमं

गी॰भा॰ २५३ 507

नर्थं॥ अभावत्वाविशेषादत्यंतप्रध्वंसाभावयोरपि॥ ननु नैवास्माभिः प्रागभावस्याभावाप त्तिः यथाघटस्यघटापत्तिः॥ एतदप्यभावस्याभावापत्तिवदेवप्रमाणविरुद्धं॥ सांख्यस्या पिच परिणामपक्षःसोप्यपूर्वधर्मोत्पत्तिविनाशांगीकरणाद्वैशेषिकपक्षान्नविशिष्य ते॥ अभिव्यक्तितिरोभावांगीकरणेपि अभिव्यक्तितिरोभावयोर्विद्यमानत्वाविद्यमान त्वनिरूपणे पूर्ववदेवप्रमाणविरोधः॥ एतेनकारणस्यैवसंस्थानमुत्पत्त्यादिइत्येत दप्ययुक्तं॥ पारिशेष्यात्सदेकमेववस्तुभ्रमविषयाउत्पत्तिविनाशादिधर्मैरनेकधानट वद्विकल्प्यतइति॥ इदं भागवतेमतमुक्तं नासतोविद्यतेभा वइत्यस्मिन् श्लोके सत्त्वस्यप्रत्ययस्याव्य भिचारात्व्यभिचाराच्चे तरेषामिति ॥ ५८॥

कथं तर्ह्यात्मनो विक्रियत्वे ऽशेषतः कर्मणां त्यागो नोपपद्यत इति ॥ यदि वस्तुभूता
508 गुणा यदि वा ऽविद्याकल्पितास्तद्धर्मकर्म तदात्मनि ऽविद्याध्यारोपितमेवेति ॥ अ
विद्वान्न हि कश्चित् क्षणमपि ॥ अशेषतस्त्यक्तुं शक्नोतीत्युक्तं ॥ विद्वांस्तु विद्ययाऽवि

असक्तबुद्धिः सर्वत्र जितात्मा विगतस्पृहः ॥ नै
ष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छति ॥४९॥

द्यायां निवृत्तायां शक्नोत्येवाशेषतः कर्म परित्यक्तुं ॥ अविद्याध्यारोपणस्याशेषतानु
पपत्ते ॥ न हि तैमिरिकदृष्ट्याध्यारोपितस्य द्वितीयचन्द्रादेस्तिमिरापगमे ऽपि शेषो ऽवति
ष्ठते ॥ एवं च सतीदं वचनमुपपन्नं सर्वकर्माणि मनसा संन्यस्यादि ॥ स्वे स्वे कर्मणीत्यादि या

कर्मजायाः सिद्धेरुक्ताया ज्ञाननिष्ठायोग्यतालक्षणायाः फलभूता नैष्कर्म्यसिद्धिर्ज्ञाननि
ष्ठालक्षणा वक्तव्येति श्लोक आरभ्यते ॥ असक्तबुद्धिः असक्ता संगरहिता बुद्धिरन्तःकर
णं यस्य सोऽसक्तबुद्धिः ॥ सर्वत्र पुत्रदारादिष्वासक्तिनिमित्तेषु जितात्मा जितो वशीकृ
त आत्मान्तःकरणं यस्य स जितात्मा ॥ विगतस्पृहः विगता स्पृहा तृष्णा देहजीवि
तभोगेषु यस्मात् स विगतस्पृहः । य एवम्भूत आत्मज्ञः स नैष्कर्म्यसिद्धिं निर्गतानि क
र्माणि यस्मात् निष्क्रियात्मसंबोधात् स निष्कर्मा तस्य भावो नैष्कर्म्यं ॥ नैष्कर्म्यं च तत् सिद्धि
श्चेति ॥ नैष्कर्म्यसिद्धिः निष्कर्मत्वस्य वा सिद्धिः निष्क्रियात्मस्वरूपावस्थानलक्षणस्य
सिद्धिः ॥ निष्पत्तिस्तां नैष्कर्म्यसिद्धिं परमां प्रकृष्टां कर्मजसिद्धिविलक्षणां सद्योमु
क्त्यवस्थानरूपां संन्यासेन सम्यग्दर्शनेन तत्पूर्वकेण वा सर्वकर्मसंन्यासेनाधिगच्छ
ति प्राप्नोति ॥ तथा चोक्तं ॥ सर्वकर्माणि मनसा संन्यस्य नैव कुर्वन्न कारयन्नास्ते इ
ति ॥४९॥ ॥ ॥ २५४

पूर्वोक्तेनस्वकर्मानुष्ठानेनेश्वरार्चनरूपेणजनितांप्रागुक्तलक्षणांसिद्धिंप्राप्तस्यउत्पन्ना
त्मविवेकज्ञानस्यकेवलात्मज्ञाननिष्ठारूपानैष्कर्म्यलक्षणासिद्धिर्येनक्रमेणभवति
तद्वक्तव्यमित्याह ॥ सिद्धिमिति ॥ सिद्धिंप्राप्तः स्वकर्मणाईश्वरमभ्यर्च्यतत्प्रसादजांकायेंद्रि
याणांज्ञाननिष्ठायोग्यतालक्षणांसिद्धिंप्राप्तः ॥ सिद्धिंप्राप्तइतिमदनुवादउत्तरार्थः

सिद्धिंप्राप्तोयथाब्रह्मतथाप्नोतिनिबोधमे ॥ समा
सेनैवकौन्तेयनिष्ठाज्ञानस्ययापरा ॥५०॥ ॥

किंतदुत्तरंयदर्थोऽनुवादइत्युच्यते ॥ यथायेनप्रकारेणज्ञाननिष्ठारूपेणब्रह्मपरमा
त्मानमवाप्नोति ॥ तथातंप्रकारंज्ञाननिष्ठाप्राप्तिक्रमंत्वंममवचनान्निबोधनिश्च
यनावधारयइत्येतत् ॥ किंविस्तरेणनेत्याह ॥ समासेनैवसंक्षेपेणैवहेकौन्तेययथा
ब्रह्मप्राप्नोतितथानिबोधेत्यनेनयाप्रतिज्ञाताब्रह्मप्राप्तिस्तामिदंतयादर्शयितुमा।

ह ॥ निष्ठा ज्ञानस्य या परेति निष्ठा पर्यवसानं परिसमाप्तिरित्येतत् कस्य ब्रह्मज्ञानस्य या परा प
र्यवसाने कीदृशी सा ॥ यादृशमात्मज्ञानं ॥ कीदृशं तद्यादृश आत्मा ॥ कीदृशः स यादृशो भ
गवतोक्तः उपनिषद्वाक्यैश्च न्यायतश्च ॥ ननु विषयाकारं ज्ञानं न विषयो नाप्याकारवा
न् ॥ आत्मेष्यते क्वचित् ॥ ननु आदित्यवर्णं भारूपः स्वयंज्योतिरित्याद्याकारवत्त्वमात्म
नः श्रूयते ॥ न ॥ तमोरूपत्वप्रतिषेधार्थत्वात्तेषां वाक्यानां ॥ द्रव्यगुणाद्याकारप्रतिषेधे
आत्मनस्तमोरूपत्वे प्राप्ते तन्न प्रतिषेधार्थानि आदित्यवर्णमित्यादिवाक्यानि ॥ अरूपमि
ति च विशेषतो रूपप्रतिषेधाद् अविषयत्वाच्च ॥ न संदृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति
कश्चिदेनम् अशब्दमस्पर्शमित्यादेः ॥ तस्मादात्माकारं ज्ञानमित्यनुपपन्नं कथं तर्ह्यात्मनो
ज्ञानं ॥ सर्वं हि यद्विषयं ज्ञानं तत्तदाकारं भवति ॥ निराकारश्चात्मेत्युक्तं ज्ञानात्मनो
श्चोभयोर्निराकारत्वे कथं तद्भावनानिष्ठेति ॥ ॥ न ॥ ॥ अत्यन्तनिर्मलत्वस्वच्छ
त्वसूक्ष्मत्वोपपत्तेः ॥ ॥ आत्मनो बुद्धेश्चात्मसमनैर्मल्याद्युपपत्तेः ॥ आत्मचै
तन्याकाराभासत्वोपपत्तिः ॥ बुद्ध्याभासं मनः ॥ तदाभासानीन्द्रियाणि ॥

512

ंद्रियाभासश्च देहः अतो लौकिकैर्देहमात्रपर्यवसितदृष्टिः कृप्यते ॥ देहचैतन्यवादिन

श्च लोकायतिकाश्चैतन्यविशिष्टः कायः पुरुष इत्याहुः ॥ तथाऽन्ये इंद्रियचैतन्यवा

दिनः ॥ तथाऽन्ये मनश्चैतन्यवादिनः ॥ अन्ये बुद्धिचैतन्यवादिनः ॥ ततोप्यंतरमव्यक्त

मव्याकृताख्यमविद्यावस्थमात्मत्वेन प्रतिपन्नाः केचित ॥ सर्वत्र देहादिबुद्ध्यादिदेहा

तेषु आत्मचैतन्याभासतात्मभ्रांतिकारणमिति ॥ अतश्चात्मविषयं ज्ञानं न विधात।

व्यं ॥ किं तर्हि तानस्वरूपायनात्माध्यारोपणनिवृत्तिरेव कार्या न त्वात्मचैतन्यविज्ञानं।

अविद्याध्यारोपितसर्वपदार्थाकारैरेव विशिष्टतया गृह्यमाणत्वात ॥ अतएव हि

विज्ञानवादिनो बौद्धाः विज्ञानव्यतिरेकेण वस्त्वेव नास्तीति प्रतिपन्नाः प्रमाणांतर

निरपेक्षतया च स्वसंविदितत्वाभ्युपगमेन ॥ तस्मादविद्याध्यारोपणनिराकरणमा

त्रेव ब्रह्मणि कर्तव्यं ॥ न च ब्रह्मज्ञाने यत्नः अत्यंतप्रसिद्धत्वात ॥ अविद्याकल्पितना

मरूपविशेषाकारापहृतबुद्धित्वादत्यंतप्रसिद्धं सत् ज्ञेयमासन्नतरमात्मभूतमपि

दुर्विज्ञेयमप्रसिद्धमतिदूरमन्यदिव च प्रतिभाति अविवेकिनां ॥ बाह्याकारनिवृत्त

बुद्धीनांतल्लब्धात्मप्रसादानांनातःपरंसुखंसुप्रसिद्धंसुविज्ञेयंस्वासन्नमस्ति॥त
थाचोक्तंप्रत्यक्षावगमंधर्म्यमित्यादि॥केचित्तुपंडितंमन्यानिराकारत्वादात्मवस्तुनो
पैतिबुद्धिरतोदुःसाध्यासम्यग्ज्ञाननिष्ठेत्याहुः॥सत्यमेवंगुरुसंप्रदायरहितानामश्र
श्रुतवेदांतानामत्यंतविषयासक्तबुद्धीनांसम्यक्प्रमाणेष्वकृतश्रमाणां॥त
द्विपरीतानांतुलौकिकग्राह्यग्राहकद्वैतवस्तुनिसद्बुद्धिर्नितरांदुःसंपाद्या॥आ
त्मचैतन्यव्यतिरेकेणवस्त्वंतरस्यानुपलब्धेः॥यथाचैतदेवंनान्यथेत्यवोचाम॥उक्तं
चभगवता यस्यांजाग्रतिभूतानिसानिशापश्यतोमुनेरिति॥तस्माद्बाह्याकारभेदबु
द्धिनिवृत्तिरेवात्मस्वरूपालंबनेकारणं॥नह्यात्मानामकस्यचित्कदाचिदप्रसिद्धःप्रा
प्योहेयउपादेयोवा॥अप्रसिद्धेहितस्मिन्नात्मनिस्वार्थाःसर्वाः॥प्रवृत्तयोव्यर्थाः
प्रसज्येरन्॥नचदेहाद्यचेतनार्थत्वंशक्यंकल्पयितुं नचसुखार्थंदुःखार्थंवादुः सुखं २
खं॥आत्मावगत्यवसानार्थत्वाच्चसर्वव्यवहारस्य॥तस्माद्यथास्वदेहस्यपरिच्छे
दायनप्रमाणांतरापेक्षा॥ततोप्यात्मनोंतरतरत्वात्॥तदवगतिंप्रति॥न॥

514 प्रमाणांतरापेक्षत्वादात्मज्ञाननिष्ठाविवेकिनां तु प्रसिद्धेति सिद्धं ॥ येषामपि निरा-
कारं ज्ञानमप्रत्यक्षं तेषामपि ज्ञानवशेनैव ज्ञेयावगतिरिति ॥ ज्ञानमत्यन्तप्रसिद्धं सु-
खादिवदित्यभ्युपगंतव्यं ॥ जिज्ञासानुपपत्तेश्च ॥ अप्रसिद्धं चेज्ज्ञानं ज्ञेयवज्जिज्ञास्येत
यथा ज्ञेयं घटादिलक्षणं ज्ञानेन ज्ञाता व्याप्तुमिच्छति ॥ तथा ज्ञानमपि ज्ञाता ज्ञानांत-
रेण व्याप्तुमिच्छेत ॥ नैव तदस्ति अतो ऽत्यन्तप्रसिद्धं
ज्ञानं ज्ञाताप्यत एव प्रसिद्ध इति तस्माज्ज्ञाना
य यत्नो न कर्तव्यः ॥ किं त्वनात्मबुद्धि
निवृत्तावेव ॥ तस्माज्ज्ञानमिति
शास्त्रसंपाया ॥ ५० ॥
॥ ॐ नमः ॥
॥ शिवा ॥
॥ य ॥
॥

गी·भा· सेयंज्ञानस्यपरानिष्ठोच्यतेकथंकार्येति॥बुद्ध्याइति॥बुद्ध्याध्यवसायात्मिकयाविशु
२५७ द्धयामायारहितया॥युक्तःसंपन्नःधृत्याधैर्येण॥आत्मानंकार्यकरणसंघातं॥नियम्य
515 चनियमनंकृत्वावशीकृत्य॥शब्दादीन्शब्दआदिर्येषांतान्विषयांस्त्यक्त्वासामर्थ्याच्छरी

बुद्ध्याविशुद्धयायुक्तोधृत्यात्मानंनियम्यच॥श
ब्दादीन्विषयांस्त्यक्त्वारागद्वेषौव्युदस्यच॥५१॥॥

रस्थितिमात्रात्केवलान्मुक्त्वाततोधिकान्सुखार्थान्त्यक्त्वेत्यर्थः॥शरीरस्थित्यर्थ
त्वेनप्राप्तेषुचरागद्वेषौव्युदस्यचपरित्यज्य
ततः॥५१॥॥

२५६

316

विविक्त इति॥ विविक्तसेवी अरण्यगिरिगुहादीन् विविक्तदेशान् सेवितुं शीलमस्ये
ति विविक्तसेवी॥ लघ्वाशी लघ्वशनशीलः॥ विविक्तसेवालघ्वशनयोर्निद्रादिदोष
निवर्त्तकत्वेन चित्तप्रसादहेतुत्वाद्ग्रहणं॥ यतवाक्कायमानसः॥ वाक् च कायश्च।
मानसं च यतानि नियमस्थानानि एष्यस्य सत्तानां निरोधयति यतवाक्कायमानसः॥ तदेव।

विविक्तसेवी लघ्वाशी यतवाक्कायमानसः॥ ध्यान
योगपरो नित्यं वैराग्यं समुपाश्रितः॥ ५२॥ ॥

मुपरतसर्वकरणाः सन्॥ ध्यानयोगपरो ध्यानमात्मस्वरूपचिंतनं योगश्चात्मविष।
यएकाग्रीकरणं तौ ध्यानयोगौ परत्वेन कर्तव्यौ यस्य स ध्यानयोगपरः॥ नित्यं।
ग्रहणं मंत्रजपाद्यन्यकर्तव्याभावप्रदर्शनार्थं॥ वैराग्यं विरागभावः दृष्टादृ
नित्यग्रहणं ... समुपाश्रितः॥ नित्यमेवेत्यर्थः ॥५२॥ ॥
ष्टेषु विषयेषु वैतृष्ण्यस्य समुपाश्रितः

किंच ॥ अहंकार इति ॥ अहंकरणं अहंकारो देहेंद्रियादिषु ॥ बलं सामर्थ्यं कामरागसंयुक्तं ते।
नेतरच्छरीरादिसामर्थ्यं स्वाभाविकत्वेन त्यागस्याशक्यत्वात् ॥ दर्पो हर्षानंतरभावी धर्माति
क्रमहेतुः हृष्टो दृप्यति दृप्तो धर्ममतिक्रामतीति स्मरणात् तं च ॥ काममिच्छां ॥ क्रोधं द्वे
षं ॥ परिग्रहं इंद्रियमनोगतदोषपरित्यागेपि शरीरधारणप्रसंगेन धर्मानुष्ठाननि

अहंकारं बलं दर्पं कामं क्रोधं परिग्रहं ॥ विमुच्य नि
र्ममः शांतो ब्रह्मभूयाय कल्पते ॥५३॥ ॥ ॥

मित्तेन वा ॥ बाह्यपरिग्रहः प्राप्तः तं च सर्वान् विमुच्य परित्यज्य परमहंसपरिव्रा
जको भूत्वा देहजीवनमात्रेपि निर्गतममभावो निर्ममः ॥ अत एव शांतः उपरतः।
हर्षायासो यतिर्ज्ञाननिष्ठः ब्रह्मभूयाय ब्रह्मभावाय ॥ कल्पते समर्थो भवती।
ति ॥ अनेन क्रमेण ॥५३॥ ॥

518 ब्रह्मभूतेति॥ब्रह्मभूतःब्रह्मप्राप्तःप्रसन्नात्मालब्धाध्यात्मप्रसादस्वभावः॥नशोचतिनकिं
चिदर्थवैकल्यमात्मनोवैगुण्यमुद्दिश्यशोचतिनसंतप्यते॥नकांक्षति॥ब्रह्मभूतस्या
यंस्वभावोनूद्यतेनशोचतिनकांक्षतीति॥नह्यप्राप्तविषयाकांक्षाब्रह्मविदउपपद्यते॥
नहृष्यतीतिवापाठः॥समःसर्वेषुभूतेषुआत्मौपम्येनसर्वेषुभूतेषुसुखंदुःखंवा

ब्रह्मभूतःप्रसन्नात्मानशोचतिनकांक्षति॥ समः
सर्वेषुभूतेषुमद्भक्तिंलभतेपरां ॥५४॥ ॥

सममेवपश्यतीत्यर्थः॥नात्मसमदर्शनमिहतस्यवक्ष्यमाणत्वात्॥भक्त्यामामभि
जानातीति॥एवंभूतोज्ञाननिष्ठोमद्भक्तिंमयिपरमेश्वरेभक्तिंभजन्ज्ञानलक्षणां ॥ ॥
चतुर्थींलभतेपरामुत्तमां ॥५४॥ ॥

चतुर्विधा भजंते मामित्युक्तं॥ततो ज्ञानलक्षणया॥भक्त्या इति॥भक्त्या मामभिजानाति या
वानहं यश्चास्मि तत्त्वतः। उपाधिकृतविस्तरभेदोय॥यश्चाहं विध्वस्तसर्वोपाधिभेदोऽभिमतः उत्तमः पुरुषश्च
काशकल्पः तं मामद्वैतं चैतन्यमात्रैकरसमजमजरममरमभयमनिधनं तत्त्वतोभिजानाति
ततो मामेव तत्त्वतो ज्ञात्वा विशते तदनंतरं मामेव॥नात्र ज्ञानानंतरप्रवेशक्रिये भिन्ने विव

भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः॥त
तो मां तत्त्वतो ज्ञात्वा विशते तदनंतरं॥५५॥ ॥

क्षिते विशते तदनंतरमिति॥किं तर्हि फलांतराभावत् ज्ञानमात्रमेव तत्र तं चापि मां
विद्धीत्युक्तत्वात्॥ननु विरुद्धमिदमुक्तं ज्ञानस्य या परा निष्ठा तया मामभिजानाती
ति॥कथं विरुद्धमिति चेत् उच्यते॥यदेव यस्मिन्विषये ज्ञानमुत्पद्यते ज्ञाता तत्क्षणा
देव तं विषयमभिजानाति विजानातीति॥न ज्ञाननिष्ठां ज्ञानावृत्तिं लक्ष।

णामेवंलक्षणस्यतत्त्वज्ञानेननाभिजानातितज्ज्ञानाद्भक्त्यातत्त्वज्ञाननिष्ठयाभिजानाति।
520 नैवदोषः।ज्ञानस्यस्वात्मोत्पत्तिपरिपाकहेतुयुक्तस्यप्रतिपक्षविहीनस्ययदात्मा
नुभवनिश्चयावसानत्वंतस्यनिष्ठाशब्दाभिलापात्॥शास्त्राचार्योपदेशेनज्ञानो
त्पत्तिपरिपाकहेतुंसहकारिकारणंबुद्धिविशुद्धत्वादिगुणादिचापेक्ष्यजनितस्य।
स्यदेहेन्द्रियपरमात्मैकत्वज्ञानस्यकर्त्रादिकारकभेदबुद्धिनिबंधनसर्वकर्मसंन्या
ससहितस्यस्वात्मानुभवनिश्चयरूपेणयदवस्थानंसापराज्ञाननिष्ठोच्यते॥सेयं
ज्ञाननिष्ठार्तादिभक्तित्रयापेक्षयापराचतुर्थीभक्तिरित्युक्ता॥तयापरयाभक्त्या
भगवंतंतत्त्वतोऽभिजानातियदनंतरमेवेश्वरक्षेत्रज्ञभेदबुद्धिरशेषतोनिवर्तते॥
अतोज्ञाननिष्ठालक्षणयाभक्त्यामामभिजानातीतिवचनंनविरुध्यते॥सर्व
वंनिवृत्तिविधायिशास्त्रंवेदांतेतिहासस्मृतिलक्षणमर्थवद्भवति॥विदित्वात्मा।
व्युत्थायाथभिक्षाचर्यंचरंतीतितस्मान्न्यासमेषांतपसामतिरिक्तमाहुः॥न्यासमेवा

त्येचयेदिति॥ संन्यासः सर्वकर्मणांन्यासो वेदादीनिमंलोकममंचपरित्यज्य।
त्यजधर्ममधर्मंचेत्यादीनि इह दर्शितानि॥ नचैतेषांवाक्यानामानर्थक्यंयुक्तं॥ न
चार्थवादत्वंस्वप्रकरणस्थत्वात्प्रत्यगात्मनःविक्रियस्वरूपनिष्ठत्वाच्चमोक्षस्य न
हिपूर्वसमुद्रंजिगमिषोःप्रातिलोम्येनप्रत्यक्समुद्रंजिगमिषुणासमानमार्ग
त्वंसंभवति॥ प्रत्यगात्मविषयप्रत्ययसंतानकरणाभिनिवेशश्चज्ञाननिष्ठासाच
प्रत्यक्समुद्रगमनवत्कर्मणासहभावित्वेनविरुध्यते
पर्वतसर्षपयोरिवान्तरवान्विरोधःप्रमाणविदां
निश्चितः॥ तस्मात्सर्वकर्मसंन्यासेनैव
ज्ञाननिष्ठाकार्येति
सिद्धं
॥५५॥

स्वकर्मणा भगवतोऽभ्यर्चनभक्तियोगस्य सिद्धिप्राप्तिः फलं ज्ञाननिष्ठायोग्यता यन्निमि
522 त्ता सा तत्फलावसाना स भगवद्भक्तियोगोऽधुना स्तूयते ॥ शास्त्रोपसंहारप्रकरणे शा
स्त्रार्थनिश्चयपदार्थाय ॥ सर्वेति ॥ सर्वकर्माण्यपि प्रसिद्धान्यपि सदा कुर्वाणो अनुतिष्ठ
न् ॥ मद्व्यपाश्रय अहं वासुदेव ईश्वरो व्यपाश्रयः समद्व्यपाश्रयः मय्यर्पितस।
र्वात्मभाव इत्यर्थः ॥ सोऽपि मत्प्रसादादीश्वरस्य प्रसादादवाप्नोति शाश्वतं नित्यं वैष्णव

सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः ॥ मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययं ॥५६॥
चेतसा सर्वकर्माणि मयि संन्यस्य मत्परः ॥ बुद्धियोगमुपाश्रित्य मच्चित्तः सततं भव ॥५७॥

पदमव्ययं ॥ तदेवं ज्ञात्वा यस्मादेवं ॥५६॥ चेतसेति ॥ चेतसा विवेकबुद्ध्या सर्वकर्माणि दृष्टा
दृष्टार्थानि मयीश्वरे संन्यस्य यत्करोषि यदश्नासीत्युक्तन्यायेन ॥ मत्परः अहं परो यस्य तव
स त्वं मत्परः सन् ॥ बुद्धियोगं मयि या समाहिता बुद्धिः सा बुद्धियोगस्तं बुद्धियोगमुपाश्रि
त्याश्रयोऽनन्यशरणं ॥ मच्चित्तो मय्येव चित्तं यस्य तव स त्वं मच्चित्तः सततं सर्वदा भव ॥५७॥

गी. भा.
२९१
523

मच्चित्तःसर्वदुर्गाणिदुस्तराणिसंसारहेतुजातानिमत्प्रसादात्तरिष्यसिअतिक्रमिष्यसि॥अथ
चेत्वमदुक्तमहंकारात्पंडितोहमिति॥नश्रोष्यसिनग्रहीष्यसि॥ततस्त्वंविनंक्ष्यसिविनाशं
गमिष्यसि॥५८॥इदंचत्वयानमंतव्यंस्वतंत्रोहंकिमर्थंपरोक्तंकरिष्यामीति॥यदहमिति॥यद्वे
तत्वमहंकारमाश्रित्यनयोत्स्यइतियुद्धंनकरिष्यामीति॥मन्यसेचिंतयसिनिश्चयंकरो।

मच्चित्तःसर्वदुर्गाणिमत्प्रसादात्तरिष्यसि॥अथचेत्वमहंकारान्नश्रोष्यसिविनंक्ष्यसि
५८॥यदहंकारमाश्रित्यनयोत्स्यइतिमन्यसे॥मिथ्यैषव्यवसायस्तेप्रकृतिस्त्वांनियोक्ष्य।
ति॥५९॥स्वभावजेनकौंतेयनिबद्धःस्वेनकर्मणा॥कर्तुंनेच्छसियन्मोहात्करिष्यस्यवशो
पितत्॥६०॥

मि१ षिमिथ्यैषव्यवसायोनिश्चयस्तेतव॥यस्मात्प्रकृतिःत्वत्स्वभावस्त्वांनियोक्ष्य
ति॥यस्माच्च॥५९॥स्वभावजेति॥स्वभावजेनशौर्यादिनायथोक्तेन॥कौंतेयनिबद्धोनिश्च
येनबद्धःस्वेनात्मीयेनकर्मणा॥कर्तुंनेच्छसियत्कर्म॥मोहादविवेकतःकरिष्यसि २९१
अवशोपिपरवशएवतत्कर्मयस्मात् ॥६०॥

ईश्वरः ईशनशीलः नारायणः सर्वभूतानां सर्वप्राणिनां ॥ हृद्देशे हृदयदेशे ॥ अर्जुन
524 शुक्लांतरस्वभावो विशुद्धांतःकरण इति ॥ अहश्च कृष्णमहरर्जुनं चेति वचनात् ॥ तिष्ठ
ति स्थितिं लभते ॥ सकर्तृत्वं तिष्ठतीत्याह ॥ भ्रामयन् भ्रमणं कारयन् ॥ सर्वभूतानि यंत्रारू
ढानि ॥ सूत्रयिष्टितानीवेति द्रव्यशाह्योत्वद्दृष्टव्यः ॥ यथा दारुकृतपुरुषादीनि यंत्रा. मायया गिध

ईश्वरः सर्वभूतानां हृद्देशेर्जुन तिष्ठति ॥ भ्रामयन् सर्वभूतानि यंत्रारूढानि मायया ॥ ६१ ॥
तमेव शरणं गच्छ सर्वभावेन भारत ॥ तत्प्रसादात्परां शांतिं स्थानं प्राप्स्यसि शाश्वतं ॥ ६२

छद्मना भ्रामयन् तिष्ठतीति संबंधः ॥ ६१ ॥ तमेवेति ॥ तमेवमीश्वरं शरणमाश्रयं संसारार्त्ति
निवारणाय गच्छ आश्रय ॥ सर्वभावेन सर्वात्मना ॥ हे भारत भरतान्वय ॥ ततस्तत्प्रसादात्
ईश्वरानुग्रहात्परां प्रकृष्टां शांतिमुपरतिं ॥ स्थानं च मम विष्णोः परमं पदमवाप्स्यसि
शाश्वतं नित्यं ॥ ६२ ॥ ॥ ॥ ॥

गी॰भा॰ इतिएतत्ते तुभ्यं ज्ञानमाख्यातं गुह्याद्गुह्यतरं अतिशयेन गुह्यं रहस्यमित्यर्थः॥ मयासर्व
२६२ ज्ञेन॥ विमृश्य विमर्षणमालोचनं कृत्वा॥ एतद्यथोक्तं शास्त्रं॥ अशेषेण समस्तं यथोक्त।
525 मर्थजातं॥ यथेच्छसि तथा कुरु॥ ६३॥ तथापि भूयोपि मयोच्यमानं शृणु॥ सर्वइति॥ सर्वगुह्य

इति ते ज्ञानमाख्यातं गुह्याद्गुह्यतरं मया॥ विमृश्यैतदशेषेण यथेच्छसि तथा कुरु॥ ६३॥
सर्वगुह्यतमं भूयः शृणु मे परमं वचः॥ इष्टोसि मे दृढमिति ततो वक्ष्यामि ते हितं॥ ६४॥

तमं सर्वगुह्येभ्योऽत्यन्तगुह्यतमं रहस्यं॥ उक्तमप्यसकृत् भूयः पुनः शृणु मे परमं प्रकृ
ष्टं वचो वाक्यं न भयान्नाप्यर्थकारणात्॥ किं तर्हि॥ इष्टोसि प्रियोसि॥ मे मम॥ दृढमव्यभिचा २६२
रेण इति कृत्वा ततस्तेन कारणेन वक्ष्यामि कथयिष्यामि ते हितं परं ज्ञानप्राप्तिसाधनं॥ ६४॥

तद्धि सर्वहितानां हिततमं किं तदित्याह ॥ मन्मना भव मच्चित्तः भव मद्भक्तो मद्भजनशी
526 लो भव ॥ मद्याजी मद्यजनशीलो भव ॥ मां नमस्कुरु नमस्कारं मय्येव कुरु ॥ एवं वर्तमानो
वासुदेव एव समर्पितसाध्यसाधनप्रयोजनो ॥ मामेवैष्यसि आगमिष्यसि ॥ सत्यं ते

म२

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ॥ मामे
वैष्यसि सत्यं ते प्रतिजाने प्रियोसि मे ॥ ६५ ॥ ॥

तव प्रतिजाने सत्यां प्रतिज्ञां करोमि एतस्मिन्वस्तुनीत्यर्थः ॥ यतः प्रियोसि मे ॥ ए
वं भगवतः सत्यप्रतिज्ञत्वं बुद्ध्वा भगवद्भक्तेरवश्यंभाविमोक्षफलमवधार्य भगव
देकशरणो भवितव्यमिति वाक्यार्थः ॥ ६५ ॥ ॥ ॥

गी-भा- सर्वकर्मत्यागनिष्ठायाः ॥ पारमहंस्यं ईश्वरशरणतामुपसंहृत्यायेदानीं कर्मयोगनिष्ठा।
२६३ फलं सम्यग्दर्शनं सर्ववेदान्तविहितं वक्तव्यमित्याह ॥ सर्वेति ॥ सर्वे च ते धर्माश्चेति सर्व
धर्मास्तान् ॥ सर्वधर्मग्रहणेनात्राधर्मोऽपि गृह्यते नैष्कर्म्यस्य विवक्षितत्वात् ॥ नाविरतो दुश्चरि
527 तात् ॥ त्यजेद्धर्ममधर्मं चेत्यादिश्रुतिभ्यः ॥ सर्वधर्मान्परित्यज्य संन्यस्य सर्वकर्मा

सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज ॥ अहं
त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥ ६६ ॥

णीत्यर्थः ॥ ॥ मामेकं सर्वात्मानं समं सर्वभूतस्थमीश्वरं अहमेवेत्येवमेकं शरणं
व्रज न मत्तोऽन्यदस्तीत्यवधारयेत्यर्थः ॥ ॥ अहं त्वामेवं निश्चितबुद्धिं सर्वपापेभ्यः
सर्वधर्माधर्मबन्धनरूपेभ्यो मोक्षयिष्यामि ॥ स्वात्मभावप्रकाशीकरणेन
उक्तं च ॥ नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वतेति ॥ ॥ २६३

अनेनात्मा स्वचःशोकंमाकार्षीरित्यर्थः॥ अस्मिन्गीताशास्त्रेपरमंनिःश्रेयससाधनंनिश्चि
528 तं॥ किंज्ञानंकिंकर्म॥ अहोस्विदुभयमिति॥ कुतःसंशयः यज्ज्ञात्वाऽमृतमश्नुतेनततो मांतत्व
तोज्ञात्वाविशतेतदनंतरं कर्मण्येवाधिकारस्ते कुरुकर्मैवेत्यादीनिकर्मणामावश्यक
र्तव्यतांदर्शयंति॥ एवंज्ञानकर्मणोःकर्तव्यतोपदेशात्समुच्चितयोरपिनिःश्रेयसहेतुत्व
स्यादितिभवेत्॥संशयः॥ किंपुनरत्रमीमांसाफलेनत्वेतदेवैषामन्यतमस्यपरमनिःश्रे
यससाधनत्वावधारणं॥ अतोविस्तीर्णेतरमीमांस्यमेतत्॥ तत्रात्मज्ञानस्यतुकेवलस्यनिः
श्रेयसहेतुत्वंभेदप्रत्ययनिवर्तकत्वेनकैवल्यफलावसानत्वात्॥ क्रियाकारकफलभेद
बुद्धिरविद्ययात्मनिनित्यप्रवृत्ताममकर्म अहंकर्ताअमुष्मैफलायइदंकर्मकरोमीति
इयमविद्या अनादिकालप्रवृत्ता अस्याअविद्यायानिवर्तकमयमहमस्मिकेवलोऽकर्ताऽ
क्रियाऽफलेनमत्तोऽन्योऽस्तिकश्चिदेवंरूपमात्मविषयंज्ञानमुत्पद्यमानंकर्मप्रवृत्तिहेतुभू
तायाभेदबुद्धेर्निवर्तकत्वात्॥ तुशब्दःपदव्यावृत्त्यर्थः नकेवलेभ्यःकर्मभ्यः नचज्ञानकर्म
भ्यांसमुच्चिताभ्यांनिःश्रेयसप्राप्तिरितिपदद्वयंनिवर्तयति॥ अकार्यत्वाच्चनिःश्रेयसस्यक

र्मसाधनत्वानुपपत्तेः॥ नहि नित्यं वस्तु कर्मणा ज्ञानेन वा क्रियते॥ केवलज्ञानमप्यनर्थकं त
र्हि॥ न॥ अविद्यानिवर्तकत्वे सति दृष्टकैवल्यफलावसानत्वात्॥ अविद्यातमोनिवर्तकस्य
ज्ञानस्य [illegible] दृष्टकैवल्यफलावसानं रज्ज्वादिविषये सर्पाद्यज्ञानतमोनिवर्तकप्रदीपप्र
काशवत्॥ विनिवृत्तविकल्पसर्परज्जुकैवल्यावसानं हि प्रकाश [illegible] फलज्ञाने
मतं॥ तथा च दृष्टार्थानां छिदिक्रियाग्निमथनादीनां व्यापृतकर्त्रादिकारकाणां द्वैधीभा
वाग्निदर्शनादिफलादन्यफले कर्मान्तरे व्यापारानुपपत्तिर्यथा तथा दृष्टार्थायां ज्ञाननिष्ठा
क्रियायां व्यापृतस्य ज्ञात्रादिकारकस्यात्मकैवल्यफलात्कर्मान्तरे प्रवृत्तिरनुपपन्ना इति ज्ञान
निष्ठा कर्मसहिता नोपपद्यते॥ तर्हि ज्ञाननिष्ठा भुज्यग्निहोत्रादिक्रियावत्स्यादिति चेन्न॥
कैवल्यफले ज्ञाने क्रियाफलार्थित्वानुपपत्तेः॥ कैवल्यफले हि ज्ञाने प्राप्ते सर्वतः संप्लुतो
दकस्थानीये फले कूपतडागादिक्रियाफलार्थित्वाभाववत्फलान्तरे तत्साधनायां वा क्रिया
यामर्थित्वानुपपत्तिः॥ न हि राज्यप्राप्तिफले कर्मणि व्यापृतस्य क्षेत्रप्राप्तिफले।
व्यापारोपपत्तिस्तद्विषयं वार्थित्वं ॥॥ तस्मान्न कर्मणोस्ति निःश्रेयसं ॥॥

नचज्ञानकर्मणोः समुच्चितयोः नापिज्ञानस्य कैवल्यफलस्य कर्मसाहाय्यापेक्षा अविद्या
530 निवर्तकत्वेन च विरोधात् ॥ न हि तमस्तमसो निवर्तकं ॥ अतः केवलमेव ज्ञानं निःश्रेयस
साधनमिति ॥ न ॥ नित्याकरणे प्रत्यवायप्राप्तेः कैवल्यस्य च नित्यत्वात् ॥ यत्तावत्केवलज्ञा
नात्कैवल्यप्राप्तिरित्येतदसत् ॥ यतो नित्यानां कर्मणामनुष्ठानाभावे अकरणे प्रत्यवायो
नरकादिप्राप्तिलक्षणः स्यात् ॥ नन्वेवं तर्हि कर्मभ्यो मोक्षो नास्तीत्यनिर्मोक्ष एव ॥ नैष दोषः
नित्यत्वान्मोक्षस्य ॥ नित्यानां कर्मणामनुष्ठानात् प्रत्यवायाप्राप्तिः प्रतिषिद्धस्य चाकरणा
दनिष्टशरीरानुपपत्तिः काम्यानां च वर्जनादिष्टशरीरानुपपत्तिः वर्तमानशरीरारम्भक
स्य कर्मणः फलोपभोगक्षये पतिते ऽस्मिन् शरीरे देहान्तरोत्पत्तौ च कारणाभावादात्म
नो रागादीनां चाकरणात् स्वरूपावस्थानमेव कैवल्यमित्ययत्नसिद्धं कैवल्यमिति ॥ अ
तिक्रान्तानेकजन्मान्तरकृतस्य स्वर्गनरकादिप्राप्तिफलस्यानारब्धकार्यस्योपभोगा
नुपपत्तेः तदभाव इति चेन्न ॥ नित्यकर्मानुष्ठानायासदुःखोपभोगस्य तत्फलोपभोगत्वो त२
पपत्तेः प्रायश्चित्तवद्वा पूर्वोपात्तदुरितक्षयार्थत्वान्नित्यकर्मणामारब्धानां चोपभोगेन

वकर्मणां क्षीणत्वादहर्वीणां च कर्मणामनारंभेऽयत्नसिद्धं कैवल्यमिति ॥ नविद्याअ
न्यः पंथा मोक्षायन विद्यतइति श्रुतेः ॥ चर्मणा काशवेष्टनासंभववत् ॥ अविदुषो मो
क्षासंभवश्रुतेः ॥ ज्ञानात्कैवल्यमाप्नोतीति च पुराणस्मृतेः ॥ अनारब्धफलानां पुण्या।
नां कर्मणां क्षयानुपपत्तेश्च ॥ यथा पूर्वोपात्तानां दुरितानां अनारब्धफलानां संभवः ॥ तथा
पुण्यानामप्यनारब्धफलानां स्यात्संभवः तेषां च देहांतरमकृत्वा क्षयानुपपत्तौ मोक्षानु
पपत्तिः ॥ धर्माधर्महेतूनां च रागद्वेषमोहानामन्यत्र ज्ञानादुच्छेदानुपपत्तेः ॥ धर्माधर्मोच्छे
दानुपपत्तिः ॥ नित्यानां च कर्मणां पुण्यलोकफलश्रुतेः ॥ वर्णाश्रमाश्च स्वकर्मनिष्ठा इ
त्यादिस्मृतेश्च कर्मक्षयानुपपत्तिः ॥ ये त्वाहुः नित्यानि कर्माणि दुःखरूपत्वात्पूर्वकृतदुरि
तकर्मणां फलमेव न तु तेषां स्वरूपव्यतिरेकेणान्यत्फलमस्तीति अश्रुतत्वात् जीवनादिनि
मित्ते च विधानात् ॥ न ॥ अप्रवृत्तानां फलदानासंभवात् ॥ दुःखफलविशेषानुपपत्तिश्च स्या
त् ॥ यदुक्तं पूर्वजन्मकृतदुरितानां कर्मणां फलं नित्यकर्मानुष्ठानायासदुःखं भुज्यत इति २६५
तदसत् ॥ न हि मरणकाले फलदानायांकुरीभूतस्य कर्मणः फलेऽन्यकर्मारब्धे जन्मनि।

पमन्यत इति उपपत्तिश्च ॥ अन्यथा स्वर्गफलोपभोगाय याग्निहोत्रादिकर्मारब्धे जन्मनि नित
532 रकफलोपभोगानुपपत्तिर्न स्यात्तस्य दुरितदुःखविशेषफलत्वानुपपत्तेश्च ॥ अनेकेषु
हि दुरितेषु संभवत्सु भिन्नदुःखसाधनफलेषु नित्यकर्मानुष्ठानायासदुःखमात्रफले
षु कल्प्यमानेषु इह रोगादिबाधा निमित्तं स्यात् ॥ न हि प्राक्तनेकल्पयितुं नित्यकर्माया
सदुःखमेव पूर्वकृतदुरितफलं न शिरसा पाषाणवहनादिदुःखमिति ॥ अप्रकृतं चेद
नुच्यते नित्यकर्मानुष्ठानायासदुःखं पूर्वकृतदुरितफलमिति ॥ कथं ॥ अप्रस्तुतफलस्य
हि पूर्वकृतदुरितस्य तदुपपद्यत इति प्रकृतं ॥ तत्राप्रस्तुतफलस्य कर्मणः फलं नित्यक
र्मानुष्ठानायासदुःखमाह भवान् न प्रस्तुतफलस्येति ॥ अथ सर्वमेव पूर्वकृतदुरितं प्र
स्तुतफलमेवेति मन्यते भवान् ॥ ततो नित्यकर्मानुष्ठानायासदुःखमेव फलमिति विशे
षणमयुक्तं नित्यकर्मविधानर्थक्यप्रसंगश्च उपभोगेनैव प्रस्तुतफलस्य दुरितकर्म।
णः क्षयोपपत्तेः ॥ किंच स्तुतस्य नित्यस्य दुःखं चेत्फलं नित्यकर्मानुष्ठानायासादेव दृ
ष्टत्वे व्यायामादिवत्तदन्यस्येति कल्पनानुपपत्तिः ॥ जीवनादिनिमित्ते च विधानात् ॥

गी.भा. नित्यानां कर्मणां प्रायश्चित्तवत् पूर्वकृतदुरितफलत्वानुपपत्तिर्यस्मिन्पापकर्मनिमि
२९९ त्ते यद्विहितं प्रायश्चित्तं तेन तत्तस्य पापस्य तत्फलं ॥ अथ तस्यैव पापस्य निमित्तस्य प्राय
533 श्चित्त[illegible]दुःखफलं जीवनादिनिमित्तमपि नित्यकर्मानुष्ठाना
यासदुःखं जीवनादिनिमित्तस्यैव फलं प्रसज्यते ॥ नित्यप्रायश्चित्तयोर्नैमित्तिकत्वा
विशेषात् ॥ किं चान्यत् नित्यस्य काम्यस्य चाग्निहोत्रादेरनुष्ठानायासदुःखमेव पूर्व
कृतदुरितस्य फलं न तु काम्यानुष्ठानायासदुःखमिति विशेषो नास्तीति तदपि पूर्व
कृतदुरितफलं प्रसज्येत ॥ तथा च सति नित्यानां फलाश्रवणात् तद्विधानान्यथानुप
पत्तेः नित्यानुष्ठानायासदुःखं पूर्वकृतदुरितफलमित्यर्थापत्तिकल्पनाऽनुपप
न्ना ॥ एवं विधानान्यथानुपपत्तेरनुष्ठानायासदुःखव्यतिरिक्तफलत्वानुमाना
च्च नित्यानां विरोधाच्च ॥ विरुद्धं चेदमुच्यते नित्यकर्मणानुष्ठीयमानेनान्यस्य फल
मिति नित्यस्य कर्मणः फलाभाव इति विरुद्धमुच्यते ॥ किं च काम्याग्निहोत्रादाव
नुष्ठीयमाने नित्यमप्यग्निहोत्रादि तन्त्रेणैवानुष्ठितं भवतीति तदायासदुःखेनैव का २९९

मग्निहोत्रादिफलमन्यदेव स्वर्गादि नदर्षनायासदुःखमपि भिन्नं प्रसज्येत ॥ न च ता
534 दृक्विदृष्टविरोधात् ॥ नहि काम्यानुष्ठानायासदुःखात्केवलनित्यानुष्ठानायासदुःखं।
विभिन्नं दृश्यते ॥ किं चान्यत् ॥ अविहितमप्रतिषिद्धं चानन्तकालफलं भवेत् ॥ नद्दृष्टस्वा
भिक्षष्टदृष्टफलस्त्वासनेनोपमानस्यात् ॥ अग्निहोत्रादीनामेव कर्मणां स्वरूपाविशेषा
नुष्ठाना[illegible]यासदुःखमात्रेण पर्यवसायः काम्यानां च स्वर्गादि महाफलत्वमंगेतिक
र्तव्यतापापि केवलमतिफलकामित्वमात्रेण तिनग्राक्या कल्पयितुं ॥ तस्मान्नि।
त्यानां कर्मणामदृष्टफलाभावः ॥ कदाचिदप्युपपद्यते ॥ अतश्चाविद्यापूर्वकस्य क
र्मणो विद्यैव शुभस्याशुभस्य वा त्यकरणं ॥ अशेषतो न नित्यानुष्ठानं ॥ अविद्याका
मबीजो हि सर्वमेव कर्म ॥ तथा चोपपादितं अविद्वद्विषयं कर्म ॥ विद्वद्विषया सर्वक
र्मसंन्यासः पूर्वकालेन निष्ठा ॥ उभौ तौ न विजानीतो ॥ वेदाविनाशिनं नित्यं ॥ ज्ञानयो
गेन सांख्यानां कर्मयोगेन योगिनां ॥ अज्ञानां कर्मसंगिनां ॥ तत्त्ववित्तु महाबाहो गु
णा गुणेषु वर्तन्त इति मत्वा न सज्जते ॥ सर्वकर्माणि मनसा संन्यस्यास्ते ॥ नैव किंचि

त्करोमीतियुक्तोमन्येततत्वविन्॥ अर्थादज्ञः करोमीति॥ आरुरुक्षोः कर्मकारणमा
रूढस्ययोगस्यस्यशममप्यवकारणं॥ उदारास्वयोप्यज्ञाज्ञानीत्वात्मैवमेमतं॥ अज्ञाः
कर्मिणोगतागतंकामकामालभंते॥ अनन्याश्चिंतयंतोमांनित्ययुक्तायथोक्त
मात्मानमुपासकाशुकल्पसुपर्यासते॥ ददामिबुद्धियोगंतंयेनमामुपयांतिते॥ अ
र्थाच्चकर्मिणोज्ञात्वाउपयांतिभगवत्कर्मकारिणोयुक्ततमाअपिकर्मिणोज्ञात्वेउ
त्तरोत्तमहीनफलत्यागावसानसाधनाः॥ अनिर्देश्यपादरोपासकात्वद्वेष्टासर्व
भूतानामित्यध्यायपरिसमाप्त्युक्तसाधनाः॥ देवताध्यायाद्यध्यायत्रयोक्तज्ञानसा
धनाश्च॥ अधिष्ठानादियंचहेतुकसर्वकर्मसंन्यासिनामात्मैकत्वाकर्तृकत्वज्ञान
वतांपरमात्मानिष्ठावतांमानानांभगवत्तत्वविद्भूमनिष्ठाहिकर्मफलत्रयपरमहंस
परिव्राजकानामेवलभ्यभगवत्स्वरूपात्मैकत्वशरणेनामभवति॥ भवत्यत्येषां।
कर्मिणामसंन्यासिनामित्यस्यगीताशास्त्रस्योक्तस्यकर्तव्यार्थस्यविभागः॥ अविद्यावत्सर्व २६७
कर्तृत्वस्यकर्मणोऽसिद्धेरितिचेन्न ब्रह्महत्यादिवत्॥ यद्यपिशास्त्रावगतंनित्यं।

कर्मतत्साध्यविद्यावत्तएवभवति॥यथाप्रतिषेधशास्त्रावगतमपिब्रह्महत्यादिलक्षणं
536 कर्मानर्थकारणंस्वविद्याकामादिदोषवतोभवति॥अन्यथाप्रवृत्त्यनुपपत्तेः॥तथा
नित्यनैमित्तिककाम्यान्यपीतिदेहव्यतिरिक्तात्मन्यज्ञातेप्रवृत्तिर्नित्यादिकर्मस्व
नुपपन्नेतिचेन्नचलनात्मकस्यकर्मणः॥नात्मकर्तृकस्याहंकरोमीतिप्रवृत्तिदर्श
नात्॥देहादिसंघातेहंकारोगौणोनमिथ्येतिचेन्न॥तत्कार्यस्यापिगौणत्वोपपत्तेः॥
आत्मीयेदेहादिसंघातेऽहंकारोगौणः॥यथात्मीयेपुत्रे॥आत्मावैपुत्रनामासीति॥
लोकेप्राणएवममायंगौरितितद्वत्॥नैवंमिथ्याप्रत्ययःमिथ्याप्रत्ययस्तुस्थाणुपु
रुषयोरग्रह्यमाणविशेषयोर्नगौणप्रत्ययस्यनमुख्यकार्यार्थत्व॥अधिकरणं।
त्तस्यर्थत्वात्॥लब्धनामशब्देन॥यथासिंहोदेवदत्तोग्निर्माणवकइतिसिंहश्चाग्नि
श्चक्रौर्यपैंगल्यादिसामान्यवत्त्वाद्देवदत्तमाणवकाधिकरणात्तत्त्वार्थमेव॥नतु
सिंहकार्यमग्निकार्यंवागौणशब्दप्रत्ययनिमित्तंकिंचित्साध्यते॥मिथ्याप्रत्ययका
र्यंत्वनर्थमेवभवति॥गौणप्रत्ययविषयंचजानातिनैवंसिंहोदेवदत्तः॥नायमग्नि

माणवक इति॥ तथा गौणेन देहादिसंघातेनात्मना कृतं कर्म न मुख्येनाहंप्रत्ययविष
येनात्मना कृतं स्यात् न हि गौणाग्निसिंहाभ्यां कृतं कर्म मुख्याभ्यां कृतं स्यात्॥ न च क्रौर्येण
पैंगल्येन वा मुख्यसिंहाग्न्योः कार्यं किंचित् क्रियते स्तूयमानत्वेनोपक्षीणत्वात्॥ स्तूयमानौ च
जानीतो नाहं सिंहो नाहमग्निरिति न हि सिंहस्य कर्म ममाग्नेश्चेति॥ तथा च न संघातस्य
कर्म मुख्यस्यात्मन इति प्रत्ययो युक्ततरः स्यात्॥ न पुनरहं कर्ता मम कर्मेति यच्चाहु
रात्मीयैः स्मृतीच्छाप्रयत्नैः कर्महेतुभिरात्मा करोति॥ न तेषां मिथ्याप्रत्ययपूर्वकत्वा
त्॥ मिथ्याप्रत्ययनिमित्तेष्टानिष्टानुभूतक्रियाफलजनितसंस्कारपूर्वका हि स्मृती
च्छाप्रयत्नादयः यथास्मिन् जन्मनि देहादिसंघाताभिमानरागद्वेषादिकृतौ धर्मा
धर्मौ तत्फलानुभवश्च तथातीतेऽतीततरेपि जन्मनीति अनादिरविद्याकृतः संसा
रोतीतोनागतश्चानुमेयः॥ ततश्च सर्वकर्मसंन्यासज्ञाननिष्ठाया भवत्या
त्यन्तिकः संसारोपरम इति सिद्धं॥ अविद्यात्मकत्वाच्च देहाभिमानस्य तन्नि २९८
वृत्तौ देहानुपपत्तेः॥ संसारानुपपत्तिः॥ ॥॥ देहादिसंघाते आत्माभिमानो ऽ॥

विषात्मकः न हि लोके गवादिभ्योऽन्योऽहं मनुष्यान्येगवादय इतिर्जननन्ते छद्दमि
538 तिप्रत्ययमन्यते कश्चिद्ज्ञानं तस्यायोणापुरुषवित्तानवद् विवेकिनो देहादिसं
घातेऽयोद्दहमितिप्रत्ययनविवेकिनोज्ञानेन॥ यत्त्वात्मावैपुत्रनामासीतिपुत्रे
हंप्रत्ययः स तत्र जन्यजनकसंबंधनिमित्तो गौणः गौणेन चात्मना भोजनादिव।
न परमार्थकार्यं न शक्यते कर्तुं गौणसिंहाग्निभ्यां नाद्यसिंहाग्निकार्यवत्॥ अदृ
ष्टविषयचोदनाप्रामाण्यादात्मकर्तव्यं गौणैर्देहेन्द्रियात्मभिः क्रियत इति चेन्न
अविद्याकृतात्मत्वात्तेषां न गौणा आत्मानो देहेन्द्रियादयः॥ किन्तर्हि मिथ्याप्रत्यय
नैवासतस्यात्मनः॥ न गत्यात्मत्वमापद्यते॥ तद्भावभावात्तदभावे चाभावाद्वि
वेकिनो ह्यज्ञानकाले बालानां दृश्यते॥ देहोऽहं गौरोऽहमिति देहादिसंघातेऽहं।
प्रत्ययः॥ न तु विवेकिनोऽन्यापोहदेहादिसंघातादिविज्ञानवतोऽतत्काले देहादिसं
घातेऽहंप्रत्ययो भवति॥ तस्मान्मिथ्याप्रत्ययाभावेऽभावात्तत्कृत एव न गौणः॥ इष्य
गदहमाणसामान्यविशेषयोर्हि सिंहदेवदत्तयोरग्निमाणवकयोर्वा गौणः प्र

त्वार

त्वयः शास्त्रप्रयोगो वा स्यात् ॥ नागृह्यमाणसामान्यविशेषयोः यदुक्तं श्रुतिप्रमाणा
दिति ॥ न ॥ नेत्प्रामाण्यस्यादृष्टविषयत्वे ॥ प्रत्यक्षादिप्रमाणानुपलब्धे हि विषये अग्नि
होत्रादिसाध्यसाधनसंबंधश्रुतेः प्रमाण्यं न प्रत्यक्षादिविषये अदृष्टदर्शनार्थत्वात्
प्रामाण्यस्य ॥ तस्मान्न दृष्टमिथ्याज्ञाननिमित्तस्याहंप्रत्ययस्य देहादिसंघातेषु गौणत्वं क
ल्पयितुं शक्यं ॥ न हि श्रुतिशतमपि शीतोग्निरप्रकाशो वेति ब्रुवत्प्रामाण्यमुपैति ॥ य
दि ब्रूयाच्छीतोग्निरप्रकाशो वेति तथाप्यर्थांतरं श्रुतेर्विवक्षितं कल्प्यं प्रामाण्यान्यथा
नुपपत्तेः ॥ न तु प्रमाणांतरविरुद्धं स्ववचनविरुद्धं वा ॥ ॥ कर्मणो मिथ्या
प्रत्ययवत्कर्तृकत्वात्कर्तुरभावे श्रुतेरप्रामाण्यमिति चेन्न ॥ ब्रह्मविद्यायामर्थव
त्त्वोपपत्तेः ॥ कर्मविधिश्रुतिवद्ब्रह्मविद्याविधेरप्रामाण्यप्रसंगइति ॥ चेन्न ॥ बा
धकप्रत्ययानुपपत्तेः ॥ यथा च ब्रह्मविद्याविधिश्रुत्यात्मन्यवगते देहादिसंघाते हं
प्रत्ययो बाध्यते तथात्मन्येवात्मावगतिर्न कदाचित्केनचित्कथंचिदपि बाधितुं शक्या
फलाव्यतिरेकादवगतेर्यथाग्निरुष्णः प्रकाशश्चेति ॥ न च कर्मविधिश्रुतेरप्रामाण्य

पूर्वपूर्वप्रवृत्तिनिरोधेनउत्तरोत्तरापूर्वापूर्वप्रवृत्तिजननस्यप्रत्यगात्माभिमुख्यप्रवृ।
540 त्तत्वादनार्थत्वात्॥ मिथ्यात्वेप्युपायस्योपेयसत्यत्वतयासत्यत्वतयासत्यार्थत्वमेवसाध
यार्थवादानांविधिशेषाणां॥ लोकेपिबालोन्मत्तादीनांपथ्यस्यादिपाययितृत्वेच्छइव
ईनादिवचने॥ प्रकरणान्तरस्थानांचसतांदेवप्रामाण्यमितिहि:प्रमाणज्ञानादेर्हाभि
मानानिमित्तप्रवृत्तत्वादिप्रामाण्यवत्॥ यत्तुमन्यतेस्वयमव्याप्रियमाणोप्यात्मास।
न्निधिमात्रेणकरोतीतितदेवंत्वाख्यकर्तृत्वमात्मनः यथाराजायुध्यमानेष्वयोधेषुयु
ध्यतइतिप्रसिद्धंस्वयमयुध्यमानोपिसन्निधानादेवजितःपराजितश्चेति॥ तथासेना
पतिर्वाचैवकरोतिक्रियाफलसंबंधश्चराज्ञःसेनापतेश्चदृष्टः॥ यथाचर्त्विक्कर्म
यजमानस्य॥ तथादेहादीनांकृतकर्म॥ आत्मकृतस्यात्तत्फलस्यात्मगामित्वात्॥ य
थाचभ्रामकस्यलोहभ्रामयितृत्वादव्यापृतस्यैवमुख्यमेवकर्तृत्वंतथैवात्मनइ।
तितदसत्॥ अकुर्वतःकारकत्वप्रसंगात्॥ कारकमनेकप्रकारमितिचेन्न॥ राजप्रभृ।
तीनांमुख्यस्यापिकर्तृत्वस्यदर्शनात्॥ राज्ञांतावत्स्वव्यापारेणापियुध्यतेयोधानांच।

गी·भा· योधयितृत्वेन धनदानेन मुख्यमेव कर्तृत्वं ॥ तथा जयपराजयफलोपभोगे ॥ तथा यज
२८० मानस्यापि प्रधानत्यागेन दक्षिणादानेन च मुख्यमेव कर्तृत्वं ॥ तस्माद्योऽव्यापृतस्य कर्तृ
541 त्वोपचारः स गौण इत्यवगम्यते ॥ यदि मुख्यमन्यत्कर्तृत्वं स्वव्यापारलक्षणं नोपल
भ्यते राजयजमानप्रभृतीनां तदा स्वसन्निधिमात्रेणापि कर्तृत्वं मुख्यं परिकल्प्यते ॥ य
थात्मनः कस्य लोहभ्रमणेन न तथा राजयजमानादीनां स्वव्यापारेणोपलभ्यते ॥ त
स्मात्सन्निधिमात्रेण कर्तृत्वं गौणमेव ॥ तथा च सति तत्फलसंबन्धोऽपि गौण एव स्या
मो·५ द्गौणेन मुख्यं कार्यं निर्वर्त्यते ॥ तस्मादसदेवेतज्जल्प्यते देहादीनां व्यापारेणाव्यापृ
तस्यात्मा कर्ता भोक्ता च स्यादिति भ्रान्तिनिमित्तं सर्वं चोपपद्यते ॥ यथा स्वप्ने मा
यायां चैव ॥ न च देहाद्यात्मप्रत्ययभ्रान्तिसंतानविच्छेदेषु सुषुप्तसमाध्यादिषु कर्तृ
भोक्तृत्वाद्यनर्थ उपपद्यते ॥ तस्माद्भ्रान्तिप्रत्ययनिमित्त एवायं संसारभ्र
मः न तु परमार्थ इति सम्यग्दर्शनादत्यन्तमेवो
परम इति सिद्धं ॥ ६६ ॥ २८०

भक्तस्तपस्व्यपि सन् न शुश्रूषुर्यो भवति तस्मा अपि न वाच्यम् ३

सर्वगीताशास्त्रार्थमस्मिन्नध्याये विशेषतश्चोक्त्वेह शास्त्रार्थदार्ढ्याय संक्षेपतउप
संहृत्येदानीं शास्त्रसंप्रदायविधिमाह॥ इदं त इति॥ इदं शास्त्रं ते तव हिताय मयो
क्तं संसारविच्छित्तये अतपस्काय तपोरहिताय न वाच्यमिति व्यवहितेन संबंधः॥ तप
स्विनेपि अभक्ताय गुरौ देवे च भक्तिरहिताय कदाचन कस्यांचिदप्यवस्थायां न वाच्यं
न वक्तव्यं मावासुदेवं मानुषं प्राकृतं मत्वा अभ्यसूयति आत्मप्रसंसादिदोषाध्यारोप।

इदं ते नातपस्काय नाभक्ताय कदाचन॥ न चाशुश्रूषवे वाच्यं न च मां योऽभ्यसूयति॥६७॥

यो न ईश्वरत्वमजानन् न सहते असावप्ययोग्यः॥ तस्मा अपि न वाच्यं॥ भगवत्यन
सूयायुक्ताय तपस्विने भक्ताय च शुश्रूषवे अनसूयवे च वाच्यमित्यर्थाद्गम्यते॥ त
त्र मेधाविने तपस्विने वेत्यनयोर्विकल्पदर्शनात् शुश्रूषाभक्तियुक्ताय तप
स्विने न मेधाविने वाच्यं॥ भगवत्यसू + शुश्रूषवे भक्तियुक्ताय तपस्विने उयुक्ताय मेधा
विने वाच्यं + सूयकाय समस्तगुणवतेपि न वाच्यं॥ गुरुशुश्रूषाभक्तिमते च वाच्यमि।

गी॰भा॰
२७१
543

संप्रदायस्यचकर्त्तुःफलमिदानीमाह॥यइइति॥यइमंमयोक्तं॥परमंपरंनिःश्रेयसार्थंके
शवार्जुनयोःसंवादरूपंग्रंथं॥गुह्यंगोप्यं॥मद्भक्तेषुमयिभक्तिमत्सु॥अभिधास्यतिव
क्ष्यतिग्रंथतोर्थतश्चस्थापयिष्यतीत्यर्थःयथात्वयिमया॥भक्तेःपुनर्ग्रहणात्भक्ति
मात्रेणकेवलेनशास्त्रसंप्रदानपात्रंभवतीतिगम्यते॥कथंअभिधास्यतिउच्यतेभक्तिं
मयिपरांकृत्वाभगवतःपरमगुरोःशुश्रूषामयाक्रियतेइत्येवंकृत्वेत्यर्थः॥तस्येदं

यइमंपरमंगुह्यंमद्भक्तेष्वभिधास्यति॥भक्तिंमयिपरांकृत्वामामेवैष्यत्यसंशयः॥६८॥
नचतस्मान्मनुष्येषुकश्चिन्मेप्रियकृत्तमः॥भविताचमेतस्मादन्यःप्रियतरोभुवि॥६९॥

फलं मामेवैष्यतिमुच्यतएवात्रसंशयोनकर्त्तव्यः॥६८॥किंच॥नचइति॥नचतस्माच्छा
स्त्रसंप्रदायकृतः॥मनुष्येषुमनुष्याणांमध्ये॥कश्चिन्मेप्रियकृत्तमअतिशयेनप्रिय
कृत्तमोऽन्योनास्त्येवेत्यर्थः॥वर्त्तमानेषु॥भविताभविष्यत्यपिकाले॥तस्माद्द्विती
योन्यःप्रियतरोभुविलोकेस्मिन्नयोपि॥६९॥

अध्य इति॥ अध्येष्यते पठिष्यति च॥ य इमं धर्म्यं धर्मादनपेतं संवादरूपं ग्रंथं॥ आवयोस्तेन
देहिनस्तात॥ ज्ञानयज्ञेन विधियज्ञपापांशुमानसानां च यज्ञानां ज्ञानयज्ञो नाम विशि
544 ष्टतम इति स्मृतस्तेन यज्ञेन गीताशास्त्राध्ययनेन स्तूयते फलविधिरेववादेवतादिवि
षयज्ञानयज्ञफलतुल्यमस्य भवतीति॥ तेनाध्ययनेनाहमिष्टः पूजितः स्यामेवं

अध्येष्यते च य इमं धर्म्यं संवादमावयोः॥ ज्ञानयज्ञेन तेनाहमिष्टः स्यामिति मे मतिः॥७०॥
श्रद्धावाननसूयश्च शृणुयादपि यो नरः॥ सोपि मुक्तः शुभांल्लोकान्प्राप्नुयात्पुण्यक
र्मणां॥७१॥

इति मेमममतिर्निश्चयः॥७०॥ अथ श्रोतरि दं फलं॥ श्रद्धा इति॥ श्रद्धावानश्च
दृशानः॥ अनसूयश्च असूयावर्जितः सन्निमं ग्रंथं शृणुयादपि यो नरः अपिश
ब्दात्किमुतार्थज्ञानवान्॥ सोपि मुक्तः पापात् शुभान् प्रशस्तान् लोकान् प्राप्नुया
त्पुण्यकर्मणां अग्निहोत्रादिकर्मवतां॥७१॥

शिष्यस्यशास्त्रार्थग्रहणाग्रहणविवेकबुभुत्सयापृच्छतितदग्रहणेज्ञातेपुनर्ग्राह
यिष्यामिउपायांतरेणेतिप्रष्टुरभिप्रायः यत्नांतरंचास्याप्यशिष्यःकृतार्थःकर्तव्यइ
त्याचार्यधर्मःप्रदर्शितोभवति॥कच्चिदिति॥कच्चित्किमेतन्मयोक्तंश्रुतंश्रवणेनावधा
रितं॥पार्थत्वयाएकाग्रेणचेतसाचित्तेनकिंवाप्रमादितः॥कच्चिदज्ञानसंमोहःअ

कच्चिदेतच्छ्रुतंपार्थत्वयैकाग्रेणचेतसा॥कच्चिदज्ञानसंमोहःप्रणष्टस्तेधनंजय॥७२
अर्जुन उवाच॥नष्टोमोहःस्मृतिर्लब्धात्वत्प्रसादान्मयाच्युत॥स्थितोस्मिगतसंदेहः
करिष्येवचनंतव॥७३॥

ज्ञाननिमित्तःसंमोहःविचित्तभावःअविवेकनास्वाभा
विकःकिंनष्टःयदर्थोयंशास्त्रश्रवणायासस्तवममचोपदेशायासःप्रवृत्तःते
तवधनंजय॥७२॥नष्टइति॥नष्टोमोहःअज्ञानजःसमस्तसंसारानर्थहेतुःसागरइव
दुस्तरःस्मृतिश्चात्मतत्त्वविषयालब्धायस्यालाभात्सर्वग्रंथीनांविप्रमोक्षः॥त्वत्प्रसा

अनेनमोहनाशइतिवचनेनसर्वशास्त्रार्थज्ञानफलमेतावदेवेतिनिश्चितंदर्शितंभ
वति॥यावतात्मज्ञानेनमोहनाशश्चात्मस्मृतिप्रतिलंभश्चेति॥तथाचश्रुतिः॥अनात्मवि
छोवामीन्मुपन्नस्यात्मज्ञानेसर्वग्रंथिविमोक्षउक्तः भिद्यतेहृदयग्रंथिः तत्रकोमोहः
कःशोकःएकत्वमनुपश्यतइतिचमंत्र॥अथेदानींतच्छामनेस्थितोस्मिगतसंदेहो

इत्यहंवासुदेवस्यपार्थस्यचमहात्मनः॥ सं
वादमिममश्रौषमद्भुतंरोमहर्षणं ॥७४॥

मुक्तसंशयः॥करिष्येवचनंतववाहंत्वत्प्रसादात्कृतार्थोनममकर्तव्यमस्तीत्यभि।
प्रायःपरिसमाप्तःशास्त्रार्थः॥७३॥अथेदानींकथासंबंधप्रदर्शनार्थंसंजयउवाच
इत्यहमिति॥एवमहंवासुदेवस्यपार्थस्यचमहात्मनःसंवादमिमंयथोक्तं॥अश्रौष
मद्भुतवानस्मिअद्भुतमत्यंतविस्मयकरं॥रोमहर्षणंरोमांचनकरं तच्चमं ॥७४॥

व्यासइति॥ व्यासप्रसादात्तेनो दिव्यचक्षुर्लाभात् श्रुतवानिमं संवादं॥ गुह्यं गोप्यम्
हं परं योगं योगाधिपत्वात्॥ संवादमिमं योगमेव वा॥ योगेश्वरात् कृष्णात्साक्षात्कथयत
नः स्वयं न परंपरातः॥७५॥ राजन्निति॥ हे राजन् धृतराष्ट्र संस्मृत्य संस्मृत्य संवादमिम



व्यासप्रसादाच्छ्रुतवानिमंगुह्यमहंपरम्॥ योगंयोगेश्वरात्कृष्णात्साक्षात्कथयतः
स्वयं॥७५॥ राजन्संस्मृत्यसंस्मृत्यसंवादमिममद्भुतं॥ केशवार्जुनयोःपुण्यंहृष्यामिच
मुहुर्मुहुः॥७६॥ तच्चसंस्मृत्यसंस्मृत्यरूपमत्यद्भुतंहरेः॥ विस्मयोमेमहान्राजन्।
हृष्यामिचपुनःपुनः॥७७॥

मद्भुतंकेशवार्जुनयोःपुण्यंश्रवणेनापिपापह
रं॥ श्रुत्वाहृष्यामिच॥ मुहुर्मुहुःप्रतिक्षणं॥ किंबहुना ॥७६॥२७३॥